(४) नयाभासनिरूपणम्

१. नैगमाभासः २१६

२. सङ्ग्रहाभासः २१७

३. व्यवहाराभासः २१९

४. ऋजुसूत्राभासः २२२

५. शब्दाभाससमभिरूढाभासैवम्भूताभासाः २२४

६. अर्थाभासादयः २२५

**निक्षेपपरिच्छेदः**

(१) निक्षेपनिरूपणम् २२६

१. निक्षेपलक्षणम् २२७

२. निक्षेपाणां फलम् २२८

३. नामनिक्षेपः २२९

४. स्थापनानिक्षेपः २३२

५. द्रव्यनिक्षेपः २३३

६. अप्राधान्यानुपयोगयोरपि द्रव्यनिक्षेपः २३३

७. भावनिक्षेपः २३५

८. नामस्थापनाद्रव्याणां परस्परं भिन्नत्वस्योपपादनम् २३५

९. नामस्थापनाद्रव्यनिक्षेपाणामावश्यकत्वप्रदर्शनम् २३८

(२) निक्षेपाणां नयैः सह संयोजना २४२

१. ऋजुसूत्रः स्थापनाद्रव्यनिक्षेपौ नेच्छतीति मतस्य खण्डनम् २४५

२. स्थापनानिक्षेपः सङ्ग्रहव्यवहारयोर्न सम्मत इति मतस्य निरसनम् २४७

(३) जीवविषयकद्रव्यनिक्षेपस्य चर्चा २५०

१. जीवपदार्थे द्रव्यनिक्षेपस्याऽघटना २५१

२. जीवे द्रव्यनिक्षेपमुपपादयतां विविधानां मतानां विचारः २५२

(अ) टीकाकर्तुः प्रशस्तिः २५७


• • •

# जैनतर्कभाषा

( यशोवचनामृतम् )

विषयानुबन्धबन्धुरमन्यन्न किमप्यतः फलं याचे ।
इच्छाम्येकं जन्मनि, जिनमतरागं परत्राऽपि ॥

तेभ्यः कृताञ्जलिरयं, तेषामेषा च मम विशेषाशीः ।
ये जिनवचोऽनुरक्ता, ग्रथ्नन्ति पठन्ति शास्त्राणि ॥

( न्यायालोक-प्रशस्तिः )

ॐ अर्हँ नमः ॥ ऐँ नमः ॥

॥ नमो नमः श्रीगुरुनेमिसूरये ॥

रत्नप्रभालङ्कृता

# जैनतर्कभाषा

## प्रमाणपरिच्छेदः

यज्ज्ञाने भाति विश्वं करबदरमिवाऽतीतदोषस्य यस्य,
वाणी सत्याऽनवद्या मितिनयभजनोद्गारकान्ताऽमितार्था ।
देवेन्द्राद्यैः सुपूज्यं जिनवरमखिलं मङ्गलं मङ्गलानां,
विघ्नव्रातापनुत्यै तमतनुविभवं नौमि योगीशगम्यम् ॥१॥

येषां तत्त्वार्थचर्चा स्वपरमतगता नाऽपसिद्धान्तमुख्यै-
र्दोषैः स्पृष्टा गुणौघैरथ परिकलिता बोधसम्पादयित्री ।
तान् श्रीमद्धेमचन्द्रप्रभृतिबुधवरान् सर्वतन्त्रस्वतन्त्रा-
नाचार्यान्नौमि भक्त्या जिनमतविततोल्लासदत्तावधानान् ॥२॥

ऊहापोहानुषक्तामितप्रमितिलसन्नव्यमार्गप्रचारा-
ऽऽचान्तस्वान्तावभातातिगहनमननालीढप्राचीनपक्षाः ।
न्यायाचार्याः परार्थातनुतनुरचनासूत्रधारा नमस्याः,
सन्तूपाध्यायवर्या मम मननविधौ साक्षिणो मानसस्थाः ॥३॥

श्रीमन्तो नेमिसूरीश्वरगुरुप्रवराः सर्वविद्याविदग्धा,
न्यायालोकादिजैनाभ्युपगतविषयग्रन्थटीकापटिष्ठाः ।
श्रीहैमव्याकृतेरप्यनुगतिरचनालम्पटा धर्मशास्त्र-
व्याख्यानैकान्तदक्षा नुतचरणकजाः सन्तु विघ्नौघशान्त्यै ॥४॥

श्रीनेमिसूरीश्वरशिष्यरत्न-रत्नप्रभादिप्रतिबोधनाय ।
रत्नप्रभाख्यां मिततर्कभाषा-व्याख्यां करोमि प्रकटार्थभावाम् ॥५॥

चिकीर्षितग्रन्थनिर्विघ्नसमाप्तये, शिष्टाः क्वचिदप्यभीष्टे प्रवर्तमाना मङ्गलपुरस्सरमेव प्रवर्तन्त इति शिष्टाचारपरिपालनाय च कृतं मङ्गलम्, शिष्या अप्येवं कुर्युरिति शिष्यशिक्षायै ग्रन्थादौ निबध्नन् ग्रन्थाध्ययनप्रवृत्त्यनुकूलानुबन्धचतुष्टयमुपदर्शयन् प्रतिजानीते—

---

१. मितिः प्रमाणम् ।

## मङ्गलम्

**ऐन्द्र[1]वृन्दनतं नत्वा, जिनं तत्त्वार्थदेशिनम् ।**
**प्रमाणनयनिक्षेपैस्तर्कभाषां तनोम्यहम् ॥**

**ऐन्द्रवृन्दनत**मिति । अहं तत्त्वार्थदेशिनमैन्द्रवृन्दनतं जिनं नत्वा तर्कभाषां प्रमाणनयनिक्षेपैस्तनोमीति सम्बन्धः ।

**तत्त्वार्थदेशिने[2]**मिति च विशेषणं जिनस्य साक्षाद् वचनातिशय[3]स्य तद्द्वारा ज्ञानातिशयस्य च ज्ञापनार्थम् । वाक्यरचनां प्रति वाक्यार्थज्ञानस्य कारणत्वेन, तत्त्वार्थलक्षणवाक्यार्थज्ञानमन्तरेण तत्त्वार्थोपदेशलक्षणवाक्यस्याऽसम्भवेन, तत्त्वार्थोपदेष्टरि जिने तत्त्वार्थज्ञानस्याऽवश्यम्भावात् ।

अर्थे **तत्त्वे**ति विशेषणोपादानेनाऽतत्त्वात्मकस्यैकान्तवाद्यभिमतार्थस्य प्रतिपादकं यद् वचनं तन्नाऽतिशय इति तदुपदेष्टॄणामेकान्तवादसूत्रणकुशलानां सूक्ष्ममतीनामपि न वचनातिशयः-तद्वचनस्याऽर्थशुद्ध्यभावात् । वचनस्य देशनास्वरूपतयाऽभिधानेन [4]समवसरणमभिव्याप्याऽवस्थितानशेषानपि नरामरतिर्यगादीन् प्राणिनः श्रोतॄन् प्रति प्रतिनियत-तत्तद्भाषा-परिणति[5]स्वरूपतयैवाऽविशेषेणाऽर्थावबोधनिबन्धनत्वमिति शब्दस्य स्वरूपतोऽप्यतिशयावेदिका शुद्धिरावेदिता भवति । न च तीर्थान्तरीयाणां वचनमीदृशमिति न तस्य स्वरूपतोऽपि वैशिष्ट्यम् ।

**ऐन्द्रवृन्दनत**मिति विशेषणेन पूजातिशयो दर्शितः । यस्य पुरुषधौरेयस्याऽमराधीश्वरसमूहप्रणतिकर्मत्वम्, तस्याऽन्यनरनाथादिपूजनीयत्वं [6]कैमुतिकन्यायागतमेवेत्यतः सर्वेभ्यो

---

१. इन्द्राणामिदमिति ऐन्द्रम्, ऐन्द्रं च तद् वृन्दं चेति ऐन्द्रवृन्दम् ।

२. इन् प्रत्ययोऽत्र शीलार्थे ।

३. अतिशयः = ऐश्वर्यविशेषः । शास्त्रेष्वर्हतश्चत्वारो मूलातिशयाः चतुस्त्रिंशदुत्तरातिशयाश्च प्रतिपादिताः । तत्र मूलाश्चत्वार इमे—१. ज्ञानातिशयः- भगवतः सर्वकालदेशस्थनिखिलपदार्थसार्थव्यापि ज्ञानं भवति । २. वचनातिशयः-भगवतो वाणी सर्वसंशयोच्छेदिनी पीयूषनिर्झरिणी पञ्चत्रिंशद्गुणगणालङ्कृता च भवति । ३. पूजातिशयः- प्रभुर्देवेन्द्रनरेन्द्रादित्रिभुवनवर्त्तिनिखिलसत्त्वैः पूजनीयो भवति । ४. अपायापगमातिशयः- प्रभुः स्वयं क्रोधादिभावरोगैर्द्रव्यरोगैश्च वियुक्तो भवति, यत्र च प्रभोरुपस्थितिः, तत्परितः सपादशतयोजनभूमौ स्थितानां सर्वाणि कष्टानि स्वयं नश्यन्ति ।

४. देवैर्विरचितमर्हद्देशनास्थानं समवसरणमित्युच्यते ।

५. अर्हद्देशनाया नियतभाषामयत्वेऽप्यतिशयवशाद् यथाश्रोतृ तस्या भाषान्तरपरिणतिर्भवति । ततः सर्वेऽपि सर्वमधिगन्तुं शक्नुवन्ति ।

६. अल्पस्य सामर्थ्यादौ ज्ञाते महतः तत् परिगणनीयमेवेति, महतोऽसामर्थ्यादौ ज्ञातेऽल्पस्य तत् परिगणनीयमेवेति वा द्योतयितुं 'किमुत'पदं प्रयुज्यते । यथा—हनुमानपि कुम्भकर्णायाऽलम्, किमुत रामः ?, मम प्राणा अपि त्वदीयाः, किमुत धनम् ?-एवं 'किमुत'अव्ययेन सङ्गृह्यमाणं कैमुतिकन्यायेनाऽऽगतमुच्यते ।

नरामराधीश्वरादिपूजार्हस्य पूजातिशयो व्यक्तीभवति ।

यद्यपि **इन्द्रवृन्दनत**मित्युक्त्याऽपि निरुक्तार्थलाभः, तथापि 'यस्य सारस्वतमन्त्रस्य प्रसादात् कवित्ववित्त्वादिप्राप्तिः[१], तस्य मन्त्रस्य सङ्ग्रथनमप्यादौ परमं मङ्गलम्, यतः सरस्वत्याः स्मरणमपि हितमाह्वयती'ति मन्यमानः श्रीमान् **यशोविजयो**पाध्यायः स्वोपज्ञेषु सर्वेष्वपि ग्रन्थरत्नेषु ऐङ्कारमादावुपनिबध्नात्येवेत्येतदनुरोधेनाऽत्राऽपि **ऐन्द्रवृन्दनत**मित्युक्तिः ।

**जिन**मिति विशेष्यवचनेन च 'रागद्वेषादीन् शत्रून् जितवानिति जिन' इति व्युत्पत्तिमहिम्नाऽवयवशक्तिलक्षणयाऽऽगतातोऽवयवार्थप्रतिपत्तितोऽपायापगमातिशय आवेदितो भवति । जिनशब्दस्तु **ऋषभादिचतुर्विंशतिजिनेषु** रूढ्यैव[२] जिनत्वलक्षणमेकमनुगतप्रवृत्तिनिमित्तमुपादाय प्रवर्त्तत इति समुदायशक्तिलक्षणरूढिविषये जिनत्वलक्षणानुगतधर्मविशिष्टे नतिक्रियाकर्मणि योगार्थस्य[३] रागद्वेषादिशत्रुजेतृत्वस्याऽपायापगमातिशयपर्यवसन्नस्य विशेषणत्वमुपपन्नमेव[४] ।

**नत्वा** = नमस्कृत्य । नमस्कारश्च स्वावधिकोत्कृष्टत्वप्रकारकज्ञानानुकूलव्यापारः[५]; **जिन**मिति द्वितीयार्थश्च कर्मत्वम्, तच्च प्रकृते विशेष्यत्वम्, तस्य नमस्कारघटकज्ञाने निरूपकत्वसम्बन्धेनाऽन्वयः, नमस्कारघटकस्वपदेन च नमस्कर्तुर्ग्रहणम् । तथा च ज्ञानातिशयवचनातिशयपूजातिशयाऽपायापगमातिशयचतुष्टयोपपन्नं जिनं प्रणम्य=जिनवृत्तिविशेष्यताकं यद् ग्रन्थकर्त्रवधिकोत्कृष्टत्वप्रकारकं ज्ञानं 'मत्त उत्कृष्टो जिन' इत्याकारकम्, तदनुकूलव्यापारानन्तरमित्यर्थः ।

**अहं** = प्राप्त-न्यायविशारद-न्यायाचार्यादिबिरुदः श्रीमान् **यशोविजयः** । 'अस्मद्'-शब्दस्य अन्यदीयस्वार्थतात्पर्यकोच्चारणानधीनोच्चारणरूपस्वतन्त्रोच्चारणकर्त्तरि[६] शक्तिरिति

---

१. एतद्ग्रन्थकर्त्ता श्रीमान् यशोविजयोपाध्यायः 'ऐँ'कारलक्षणसारस्वतबीजमन्त्रजापेन सरस्वतीं प्रत्यक्षीकृत्य वरं लब्धवान् ।

२. शास्त्रकल्पितावयवार्थभानाभावे समुदायार्थनिरूपिता शक्ती रूढिः ।

३. शास्त्रकल्पितावयवार्थनिरूपिता शक्तिर्योगः । (न्यायसिद्धान्तमुक्तावली का०—७१)

४. अस्मिन् पद्ये 'जिन'शब्दो द्विर्व्याख्येयः । तत्र रूढ्यर्थो विशेष्यः, योगार्थस्तु विशेषणम् ।

५. अनुकूलत्वं चाऽत्र प्रयोज्यत्वम्, न तु प्रयोजकत्वम्—अन्यथा स्वकृतनमस्कारं प्रति स्वस्थित—किञ्चिद्विशेष्यकस्वावधिकोत्कृष्टत्वप्रकारकज्ञानस्य कारणत्वानुपपत्तेः ।

६. अयमत्राऽभिसन्धिः- 'अहं वच्मी'त्यादौ अस्मच्छब्दस्योच्चारणकर्त्तरि शक्तिर्भवति । ''चैत्रेण कथितम्—अहं चतुरोऽस्मी''त्यादौ अस्मच्छब्दस्य नैतद्वाक्यवक्तरि देवदत्तादौ शक्तिः-देवदत्तादि-कर्तृकोच्चारणेऽन्यदीयस्वार्थतात्पर्यकोच्चारणानधीनत्वरूपस्वातन्त्र्याभावादिति स्वतन्त्रोच्चारणकर्त्तरि चैत्रे एवाऽस्मच्छब्दस्य शक्तिः ।

प्रकृतास्मच्छब्दोच्चारयितुः **श्रीयशोविजयोपाध्याय**स्याऽस्मच्छब्देनाऽवगतिः । **अहं**-पदानुपादानेऽपि **तनोमी**त्युत्तमपुरुषेण तदर्थावगतिः स्यादेव, तथापि स्वगत-विदित-चारु-**चिन्तामणि**त्वादिधर्मलक्षणासाधारणपाण्डित्याभिव्यञ्जनद्वारा स्वकर्तृकोक्तग्रन्थस्योपादेयत्वाभिवक्तये तदुक्तिः ।

**प्रमाणनयनिक्षेपै**रिति । समासेऽल्पस्वरस्य पूर्वमुपादानमिति[१] नियमेऽपि बहुस्वरस्य प्रमाणपदस्य यत् पूर्वमुपादानं तद् नयापेक्षया प्रमाणस्याऽभ्यर्हितत्वादिति बोध्यम् । प्रमाणादीनां स्वरूपं ग्रन्थे एव व्यक्तम् ।

**तर्कभाषा**मिति । तर्क्यन्ते = प्रमितिविषयीक्रियन्ते इति तर्काः प्रमाणादयः, तेषां भाषा = प्रतिपादकवचनसमष्टिः = पूर्वापरसङ्गतिविशेषभावापन्न-वाक्यकदम्बकसन्निवेशलक्षण-सन्दर्भात्मा ग्रन्थ इति यावत्; तां **तनोमि** = विस्तारयामि ।

तावन्मात्राभिधाने च तर्कपदव्युत्पत्तिनिमित्तस्य प्रमितिविषयत्वस्य जीवाजीवपुण्यपाप-बन्धास्रवसंवरनिर्जरामोक्षाख्यनवतत्त्वेषु, पुण्यपापयोर्जीवाजीवयोरन्तर्भावमाश्रित्य सप्ततत्त्वेषु, जीवपुद्गलधर्माधर्माकाशकालात्मकषड्द्रव्येषु तथा क्रमाक्रमभाविपर्यायेषु च सत्त्वेन; तत्प्रतिपादकसन्दर्भविशेषस्याऽपि तर्कभाषात्वेनोत्तरकालीनकर्त्तव्यत्वप्रकारक-ज्ञानानुकूल-व्यापारलक्षणप्रतिज्ञाविषयतया[२], ग्रन्थे चाऽस्मिन् जीवादिपदार्थानामनिरूपणेन सम्पूर्णतया प्रतिज्ञातार्थानिर्वाहाद् न्यूनत्वं स्यात्[३] । व्युत्पत्त्यर्थमनाश्रित्य चिकीर्षितग्रन्थविशेषे रूढ एवाऽयं तर्कभाषाशब्द इति यावान् विषयोऽत्र प्रतिपादितोऽस्ति तावदभिधेयकग्रन्थ एव प्रतिज्ञाविषय इति न प्रतिज्ञातार्थानिर्वाह[४] इति विभाव्यते, तदाऽपि चिकीर्षितग्रन्थादौ तदध्ययनादि-प्रवृत्त्यर्थमनुबन्धचतुष्टयमवश्यमेव वक्तव्यम् । अन्यथाऽनुबन्धचतुष्टयाज्ञाने प्रवृत्तिकारणयोरिदं[५] मदिष्टसाधनमिति, इदं च मत्कृतिसाध्यमिति ज्ञानयोरभावात् तदध्ययनार्थं प्रेक्षावतां प्रवृत्तिरेव न स्यात् ।

---

१. लघ्वक्षरासखीदुत्स्वराद्यदल्पस्वरार्च्यमेकम् ॥ (सिद्ध० ३-१-१६०)

२. अहमेतत् कार्यं करिष्यामीति मनसिकृत्य प्रतिज्ञा गृह्यते । अतः सा उत्तरकालीन(= भविष्यत्कालीन)-कर्त्तव्यत्वप्रकारक(किञ्चित्कार्यविशेष्यक)ज्ञानानुकूल(= ज्ञानप्रयोज्य)व्यापारात्मिका ।

३. जैनदर्शने लोकोऽयं नवतत्त्वात्मकः षड्द्रव्यात्मको वा मतः । अतो नवतत्त्वानि षड्द्रव्याणि गुणाः पर्यायाश्च— इदं सर्वं प्रमितिविषयीभूतमिति तत् सर्वं तर्कपदवाच्यम् । न चाऽत्र तत्सर्वस्य निरूपणमिति तर्कनिरूपण-प्रतिज्ञाभङ्गः स्यादिति भावः ।

४. अथवाऽत्र तर्कशब्दो यथार्थज्ञानसाधनार्थे ज्ञेयः । प्रमाणनयनिक्षेपा यथार्थज्ञानसाधनानीति तेषामेव निरूपणे न प्रतिज्ञाभङ्गः ।

५. चिकीर्षां प्रतीष्टसाधनत्वकृतिसाध्यत्वयोर्ज्ञानस्य हेतुत्वम् । (कारिकावली १५०)

अभिधेयः प्रयोजनमधिकारी सम्बन्धश्चेत्येतदनुबन्धचतुष्टयम् । तल्लक्षणं तु प्रवृत्तिप्रयोजकज्ञानविषयत्वं प्रवृत्तिजनकज्ञानजनकज्ञानविषयत्वं वा । प्रथमे जनकजनकं प्रयोजकं भवतीतिकृत्वा प्रवृत्तिप्रयोजकमभिधेयादिचतुष्टयज्ञानम्, तद्विषयत्वमभिधेयादिचतुष्टये । द्वितीये प्रवृत्तिजनकं मदिष्टसाधनताज्ञानं मत्कृतिसाध्यताज्ञानं च, तज्जनकमनुबन्धचतुष्टयज्ञानम्, तद्विषयत्वमनुबन्धचतुष्टये समस्तीति लक्षणसमन्वयः ।

तथा चैतद्ग्रन्थाध्ययनप्रवृत्त्यर्थमभिधेयादिस्वरूपानुबन्धचतुष्टयप्रतिपादनायोक्तं-**प्रमाणनयनिक्षेपै**रिति । उपलक्षणे[१] चेयं तृतीया, प्रमाणनयनिक्षेपोलक्षितत्वं च प्रकृततर्कभाषाभिधग्रन्थस्य प्रतिपादकतयेति । न तु करणाभिधायिनीयं तृतीया, तथा सति तस्याः **तनोमी**त्यनेनैवाऽन्वयस्य वक्तव्यत्वेन तर्कभाषाभिधेयस्याऽन्यस्यैव कस्यचिद् विशदीकरणमेभिरिति स्यात्, न च तथाऽत्र समस्तीति । एवं च प्रमाणनयनिक्षेपा अभिधेयाः, तैः सह ग्रन्थस्य प्रतिपाद्यप्रतिपादकभावः सम्बन्ध इति साक्षात् प्रतीयते । प्रमाणनयनिक्षेपज्ञानं प्रयोजनम्, तत्कामोऽधिकारीति प्रयोजनाधिकारिणावर्थात् प्रतीयेते ।

प्रमाणनयनिक्षेपाणां च ज्ञानरूपमेवाऽनुष्ठानम्, तच्च शक्यमेवेति नाऽशक्यानुष्ठेयत्वमभिधेयस्य; तत्प्रतिपादकत्वमप्युक्तशास्त्रस्य सम्भवत्येवेति नाऽसम्बद्धत्वम्; निरुक्ताभिधेयपरिज्ञानं चोपादेयार्थविषयकत्वेन काम्यत्वाद् भवत्येव प्रयोजनम्; तत्कामनाऽपि प्रेक्षावतां सम्भवत्येवेति नाऽधिकारिणामप्यसम्भव इति—न चन्द्रानयनोपदेशवद् नागशिरोमण्याहरणोपदेशवच्चाऽशक्यानुष्ठेयार्थत्वम्, न वोन्मत्तवाक्यसन्दर्भवत् पूर्वपरासङ्गतार्थत्वम्, न रसाभासादिवर्णनवदुत्तमपुरुषानभिमतार्थज्ञानजनकत्वम्, नाऽत एव चाऽसम्भवद्विशिष्टपुरुषाधिकारत्वमिति निष्कम्पप्रवृत्तिविषयाध्ययनकोऽयं ग्रन्थ इति ।

## प्रमाणसामान्यनिरूपणम्

अथ प्रथमोद्दिष्टं[२] प्रमाणं निरूपयति । श्रीदेवसूर्युपदिष्टं प्रमाणलक्षणमाह-

**तत्र—स्वपरव्यवसायिज्ञानं प्रमाणम् ॥**

**तत्र** = प्रमाणादीनां मध्ये ।

**स्वपरे**ति । अत्र **प्रमाण**मिति लक्ष्यनिर्देशः, **स्वपरव्यवसायिज्ञान**मिति लक्षणनिर्देशः । यद्यपि स्वपरव्यवसायित्वस्वरूपप्रकर्षविशिष्टं ज्ञानं-प्रशब्दाव्यवहितोत्तरेण भावानडन्तेन[३]

१. हेतुकर्तृकरणेत्थम्भूतलक्षणे ॥ (सिद्ध० २-२-४४)

२. यथोद्देशं निर्देश इति न्यायाद् ।

३. अनट् ॥ (सिद्ध० ५-३-१२४)

करणानडन्तेन[१] वा 'मा'धातुना प्रत्याय्यते इति, प्रमाणमिति लक्ष्यवचनं स्वपरव्यवसायिज्ञानमिति लक्षणवचनं च समानार्थमिति उद्देश्यतावच्छेदक-विधेयतावच्छेदकयोरैक्ये 'घटो घट' इत्यस्मादिव प्रकृतलक्षणवाक्यादपि शाब्दबोधानुपपत्तिः[२]; तथापि प्रत्यक्षं प्रमाणमनुमानं प्रमाणं प्रत्यभिज्ञानं प्रमाणं स्मृतिः प्रमाणमित्याद्यनुगतप्रतीतिसिद्धमनुगतमस्त्येव किञ्चित् प्रमाणत्वं स्वपरव्यवसायिज्ञानत्वसमनियतं तदन्यत्[३], तदेव च लक्ष्यतावच्छेदकम्, तद्विशिष्टमेव च प्रमाणमिह प्रमाणपदेन विवक्षितम् ।

स्वपरव्यवसायिज्ञानत्वाभिन्नत्वेऽपि वा प्रमाणत्वस्य प्रमाणत्वत्वेन लक्ष्यतावच्छेदकत्वं स्वपरव्यवसायिज्ञानत्वत्वेन च लक्षणतावच्छेदकत्वमित्यपि **स्याद्वादिना** वक्तुं शक्यत एव-तन्मते एकस्याऽपि निरुक्तज्ञानत्वस्योक्तरूपाभ्यां भेदसम्भवात् । तथा स्वपरव्यवसायिज्ञानत्वमपि स्वव्यवसायिज्ञानत्व-परव्यवसायिज्ञानत्वाभ्यामभेदेनाऽऽकलितं द्विस्वभावमिति, तत्र स्वव्यवसायिज्ञानत्वस्वभावात्मना प्रमात्मकफलतावच्छेदकम्, परव्यवसायिज्ञानत्वस्वभावात्मना च प्रमाणात्मककरणशक्त्यवच्छेदकमित्यपि बोध्यम् ।

लक्षणांशं विवृणोति-

**स्वम् आत्मा, ज्ञानस्यैव स्वरूपमित्यर्थः ।**

कस्याऽऽत्मेत्यनुक्तौ 'घटात्मा-पटात्मे'त्येवं घटादिस्वरूपे सर्वत्र 'आत्म'शब्दप्रयोगाद् घटाद्यात्मनोऽपि स्वशब्देन ग्रहणं प्रसज्येत । किञ्च **जैनमते** घटादिव्यवसायो 'घटमहं जानामी'-त्यादिस्वरूप एव, तत्र च 'अहं'पदवाच्यस्य प्रमातुरात्मनोऽपि भानं भवतीति प्रमाता स्वशब्दग्राह्य इति भ्रान्तिरपि प्रसज्येतेत्यतः तत्पर्यवसितार्थमाह-**ज्ञानस्ये**ति । साक्षात् परम्परया वा यः स्वार्थस्य विशेष्यः, यश्च समभिव्याहृतक्रियाकारकपदार्थः तदुभयत्र 'स्व'पदस्य शक्तिरिति[४] **स्वपरव्यवसायिज्ञान**मित्यत्र 'स्व'शब्दार्थस्य परम्परया विशेष्यं ज्ञानमेवेति ज्ञानस्यैव

---

१. करणाऽऽधारे ॥ (सिद्ध० ५-३-१२९)

२. लक्षणवाक्ये लक्ष्यमुद्दिश्य लक्षणं विधीयते इति लक्ष्यमुद्देश्यम्, लक्षणं विधेयम् । टीकायां दर्शितं च- प्रमाणत्वम् = उद्देश्यतावच्छेदकम् = स्वपरव्यवसायिज्ञानत्वमिति । तदेव विधेयतावच्छेदकमपीति उभयोरैक्यात् शाब्दबोधानुपपत्तिरित्याशङ्का । न चेयं युक्ता-'इदं प्रमाणम्', 'इदं प्रमाण'मित्यनुगतप्रतीतिसिद्ध-'प्रमाणत्व'धर्मस्यैवाऽत्रोद्देश्यतावच्छेदकत्वेनाऽभिमतत्वात्, तस्य च स्वपरव्यवसायिज्ञानत्वरूपविधेयतावच्छेदकभिन्नत्वात् ।

३. स्वपरव्यवसायिज्ञानत्वान्यत् ।

४. अत्र स्वपदार्थविशिष्टो व्यवसायः, तद्विशिष्टं च ज्ञानमिति स्वार्थस्य परम्परया विशेष्ये ज्ञाने स्वपदस्य शक्तिः । 'चैत्रः स्वं पश्यती'त्यादौ यः समभिव्याहृतायाः क्रियायाः कारकः चैत्रादिः, तत्र स्वपदस्य शक्तिः ।

स्वरूपं 'स्व'शब्देन ग्रहीतव्यमित्यर्थः ।

'पर'पदेन भिन्नस्वरूपबोधकेनाऽशेषस्याऽपि जगतो ग्रहणं प्रसज्येतेत्यत आह—

**परः तस्मादन्योऽर्थ इति यावत् ।**

ज्ञानस्वरूपाद् भिन्नः परपदेन ग्राह्य इत्यर्थः । ज्ञानस्वरूपादन्य आत्माऽपि, तद्व्यवसायि भ्रमज्ञानमपीत्यत[1] आह—**अर्थ** इति । यज्ज्ञानस्य यो ज्ञेयो बाह्योऽर्थः, स एव परपदेनाऽत्राऽभिप्रेत इत्यर्थः ।

**तौ व्यवस्यति = यथास्थिततत्वेन निश्चिनोतीत्येवंशीलं स्वपरव्यवसायि ।**

**तौ**=ज्ञानस्वरूप-बाह्यार्थौ । **यथास्थिततत्वेन**=यस्य ज्ञानस्य यद् रूपं प्रत्यक्षत्वानुमितित्वादिकम्, बाह्यार्थस्य च स्वस्मिन् वर्त्तमानं यद् रूपम्, तद्रूपेण ।

यद्यपि लक्षणवाक्ये लक्ष्यमुद्दिश्य लक्षणं विधीयत इति उद्देश्यविधेयवचनयोरावश्यकत्वमेवेति केवलं 'प्रमाण'मिति पदं विभक्तिलक्षणपदसमभिव्याहारमाश्रित्य[2] वाक्यं भवदपि लक्ष्यमात्रप्रतिपादकत्वाद् न लक्षणवाक्यमतो ज्ञानपदाऽनुपादानेऽन्यदेव किञ्चिद् 'उपयोगा'दिपदमुपात्तं स्याद्, न च तद् उपात्तमिति लक्षणवाक्यत्वोपपत्त्यर्थमेव 'ज्ञान'पदम्, तथापि प्रमाणमित्यस्यैव रूढ्यर्थः किञ्चिल्लक्ष्यम्, प्रमाणत्वादिना परिकल्पितादिरूपं च किञ्चिल्लक्षणम्—इत्यभ्युपेत्य 'प्रमाण'मिति लक्षणवाक्यं काममस्तु, किं ज्ञानपदोपादानेनेत्यत आह—

**अत्र दर्शनेऽतिव्याप्तिवारणाय ज्ञानपदम् ।**

---

## तात्पर्यसङ्ग्रहा

न्यायविशारदं नत्वा **यशोविजय**वाग्मिनम् ।
तन्यते तर्कभाषाया वृत्तिस्तात्पर्यसङ्ग्रहा ॥

---

१. रज्जौ 'अहं सर्पं जानामी'ति भ्रमेऽपि स्वस्य = ज्ञानस्वरूपस्य, तद्भिन्नस्याऽऽत्मनश्च व्यवसायो यथार्थ एवेति भ्रमेऽपि स्वपरव्यवसायित्वात् प्रमाणत्वापत्तिरिति 'पर'पदार्थं विवृणोति-तस्मादिति ।

२. स्वपरेति, व्यवसायीति, ज्ञानमिति च पदानामावश्यकताया दर्शनीयत्वेन प्रथमं केवलं 'प्रमाण'मिति ग्रहीतव्यम्। तस्य च 'प्रमाण' 'अम्' इति पदद्वयसमूहत्वेन वाक्यत्वमपि । परं तस्य न लक्षणवाक्यत्वं-लक्ष्यमात्रप्रतिपादकत्वात् । अतस्तत्र लक्षणवाक्यत्वोपपत्त्यर्थमेव 'ज्ञान'पदं स्यादिति न तत्पदकृत्यस्याऽऽवश्यकता । तथापि 'प्रमाण'मित्येतावन्मात्रेऽपि, रूढ्यर्थो लक्ष्यम्, स्वपरव्यवसायित्वरूपप्रमाणत्वस्य लक्षणत्वमिति लक्षणवाक्यत्वोपपत्तेर्न तदर्थं ज्ञानपदस्याऽऽवश्यकतेति ज्ञानपदप्रयोजनं दर्शयति-अत्रेति ।

**अत्र** = उक्तलक्षणवाक्ये । स्वमते सामान्यमात्रविषयकग्रहणमनाकारोपयोगस्वरूपं दर्शनमित्युच्यते । तत्स्थाने सामान्यानुपगन्त्रा **बौद्धेन** स्वलक्षणमात्रगोचरं निर्विकल्पक-प्रत्यक्षमुपेयते, तच्च न प्रमाणमथापि प्रत्यक्षप्रमाणतया तेनाऽभ्युपेयते । वस्तुतोऽलक्ष्ये तत्र लक्षणगमनादतिव्याप्तिः स्यादतः तद्वारणाय **ज्ञान**पदम् । तच्च विशेषावगाहिबोधे सविकल्पात्मके सङ्केतितमिति दर्शनस्याऽतथात्वाद् न तत्राऽतिव्याप्तिः ।

यदा[१] च **बौद्धा**भ्युपगत-स्वलक्षणविषयक-निर्विकल्पकप्रत्यक्षात्मकदर्शने एवाऽतिव्याप्तिवारणाय 'ज्ञान'पदोपादानमुपपादितम्, तदा ज्ञानदर्शनयोरैक्यमभ्युपगच्छतां नव्यानां मते दर्शनस्य लक्ष्यतया, ग्रन्थकारो**पाध्याय**मते नैश्चयिकावग्रहस्वरूपस्य दर्शनस्य मतिज्ञानत्वेन प्रामाण्ये च तत्राऽतिव्याप्त्यसम्भवेऽपि न क्षतिः । अपि चोक्तलक्षणं श्रीम**द्देवसूरि**निर्दिष्टमेव, तन्मते च दर्शनं ज्ञानात् पृथगेवाऽभिमतमिति तदुक्तलक्षणघटकविशेषणव्यावृत्तिः तन्मतमवलम्ब्य युक्तैव ।

वस्तुतो 'दृश्यतेऽनेनेति दर्शन'मिति व्युत्पत्त्या 'दर्शन'पदेन प्रत्यक्षकारणमिन्द्रिय[२]-मिन्द्रियसन्निकर्षो वाऽज्ञानरूपमपि प्रमाणतया **नैयायिकवैशेषिका**भ्यामुपगतम्, तस्य चाऽज्ञानरूपतयाऽप्रामाण्याद् **जैनमते** न तत्र प्रामाण्यमभ्युपगतमिति लक्ष्यभिन्ने तत्र लक्षण-गमनवारणाय **ज्ञान**पदमिति बोध्यम् ।

**व्यवसायी**ति विशेषणस्य प्रयोजनमुपदर्शयति—

**संशयविपर्ययानध्यवसायेषु तद्वारणाय व्यवसायिपदम् ।**

'साधक-बाधकप्रमाणाभावादनवस्थितानेककोटिसंस्पर्शिज्ञानं संशय' इति सूत्रलक्षिते (प्र.न.१.११) 'अयं स्थाणुर्वा पुरुषो वे'त्याकारके संशये, 'विपरीतैककोटिनिष्टङ्कनं विपर्यय'

---

यद्यपि **सन्मतिटीका**कृता **अभयदेवेन** द्वितीयकाण्डप्रथमगाथाव्याख्यायां दर्शनस्याऽपि प्रामाण्यं स्पष्टमुक्तम्, यद्यपि च स्वयं ग्रन्थकारेणाऽपि सामान्यमात्रग्राहिणो नैश्चयिकावग्रहत्वं वदता दर्शनस्य मतिज्ञानोपयोगान्तर्गतत्वेनैव प्रामाण्यं सूचितं भाति; तथापि **माणिक्यनन्दि-वादिदेव-सूरि**प्रभृतिभि**र्जैन**तार्किकैः यद् दर्शनस्य प्रमाणकोटेर्बहिर्भावसमर्थनं कृतं तदभिप्रेत्य ग्रन्थकृता अत्र दर्शनस्य प्रमाणालक्ष्यत्वं मन्वानेन '**दर्शनेऽतिव्याप्तिवारणाय**' इत्याद्युक्तम् ।

---

१. श्रीसिद्धसेनाचार्यादयो ज्ञानदर्शनयोरैक्यमभ्युपगच्छन्ति, ग्रन्थकारोपाध्यायश्च दर्शनस्य मतिज्ञानोपयोगान्तर्गतत्वमनुमन्यते इति तेषां मते दर्शनं प्रमाणं प्रमाणलक्षणलक्ष्यं चैवेति 'दर्शनेऽतिव्याप्तिवारणाये'त्यसङ्गतं भवेत् । यदा च दर्शनपदस्य बौद्धाभ्युपगतनिर्विकल्पकप्रत्यक्षेत्यर्थोऽनुमतः तदा नाऽसङ्गतिरित्यत्र भावः ।

२. 'इन्द्रियं करणं मतम् ॥' (कारिकावली ५८)

(प्र.न.१.९) इति सूत्रलक्षिते शुक्तिकाया'मिदं रजत'मित्याकारके विपर्यये, [१]''किमित्यालोचनमात्रमनध्यवसाय' इति सूत्रलक्षिते (प्र.न.१.१३) 'किमपि मया स्पृष्ट'मित्याकारके गच्छत्तृणस्पर्शज्ञानरूपेऽनध्यवसाये[२] च प्रमाणतात्मकज्ञानत्वस्य सत्त्वेनाऽतिव्याप्तिवारणाय **व्यवसायि**पदमित्यर्थः ।

तथा च यथास्थिततत्वेन निश्चयत्वलक्षणव्यवसायत्वं तद्वति तत्प्रकारकतदभावाप्रकारकनिश्चयत्वे पर्यवसितम् । संशये च तदभावाप्रकारकत्वस्य निश्चयत्वघटकस्याऽभावाद्, विपर्यये च तद्वति तत्प्रकारकत्वस्याऽभावाद्, अनध्यवसाये च नियतप्रकारताविशेष्यत्वयोर्निरूपकत्वस्याऽभावाद् न व्यवसायित्वम्[३] । संशयविपर्ययानध्यवसायाः समारोपाः, तद्विरोधी च व्यवसाय-इति समारोपेऽतिव्याप्तिवारणायेत्युक्तौ लाघवसम्भवेऽपि स्पष्टप्रतिपत्तये इत्थमभिधानम् ।

यद्यपि स्वमते ज्ञानमात्रं स्वप्रकाशस्वरूपं परप्रकाशकं चेति 'स्वपरे'ति विशेषणानुपादानेऽपि नाऽतिव्याप्तिः, तथापि १. 'ज्ञानमात्रमतीन्द्रियम्, किन्तु स्वजंन्यज्ञाततालिङ्गकानुमानेन तद् गृह्यते, तदनुमानप्रयोगश्च-इयम् घटनिष्ठज्ञातता-घटत्वप्रकारकघटविशेष्यकज्ञानजन्याघटत्वप्रकारकघटनिष्ठज्ञाततात्वाद्-या यत्प्रकारिका यन्निष्ठा ज्ञातता सा तत्प्रकारकतद्विशेष्यकज्ञानजन्या, यथा पटत्वप्रकारकपटनिष्ठज्ञातता' एवं परोक्षज्ञानवादिनो मीमांसकप्रकाण्डस्य **कुमारिलभट्टस्य**, २. 'निर्विकल्पकज्ञानातिरिक्तं ज्ञानमात्रं यद्यपि प्रत्यक्षस्वरूपयोग्यम्, तथापि ईश्वरयोगिज्ञानातिरिक्तस्य तस्य स्वविषयकत्वं न सम्भवतीति स्वसमानाधिकरण-स्वानन्तरोत्पन्नानुव्यवसायात्मकप्रत्यक्षज्ञानेन व्यवसायो गृह्यते, यथा "अयं घट" इति व्यवसायो "घटमहं जानामीत्यनुव्यवसायेन गृह्यते" इत्येवं स्वसमानाधिकरण-समनन्तरप्रत्ययवेद्यं ज्ञानमिति वादिनोऽपरप्रकाशज्ञानिनो **नैयायिकस्य वैशेषिकस्य** च, ३. [४]'तादात्म्यमेव विषयविषयिभावनिबन्धनमिति ज्ञानाभिन्नो ज्ञानाकार एव ज्ञानविषयः, ज्ञानाकाराद् भिन्नं बाह्यं वस्तु समस्त्येव ने'ति स्वमात्रविषयकमेव सर्वं ज्ञानं बाह्यवस्तुनोऽभावादेव न बाह्यवस्तुविषयकमिति **ज्ञानाद्वैतवादिनो योगाचारस्य** बौद्धविशेषस्य च मतमपहस्तयितुं **स्वपरे**ति विशेषणमित्याह—

---

१. सामान्यमात्रगोचरयोरर्थावग्रहानध्यवसाययोरीहाजननाऽजननरूपफलभेदाद् भेदोऽवसेयः ।

२. नञोऽत्राऽल्पार्थकत्वम्, न चाऽऽत्यन्तिकनिषेधपरत्वम्—तथा सति अनध्यवसायस्याऽज्ञानत्वेन ज्ञानपदेनैव तद्व्यावृत्तिसम्भवे, व्यवसायिपदेन तद्व्यावृत्तिदर्शनानुपपत्तेः ।

३. संशये पुरुषत्ववति पुरुषत्वाभावाप्रकारकत्वस्याऽसत्त्वाद्, विपर्यये शुक्तित्ववति शुक्तित्वप्रकारकत्वाऽभावात्, अनध्यवसाये च स्वनिरूपितनियतप्रकारताविशेष्यतयोरेवाऽभावाद् न निश्चयत्वमिति भावः ।

४. न्यायसिद्धान्तमुक्तावली, का० ४९ ।

**परोक्षबुद्धयादिवादिनां मीमांसकादीनां, बाह्यार्थापलापिनां ज्ञानाद्यद्वैतवादिनां च मतनिरासाय स्वपरेति स्वरूपविशेषणार्थमुक्तम् ।**

**परोक्षेति** । **आदिपदात्** समानाधिकरण-समनन्तर-स्वविषयकपरोक्षवेद्यबुद्धयुपग्रहः । '**मीमांसकादीना**'मित्यत्र 'आदि'पदाद् **वैशेषिकाद्युपग्रहः** । **स्वरूपेति** । विशेषणं द्विविधम्—१. स्वरूपविशेषणम् २. व्यावर्त्तकविशेषणम् । स्वरूपविशेषणमेव चोपरञ्जकविशेषणमुच्यते, स्वरूपपरिज्ञानरूपफलत्वेनाऽस्याऽपि न निष्फलत्वम् । 'सम्भवे व्यभिचारे च विशेषणमर्थव'-दिति वचनं च व्यावर्त्तकविशेषणपरम्, तस्य हि विशेष्ये सम्भवोऽपि वर्त्तते, व्यभिचारोऽपि । व्यभिचार इत्थम्—१. तद्भिनाऽपि विशेष्यतावच्छेदकाक्रान्तस्याऽन्यस्य सद्भावात्[1] २. तस्याऽपि च विशेष्यतावच्छेदकशून्ये वृत्तेः । तत्र 'शुक्लं जल'मित्यत्र जलस्य शौक्ल्यं विशेषणं प्रथमं-तत्र सम्भवमात्रम्, द्वितीयं 'नीलो घट' इत्यत्र घटस्य नीलरूपत्वम् । प्रकृते च **स्वपरेति** विशेषणं व्यवसायिज्ञानात्मकप्रमाणस्य स्वरूपपरिज्ञानफलकमुक्तमित्यर्थः ।

ननु **स्वपरेति** स्वरूपविशेषणमेवेत्याश्रयणे 'व्यवसायिज्ञानं प्रमाण'मित्येवाऽऽश्रितं स्यात्, तत्र व्यवसायश्च यथावस्थिततत्त्वेन निश्चय एव—इति शब्दान्तरेण 'सम्यग्ज्ञानं प्रमाण'-मित्याख्यातम् । सम्यग्ज्ञानं च प्रमैव, तस्येदानीं प्रमाणत्वे आश्रिते करणं तत् संवृत्तम् । अथ च तस्य तदतिरिक्तं फलं वक्तव्यम्, न च तद् वक्तुं शक्यमिति फलाभावात् करणमप्यनुपपन्नमिति करणार्थक'अनट्'प्रत्ययान्त—'मा'धातुनिष्पन्न-प्रमाणपदार्थरूपलक्ष्यस्य तादात्म्येन लक्षणत्व-मप्युक्तज्ञानस्य न सम्भवतीत्याशङ्कते—

---

**'मीमांसकादीनाम्'-कुमारिल**प्रभृतयो हि ज्ञानमात्रस्य परोक्षत्वेन परप्रकाश्यत्वं मन्वानाः अर्थप्राकट्याख्येन तत्फलेनैव हेतुना तदनुमितिमङ्गीकुर्वाणाः तस्य स्वप्रकाशत्वं निरस्यन्तीति ते परोक्षबुद्धिवादिनोऽभिधीयन्ते ।

**जैनमते** हि सर्वस्याऽपि ज्ञानस्य स्वपरप्रकाशकत्वनियमात् 'स्वपर'इति विशेषणा-ऽभावेऽपि स्वपरव्यवसायित्वरूपस्याऽर्थस्य सिद्धान्तबलेनैव लाभात् 'स्वपर'इति विशेषणं कस्मात्? इत्याशङ्कां निवारयितुमुक्तम्-'**स्वरूपविशेषणार्थम्**' इत्यादि । तथा च नेदं विशेषणं किञ्चिद्व्यावर्तकतया लक्षणे निवेशितं येन व्यावृत्त्यभावप्रयुक्ता तद्वैयर्थ्याशङ्का स्यात् । किन्तु स्वरूपमात्रनिदर्शनतात्पर्येणैव तत् तत्र निवेशितम् । न च स्वरूपविशेषणे व्यावृत्तिलाभप्रत्याशा । विशेष्यस्वरूपविषयकबोधजननरूपं तत्फलं तु अत्रापि निर्बाधमिति नैतस्य विशेषणस्य वैयर्थ्याशङ्का ।

---

१. वस्तुतः प्रथमो व्यभिचार एव 'सम्भवे व्यभिचारे०' इति नियमे कक्षीक्रियते । द्वितीयस्य स्वरूपविशेषणेऽपि सद्भावात्-शुक्लं जलमित्यत्राऽपि शौक्लस्य जलत्वशून्ये वृत्तेः ।

**ननु यद्येवं सम्यग्ज्ञानमेव प्रमाणमिष्यते तदा किमन्यत् तत्फलं वाच्यमिति चेत्,**

**किमि**त्याक्षेपे, न किञ्चिदिति तदर्थः । **अन्यत्** = सम्यग्ज्ञानरूपप्रमाणाद् भिन्नम् । **तत्फलम्** = सम्यग्ज्ञानलक्षणप्रमाणफलम् ।

प्रमाण-तत्फलयोः कथञ्चिद् भेदाभेदस्यैव **स्याद्वादे** स्वीकृतत्वेन प्रमाणात् सर्वथा भिन्नस्य तत्फलस्याऽभावेनोपदेष्टुमशक्यत्वेऽपि, प्रमाणात् कथञ्चिद् भिन्नाभिन्नस्य स्वार्थ-व्यवसितिलक्षणस्य तत्फलस्य सम्भवाद्, नोक्ताक्षेपः **स्याद्वादिनं** प्रति कमपि दोषमावहतीति समाधत्ते–

**सत्यम्, स्वार्थव्यवसितेरेव तत्फलत्वात् ।**

**सत्य**मिति । अन्यफलापाकरणमिष्टमेवेत्यर्थः । **तत्फलत्वात्** = प्रमाणफलत्वात् ।

ननु यथा च भवन्मते-व्यवसायिज्ञानमात्रस्य प्रमाणलक्षणत्वोपपत्तौ 'स्वपरे'ति स्वरूपविशेषणार्थमेव, लक्षणे तदनिवेशेऽपि नाऽतिव्याप्त्यादिदोषः; तथा 'स्वार्थे'त्यपि स्वरूपविशेषणार्थमेव-स्वार्थव्यवसितिरूपत्वादेव तद्रूपाया एव तस्याः फलत्वसिद्धेः (?) । एवं च 'व्यवसितिः प्रमाणं' 'व्यवसितिः फल'मित्येकेनैव धर्मेण प्रमाणत्वं फलत्वं च स्यात्, तच्च न सम्भवति-प्रमाणफलभावस्य भेदनियतत्वात् । अतः स्वव्यवसायित्वेन फलत्वं-परव्यवसायित्वेन प्रमाणत्वमित्येवमवश्यमभ्युपगन्तव्यत्वेन प्रमाणस्य स्वपरव्यवसायित्वं स्वाभ्युपगतं न स्यादिति शङ्कते-

**नन्वेवं प्रमाणे स्वपरव्यवसायित्वं न स्यात्-प्रमाणस्य परव्यवसायित्वात् फलस्य च स्वव्यवसायित्वादिति चेत्,**

**नन्वेव**मिति । स्वार्थव्यवसितेः फलत्वाङ्गीकारे इत्यर्थः ।

---

**'ननु यद्येवम्'**–प्रस्तुतस्य शङ्कासमाधानग्रन्थस्य मूलं **स्याद्वादरत्नाकरे** [पृ० ५२] इत्थं दृश्यते–

अत्र 'ज्ञानस्याऽथ प्रमाणत्वे०' इत्यादि रत्नप्रभायामुद्धृतं श्लोकत्रयं (पृष्ठ १४) समस्ति ।

**'स्वव्यवसायित्वात्'**-ननु **देवसूरि**कृतं 'स्वपर'इत्यादिसूत्रं तदीयां च **रत्नाकर**व्याख्या-मवलम्ब्य प्रमाणस्य फलं दर्शयता श्रीमता **उपाध्यायेन** 'स्वार्थव्यवसितेरेव तत्फलत्वात्' इत्युक्तम्, अस्य च उक्तसूत्र-तदीयव्याख्यानुसारी स्वपरव्यवसितिरेवाऽर्थः फलत्वेन पर्यवस्यति । तथा च अत्रत्यः स्वमात्रव्यवसितेः फलत्वप्रदर्शनपरः आशङ्काग्रन्थः कथं सङ्गच्छेत ? यतो हि 'स्वपरव्यवसायि'इत्यादिसूत्रव्याख्यायां अग्रेतने च 'स्वपरव्यवसितिक्रियारूपाऽज्ञाननिवृत्त्याख्यं फलं तु'इत्यादिसूत्रे [प्र० न० ६.१६] स्वयं **देवसूरिणा** स्वपरव्यवसितेरेव फलत्वस्य प्रति-

ननु योग्यताज्ञानशाब्दबोधयोः कारणकार्यभावेऽपि समानविषयकत्वं [१]दृश्यते एवेति फलस्य स्वपरव्यवसायित्वे प्रमाणस्याऽपि स्वपरव्यवसायित्वं स्यादेवेति **प्रमाणस्य परव्यवसायित्वात् फलस्य च स्वव्यवसायित्वा**दिति हेतूपादानं प्रमाणस्य स्वपरव्यवसायित्वासम्भवप्रतिपत्तयेऽयुक्तमिति चेत् ?

न, अन्यत्र भिन्नयोः समानविषयतया कार्यकारणभावे समानविषयकत्वस्य सम्भवेऽपि, प्रकृते य एव प्रमाणस्य स एव यदि फलस्याऽपि विषयः, तदा फलेन यत् प्रकाशयितव्यं तत् प्रमाणेन प्रकाशितमेवेति न तत्प्रकाशनेन फलं किञ्चिदित्यतः प्रमाण-फलयोर्विषयभेदस्याऽवश्यमभ्युपगन्तव्यत्वात् ।

न च-प्रमाणफलयोर्विषयभेदः-प्रमाणस्य स्वप्रकाशकत्वेन स्वव्यवसायित्वात्, फलस्य परप्रकाशकत्वेन परव्यवसायित्वादप्युपपद्यते इति 'प्रमाणस्य परव्यवसायित्वं फलस्य च स्वव्यवसायित्व'मित्यत्र विनिगमकं नास्तीति-वाच्यम् ।

यतः[२]१. 'घटमहं जानामी'त्याद्यनुव्यवसायस्य 'अयं घट'इत्यादिव्यवसायफलत्वं

---

पादनात्। किञ्च, प्रमाणफलस्वरूपविषयको **जैन**तर्कसिद्धान्तोऽपि इदानीं यावन्निर्विवादं स्वपरप्रकाशयोरेव फलत्वं प्रतिपादयन् सर्वत्र दृश्यते इति तं सिद्धान्तमपि प्रस्तुतशङ्काग्रन्थः कथं न बाधेत इति चेत्;

अवधेहि, यद्यपि स्वपरव्यवसितेरेव प्रमाणफलत्वं निर्विवादं **जैन**तर्कसम्मतम्, तथापि अत्र ग्रन्थकृता **विज्ञानवादीयबौद्ध**परम्परायां लब्धप्रतिष्ठः स्वमात्रसंवेदनस्य प्रमाणफलत्वसिद्धान्तः, इदानीं यावत् **जैन**तर्कपरम्परायां अलब्धप्रतिष्ठोऽपि औचित्यं समीक्ष्य सन्निवेशितः । तथा च ग्रन्थकर्तुस्तात्पर्यमत्र इत्थं भाति—यद्यपि ज्ञानं स्वं परं चोभयं प्रकाशयति तथापि तदीयं स्वमात्रप्रकाशनं फलकोटौ निपतति । स्वमात्रप्रकाशनस्य फलत्वोक्तावपि वस्तुतः ज्ञानात्मकस्वप्रकाशनस्य 'विषयनिरूप्यं हि ज्ञानम्, ज्ञानवित्तिवेद्यो विषयः' [मुक्ता० का० १३६.] इति सिद्धान्तानुसारेण स्वविषयविषयकत्वान्यथानुपपत्त्या परप्रकाशनगर्भितत्वमपि पर्यवस्यति इति परव्यवसितेरर्थादेव लभ्यत्वेन गौरवादेव स्वपरोभयव्यवसितेः साक्षात् फलत्वेनाऽभिधानं ग्रन्थकृता नाऽऽदृतम् । प्रमाणफलयोरभेदपक्षं समाश्रित्य च प्रमाणस्य स्वपरव्यवसायित्वोक्तिः फलस्य च स्वपरव्यवसितित्वोक्तिः सङ्गमिता । ग्रन्थकर्तुरयमभिप्रायः अग्रेतनेन 'ज्ञानाभावनिवृत्तिरूत्वर्थज्ञातताव्यव्यहारनिबन्धनस्वव्यवसितिपर्यवसितैव सामान्यतः फलमिति द्रष्टव्यम्' इति ग्रन्थेनाऽपि स्फुटीभवति ।

---

१. योग्यताज्ञानं पदार्थानामन्वयं विषयीकरोति । शाब्दबोधविषयोऽपि पदार्थानामन्वय एव ।

२. एकस्यैव ज्ञानस्यांऽशद्वयं-स्वसंवेदनं च परसंवेदनं च । तत्र स्वव्यवसायित्वस्य फलत्वम्, परव्यवसायित्वस्य च प्रमाणत्वमिति पूर्वपक्षे उक्तम् । तत्र केनचिदाशङ्क्य प्रदर्श्यते-स्वव्यसायित्वस्य प्रमाणत्वम्, परव्यवसायित्वस्य च फलत्वमिति कथं न स्यात् ? इति । तदाशङ्कापनोदनाय पूर्वपक्षेण युक्तिचतुष्टयं प्रदर्श्यते ।

ज्ञानस्य स्वसमानाधिकरण-समनन्तरज्ञानवेद्यत्वमभ्युपगच्छता **नैयायिके**नाऽभ्युपेयते एव-तद्विषयकप्रत्यक्षं प्रति विषयस्य कारणत्वादिति वस्तुस्थितौ परप्रकाशेऽनवस्थानात्[१] स्वप्रकाशमभ्युपगच्छद्भिः **स्याद्वादि**भिरेकस्यैव ज्ञानस्य 'अयं घटः, घटमहं जानामी'त्युभयाकारकत्वमुपेयते इति 'घटमहं जानामी'त्यनुव्यवसायस्थानीय-स्वसंवेदनरूपस्वव्यवसितेः फलत्वम्, तज्ज्ञानीयव्यवसायस्थानीय-'अयं घट' इति बाह्यघटादिलक्षणपरप्रकाशस्वरूप-परव्यवसितेः प्रमाणत्वं युज्यते एव ।

२. अपि च सर्वमेव ज्ञानं स्वसंविदितमिति स्वांशे न संशयादिरूपम्, न हि भवति यस्य कस्यचिदपि ज्ञानस्योत्पत्तौ-'ज्ञानवानहं न वे'ति संशयो, 'न ज्ञानवा'निति विपर्ययोऽनध्यवसायो वेति स्वांशे समारोपानात्मकत्वात् स्वव्यवसितिरूपतदंशस्य ज्ञानसामान्यकारण[२]-कूटलक्षणज्ञानसामग्रीजन्यत्वाद् न प्रत्यक्षादिप्रमाणलक्षणज्ञानविशेषप्रयोजकसामग्रीजन्यत्वमिति प्रमाणकोटिबहिर्भावात् प्रमाणफलत्वम् । घटपटादिबाह्यविषयकत्वात् परप्रकाशकत्वांशे-(१) दोषादिघटितसामग्रीप्रभवत्वे प्रमेयव्यभिचारित्वलक्षणमप्रामाण्यम्, तच्चाऽवान्तरसामग्रीविशेष-प्रभवत्वेन संशयत्वविपर्ययत्वादिरूपतामञ्चति २) गुणादिघटितसामग्रीप्रभवत्वे 'यथावस्थिततत्वेन निश्चयत्व'लक्षण-प्रमेयाव्यभिचारित्वलक्षणप्रामाण्यम्, तच्चाऽवान्तरसामग्रीविशेषप्रभवत्वेन प्रत्यक्षपरोक्षप्रमाणत्व-तदवान्तरप्रमाणभेदरूपतामासादयतीति प्रमाणकोटिसन्निवेशः परव्यवसायित्वांशस्य ।

३. किञ्च, प्रत्यक्षमात्रस्य संवेदनं 'साक्षात्करोमी'ति, अनुमितिमात्रस्य संवेदनं 'अनुमिनोमी'ति, प्रत्यभिज्ञानमात्रस्य संवेदनं 'प्रत्यभिजानामी'ति तादृशेन संवेदनेन ज्ञानस्य कुत्र प्रामाण्यमिति न निर्णीयते । तादृशसंवेदनस्वरूपतयैव च ज्ञानस्य प्रामाण्याभ्युपगमे-स्वसंविदितं घटप्रत्यक्षमिव पटप्रत्यक्षमपीति स्वसंवेदनस्वरूपत्वाविशेषाद् घटप्रत्यक्षवत् पटप्रत्यक्षमपि घटे प्रमाणं स्यादिति पटप्रत्यक्षसंवेदनादपि घटसिद्धिः प्रसज्येत । परव्यवसायित्वेन प्रामाण्ये च स्वव्यवसितित्वस्याऽविशेषेऽपि परव्यवसितिस्वभावाद् घटप्रत्यक्षमेव घटे प्रमाणम्, न पट-प्रत्यक्षम् । तत एव च 'अर्थेनैव विशेषो हि निराकारतया धिया'मिति वचनमपि व्याख्यातं भवति ।

४. यद् न स्वस्वरूपमवभासयति तद् न परस्वरूपमप्यवभासयति, यथा स्तम्भादिकम्, स्वस्वरूपं नाऽवभासयति चाऽज्ञानरूपमिन्द्रिय-तत्सन्निकर्षादि, ततो नाऽर्थावभासकमिति **नैयायिका**भ्युपगतस्याऽस्वसंविदितज्ञानस्य स्वप्रकाशकत्वाभावात् परप्रकाशकत्वं न स्यात्, परव्यवसितित्वाभावे च प्रामाण्याभाव एवेति प्रमाण्योपपादकत्वेन स्वसंवेदनस्य स्वव्यवसिति-

१. अनुव्यवसायस्य प्रकाशार्थं पुनर्ज्ञानान्तरमभ्युपेयमित्यनवस्था ।

२. आत्ममनःसंयोगादि ।

पर्यवसन्नस्य भवेदुपादेयतेति सिध्यति प्रमाणस्य परव्यवसायित्वं फलस्य च स्वव्यवसायित्वमिति ।

प्रमाणफलयोरुक्तदिशा भेदेऽपि उपयोगात्मना कथञ्चिदभेदस्याऽपि भावेन फलस्य स्वव्यवसायित्वे तदभिन्नत्वात् प्रमाणस्याऽपि स्वव्यवसायित्वम्, एवं प्रमाणस्य परव्यवसायित्वे तदभिन्नत्वात् फलस्याऽपि परव्यवसायित्वमित्येवं तयोर्द्वयोरपि स्वपरव्यवसायित्वस्योपपत्तिरिति समाधत्ते-

**न, प्रमाण-फलयोः कथञ्चिदभेदेन तदुपपत्तेः ।**

**तदुपपत्तेः**=स्वपरव्यवसायित्वस्य सम्भवात् ।

उक्तशङ्कासमाधानमूलीभूतस्य-

''ज्ञानस्याऽथ प्रमाणत्वे, फलत्वं कस्य कथ्यते ? ।
स्वार्थसंवित्तिरस्त्येव, ननु किं न विलोक्यते ? ॥

स्यात् फलं स्वार्थसंवित्तिर्यदि नाम तदा कथम् ।
स्वपरव्यवसायित्वं, प्रमाणे घटनामियात् ? ॥

उच्यते—स्यादभेदात् प्रमांणस्य, स्वार्थव्यवसितेः फलात् ।
नैव ते सर्वथा कश्चिद्, दूषणक्षण ईक्ष्यते ॥'' [स्या. र. पृष्ठ ५२]

इति वचनकदम्बकस्याऽपि **स्याद्वादरत्नाकर**गतस्योक्ताभिप्रायोऽनुशीलनीयः ।

यदा च प्रमाणफलयोरुक्तदिशा भेदोऽभेदोऽपि च, तदाऽऽत्मनो व्यापाररूपमुपयोगेन्द्रियमेव स्वपरव्यवसायिज्ञानत्वात् प्रमाणम्, न तु चक्षुरादीन्द्रियं जडरूपं-स्वपरव्यवसायिज्ञानरूपत्वाभावादिति निगमयति-

**इत्थं चाऽऽत्मव्यापाररूपमुपयोगेन्द्रियमेव प्रमाणमिति स्थितम् ।**

**इत्थं च** = स्वपरव्यवसायिज्ञानस्य प्रमाणलक्षणत्वे चेत्यर्थः ।

अत्र 'आत्मा ज्ञानेनाऽर्थं प्रमिणोती'त्यनुभवः साक्षिभावं भजते । स्पर्शादिविषयप्रकाशस्वरूपक्रियां प्रति कर्तृकारकरूपस्याऽऽत्मनः सव्यापारत्वं-छेदनलक्षणक्रियाकर्तुः तीक्ष्णकुठारादिकरणोत्पतननिपतनानुकूलयत्नलक्षणव्यापारवत्त्ववदावश्यकं-व्यापारमन्तरेण कर्तुः क्रियाकारकत्वासम्भवात् । स च व्यापार उपयोग एव । तस्य स्वपरव्यवसायित्वात् क्रियायाश्चाऽपि स्वपरव्यवसायित्वमित्याशयेनाऽऽह-

**न ह्यव्यापृत आत्मा स्पर्शादिप्रकाशको भवति-निर्व्यापारेण कारकेण क्रिया-**

जननायोगात्;

सव्यापारस्यैवाऽऽत्मनो ज्ञानलक्षणक्रियाजनकत्वमिति-नियमानभ्युपगमे इन्द्रियसन्निकर्षमात्रेणाऽऽत्मनः तत्क्रियाकर्तृत्वाभ्युपगमे च, सुषुप्तिसमयेऽपि देहव्यापक-त्वगिन्द्रियेण मसृणतूलिकादिसन्निकर्षस्य सद्भावात्, तेन तूलिकादिस्पार्शनज्ञानस्योत्पत्तिप्रसङ्गेन स्पार्शन-ज्ञानाद्यभावलक्षणसुषुप्त्यवस्थैव विलीयेतेत्याह-

**मसृणतूलिकादिसन्निकर्षेण सुषुप्तस्याऽपि तत्प्रसङ्गाच्च ।**

**तत्प्रसङ्गात्** = स्पर्शादिप्रकाशप्रसङ्गात् ।

ननु आत्मव्यापाररूपस्योपयोगेन्द्रियस्य प्रमाणत्वे तद्भिन्नमेव फलं स्याद्, अन्यथा[1] स्वस्यैव स्वं प्रति करणत्वं स्वं प्रति क्रियात्वं च विरुद्धं स्यात्–क्रियाकरणभावस्य पौर्वापर्य-नियतत्वात्, स्वस्य स्वापेक्षया पौर्वापर्यासम्भवाच्च । भेदे च स्वव्यवसायिनः फलस्य-परव्यवसायित्वं परव्यवसायिनः प्रमाणस्य स्वव्यवसायित्वं चाऽनुपपन्नम् । स्वरूपतो भिन्नयोरपि प्रमाणफलयोरुपयोगस्वभावत्वेनाऽभेदमभ्युपेत्य स्वपरव्यवसायित्वस्याऽभ्युपगमे–नीलज्ञानाद् जायमाने पीतज्ञानेऽपि नीलविषयत्वं स्यात्, पीतज्ञानजनके च नीलज्ञाने पीतविषयत्वं प्रसज्येत-उपयोगस्वभावत्वेन तयोरप्यभेदस्य भावादिति चेत्;

न, एकविषयकैकजातीयोपयोगस्थले यावद् न विषयान्तरोपयोगः तावत्कालं समानविषयकोपयोगस्याऽवान्तरवैलक्षण्येन वैलक्षण्यभावेऽपि तावदुपयोगव्यापि-दीर्घोपयोग-स्यैकस्य भावेन, तदात्मनाऽवान्तरवैलक्षण्यापन्नोपयोगयोरभेदस्याऽप्यभ्युपगमेन,[2] तद्बलात् फलाभिन्नस्य प्रमाणस्य फलविषय-स्वव्यवसायित्वस्य प्रमाणाभिन्नस्य फलस्य प्रमाणविषय-परव्यवसायित्वस्य च सम्भवेन, फल-प्रमाणयोः स्वपरव्यवसायित्वोपपत्तेः । नीलज्ञान-पीतज्ञानयोश्च भिन्नविषयकयोर्विजातीययोर्वा कार्यकारणभावमापन्नयोर्यावत्कालमवस्थानं तदन्यतरनिरुपितम्, तावत्कालीनः तदुपयोगद्वयव्यापी दीर्घोपयोग एको नाऽभ्युपगम्यते, इति न तदात्मना तदुपयोगद्वयस्याऽभेद इति तयोरन्योन्यविषयविषयकत्वस्य तद्बलादापत्तेरसम्भवात् ।

यद्वा प्रमाण-फलभाव एकस्याऽप्युपयोगस्यैकस्मिन्नपि क्षणे उपपद्यते । तथाहि–**नैयायिकवैशेषिका**दिभिरीश्वरज्ञानं नित्यमपि प्रमोपेयते, ईश्वरश्च तदकर्त्ताऽपि प्रमाता, तथा तदकरणमपीश्वरः प्रमाणम् । तथा च प्रमाणजन्यत्वाभावेऽपि प्रमास्वरूपतया फलरूपमीश्वर-

---

१. अन्यथा = प्रमाणफलयोरभेदे ।

२. प्रमाणज्ञानफलज्ञानयोरेकविषयत्वमेकजातीयत्वं वा । ततस्तयोः परस्परं वैलक्षण्येन भेदेऽपि, एकविषयत्वेन तदुपयोगद्वयव्यापि-दीर्घोपयोगस्यैकत्वेन तदात्मनाऽभेदोऽपि । नीलज्ञान-पीतज्ञानयोस्तु नैवम् ।

ज्ञानम्, तत्कर्तृत्वाभावेऽपि तद्वत्त्वात् प्रमाता महेशः, प्रमात्मकस्वज्ञानकरणत्वाभावेऽपि तदयोगव्यवच्छेदवत्त्वात् प्रमाणमीश्वरः । तदुक्तं **कुसुमाञ्जलावुदयनाचार्येण**-

मितिः सम्यक् परिच्छित्तिः, तद्वत्ता च प्रमातृता ।
तदयोगव्यवच्छेदः प्रमाण्यं गौतमे मते ॥ इति । (कुसुमा० ४.५)

अस्याऽर्थः-मितिः = प्रमितिः = सम्यक्-परिच्छित्तिः = यथार्थज्ञानम्, तद्वत्ता = प्रमाधिकरणता = प्रमातृता = प्रमातृभावः, तदयोगव्यवच्छेदः = प्रमया सह अयोगस्य = असम्बन्धस्य व्यवच्छेदः = अभावः = प्रामाण्यं = प्रमाणत्वम्, **गौतमे** मते = **न्यायमते** । एवमेव **स्याद्वादे**ऽपि स्वव्यवसायिन्या प्रमया सह तदात्मकस्य स्वपरव्यवसायिनः प्रमाणस्य, तादात्म्यलक्षणस्य योगस्य सद्भावे, तदभावलक्षणायोगस्य व्यवच्छेदः = तादात्म्यलक्षणो योगोऽस्तीति तल्लक्षणं प्रामाण्यं सङ्गतिमञ्चत्येव ।

स्वं प्रति स्वस्य करणत्वाभावेऽपि यथा प्रमाणोपपत्तिः, तथा स्वकार्यत्वाभावेऽपि प्रमायाः फलत्वं निर्वहत्येव । प्रमाणस्य हि अज्ञाननिवृत्तिः फलम्, अज्ञानं तु ज्ञानाभावः, तन्निवृत्तिः तु ज्ञानमेव—अभावाभावस्य प्रतियोगिरूपत्वात् । ज्ञानं च यद्यपि प्रमाणप्रमोभय-स्वभावं तथापि स्वव्यवसितिस्वभावस्वरूपमेव तत्फलरूपमज्ञाननिवृत्तिलक्षणं ज्ञानं-यतः 'अयं घट' इत्यतो न भवति 'ज्ञातो घट' इति व्यवहारः, किन्तु 'घटमहं जानामी'त्यनन्तरमेव, 'ज्ञातो घट' इति व्यवहारोऽज्ञाननिवृत्त्यनन्तरमेवाऽवश्यंभावीत्यतो निर्णीयतेऽर्थज्ञातताव्यवहारनिबन्धन-त्वात् स्वव्यवसितिलक्षणप्रमारूपैवाऽज्ञाननिवृत्तिः फलम् । यदा च संशयविपर्ययानध्यवसाय-लक्षणसमारोप एवाऽज्ञानं तदाऽपि तन्निवृत्तिः सम्यग्ज्ञानस्वरूपैवेति ।

**तत्त्वार्थश्लोकवार्त्तिके विद्यानन्देन** अर्थग्रहणशक्तिस्वरूपमेव प्रमाणं प्रकटीकृतम्, तन्मतं प्रतिक्षेप्तुमुपन्यस्यति—

**केचित्तु—ततोऽर्थग्रहणाकारा, शक्तिर्ज्ञानमिहात्मनः ।**
**करणत्वेन निर्दिष्टा, न विरुद्धा कथञ्चन** ॥ (त० श्लो० १.१.२२)

---

**ततोऽर्थ०**-श्रीमता **विद्यानन्देन** स्वकीयस्य शक्तिकरणत्वपक्षस्य तात्पर्यं प्रस्तुतपद्यव्या-ख्यायामित्थं प्रकटीकृतम्—"नहि...(अत्र सम्पूर्णमुद्धरणं रत्नप्रभावद् द्रष्टव्यम् ।)

**विद्यानन्दीयं** मतं पराकर्तुकामेन श्रीमता **देवसूरिणा** तदीयपक्षोपन्यासपुरःसरमित्थं निराकरणं कृतम्-"केचित्तु-'ततोऽर्थग्रहणाकारा....' इति परमार्थतो भावेन्द्रियस्यैव अर्थग्रहण-शक्तिलक्षणस्य साधकतमतया करणताध्यवसायादिति च ब्रुवाणा लब्धीन्द्रियं प्रमाणं समगिरन्त, तन्न समगंस्त, उपयोगात्मना करणेन लब्धेः फले व्यवधानात्, सन्निकर्षादिवदुपचारत एव

**इति लब्धीन्द्रियमेवाऽर्थग्रहणशक्तिलक्षणं प्रमाणं सङ्गिरन्ते ।**

**केचिदिति** । अस्य **सङ्गिरन्ते** इत्यनेनाऽन्वयः । अर्थग्रहणशक्तेः प्रमाकरणत्वात् प्रमाणत्वमित्यर्थकस्य 'ततोऽर्थे'ति पद्यस्य तदीयं व्याख्यानं यथा-

"न हि अन्तरङ्गबहिरङ्गार्थग्रहणरूपाऽऽत्मनो ज्ञानशक्तिः करणत्वेन कथञ्चिद् निर्दिश्यमाना विरुध्यते-सर्वथा शक्तितद्वतोर्भेदस्य प्रतिहननात् ।

"ननु च ज्ञानशक्तिर्यदि प्रत्यक्षा तदा सकलपदार्थशक्तेः प्रत्यक्षत्वप्रसङ्गादनुमेयत्वविरोधः । यदि पुनरप्रत्यक्षा तदा तस्याः करणज्ञानत्वे **प्राभाकर**मतसिद्धिः-तत्र करणज्ञानस्य परोक्षव्यवस्थितेः फलज्ञानस्य प्रत्यक्षत्वोपगमात् । ततः प्रत्यक्षकरणज्ञानमिच्छद्भिर्न तत् शक्तिरूपमेषितव्यं **स्याद्वादि**भिरिति चेद्; तदनुपपन्नम्, एकान्ततोऽस्मदादिप्रत्यक्षत्वस्य करणज्ञानेऽन्यत्र वा वस्तुनि प्रतीतिविरुद्धत्वेनाऽनभ्युपगमात् ।

"द्रव्यार्थतो हि ज्ञानमस्मदादेः प्रत्यक्षम्, प्रतिक्षणपरिणामशक्त्यादिपर्यायार्थतस्तु न प्रत्यक्षम् । तत्र 'स्वार्थव्यवसायात्मकं ज्ञानं' 'स्वसंविदितं फलं प्रमाणाभिन्नं' वदतां करणज्ञानं कथमप्रत्यक्षं नाम ? न च येनैव रूपेण तत् प्रमाणं तेनैव फलं येन विरोधः । किं तर्हि ? साधकतमत्वेन प्रमाणं साध्यत्वेन फलम् । साधकतमत्वं तु परिच्छेदनशक्तिरिति प्रत्यक्षफलज्ञानात्मकत्वात् प्रत्यक्षम्, शक्तिरूपेण परोक्षम् । ततः स्यात्प्रत्यक्षम्, स्यादप्रत्यक्षमित्यनेकान्तसिद्धिः ।

"यदा तु प्रमाणाद्भिन्नं फलं हानोपादानोपेक्षाज्ञानलक्षणं तदा स्वार्थव्यवसायात्मकं करणसाधनं ज्ञानं प्रत्यक्षं सिद्धमेवेति न परमतप्रवेशः, तच्छक्तेरपि सूक्ष्मायाः परोक्षत्वात् । तदेतेन सर्वं कर्त्रादिकारकत्वेन परिणतं वस्तु कस्यचित् प्रत्यक्षं परोक्षं च कर्त्रादिशक्तिरूपतयोक्तं प्रत्येयम् । ततो ज्ञानशक्तिरपि च करणत्वेन निर्दिष्टा न स्वागमेन युक्त्या च विरुद्धेति

---

प्रमाणतोपपत्तेः ।

अथ न **जैना**नामेकान्तेन किञ्चित् प्रत्यक्षमप्रत्यक्षं वा, तदिह द्रव्यार्थतः प्रत्यक्षा ज्ञानशक्तिः पर्यायार्थतस्तु परोक्षा । अयमर्थः-स्वपरपरिच्छित्तिरूपात् फलात् कथञ्चिदपृथग्भूते आत्मनि परिच्छिन्ने तथाभूता तज्जननशक्तिरपि परिच्छिन्नैवेति । नन्वेवं आत्मवर्त्तिनामतीतानागतवर्तमानपर्यायाणामशेषाणामपि द्रव्यार्थतः प्रत्यक्षत्वात् यथा ज्ञानं स्वसंविदितमेवं तेऽपि स्वसंविदिताः किं न स्युः ? किञ्च, यदि द्रव्यार्थतः प्रत्यक्षत्वात् स्वसंविदिता ज्ञानशक्तिः तदाऽहं घटज्ञानेन घटं जानामि इति करणोल्लेखो न स्यात् । नहि कलशसमाकलनवेलायां द्रव्यार्थतः प्रत्यक्षत्वेऽपि प्रतिक्षणपरिणामिनामतीतानागतानां च कुशूलकपालादीनामुल्लेखोऽस्ति ।"–स्या० र० पृ० ५३ ।

सूक्त''मिति।

**लब्धीन्द्रियमेवे**ति। इन्द्रियं द्विविधं द्रव्येन्द्रियभावेन्द्रियभेदात्। तत्र द्रव्येन्द्रियं निर्वृतीन्द्रियोपकरणेन्द्रियभेदाद् द्विधा, निर्वृतीन्द्रियं चक्षुरादीनां गोलकाद्यधिष्ठानम्, उपकरणेन्द्रियं तद्गतशक्तिविशेषः। भावेन्द्रियमपि द्विधा-उपयोगेन्द्रियलब्धीन्द्रियभेदात्, तत्रोपयोगेन्द्रियं स्वपरव्यवसायिज्ञानस्वरूपमात्मनोऽर्थोपलब्धिक्रियाजनने व्यापारस्वरूपम्। तस्योपयोगस्याऽर्थग्रहणशक्तिस्वरूपं लब्धीन्द्रियम्। तस्यैव प्रमाणत्वं नाऽन्येन्द्रियाणामित्येतदर्थमेवकारोपादानम्।

एतन्मतं प्रतिक्षिपति-

**तदपेशलम्, उपयोगात्मना करणेन लब्धेः फले व्यवधानात्,**

लब्धीन्द्रियस्य प्रमाणत्वसमर्थनमसुन्दरमित्यर्थः।

अर्थप्रमितिलक्षणफलं प्रति यदव्यवधानेन करणं तदेव साधकतमत्वात् प्रमाणम्। एतादृशं च स्वपरव्यवसायिज्ञानमेव, तदात्मकोपयोगद्वाराऽर्थग्रहणशक्तिलक्षणं लब्धीन्द्रियं च व्यवहितं कारणमिति तद् न साधकतममिति न प्रमाणम्। व्यवहितकारणस्य प्रमाणत्वाभ्युपगमे द्रव्येन्द्रियादेरज्ञानस्याऽपि प्रमाणत्वं स्यादित्याशयेनाऽऽह—**उपयोगात्मने**ति। उपयोगेन्द्रियात्मकेनेत्यर्थः। **लब्धेः** = अर्थग्रहणशक्तिलक्षण-लब्धीन्द्रियस्य।

यथा च वह्न्यादौ दाहादिक्रियानुकूलाः शक्तयोऽतीन्द्रियत्वेनाऽप्रत्यक्षाः तथेयमप्यर्थग्रहणानुकूलोपयोगगता शक्तिरिति परोक्षस्वभावा सा प्रमाणम्, प्रत्यक्षस्वभावं फलज्ञानस्य च प्रमेयत्वाऽभ्युपगमे (?) भवतः—करणस्य परोक्षत्वं फलज्ञानस्य च प्रत्यक्षत्वमभ्युपगच्छतः **प्रभाकरस्य** मते प्रवेशोऽपि प्रसज्यत इत्याह—

**शक्तीनां परोक्षत्वाभ्युपगमेन करण-फलज्ञानयोः परोक्ष-प्रत्यक्षत्वाभ्युपगमे प्राभाकरमतप्रवेशाच्च।**

ननु सर्वस्याऽनेकान्तत्वमभ्युपगच्छतां **जैनानां** मते किञ्चिदपि वस्तु नैकान्तेन प्रत्यक्षमप्रत्यक्षं वा, किन्तु कथञ्चित्। एवं चाऽर्थग्रहणशक्तिरपि पर्यायतः परोक्षाऽपि द्रव्यार्थतः प्रत्यक्षा। स्वपरपरिच्छित्तिलक्षणफलात् कथञ्चिदभिन्नस्याऽऽत्मनः प्रत्यक्षत्वेन तदभिन्नाया अर्थग्रहणशक्तेरपि तदात्मना प्रत्यक्षत्वात्। एतदभिप्रायकमेव 'द्रव्यार्थतो ही'ति तद्वचनम्। एवं च न **प्राभाकर**मतप्रवेशः, तत्र करणज्ञानस्य सर्वथा परोक्षत्वस्य फलज्ञानस्य सर्वथा प्रत्यक्षत्वस्य चाऽभ्युपगमादित्याशङ्कते-

**अथ ज्ञानशक्तिरप्यात्मनि स्वाश्रये परिच्छिन्ने द्रव्यार्थतः प्रत्यक्षेति न दोष इति चेत्;**

**स्वाश्रये** = ज्ञानशक्त्याश्रये ।

यद् हि साक्षात्संवेदनेन स्वात्मना संवेद्यते तदेव स्वसंविदितं भवति यथा सुखादि । ग्रहणशक्तिस्तु नैव संवेदनविषय 'आत्म'द्रव्याभेदात् तथा, यतः सा करणं ज्ञानात्मना भवति, संविदिता तु स्वाश्रयात्मस्वरूपेण । एवं च स्वसंविदितत्वाभावे, घटाद्यर्थज्ञानफलाद्यवगाहि-प्रत्यक्षे सा स्वस्वरूपेण करणतयोल्लिखिता न भवेत्—तद्रूपेण तस्या अप्रत्यक्षत्वात् । न हि यद् द्रव्यार्थतः प्रत्यक्षम्, तस्य पर्यायार्थतः प्रत्यक्षप्रतीतौ स्वस्वरूपेण पर्यायात्मनोल्लेखो भवति । तथा तदुल्लेखाभ्युपगमे, मृदात्मनः कलशस्य प्रत्यक्षकाले कलशाभिन्नमृद्भाने तदात्मना कुशूल-कपालादीनां प्रत्यक्षत्वेन, कलशप्रत्यक्षे तेषामपि कुशूलकपालादिपर्यायात्मनोल्लेखः प्रसज्येतेति प्रतिक्षिपति–

**न, द्रव्यद्वारा प्रत्यक्षत्वेन सुखादिवत् स्वसंविदितत्वाव्यवस्थितेः, 'ज्ञानेन घटं जानामि' इति करणोल्लेखानुपपत्तेश्च, न हि कलशसमाकलनवेलायां द्रव्यार्थतः प्रत्यक्षाणामपि कुशूलकपालादीनामुल्लेखोऽस्तीति ।**

**द्रव्यद्वारा प्रत्यक्षत्वेन** = प्रत्यक्षविषयद्रव्याभिन्नत्वप्रयुक्तप्रत्यक्षत्वोपचारेण । **सुखादिवदिति** । प्रत्यक्षज्ञानस्वरूप-सुखादिपर्यायस्वरूपसुखादेर्यथा स्वसंविदितत्वं न तथेति व्यतिरेकेण दृष्टान्तः ।

तस्मात् **प्राभाकर**मतप्रवेशभयाद्, 'ज्ञानेन घटं जानामी'ति करणोल्लेखानुपपत्तिभयाच्च न लब्धीन्द्रियं प्रमाणम्, किन्तु स्वपरव्यवसायिज्ञानस्वरूमुपयोगेन्द्रियमेव । तस्य प्रमास्वरूपाद-भेदेऽपि तत्तत्पूर्वक्षणवृत्तित्वविशिष्टज्ञानस्वरूपत्वेन करणत्वम्, तत्तदुत्तरक्षणवृत्तित्वविशिष्ट-स्वरूपत्वेन च फलत्वं नाऽनुपपन्नमिति भावः ।

## प्रमाणविभजनम् ।

प्रत्यक्षमेवैकं प्रमाणमिति **चार्वाकाः**, प्रत्यक्षानुमाने द्वे प्रमाणे इति **बौद्धा वैशेषिकाश्च**, प्रत्यक्षानुमानशब्दाः प्रमाणानीति **साङ्ख्याः**, उपमानेन सह तानि चत्वारीति **गौतमीयाः** अर्थापत्त्या सह तानि पञ्चेति **प्राभाकराः**, अनुपलब्ध्या सह तानि षडिति **भाट्ट-वेदान्तिनौ**, एवं सम्भवैतिह्यचेष्टादीन्यपि प्रमाणानि वादिनो मन्यन्ते । ततः प्रमाणे सङ्ख्यायां बह्व्यो विप्रतिपत्तयः । तद्व्यपोहाय प्रतिनियतसङ्ख्याप्रतिपत्तिफलकं प्रमाणविभागमादर्शयति–

**तद् द्विभेदं-प्रत्यक्षं परोक्षं च ।**

**तद्** = उक्तलक्षणलक्षितं प्रमाणम् । **द्विभेदमिति** । द्वौ भेदौ = विशेषौ यस्य तद्

द्विभेदम्, स्वसाक्षाद्व्याप्यसामान्यद्वयकप्रमाणत्ववदिति[१] यावत् । तेन—चाक्षुषादिभेदेन प्रत्यक्ष-ज्ञानव्यक्तीनां स्मरण-प्रत्यभिज्ञान-तर्का-ऽनुमान-शाब्दभेदेन परोक्षव्यक्तीनां बहुत्वसङ्ख्या-योगित्वेऽपि-न क्षतिः ।

व्युत्पत्तिनिमित्ताश्रयेण **प्रत्यक्ष**शब्दार्थं तावदाह-

**अक्षम् = इन्द्रियं प्रतिगतं = कार्यत्वेनाऽऽश्रितं प्रत्यक्षम्,**

**प्रतिगतं = कार्यत्वेनाऽऽश्रित**मित्यर्थकरणेनेन्द्रियत्वावच्छिन्नकारणतानिरूपित-कार्यताश्रयज्ञानं प्रत्यक्षमिति लभ्यते । इन्द्रियत्वं च इन्द्रस्य = आत्मनो लिङ्गत्वम् । **नैयायिकेन** तु शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमिन्द्रियत्वं मनःसाधारण-मुक्तम्, तच्च सिद्धान्ते मनसोऽनिन्द्रियत्वेन तद्गतत्वादतिव्याप्त्योपेक्ष्यम् ।

उक्तव्युत्पत्तिनिमित्तं च पारमार्थिकप्रत्यक्षेऽवध्यादौ नाऽस्तीति तद्गतं **प्रत्यक्ष**-पदव्युत्पत्तिनिमित्तमुपदर्शयितुमाह-

**अथवाऽश्नुते = ज्ञानात्मना सर्वार्थान् व्याप्नोतीत्यौणादिकनिपातनाद् अक्षो जीवः, तं प्रतिगतं प्रत्यक्षम् ।**

सर्वेषामेवाऽऽत्मनां ज्ञानं जगद्विषयकमेव, परं स्वावरणकर्मप्रतिबन्धात् स्वविषयी-भूतमप्यर्थं न प्रकाशयति । यद्विषयावच्छेदेनाऽऽवरणस्य क्षयोपशमादिः तं विषयं प्रकाशयत् प्रतिनियतविषयकमुच्यमानमपि वस्तुस्थित्या सर्वविषयकम् । एवं विषयतासम्बन्धेन ज्ञानस्य वस्तुत्वव्यापकत्वाद्, ज्ञानस्य चाऽऽत्मना समं भेदाभेदस्य सम्बन्धत्वेनाऽऽत्मनः कथञ्चिद-भिन्नत्वमिति ज्ञानात्मना सर्वार्थव्याप्तेर्घटनादगत्याऽऽत्माऽक्षः ।

**तं** = जीवम् । **तं प्रतिगतत्वं** च तन्मात्राधीनतयोत्पत्तिमत्त्वमेव । 'नह्येकं जनक'मिति नियमादात्ममात्राधीनतयोत्पत्तिर्नाऽवध्यादीनामपि, परमात्मातिरिक्तं चक्षुरादिकमवध्यादि-ज्ञानजनने आत्मा नाऽपेक्षते, तज्ज्ञानावरणीयकर्मक्षयोपशमादिकं त्वपेक्षत एव—इत्येताव-तैवाऽऽत्ममात्राधीनत्वमत्र विवक्षितमिति बोध्यम् ।

अत्रेन्द्रियजन्यत्वरूपस्य 'प्रत्यक्ष'पदव्युत्पत्तिनिमित्तस्य 'प्रत्यक्ष'लक्षणत्वे इन्द्रिया-जन्येऽवध्यादिप्रत्यक्षेऽव्याप्तिः । आत्ममात्राधीनतयोत्पत्तिमज्ज्ञानत्वरूपस्य तस्य 'प्रत्यक्ष'-लक्षणत्वे इन्द्रियमपेक्ष्याऽऽत्मजन्ये मत्यादिप्रत्यक्षेऽव्याप्तिरित्याशङ्क्य प्रतिक्षिपति-

---

१. स्वं प्रमाणत्वम्, तत्साक्षाद्व्याप्यं सामान्यद्वयं = प्रत्यक्षत्व-परोक्षत्वे, तद्वत् प्रमाणत्वम्, तद्वत् प्रमाणम् । चाक्षुषत्वादीनां प्रमाणत्वव्याप्यव्याप्यत्वाद् न साक्षाद्व्याप्यत्वम् ।

**न चैवमवध्यादौ मत्यादौ च प्रत्यक्षव्यपदेशो न स्यादिति वाच्यम्,**

**एवं** = अनन्तरोपदर्शितस्य व्युत्पत्तिनिमित्तस्य 'प्रत्यक्ष'लक्षणतयाऽऽश्रयणे । **अवध्यादाविति** । 'आदि'पदाद् मनःपर्यव-केवलयोरुपग्रहः । तेषु इन्द्रियाश्रितत्वलक्षण-व्युत्पत्ति-निमित्तस्याऽभावात् 'प्रत्यक्ष'व्यपदेशो न भवेदित्यर्थः । **मत्यादाविति** । 'आदि'पदात् श्रुत-ज्ञानस्य परिग्रहः । तयोरात्ममात्राधीनज्ञानत्वस्याऽभावात् तन्निमित्तकस्य 'प्रत्यक्ष'व्यपदेशस्याऽभावः स्यादित्यर्थः ।

यद्यपीन्द्रियमनिन्द्रियस्याऽप्युपलक्षकम्, तथा च-इन्द्रियानिन्द्रियान्यतरजन्यत्वात्ममात्राश्रितत्वान्यतरवत्त्वस्य प्रत्यक्षलक्षणत्वे न कुत्राप्यव्याप्तिः, तथापि स्पष्टत्वं लघुभूतं प्रत्यक्षपद-प्रवृत्तिनिमित्तमेव प्रत्यक्षलक्षणम्, तत एव च मतिज्ञानादौ सर्वत्र 'प्रत्यक्ष'व्यपदेशोपपत्तिरित्याशयेन निषेधहेतुमाह—

**यतो व्युत्पत्तिनिमित्तमेवैतत्,**

**एतत्** = अक्षाश्रितत्वम् । **व्युत्पत्तिनिमित्तमेवेति** । 'प्रत्यक्ष'व्युत्पत्तिनिमित्तम्, न तु 'प्रत्यक्ष'पदप्रवृत्तिनिमित्तम् । तदर्थाधिगतये एवकारोपादानम् । किं तर्हि 'प्रत्यक्ष'पदप्रवृत्ति-निमित्तमित्याकाङ्क्षायामाह-

**प्रवृत्तिनिमित्तं तु एकार्थसमवायिनाऽनेनोपलक्षितं स्पष्टतावत्त्वमिति ।**

**प्रवृत्तिनिमित्तमिति** । प्रवृत्तिनिमित्तत्वं च वाच्यत्वे सति वाच्यवृत्तित्वे सति वाच्योपस्थितिप्रकारत्वम् । यथा 'घट'पदस्य घटत्वं प्रवृत्तिनिमित्तम् । तत्र 'घट'पदवाच्यत्वमस्ति— 'घट'पदस्य घटत्वविशिष्टघटव्यक्तिवाचकत्वे घटत्ववाचकत्वस्य सद्भावात्, 'घट'पदवाच्य-घटव्यक्तिवृत्तित्वमप्यस्ति तथा 'घट'पदजन्यघटोपस्थितौ प्रकारत्वमप्यस्ति । तथा 'प्रत्यक्ष'-पदस्य स्पष्टत्वं प्रवृत्तिनिमित्तम्, अर्थात् शक्यतावच्छेदकम् । तत्र स्पष्टताविशिष्टज्ञानवाचकस्य 'प्रत्यक्ष'पदस्य स्पष्टतावाचकत्वस्याऽपि भावेन तद्वाच्यत्वमपि विद्यते । 'प्रत्यक्ष'पदवाच्ये स्पष्टतावति ज्ञाने वृत्तित्वमपि समस्ति । 'प्रत्यक्ष'पदजन्य-स्पष्टताविशिष्टज्ञानोपस्थितौ प्रकार-

---

**'यतो व्युत्पत्ति'**—"अक्षाश्रितत्वं च व्युत्पत्तिनिमित्तं शब्दस्य, न तु प्रवृत्तिनिमित्तम् । अनेन तु अक्षाश्रितत्वेनैकार्थसमवेतमर्थसाक्षात्कारित्वं लक्ष्यते । तदेव शब्दस्य प्रवृत्तिनिमित्तम् । ततश्च यत्किञ्चिदर्थस्य साक्षात्कारि ज्ञानं तत् प्रत्यक्षमुच्यते । यदि त्वक्षाश्रितत्वमेव प्रवृत्तिनिमित्तं स्यादिन्द्रियज्ञानमेव प्रत्यक्षमुच्येत न मानसादि । यथा गच्छतीति गौरिति गमनक्रियायां व्युत्पादितोऽपि गोशब्दो गमनक्रियोपलक्षितमेकार्थसमवेतं गोत्वं प्रवृत्तिनिमित्तीकरोति तथा च गच्छत्यगच्छति च गवि गोशब्दः सिद्धो भवति ।"—न्यायबि० टी० १.३. । स्या० र० पृ० २६० ।

त्वमप्यस्ति । एवं स्पष्टतावत्त्वमेव 'प्रत्यक्ष'लक्षणम् ।

**एकार्थसमवायिना** = स्वाधिकरणवर्तिना । **अनेन** = अक्षाश्रितत्वलक्षणव्युत्पत्तिनिमित्तेन । **उपलक्षितं** = ज्ञायमानम् ।

तथा च अक्षाश्रितत्वरूपव्युत्पत्तिनिमित्तेन सामानाधिकरण्यप्रत्यासत्त्या ज्ञायमानं यत् स्पष्टतावत्त्वं 'प्रत्यक्ष'पदप्रवृत्तिनिमित्तं तदेव 'प्रत्यक्ष'लक्षणम् । अक्षाश्रितत्वमिन्द्रियजन्यत्वादिपर्यवसितं व्युत्पत्तिनिमित्तमेव न प्रवृत्तिनिमित्तं–तस्यैव प्रवृत्तिनिमित्तत्त्वे चक्षुरादिजन्यज्ञानमेव 'प्रत्यक्ष'व्यपदेश्यं स्याद्, न मानसादि । अन्यत्राऽपि व्युत्पत्तिनिमित्तस्य प्रवृत्तिनिमित्तत्वं नाऽभ्युपेयते एव, यथा गच्छतीति गौरिति व्युत्पत्त्या गमनक्रियाकर्तृत्वं 'गो'पदव्युत्पत्तिनिमित्तमपि न 'गो'पदप्रवृत्तिनिमित्तम् । गच्छत्यगच्छति च गवि 'गो'शब्दप्रवृत्तेर्दर्शनेन समानाकारपरिणामलक्षणस्य गोत्वरूपतिर्यक्सामान्यस्यैव सर्वदा गवि वर्त्तमानस्य 'गो'शब्दप्रवृत्तिनिमित्तत्वादिति भावः ।

सकलप्रत्यक्षसाधारणं स्पष्टतास्वरूपं प्रकटयति–

**स्पष्टता चाऽनुमानादिभ्योऽतिरेकेण विशेषप्रकाशनमित्यदोषः ।**

**अनुमानादिभ्य** इत्यत्र 'आदि'पदादागमादीनां परोक्षप्रकाराणामुपग्रहः । **अतिरेकेण** = आधिक्येन = प्रतिनियतवर्णसंस्थानपरिणामादिमत्त्वेन ।

प्रत्यक्षे यथा विषयस्य नियतवर्णसंस्थानादिकमवभासते तथा नाऽनुमानादौ विशेषावभासोऽस्तीति निरुक्तस्पष्टत्ववत्त्वं सर्वत्र प्रत्यक्षे वर्त्तत इति नाऽव्याप्त्यसम्भवौ, अनुमानादावलक्ष्ये च नाऽस्तीत्यतिव्याप्तिरपि नेत्याह–**अदोष** इति ।

एतावता स्पष्टं प्रत्यक्षमिति फलितम् । ततश्च तद्विपरीतं परोक्षमस्पष्टमिति प्राप्तमेव । तत्राऽपि व्युत्पत्तिनिमित्तं सामानाधिकरण्यप्रत्यासत्त्या प्रवृत्तिनिमित्तस्याऽस्पष्टवत्त्वस्योपलक्षकमेव, न तु तदेव लक्षणम्, यतः तदिन्द्रियातिरिक्तजन्यज्ञानत्वं वाऽऽत्मातिरिक्तकारणजन्यज्ञानत्वं वा भवेत्, प्रथमं मानसप्रत्यक्षेऽवध्यादौ अतिप्रसक्तम्, द्वितीयं च इन्द्रियजप्रत्यक्षेऽतिप्रसक्तम्, तदन्यतरवत्त्वं तु गुरुभूतमेव । ततः 'परोक्ष'पदप्रवृत्तिनिमित्तमस्पष्टतावत्त्वमेव 'परोक्ष'लक्षणं युक्तमित्याशयेन 'परोक्ष'पदव्युत्पत्तिनिवेदनपुरस्सरं तल्लक्षणमुपदर्शयति–

---

**'स्पष्टता'–**

"अनुमानाद्यतिरेकेण विशेषप्रतिभासनम् ।
तद्वैशद्यं मतं बुद्धेरवैशद्यमतः परम् ॥"–लघीय० १.४.

**अक्षेभ्योऽक्षाद् वा परतो वर्त्तते इति परोक्षम्, अस्पष्टं ज्ञानमित्यर्थः ।**

**अक्षेभ्य** इति । अत्र 'अक्ष'पदेन चक्षुरादीन्द्रियं विवक्षितम्, तद्बहुत्वाद् बहुवचन-निर्देशः । **अक्षाद्** = आत्मनः, व्यक्त्या भिन्नत्वेऽपि जात्यैकत्वादेकवचननिर्देशः । स्पष्टत्वं विशदत्वम्, तद्विपरीतमस्पष्टत्वमविशदत्वम् । तत्राऽनुमानाद्यतिरेकेण विशेषप्रकाशनं स्पष्टत्व-मित्यत्र न कस्यापि विप्रतिपत्तिः । अनुमानादीत्यादिरूपेण तस्य गुरुभूतत्वेऽपि, 'साक्षा-त्करोमी'त्यनुभवसिद्धविषयताविशेषे निरूपकतासम्बन्धेन[१] सकलप्रत्यक्षनियतस्पष्टत्वम्, तदन्यविषयताविशेषे एव 'परोक्षं वह्न्यादिकमस्पष्टमनुभवामी'त्यनुभवसिद्धमस्पष्टत्वं निरूपक-तासंसर्गेण सकलपरोक्षगतमिति बोध्यम् ।

प्रथमत उद्दिष्टं सामान्यतो लक्षितं च प्रत्यक्षं विभजते-

**प्रत्यक्षं द्विविधं-सांव्यवहारिकं पारमार्थिकं चेति ।**

सांव्यवहारिकं प्रत्यक्षमपारमार्थिकम् । तथा चाऽपारमार्थिकपारमार्थिकभेदेन प्रत्यक्षं द्विविधमित्यर्थः ।

संव्यवहारप्रयोजकत्वात् तत् प्रत्यक्षतया व्यवह्रियते-स्पष्टतया चोपचर्यते, न तु तद् वस्तुगत्या प्रत्यक्षम्—अक्षम् = आत्मानं प्रत्यगतत्वात् । साक्षादात्मसम्पाद्यमेव प्रत्यक्षम्, तदेव च पारमार्थिकम्, तच्चाऽवध्यादिकमेवेत्याशयवान् **सांव्यवहारिक**शब्दार्थोपदर्शनेन प्रथमभेदं स्पष्टयति-

## सांव्यवहारिकप्रत्यक्षनिरूपणम्

**समीचीनो बाधारहितो व्यवहारः प्रवृत्तिनिवृत्तिलोकाभिलापलक्षणः संव्यवहारः, तत्प्रयोजनकं सांव्यवहारिकम्-अपारमार्थिकमित्यर्थः, यथा अस्मदादिप्रत्यक्षम् ।**

**समीचीन** इति । अयं समित्युपसर्गस्याऽर्थः । समीचीनत्वं किमित्यपेक्षायामाह—**बाधारहित** इति । व्यवहारस्वरूपजिज्ञासायामाह-**प्रवृत्तीति** । इष्टसाधनघटादिवस्तुविषय-कचाक्षुषादिप्रत्यक्षेणाऽबाधितघटाद्यानयनादिगोचरप्रवृत्तिलक्षणव्यवहारो जायते, अनिष्टसाधन-सर्पादिगोचरचाक्षुषादिप्रत्यक्षेणाऽबाधितसर्पादिनिकटस्थानगमनादिविषयकनिवृत्तिलक्षणव्यवहारो जायते । कदाचिच्च इष्टानिष्टोपेक्षणीयवस्तुविषयकचाक्षुषादिना परप्रतिबोधनाय तत्प्रतिपादक-वचनोद्गारलक्षणव्यवहार इति भेदेनोपादानम् ।

**तत्प्रयोजनकं** = निरुक्तसंव्यवहारप्रयोजनकम् । उपेक्षणीयवस्तुविषयकप्रत्यक्षे सति

---

१. विशदता विषयनिष्ठा, प्रत्यक्षं तस्या निरूपकमिति निरूपकतासंसर्गेण सा प्रत्यक्षे तिष्ठति ।

तद्वस्तुविषयिणी भवत्युपेक्षा, परं सा न व्यवहार इति तदकथनम् । संव्यवहारप्रयोजनक-प्रत्यक्षत्वरूपव्युत्पत्तिनिमित्तस्य सांव्यवहारिकप्रत्यक्षलक्षणत्वेऽपि न कश्चिद् दोषः । यद्यपि कस्यचित् सहकारिणो वैकल्यात् केनचित् चाक्षुषादिज्ञानेन प्रवृत्त्यादिलक्षणः संव्यवहारो न भवति, तथापि तादृशसंव्यवहारानुकूलशक्तिमत्त्वलक्षण-तज्जनकतावच्छेदकशालित्वेन तज्जन-नयोग्यत्वमस्त्येवेति न तत्राऽव्याप्तिः ।

व्यावहारिकोऽपि घटादिः पारमार्थिको भवत्येवेति सांव्यवहारिकत्वे पारमार्थिकत्व-विरोधाभावात् सामान्यधर्मव्याप्य-परस्परविरुद्धनानाधर्मेण धर्मिप्रतिपादनरूपविभागः प्रत्यक्षस्य सांव्यवहारिकत्व-पारमार्थिकत्वाभ्यामनुपपन्न इत्यत आह-**अपारमार्थिक**मिति । तथाच सांव्यवहारिकत्वमपारमार्थिकत्वमेव, तच्च पारमार्थिकत्वविरुद्धमिति तद्रूपेण विभागो नाऽनुपपन्न इति भावः ।

यच्चाऽपारमार्थिकं प्रत्यक्षम्, तद् वस्तुतः परोक्षमेव । परोक्षत्वापरोक्षत्वयोः परस्पर-विरुद्धत्वेनैकस्य यत्राऽपारमार्थिकत्वं स्वासत्त्वनिबन्धनम्, तत्र द्वितीयस्य स्वसत्त्वनिबन्धनं पारमार्थिकं स्यात् । अतोऽस्मदादिप्रत्यक्षस्य पारमार्थिकपरोक्षत्वमपारमार्थिकप्रत्यक्षत्व-प्रयोजकमुपदर्शयति-

**तद्धीन्द्रियानिन्द्रियव्यवहितात्मव्यापारसम्पाद्यत्वात् परमार्थतः परोक्षमेव ।**

**हि** = यतः, **तत्** = अस्मदादिचाक्षुषादिप्रत्यक्षम् । **इन्द्रियेति** । इन्द्रियानिन्द्रियाभ्यां चक्षुरादिमनोभ्यां व्यवहितो य आत्मव्यापारः, **तत्सम्पाद्यत्वात्** = तत्प्रयोज्यत्वात् । आत्मा इन्द्रियानिन्द्रिययोः प्रेरणे व्याप्रियते, ताभ्यां चेन्द्रियजन्यं मनोजन्यं च ज्ञानं जायते इति परम्परयाऽऽत्मजन्यत्वं तत्र, न तु साक्षादात्मव्यापारजन्यत्वलक्षणपारमार्थिकप्रत्यक्षत्वम् । किन्तु व्यवहितात्मव्यापारप्रयोज्यत्वेन परमार्थतः परोक्षत्वमेवेति निर्गलितोऽर्थः ।

यत्र व्यवहितात्मव्यापारप्रयोज्यत्वं तत्र परोक्षत्वमेव, यथा धूमरूपलिङ्गज्ञानेन जन्यं वह्निरूपलिङ्गिज्ञानम् । तत्र धूमज्ञानेनाऽऽत्मव्यापारस्य व्यवहितत्वम् । तथैवेन्द्रियानिन्द्रिय-जन्यज्ञानेऽपि तद्व्यापारेणाऽऽत्मव्यापारस्य व्यवहितत्वमविशिष्टमिति तद् ज्ञानं परमार्थतः परोक्षमेवेत्याह–

---

**'तद्धीन्द्रिया०'**–"इदमुक्तं भवति-अपौद्गलिकत्वादमूर्त्तो जीवः, पौद्गलिकत्वात् तु मूर्त्तानि द्रव्येन्द्रियमनांसि, अमूर्त्ताच्च मूर्त्तं पृथग्भूतम्, ततस्तेभ्यः पौद्गलिकेन्द्रियमनोभ्यो यद् मतिश्रुतलक्षणं ज्ञानमुपजायते तद् धूमादेरग्न्यादिज्ञानवत् परनिमित्तत्वात् परोक्षम् ।"–विशेषा० बृ० गा० ९०.

**धूमादग्निज्ञानवद् व्यवधानाविशेषात् ।**

'यत् संशयविपर्ययानध्यवसायजातीयं-तत् परोक्षं-यथाऽनुमानाभासः', 'यत् सङ्केतस्मरणादिपूर्वकनिश्चयस्वभावं-तत् परोक्षं-यथा सदनुमान'मित्यनुमानाभ्यामिन्द्रियानिन्द्रियजन्यज्ञानस्य संशयादिजातीयत्वात् सङ्केतस्मरणादिपूर्वकनिश्चयस्वभावत्वाच्च परोक्षत्वं सिध्यतीत्याह-

**किञ्च, असिद्धानैकान्तिकविरुद्धानुमानाभासवत् संशयविपर्ययानध्यवसायसम्भवात्, सदनुमानवत् सङ्केतस्मरणादिपूर्वकनिश्चयसम्भवाच्च परमार्थतः परोक्षमेवैतत् ।**

'यद् इन्द्रियमनोनिमित्तं ज्ञानं-तत् परोक्षं-संशयविपर्ययानध्यवसायानां तत्र सम्भवात्-इन्द्रियमनोनिमित्तासिद्धानैकान्तिकविरुद्धानुमानाभासव'दिति प्रथमः प्रयोगः, 'यद् इन्द्रियमनोनिमित्तं ज्ञानं-तत् परोक्षं-तत्र सङ्केतस्मरणादिपूर्वकनिश्चयसम्भवात्-धूमादेरग्न्याद्यनुमानव'दिति द्वितीयः प्रयोग-इत्येवं प्रयोगरचनाऽन्यत्रोपलभ्यते[१] । तत्र यथा 'यो धूमवान् स वह्निमा'निति उदाहरणवाक्ये धूमस्य हेतुत्वं वह्नेः साध्यत्वं च प्रतीयते, तथा 'यद् इन्द्रियमनोनिमित्तं तत् परोक्ष'मिति प्रयोगेऽपि, इन्द्रियमनोनिमित्तत्वस्य हेतुत्वं परोक्षत्वस्य साध्यत्वं च भवेत् । एवं सति उपरितनप्रयोगद्वये पञ्चम्यन्तं वाक्यं न हेत्ववयवतया सङ्गतं भवेत् । किन्तु 'इन्द्रियमनोनिमित्तत्वमस्तु परोक्षत्वं माऽस्तु' इति व्यभिचारशङ्कायाम्, तन्निवर्तकतर्कोपदर्शनार्थमेतत् ।

परोक्षज्ञाने हि अस्पष्टस्वरूपे बहुतरविशेषानवगाहने-एककोटिव्याप्यदर्शनस्य

---

**'किञ्च, असिद्ध०'**—''प्रयोगः-यद् इन्द्रियमनोनिमित्तं ज्ञानं तत् परोक्षम्, संशयविपर्ययानध्यवसायानां तत्र सम्भवात्, इन्द्रियमनोनिमित्ताऽसिद्धाऽनैकान्तिकविरुद्धानुमानाभासवदिति प्रथमः प्रयोगः । यद् इन्द्रियमनोनिमित्तं ज्ञानं तत् परोक्षम्, तत्र निश्चयसम्भवात्, धूमादेरग्न्याद्यनुमानवत् इति द्वितीयः । ननु निश्चयसम्भवलक्षणो हेतुः अवध्यादिष्वपि वर्त्तत इत्यनैकान्तिक इति चेत्, नैवम्, अभिप्रायापरिज्ञानात्, सङ्केतस्मरणादिपूर्वको हि निश्चयोऽत्र विवक्षितः, तादृशश्चाऽयमवध्यादिषु नाऽस्ति ज्ञानविशेषत्वात्तेषामित्यदोषः ।''—विशेषा० बृ० गा० ९३.

---

१. भाष्यादिष्वेवं प्रयोगद्वयमुपलभ्यते । तत्र कथं विसङ्गत्याशङ्का भवितुं शक्यते, कथं च तन्निराकरणमिति प्रदर्श्यतेऽत्र । 'यदिन्द्रियनिमित्तं तत् परोक्ष'मित्युक्तौ परोक्षत्वस्य साध्यत्वे इन्द्रियमनोनिमित्तत्वस्य हेतुत्वं प्रतीयते । तत्र 'संशयविपर्ययानध्यवसायानां तत्र सम्भवात्, सङ्केतस्मरणादिपूर्वकनिश्चयसम्भवा'दित्येवं पुनर्हेतूपन्यासो नौचित्यावह इत्याशङ्का । 'यत्र धूमः तत्र वह्निः, धूमस्य वह्निजन्यत्वा'दित्यत्र धूमस्य वह्निसाध्यकहेतुत्वेऽपि, 'धूमस्य वह्निजन्यत्वा'दित्युपन्यासो यथा प्रतिकूलशङ्कानिवारकः, तथैवाऽत्रापि 'संशय०' इति कथनं प्रतिकूलशङ्कानिवारकतर्कोपदर्शकमिति बोध्यम् ।

एकप्रकारसाधकस्य प्रकारान्तरबाधकस्य संशयविरोधिनोऽभावात् संशयस्य, विपरीतैककोटि-भासकदोषस्याऽपि सम्भवेन तद्बलाद् विपर्ययस्याऽयथावदर्थप्रतिभासतोऽनध्यवसायस्य चाऽस्ति सम्भवः। प्रत्यक्षे तु पारमार्थिके यथावस्थितार्थावभासके, बहुतरविशेषावभासकत्वेन विशदस्वरूपे, संशयविरोधिनो विशेषदर्शनस्याऽवश्यम्भावेन न संशयस्य, स्पष्टप्रतिभासत्वादेव दोषासंस्पृष्टत्वेन न विपर्ययस्य, तत एव नाऽध्यवसायस्य च सम्भवः-इति वस्तुस्थितौ 'इन्द्रियानिन्द्रियजं ज्ञानं यदि प्रत्यक्षं स्यात्, तर्हि सम्भवत्संशयादिकं न स्याद्-अवध्यादिवत्, परोक्षत्वे तु असिद्धानैकान्तिकविरुद्धानुमानाभासवत् तत्त्वं भवेदपि' तथा 'इन्द्रियानिन्द्रियज-ज्ञानस्य यदि परोक्षत्वं न भवेत्, तदा तत्र सङ्केतस्मरणादिपूर्वकनिश्चयसम्भवोऽपि न सम्भवेत्, प्रत्यक्षेऽवध्यादिनिश्चयस्य सङ्केतस्मरणादिपूर्वकत्वस्यैवाऽभावा'दित्येवंविधयोः तर्कयोः प्रदर्शनार्थं पञ्चम्यन्तद्वयं बोध्यम्।

वस्तुतः परोक्षरूपतया व्यवस्थापितं सांव्यवहारिकप्रत्यक्षं विभजते-

**एतच्च द्विविधम्-इन्द्रियजम्, अनिन्द्रियजं च। तत्रेन्द्रियजं चक्षुरादिजनितम्, अनिन्द्रियजं च मनोजन्म।**

**एतत्** = सांव्यवहारिकप्रत्यक्षम्। **तत्र** = इन्द्रियजानिन्द्रियजयोर्मध्ये। **चक्षुरादी**ति। **आदि**पदात् त्वग्-घ्राण-रसन-श्रोत्राणामुपग्रहः। तथा च चाक्षुषस्पार्शनघ्राणजरासनश्रावणभेदेन पञ्चविधमिन्द्रियजप्रत्यक्षमित्यर्थः। मनसोऽनिन्द्रियतया राद्धान्तेऽभ्युपगमात् तज्जन्यं मानसं प्रत्यक्षमनिन्द्रियजमित्याह–**अनिन्द्रिये**ति। मनसोऽनिन्द्रियाद् जन्म = उत्पत्तिर्यस्य ज्ञानस्य तद् **मनोजन्मे**त्यर्थः।

चक्षुरादिजन्यप्रत्यक्षेऽपि मनसः कारणत्वाद् मनोजन्यप्रत्यक्षत्वस्याऽनिन्द्रियजलक्षणस्य तत्राऽतिव्याप्तिरित्याह–

**यद्यपीन्द्रिजज्ञानेऽपि मनो व्यापिपर्त्ति,**

चक्षुरादिजन्यज्ञाने यद् मनसः कारणत्वम्, तद् न मानसप्रत्यक्षत्वावच्छिन्नकार्यता-निरूपितकारणतारूपम्, किन्त्विन्द्रियजानिन्द्रियजज्ञानसाधारणः सांव्यवहारिकप्रत्यक्षत्व-पारमार्थिकपरोक्षत्वादिलक्षणो यद् इन्द्रियजज्ञानत्वादिव्यापको धर्मः, तद्धर्मावच्छिन्नकार्यता-

---

**'यद्यपि इन्द्रियज'**–"इन्द्रियाणि चक्षुरादीनि, तानि मानसबलाधानसहितानि प्राधान्येन निबन्धनमस्य इति इन्द्रियनिबन्धनम्।"–स्या० र० पृ० ३४४.

निरूपितमनस्त्वावच्छिन्नकारणतारूपम्[१] । तच्च अनिन्द्रियजज्ञानलक्षणे न प्रविष्टम् । प्रविष्टं तु मानसप्रत्यक्षत्वावच्छिन्नकार्यतानिरूपितं यद् इन्द्रियविधया मनोनिष्ठकारणत्वम्, तन्निरूपित-कार्यत्वं न चक्षुरादिजन्यज्ञाने इति न तत्राऽतिव्याप्तिरित्याह—

**तथापि तत्रेन्द्रियस्यैवाऽसाधारणकारणत्वाददोषः ।**

**तथापि** = इन्द्रियजज्ञाने साधारणकारणतया मनसो व्यापारसद्भावेऽपि । **तत्र** = इन्द्रियजज्ञाने । **इन्द्रियस्यैवे**ति । एवकारेण मनसो व्यवच्छेदः ।

इन्द्रियजानिन्द्रियजयोरवान्तरभेदमुपदर्शयति—

**द्वयमपीदं मतिश्रुतभेदाद् द्विधा ।**

**द्वयमपीद**मिति । इन्द्रियजानिन्द्रियजोभयमपि ज्ञानमित्यर्थः । तद् लक्षयति—

**तत्रेन्द्रियमनोनिमित्तं श्रुताननुसारि ज्ञानं मतिज्ञानम्, श्रुतानुसारि च श्रुतज्ञानम् ।**

तथा च-इन्द्रियनिमित्तकं श्रुताननुसारिज्ञानमिन्द्रियजमतिज्ञानम्, मनोनिमित्तकं श्रुताननुसारिज्ञानमनिन्द्रियजमतिज्ञानम्, इन्द्रियनिमित्तकं श्रुतानुसारिज्ञानमिन्द्रियजश्रुतज्ञानम्, मनोनिमित्तकं श्रुतानुसारिज्ञानं चाऽनिन्द्रियजश्रुतज्ञानमित्यर्थः ।

श्रुतानुसारित्वस्वरूपावगतौ श्रुतानुसारित्वरहितत्वं = श्रुताननुसारित्वं सुखेन प्रतिपत्तुं शक्यत इत्यतः श्रुतानुसारित्वस्वरूपमेवोपदर्शयति-

**श्रुतानुसारित्वं च- सङ्केतविषयपरोपदेशं श्रुतग्रन्थं वाऽनुसृत्य वाच्यवाचकभावेन संयोज्य 'घटो घट' इत्याद्यन्तर्जल्पाकारग्राहित्वम् ।**

---

**'श्रुतानुसारित्वं'**—"श्रूयते इति श्रुतं द्रव्यश्रुतरूपं शब्द इत्यर्थः, स च सङ्केतविषय-परोपदेशरूपः श्रुतग्रन्थात्मकश्चेह गृह्यते, तदनुसारेणैव यद् उत्पद्यते तत् श्रुतज्ञानम्, नाऽन्यत् । इदमुक्तं भवति—सङ्केतकालप्रवृत्तं श्रुतग्रन्थसम्बन्धिनं वा घटादिशब्दमनुसृत्य वाच्यवाचकभावेन संयोज्य 'घटो घटः' इत्यन्तर्जल्पाद्याकारमन्तःशब्दोल्लेखान्वितमिन्द्रियादिनिमित्तं यद् ज्ञानमुदेति तत् श्रुतज्ञानमिति । शेषमिन्द्रियमनोनिमित्तमश्रुतानुसारेण यद् अवग्रहादिज्ञानं तद् मतिज्ञानम् इत्यर्थः ।" —विशेषा० बृ० गा० १०० ।

---

१. मनः कार्यद्वये कारणं भवति १. मानसप्रत्यक्षे २. यावत्सांव्यवहारिकप्रत्यक्षे (=इन्द्रियजज्ञाने मानसप्रत्यक्षे च) । तत्र प्रथमे कार्यता मानसप्रत्यक्षत्वावच्छिन्ना, कारणता तु मनस्त्वावच्छिन्ना । द्वितीये कार्यतावच्छेदको धर्मः सांव्यवहारिकप्रत्यक्षत्वं वा इन्द्रियजानिन्द्रियजज्ञानव्यापको यः कोऽपि धर्मो वा, कारणतावच्छेदको धर्मो मनस्त्वावच्छिन्नसहकृतचक्षुरादित्व-मनस्त्वान्यतरः ।

श्रूयते इति श्रुतं शब्दः, स च शाब्दबोधलक्षणभावश्रुतकारणत्वाद् द्रव्यश्रुतम् । स च सङ्केतविषयपरोपदेशरूपो 'घटपदवाच्यो घट' इत्यादिर्द्वादशाङ्ग्यादिग्रन्थरूपश्च । तयोरन्यतर-माश्रित्य '**घटो घट' इत्याद्यन्तर्जल्पाकारग्राहित्वं** = घटादिशब्दं वाचकत्वेन घटाद्यर्थं वाच्यत्वेन च संयोज्य 'घटो घट' इत्यादिरूपान्तःशब्दोल्लेखसमन्विताकारावगाहित्वम् । तदेव इन्द्रिय-निमित्तकज्ञाने अनिन्द्रियजज्ञाने च श्रुतानुसारित्वम् ।

**सङ्केतेति** । 'अस्मात् पदादयमर्थो बोद्धव्य' इति, 'इदं पदममुमर्थं बोधयत्वि'ति वेच्छा सङ्केतः । यथा 'घटपदाद् घटरूपोऽर्थो बोद्धव्य' इत्याकारिका, 'घटपदं घटरूपार्थं बोधयत्वि'-त्याकारिका वेच्छा सङ्केतः । स च[१]–शब्दार्थयोर्वाच्यवाचकभावाभिन्नस्वाभाविकः सम्बन्धः, यद्बलात् शब्दोऽर्थं प्रत्याययति, तस्य शब्दोत्पत्तिकाले शब्दोत्पादकसामग्रीतोऽर्थोत्पत्ति-कालेऽर्थोत्पादकसामग्रीतः कथञ्चिच्छब्दार्थोभयाभिन्नस्वभावस्योत्पादेन यावच्छब्दार्थकालं भावेऽपि, अनभिव्यक्तिदशायां नाऽर्थप्रत्ययोत्पादकत्वमिति तदभिव्यक्तये–स्वीक्रियते ।

सङ्केतेन यो विषयः प्रतिपाद्येत स सङ्केतविषयः, स चाऽसौ परोपदेशः = आप्तोपदेश-श्चेति **सङ्केतविषयपरोपदेशः** तम्, अस्य **अनुसृत्येत्य**नेनाऽन्वयः । उपदेशश्च प्रवृत्तिनिमित्त-सामानाधिकरण्येन[२] वाच्यताबोधकं वाक्यम्, यथा 'कोकिलः पिकपदवाच्य' इति । अतिदेश-स्तु प्रवृत्तिनिमित्तोपलक्षकधर्मसामानाधिकरण्येन वाच्यताबोधकं वाक्यम्, यथा 'गोसदृशो गवयपदवाच्य' इति । श्रुतग्रन्थं च तत्तच्छब्दस्य तत्तदर्थवाचकत्वादिप्रतिपादकमागमम् ।

तदनुसरणं च यथोपदेशो यथा वा श्रुतग्रन्थो येन रूपेणाऽर्थे येन रूपेण शब्दस्य वाच्यवाचकभावमवबोधयति, तथैव प्रमाता पुरुषः शब्दार्थौ वाच्यवाचकभावेन संयोजयति । अन्यथासंयोजने तदनुसरणं न भवेदिति बोध्यम् ।

तथा च चक्षुरादिना वाच्यवाचकभावसंयोजनेन 'घटो घट'इत्याद्यन्तःशब्दोल्लेखान्वित-ज्ञानं तद् इन्द्रियजश्रुतम्, मनसा च तथाविधं ज्ञानमनिन्द्रियजश्रुतम् । यच्चोक्तदिशा इन्द्रियेण वाच्यवाचकभावसंयोजनमन्तरेणैव घटाद्यर्थज्ञानं तत् श्रुताननुसारित्वादिन्द्रियजमतिज्ञानम्, ईदृशमेव च मनसा जातमनिन्द्रियजमतिज्ञानमिति भावः ।

---

१. अस्य 'स्वीक्रियते'इत्यनेनाऽन्वयः । तथा चाऽयमर्थः-शब्दार्थयोर्वाच्यवाचकभावसम्बन्धः, तत्सम्बन्धबलेन शब्दादर्थबोधो भवति । स च कथञ्चिदर्थ-शब्दोभयाभिन्नस्वभावो यावच्छब्दार्थकालं तिष्ठति । अतः सङ्केतेन तस्योत्पत्तिर्न भवति, परमभिव्यक्तिर्भवति । यतोऽनभिव्यक्तिदशायां तत्सम्बन्धेन शब्दादर्थबोधो न भवति, ततः सङ्केतावश्यकता ।

२. यस्य शब्दस्य यत् प्रवृत्तिनिमित्तं तत्सामानाधिकरण्यं तच्छब्दवाच्यतायां भवति । एवं प्रवृत्तिनिमित्तोप-लक्षकधर्मोऽपि वाच्यतासमानाधिकरणो भवति ।

ननूक्तरीत्या श्रुतानुसारित्वनिर्वचने शब्दोल्लेखसहितं ज्ञानं श्रुतज्ञानम्, शब्दोल्लेखविनिर्मुक्तं च मतिज्ञानमिति प्राप्तम् । तथा च ज्ञानोपादानत्वेन ज्ञानत्वोपचरिते, अव्यक्तज्ञानस्वरूपत्वाद् वास्तविकज्ञानस्वरूपे वा व्यञ्जनावग्रहे, स्वरूपनामादिकल्पनारहित-सामान्यग्रहणरूपेऽर्थावग्रहे च शब्दोल्लेखविनिर्मुक्तत्वाद् मतिज्ञानत्वस्य सम्भवेऽपि, मतिज्ञानविशेषतया प्रसिद्धे ईहापायादौ शब्दोल्लेखसहितत्वस्यैव भावेन तद्विनिर्मुक्तत्वस्यैवाऽभावाद् मतिज्ञानलक्षणस्य तस्य तत्राऽव्याप्तिः । श्रुतलक्षणस्य शब्दोल्लेखसहितत्वस्य च तत्र भावात् तस्याऽतिव्याप्तिरपि । एवमङ्गानङ्गप्रविष्टेषु श्रुतभेदेष्ववग्रहादिरूपताया अपि भावाद् मतिज्ञानलक्षणस्याऽतिव्याप्तिरित्याशङ्कते—

**नन्वेवमवग्रह एव मतिज्ञानं स्यान्न त्वीहादयः, तेषां शब्दोल्लेखसहितत्वेन श्रुतत्वप्रसङ्गादिति चेत्,**

---

**'नन्वेवम्'**—"अत्राऽऽह कश्चित्-ननु यदि शब्दोल्लेखसहितं श्रुतज्ञानमिष्यते, शेषं तु मतिज्ञानम्, तदा वक्ष्यमाणस्वरूपोऽवग्रह एव मतिज्ञानं स्यात्, न पुनः ईहापायादयः-तेषां शब्दोल्लेखसहितत्वात्, मतिज्ञानभेदत्वेन चैते प्रसिद्धाः, तत्कथं श्रुतज्ञानलक्षणस्य नाऽतिव्याप्तिदोषः ?

अपरञ्च, अङ्गानङ्गप्रविष्टादिषु 'अक्खर सन्नी सम्मं, साईयं खलु सपज्जवसियं च' [आव० नि० १९] इत्यादिषु च श्रुतभेदेषु मतिज्ञानभेदस्वरूपाणामवग्रहेहादीनां सद्भावात् सर्वस्यापि तस्य मतिज्ञानत्वप्रसङ्गात्, मतिज्ञानभेदानां चेहापायादीनां साभिलापत्वेन श्रुतज्ञानत्वप्राप्तेः उभयलक्षणसङ्कीर्णतादोषश्च स्यात् ।

तदयुक्तम्, यतो यद्यपीहादयः साभिलापाः तथापि न तेषां श्रुतरूपता, श्रुतानुसारिण एव साभिलापज्ञानस्य श्रुतत्वात् ।

अथ अवग्रहादयः श्रुतनिश्रिता एव सिद्धान्ते प्रोक्ताः, युक्तितोऽपि चेहादिषु शब्दाभिलापः सङ्केतकालाद्याकर्णितशब्दानुसरणमन्तरेण न सङ्गच्छते, अतः कथं न तेषां श्रुतानुसारित्वम् ?

तदयुक्तम्, पूर्वं श्रुतपरिकर्मितमतेरेवैते समुपजायन्त इति श्रुतिनिश्रिता उच्यन्ते, न पुनर्व्यवहारकाले श्रुतानुसारित्वमेतेष्वस्ति । सङ्केतकालाद्याकर्णितशब्दपरिकर्मितबुद्धीनां व्यवहारकाले तदनुसरणमन्तरेणापि विकल्पपरम्परापूर्वकविविधवचनप्रवृत्तिदर्शनात् । न हि पूर्वप्रवृत्तसङ्केता अधीतश्रुतग्रन्थाश्च व्यवहारकाले प्रतिविकल्पन्ते—'एतच्छब्दवाच्यत्वेनैतत् पूर्वं मयाऽवगतम्' इत्येवंरूपं सङ्केतम्, तथा 'अमुकस्मिन् ग्रन्थे एतदित्थमभिहितम्' इत्येवं श्रुतग्रन्थं चाऽनुसरन्तो दृश्यन्ते, अभ्यासपाटववशात् तदनुसरणमन्तरेणाऽप्यनवरतं विकल्पभाषणप्रवृत्तेः । यत्र तु श्रुतानुसारित्वं तत्र श्रुतरूपताऽस्माभिरपि न निषिध्यते । तस्मात् श्रुतानुसारित्वाभावेन श्रुतत्वाभावादीहापायधारणानां सामस्त्येन मतिज्ञानत्वात् न मतिज्ञानलक्षणस्याऽव्याप्तिदोषः,

**एवम्** = शब्दोल्लेखसहितत्वस्य श्रुतलक्षणत्वे शब्दोल्लेखरहितत्वस्य च मतिलक्षणत्वे आश्रीयमाणे । **तेषां**- ईहादीनाम् ।

श्रुतानुसारिण एव साभिलापकज्ञानस्य श्रुतत्वेन—ईहादीनां श्रुताननुसारित्वेन साभिलापत्वेऽपि न श्रुतत्वम् । सङ्केतकाले एतच्छब्दवाच्यतया गुरुणाऽऽप्तेन केनचिद्वोपदिष्टमेतदिति ग्रहणे सति, तदानीमवग्रहादीनां श्रुतानुसारित्वेन सिद्धान्तोक्तत्वेऽपि; व्यवहारकाले एतच्छब्दवाच्यतयैतद् मया पूर्वमवगतमित्येवंरूपसङ्केताननुसरणेऽपि, अमुकस्मिन् ग्रन्थे एतदित्थमभिहित मित्येवंरूपश्रुतग्रन्थाननुसरणेऽपि, अभ्यासपाटववशाद् विकल्पपरम्परापूर्वकविविधवचनप्रवृत्तित ईहापायधारणानां साभिलापानां सम्भवेन, न तेषां व्यवहारकाले सङ्केतविषयपरोपदेशं श्रुतग्रन्थं वाऽनुसृत्य वाच्यवाचकभावसंयोजनपुरस्सरमन्तःशब्दोल्लेखान्विितार्थावगाहित्वमिति न तत्र श्रुतलक्षणस्याऽतिव्याप्तिः, न वा तद्विरहितत्वलक्षणमतिलक्षणस्याऽव्याप्तिरपि । अङ्गानङ्गप्रविष्टादिश्रुतभेदेषु तु पूर्वं शब्दाद्यवग्रहणकालेऽवग्रहादयो जायमानाः श्रुताननुसारित्वाद् मतिज्ञानविशेषा एव, यस्तु तेषां श्रुतानुसारी ज्ञानविशेषः स श्रुतज्ञानमेव । इत्थं च मतिविशेषेष्वीहादिषु श्रुतानुसारित्वाभावेन श्रुतज्ञानत्वाभावाद् नोक्तमतिश्रुतलक्षणयोः सङ्कीर्णताऽपीति समाधत्ते—

**न, श्रुतनिश्रितानामप्यवग्रहादीनां सङ्केतकाले श्रुतानुसारित्वेऽपि व्यवहारकाले तदननुसारित्वाद्, अभ्यासपाटववशेन श्रुतानुसरणमन्तरेणाऽपि विकल्पपरम्परापूर्वकविविधवचनप्रवृत्तिदर्शनात् ।**

**सङ्केतकाले** = सङ्केतविषयपरोपदेशं श्रुतग्रन्थं वाऽनुसृत्य शब्दार्थयोर्वाच्यवाचकभावेन

---

श्रुतरूपतायाश्च श्रुतानुसारिष्वेव साभिलापज्ञानविशेषेषु भावान्न श्रुतज्ञानलक्षणस्याऽतिव्याप्तिकृतो दोषः ।

अपरं च, अङ्गानङ्गप्रविष्टादिश्रुतभेदेषु मतिपूर्वमेव श्रुतमिति वक्ष्यमाणवचनात्, प्रथमं शब्दाद्यवग्रहणकाले अवग्रहादयः समुपजायन्ते । एते च अश्रुतानुसारित्वात् मतिज्ञानम् । यस्तु तेष्वङ्गानङ्गप्रविष्टश्रुतभेदेषु श्रुतानुसारी ज्ञानविशेषः स श्रुतज्ञानम् । ततश्च अङ्गानङ्गप्रविष्टादिश्रुतभेदानां सामस्त्येन मतिज्ञानत्वाभावात्, ईहादिषु च मतिभेदेषु, श्रुतानुसारित्वाभावेन श्रुतज्ञानत्वासम्भवात् नोभयलक्षणसङ्कीर्णतादोषोऽप्युपपद्यत इति सर्वं सुस्थम् । तस्मादवग्रहापेक्षया अनभिलापत्वात् ईहाद्यपेक्षया तु साभिलापत्वात् साभिलापानभिलापं मतिज्ञानम्, अश्रुतानुसारि च, सङ्केतकालप्रवृत्तस्य श्रुतग्रन्थसम्बन्धिनो वा शब्दस्य व्यवहारकाले अननुसरणात् । श्रुतज्ञानं तु साभिलापमेव श्रुतानुसार्येव च, सङ्केतकालप्रवृत्तस्य श्रुतग्रन्थसम्बन्धिनो वा श्रुतस्य व्यवहारकाले अवश्यमनुसरणात् इति स्थितम् ।''—विशेषा० बृ० गा० १०० ।

प्रकारविशेष्यभावेनाऽवबोधनसमये । **व्यवहारकाल** इति । 'एतच्छब्दवाच्यतयैतत् पूर्वं मयाऽवगत'मित्येवंरूपसङ्केतानुसरणस्य, 'अमुकस्मिन् ग्रन्थे एतदित्थमभिहित'मित्येवंरूप-श्रुतग्रन्थानुसरणस्य चाऽभावेऽपि, 'घटमानये'ति वाक्यादितोऽभ्यासपाटवादिवशाद्, घटादि-पदोल्लिखितघटाद्यर्थविषयकावबोधलक्षण-घटाद्यानयनादिविषयकप्रवृत्त्याद्यात्मकव्यवहारो-न्मुखावबोधसमये इत्यर्थः ।

श्रुतनिश्रितानामप्यवग्रहादीनां व्यवहारकाले कथं श्रुताननुसारित्वम्, येन तेषां मतिज्ञान-त्वमभ्युपगन्तुमुचितमित्यपेक्षायामाह—**अभ्यासपाटववशेने**ति । अनभ्यासदशायामयमर्थ एतच्छब्दस्य वाच्य इति तावद् नाऽवधारयति यावद् 'अस्य शब्दस्याऽस्मिन्नर्थे सङ्केतेऽमुकेन पुंसा कृते, अयमर्थोऽस्य शब्दस्य वाच्यः, एतत् पदमस्याऽर्थस्य वाचक'मित्येवं न स्मरति । ततश्चाऽनभ्यासदशायां वाच्यवाचकभावसंयोजनलब्धार्थावगाहनविशेषस्वरूपाणामवग्रहादीनां श्रुतानुसारिणां श्रुतत्वेऽपि, अभ्यासदशायां—शब्दश्रवणतः तद्वाच्यवाचकभावस्य झटित्युद्बुद्ध-संस्कारवशात् स्मरणे तत्तच्छब्दवाच्यार्थावग्रहादेरुक्तसङ्केतानुसरणमन्तरेणाऽपि भावात्, शब्दा-श्रवणेऽप्यर्थस्येन्द्रियसाम्मुख्यादिलक्षणेन्द्रियसन्निकृष्टत्वे तद्वाचकशब्दस्योद्बुद्धसंस्कारतः स्मरणे तत्संसृष्टार्थावग्रहादेश्च भावात् तस्य मतिज्ञानत्वमेवेति भावः ।

**अङ्गोपाङ्गादौ शब्दाद्यवग्रहणे च श्रुताननुसारित्वाद् मतित्वमेव, यस्तु तत्र श्रुतानुसारी प्रत्ययः, तत्र श्रुतत्वमेवेत्यवधेयम् ।**

अङ्गोपाङ्गादिश्रुतविशेषे तु पूर्वं शब्दादिस्वरूपावग्रहणम्, शब्दादिस्वरूपस्यैवेहापाय-धारणाः, ते च श्रुताननुसारित्वाद् मतिज्ञानविशेषा एवेति । तदनन्तरं तु यत् तत्तत्पदार्थ-सङ्केतानुस्मरणपुरस्सरं पदार्थ-वाक्यार्थ-महावाक्यार्थैदम्पर्यार्थपरिज्ञानं तत् सर्वं श्रुतानुसारित्वाद् भवति श्रुतमित्याह-**यस्त्वि**ति । **तत्र** = अङ्गोपाङ्गादौ ।

तदयमत्र निष्कर्षः-साभिलापं सत् श्रुतानुसार्येव यद् ज्ञानं तत् श्रुतज्ञानम् । यत्त्वभ्यास-पाटवादिवशात् श्रुतानुसरणमन्तरेणाऽपीहादिकं साभिलापं तत् श्रुताननुसारित्वाद् मतिज्ञानम्, यच्चाऽवग्रहज्ञानं साभिलापमपि न भवति तदपि मतिज्ञानम् । तदुभयमिन्द्रियजमनिन्द्रियजं सांव्यवहारिकप्रत्यक्षमिति ।

ननु सिद्धान्ते ज्ञानं पञ्चविधमाम्नातं—मतिज्ञानम्, श्रुतज्ञानम्, अवधिज्ञानम्, मनःपर्यव-ज्ञानम्, केवलज्ञानं चेति । तथा मतिविपर्ययो मत्यज्ञानम्, श्रुतविपर्ययो श्रुताज्ञानम्, अवधि-विपर्ययो विभङ्गज्ञानं चेत्येतानि त्रीण्यज्ञानानि मिथ्यादृष्टेर्भवन्ति । एवं ज्ञानमात्रस्य मत्यादि-पञ्चस्वेवाऽन्तर्भावो वाच्य इति वस्तुस्थितिः । अथ प्रत्यक्षस्य सांव्यवहारिकभेदे मतिश्रुतयोः,

पारमार्थिकभेदे चाऽवधि-मनःपर्यव-केवलज्ञानानां समावेशात्, प्रमाणस्य प्रत्यक्षात्मकप्रथमभेदे एव ज्ञानाशेषभेदानां परिसमाप्तिरिति प्रमाणस्य परोक्षाख्यः पञ्चविधज्ञानस्वरूपातिक्रान्तो द्वितीयभेदोऽलीकतामेवाऽऽकलयतीति चेद्;

न, मतिज्ञानस्य श्रुतज्ञानस्य च बहवो विशेषाः स्वस्वावरणक्षयोपशमविशेषप्रभवा भवन्ति । तत्र ये इन्द्रियानिन्द्रियलक्षणसहकारिविशेषसहकृतस्वावरणक्षयोपशमविशेषसमुत्थाः, ते परोक्षस्वभावा अपि सांव्यवहारिकप्रत्यक्षव्यपदेशमासादयन्तः प्रत्यक्षस्य प्रथमभेदेऽन्तर्भवन्ति, तत्राऽन्तर्भूतश्च मतिज्ञानविशेषोऽवग्रहेहापायधारणाभेदात् चातुर्विध्यमञ्चति, श्रुतज्ञानविशेषश्च लब्ध्यक्षरादिरूपेण व्यवह्रियते । अन्ये च स्मरणादयो मतिज्ञानविकल्पाः श्रुतज्ञानविकल्पाश्च सांव्यवहारिकप्रत्यक्षव्यपदेशानर्हाः, ते परोक्षप्रमाणतामेवाऽऽत्मनि भजन्ते इति प्रमाणस्य परोक्षाख्यो द्वितीयभेदो नाऽनुपपन्न इति बोध्यम् ।

इन्द्रियानिन्द्रियजभेदेन द्विविधं यद् मतिज्ञानं प्राक् प्रस्तुतं तस्याऽवग्रहादिभेदेन चातुर्विध्यमुपदर्शयति-

## मतिज्ञाननिरूपणम्

**मतिज्ञानमवग्रहेहापायधारणाभेदात् चतुर्विधम् ।**

विशेषानवगाहित्वमेव ज्ञानेऽपकृष्टत्वम्, तदेव चेहादितोऽवग्रहे विशेष इत्यभिसन्धानेनाऽवग्रहं निर्वक्ति—

**अवकृष्टो ग्रहः-अवग्रहः । स द्विविधः-व्यञ्जनावग्रहः, अर्थावग्रहश्च ।**

यद्यपि[१] सामान्यमात्रावगाहित्वलक्षणमप्यपकृष्टत्वं वक्तुं शक्यते, तथापि तस्य सामान्येतरानवगाहित्वे सति सामान्यावगाहित्वरूपतया, तत्र सत्यन्तमात्रस्य 'व्यञ्जनावग्रहस्य ज्ञानोपादानत्वेनोपचरितज्ञानत्व'मिति पक्षेऽपि तत्र सम्भवेन, लाघवात् तस्यैवाऽपकृष्टत्वरूपत्वमत्र बोध्यम् ।

व्यञ्जनावग्रहार्थावग्रहभेदेन तस्य द्वैविध्यं प्रकटयति-**स द्विविध** इति । **सः** = अवग्रहः ।

व्यञ्जनावग्रहपदेन किमुच्यते इत्यपेक्षायां योगलभ्य एवाऽर्थोऽस्य विवक्षितः । योगेन च उपकरणेन्द्रिय-तद्विषययोः सम्बन्धोऽर्थावग्रहादव्यवहितपूर्वकालीनो व्यञ्जनावग्रहशब्देन प्रतिपाद्यते इति स एव व्यञ्जनावग्रह इत्याह—

---

१. अत्राऽपकृष्टत्वं सामान्येतरानवगाहित्वरूपमुक्तम्, तत्र सामान्यमात्रग्राहित्वमित्येव किमर्थं नोक्तमिति शङ्कायामुत्तरमाह-सामान्यमात्रग्राहित्वस्य सामान्येतरानवगाहित्वे सति सामान्यग्राहित्वमित्यर्थः पर्यवसितः । स च व्यञ्जनावग्रहस्य ज्ञानोपादानत्वादेवोपचरितज्ञानत्वम् = अज्ञानत्वमिति पक्षे न सम्भवति-तत्र सामान्यग्राहित्वस्याऽभावादिति ।

**व्यज्यते = प्रकटीक्रियतेऽर्थोऽनेनेति व्यञ्जनं-कदम्बपुष्पगोलकादिरूपाणामन्तर्निर्वृत्तीन्द्रियाणां शब्दादिविषयपरिच्छेदहेतु-शक्तिविशेषलक्षणमुपकरणेन्द्रियम्, शब्दादिपरिणतद्रव्यनिकुरम्बम्, तदुभयसम्बन्धश्च ।**

**अर्थः** = शब्दादिपरिणतद्रव्यनिकुरम्बलक्षणो विषयः, **अनेन** = अन्तर्निर्वृत्तीन्द्रियाणां[१] शक्तिविशेषलक्षणेनोपकरणेन्द्रियेण, **प्रकटीक्रियते** = स्पष्टं ज्ञायते, **इति** = एवंस्वरूपव्युत्पत्त्या, **व्यञ्जनं** = व्यञ्जनपदप्रतिपाद्यम् । अस्यो**पकरणेन्द्रिय**मित्यनेनाऽन्वयः । **शब्दादी**ति । उपकरणेन्द्रियस्वरूपावगतये एतत् । शक्तिर्निराश्रया न सम्भवतीति तदाश्रयावगतये—**अन्तर्निर्वृत्ती**ति । एतत्स्वरूपपरिचयायोक्तं—**कदम्बे**ति ।

व्यज्यते = प्रकटीक्रियतेऽर्थोऽनेनेति करणव्युत्पत्त्या व्यञ्जनमुपकरणेन्द्रियम्, व्यज्यते = प्रकटीक्रियते इति कर्मव्युत्पत्त्या व्यञ्जनमर्थोऽपीत्याशयेनाऽऽह-**शब्दादिपरिणतद्रव्यनिकुरम्ब**मिति । अत्र आदिशब्देन रसगन्धस्पर्शानां ग्रहणम्, न तु चक्षुर्मनोविषयस्य रूपादेः, तयोरप्राप्यकारित्वेन व्यञ्जनावग्रहाभावात् । शब्दादिरूपेण परिणतानि द्रव्याणि भाषावर्गणादीनि, तेषां **निकुरम्बम्** = अन्यतमम् । 'निकुरम्ब'शब्दस्य समुदायवाचकत्वेऽपि तत्समुदायस्य न कस्यचिदिन्द्रियस्य विषयत्वमिति लक्षणाऽऽश्रीयते, अथवैकैकस्याऽपि समुदायरूपत्वमनेकप्रचितत्वेन सुसङ्गतमेवेति लक्षणाऽनाश्रयणीयेति ।

**तदुभयसम्बन्धश्च** = इन्द्रियार्थोभयसम्बन्धश्च । चकाराद् यद्यपि व्यञ्जनं सम्बध्यते-

---

'**व्यज्यते**'—"तत्र कदम्बकुसुमगोलकाकारमांसखण्डादिरूपाया अन्तर्निर्वृत्तेः शब्दादिविषयपरिच्छेदहेतुः यः शक्तिविशेषः, स उपकरणेन्द्रियम् । शब्दादिश्च श्रोत्रादीन्द्रियाणां विषयः । आदिशब्दाद् रसगन्धस्पर्शपरिग्रहः । तद्भावेन परिणतानि च तानि भाषावर्गणादिसम्बन्धीनि द्रव्याणि च शब्दादिपरिणतद्रव्याणि । उपकरणेन्द्रियं च शब्दादिपरिणतद्रव्याणि च, तेषां परस्परं सम्बन्ध उपकरणेन्द्रियशब्दादिपरिणतद्रव्यसम्बन्धः—एष तावद् व्यञ्जनमुच्यते । अपरञ्च, इन्द्रियेणाऽपि अर्थस्य व्यज्यमानत्वात् तदपि व्यञ्जनमुच्यते । तथा, शब्दादिपरिणतद्रव्यनिकुरम्बमपि व्यज्यमानत्वात् व्यञ्जनमभिधीयते इति । एवमुपलक्षणव्याख्यानात् त्रितयमपि यथोक्तं व्यञ्जनमवगन्तव्यम् । ततश्च इन्द्रियलक्षणेन व्यञ्जनेन शब्दादिपरिणतद्रव्यसम्बन्धस्वरूपस्य व्यञ्जनस्याऽवग्रहो व्यञ्जनावग्रहः, अथवा तेनैव व्यञ्जनेन शब्दादिपरिणतद्रव्यात्मकानां व्यञ्जनानामवग्रहो व्यञ्जनावग्रह इति । उभयत्रापि एकस्य व्यञ्जनशब्दस्य लोपं कृत्वा समासः ।"—विशेषा० बृ० गा० १९४ ।

---

१. इन्द्रियस्वरूपस्य विशेषपरिचयार्थं 'निर्वृत्त्युपकरणे द्रव्येन्द्रियम् ॥ (२.१७) लब्ध्युपयोगौ भावेन्द्रियम् ॥ (२.१८) इति तत्त्वार्थाधिगमसूत्रद्वयवृत्तिरवलोकनीया ।

अर्थस्य प्रकटीकरणे इन्द्रियार्थसम्बन्धस्याऽपि कारणत्वेन, असाधारणकारणत्वलक्षणकरणत्वस्य तत्राऽपि भावतः, करणव्युत्पत्त्या व्यञ्जनपदस्य तत्राऽपि प्रवृत्तिसम्भवात्; तथापि व्यञ्जनपदेनैव तदुभयसम्बन्धस्याऽपि ग्रहणे, अवग्रहपदेन ततोऽन्यदेव ज्ञानं वक्तव्यं स्यात्, ततश्चाऽज्ञान-रूपस्येन्द्रियार्थसम्बन्धस्य व्यञ्जनावग्रहत्वाप्राप्त्या '**अथाज्ञानमयमि**'त्युत्तरशङ्कानुत्थानं स्याद्, अतो 'व्यञ्जनावग्रह' इत्यत्र शेषो बोध्यः । तथा च तदुभयसम्बन्धः पुनर्व्यञ्जनावग्रहो भवतीत्यर्थः ।

व्यञ्जनपदेन करणव्युत्पत्त्या इन्द्रियस्य कर्मव्युत्पत्त्याऽर्थस्य चावबोधेऽपि व्यञ्जनावग्रहशब्देन कथं तदुभयसम्बन्धलाभ इत्यपेक्षायामाह-

**ततो व्यञ्जनेन व्यञ्जनस्याऽवग्रहो व्यञ्जनावग्रह इति मध्यमपदलोपी समासः ।**

**ततः** = व्यञ्जनावग्रहशब्देनेन्द्रियार्थोभयसम्बन्धस्य विवक्षितत्वाद्, **व्यञ्जनेन** = इन्द्रियेण, **व्यञ्जनस्य** = शब्दाद्यर्थस्य, **अवग्रहः** = सम्बन्धः ।

अथवेन्द्रियार्थसम्बन्धोऽपि चकाराद् व्यञ्जनतयैव परिगृह्यते, शेषश्च नाऽऽद्रियते । इत्थं सति व्यञ्जनावग्रहपदेन ज्ञानविशेषस्य कथं लाभ इत्यपेक्षायामाह—**तत** इति । **ततः** = इन्द्रियार्थोभयसम्बन्धानां व्यञ्जनत्वाद्, **व्यञ्जनेन** = इन्द्रियेणेन्द्रियार्थसम्बन्धेन च, **व्यञ्जनस्य** = अर्थस्य, **अवग्रहः** = अव्यक्तज्ञानम् । पूर्वं सहार्थे तृतीया, इदानीं करणे, तथा च पूर्वं[१] प्रतियोगित्वानुयोगित्वान्यतरसम्बन्धार्था षष्ठी, इदानीं[२] विषयविषयिभावलक्षणसम्बन्धार्था सा ।

व्यञ्जनावग्रहस्याऽव्यक्तज्ञानत्वेनाऽर्थावग्रहाद् भेदः, अर्थविषयकत्वभावाभावाभ्यां व्यक्तत्वाव्यक्तत्वाभ्यां विशेषात् । यद्यपि नैश्चयिकार्थावग्रहस्याऽव्यक्तत्वमेव तथाप्यस्य[३] ज्ञानत्वाभ्युपगमपक्षे एतदपेक्षया तस्य व्यक्तत्वस्याऽप्युररीकरणीयत्वादिति ध्येयम् ।

नन्वर्थावग्रहपूर्ववर्त्तिनि इन्द्रियार्थसम्बन्धकाले ज्ञानानुपलम्भाद् व्यञ्जनावग्रहोऽर्थेन्द्रिय-सन्निकर्षरूप एव स्यात्, स च कथं ज्ञानरूपस्य मतिज्ञानविशेषस्याऽवग्रहस्य विशेषो भवेदित्याशङ्कते—

---

१. 'इन्द्रियेण शब्दाद्यर्थस्य सम्बन्ध' इत्यर्थकरणे । तथा च इन्द्रियप्रतियोगिकार्थानुयोगिकोऽर्थानुयोगिकेन्द्रिय-प्रतियोगिको वा सम्बन्ध इत्यर्थः ।

२. 'इन्द्रियार्थसम्बन्धेनाऽर्थस्याऽव्यक्तज्ञान'मित्यर्थकरणे । तथाच व्यञ्जनविषयकमव्यक्तज्ञानमित्यर्थः ।

३. अस्य = व्यञ्जनावग्रहस्य ।

**अथ अज्ञानमयं-बधिरादीनां श्रोत्रशब्दादिसम्बन्धवत् तत्काले ज्ञानानुपलम्भादिति चेद्,**

**अयं** = व्यञ्जनावग्रहः । अबधिरादिश्रोत्रशब्दादिसम्बन्धस्य व्यञ्जनावग्रहत्वात् पक्षान्तर्भूतत्वेन, तस्यैव तदज्ञानत्वसाधने दृष्टान्तता न युक्तेत्यत आह—**बधिरादीनामिति** । बधिरादीनां श्रोत्रेन्द्रियलक्षणोपकरणेन्द्रिय-शब्दादिस्वरूपार्थसन्निकर्षकाले किमपि ज्ञानं नाऽनुभूयते, अननुभूयमानत्वाच्च तद् नाऽस्तीति न तत्र व्यञ्जनावग्रह इष्यते, उत्तरकालेऽर्थावग्रहाभावेन तत्कल्पनाऽसम्भवात् । तथा प्रकृतेऽबधिरादीनां श्रोत्रादीन्द्रियशब्दादिविषयसन्निकर्षकाले न किमपि ज्ञानमनुभूयते, अननुभूयमानत्वात् तदपि नाऽस्ति । यश्च तदानीमस्तीन्द्रियार्थसन्निकर्षः सोऽज्ञानत्वादेव व्यञ्जनावग्रहो न भवितुमर्हतीति शङ्कितुरभिप्रायः ।

यद्यपि तदानीं ज्ञानं नोपलभ्यते, तथाप्यर्थावग्रहाद्युत्पादनार्थमिन्द्रियसन्निकर्ष उपादीयते, तदभावे श्रोत्रादिजन्यार्थावग्रहादेरेवाऽभावात् । अतो ज्ञानोपादानत्वाद् ज्ञानार्थमुपादीयमानत्वादिन्द्रियसन्निकर्षे ज्ञानत्वमुपचर्यते । बधिरादीनां च नोत्तरकालं ज्ञानमुत्पद्यते इति तत्र न ज्ञानत्वोपचारः । एवमुपचरितज्ञानत्वस्वभावोऽज्ञानात्माऽपीन्द्रियार्थसन्निकर्षो व्यञ्जनावग्रह इति समाधत्ते—

**न, ज्ञानोपादानत्वेन तत्र ज्ञानत्वोपचाराद्,**

**ज्ञानोपादानत्वेनेति** । ज्ञानार्थमुपादानं यस्य तद् ज्ञानोपादानम्, तत्त्वेन ज्ञानार्थमुपादीयमानत्वेन ज्ञाननिमित्तत्वेनेति यावत्, तेनाऽज्ञानस्य ज्ञानोपादानत्वाभावेऽपि न क्षतिः ।

**तत्र** = इन्द्रियार्थसन्निकर्षे ।

ननु यद्युपचरितज्ञानत्वेऽपि व्यञ्जनावग्रहत्वं, तदा निमित्तान्तरस्याऽपि तत्त्वं भवेद्, न वाऽज्ञानस्य ज्ञानत्वमुपचर्य ज्ञानविशेषभेदमध्ये परिगणनं परीक्षाक्षमं भवेदित्यत आह—

**अन्तेऽर्थावग्रहरूपज्ञानदर्शनेन तत्कालेऽपि चेष्टाविशेषाद्यनुमेयस्वप्नज्ञाना-**

---

**'अथ अज्ञानम्'**—"स व्यञ्जनावग्रहोऽज्ञानं-ज्ञानं न भवति, यथा हि बधिरादीनामुपकरणेन्द्रियस्य शब्दादिविषयद्रव्यैः सह सम्बन्धकाले न किमपि ज्ञानमनुभूयते, अननुभूयमानत्वाच्च तन्नाऽस्ति, तथेहापीति भावः । अत्रोत्तरमाह-यस्य ज्ञानस्याऽन्ते तज्ज्ञेयवस्तूपादानात् तत एव ज्ञानमुपजायते तद् ज्ञानं दृष्टम्, यथाऽर्थावग्रहपर्यन्ते तज्ज्ञेयवस्तूपादानत ईहासद्भावादर्थावग्रहो ज्ञानम् । जायते च व्यञ्जनावग्रहस्य पर्यन्ते तज्ज्ञेयवस्तूपादानात् तत एवाऽर्थवग्रहज्ञानम्, तस्माद् व्यञ्जनावग्रहो ज्ञानम् ।"—विशेषा० बृ० गा० १९५ ।

"तदेवं व्यञ्जनावग्रहे यद्यपि ज्ञानं नाऽनुभूयते, तथापि ज्ञानकारणत्वादसौ ज्ञानम्, इत्येवं

**दितुल्याव्यक्तज्ञानानुमानाद् वा, एकतेजोऽवयववत् तस्य तनुत्वेनाऽनुपलक्षणात् ।**

**अन्ते** = इन्द्रियार्थोभयसम्बन्धानन्तरं, **तत्काले** = इन्द्रियार्थसम्बन्धकाले । बधिरादीनां तु श्रोत्रशब्दादिसम्बन्धानन्तरमर्थावग्रहरूपज्ञानस्याऽदर्शनेन न तत्कालेऽव्यक्तज्ञानकल्पनमित्याशयः ।

नन्वव्यक्तज्ञानमन्यत्र न क्वापि दृश्यते इति प्रकृतेऽपि तादृशज्ञानकल्पनाऽदृष्टचरी न भद्रेत्यत आह—**चेष्टे**ति । सुप्तस्य चेष्टाविशेषं दृष्ट्वा तन्निकटस्थः तदीयं स्वप्नमनुमिनोति, सुप्तश्च तदानीं जायमानमपि स्वप्नज्ञानमव्यक्तत्वाद् नाऽवधारयति, सुप्तोत्थितः पुनः तच्चेष्टानुमिततदीयज्ञानकेन पुंसा तथा प्रतिबोध्यमानः कथयत्यपि 'किञ्चित् किञ्चिदनुभवन् तदानीमहमासम्, न तु तद् ज्ञानं व्यक्तमतः किं मया तदानीं दृष्टमिति न स्मरामी'ति । एवं चाऽव्यक्तमपि यथा तद् ज्ञानं तथेदमपि व्यञ्जनावग्रहपदवाच्यमिन्द्रियार्थसन्निकर्षकाले समस्तीति ।

अत्र-यज्ज्ञेयवस्तूपादानतो यदनन्तरं ज्ञानमुपजायते तद् ज्ञानम्, यथाऽर्थावग्रहज्ञेयवस्तूपादानतोऽर्थावग्रहानन्तरमीहाज्ञानं प्रादुर्भवतीत्यर्थावग्रहो ज्ञानम्, तथा व्यञ्जनावग्रहज्ञेयवस्तूपादानतो व्यञ्जनावग्रहानन्तरं भवत्यर्थावग्रह इति व्यञ्जनावग्रहो ज्ञानमित्यनुमानप्रयोगः ।

ननु प्रकाशस्वभावे ज्ञानेऽव्यक्तता नोत्पद्यते, न हि प्रकाशस्वभावेऽव्यक्तता क्वचिदपि

---

व्यञ्जनावग्रहे ज्ञानाभावमभ्युपगम्योक्तम् । साम्प्रतं ज्ञानाभावोऽपि तत्राऽसिद्ध एवेति दर्शयन्नाह"-**'तत्कालेऽपि'**—"तस्य व्यञ्जनसम्बन्धस्य कालेऽपि तत्राऽनुपहतेन्द्रियसम्बन्धिनि व्यञ्जनावग्रहे ज्ञानमस्ति, केवलं एकतेजोऽवयवप्रकाशवत् तनु-अतीवाऽल्पमिति, अतोऽव्यक्तं स्वसंवेदनेनाऽपि न व्यज्यते । बधिरादीनां पुनः स व्यञ्जनावग्रहो ज्ञानं न भवतीत्यत्राऽविप्रतिपत्तिरेव, अव्यक्तस्याऽपि च ज्ञानस्याऽभावात् ।"—विशेषा० बृ० गा० १९६ ।

"परः सासूयमाह—ननु कथं ज्ञानम्, अव्यक्तं च इत्युच्यते ?, तमःप्रकाशाद्यभिधानवद् विरुद्धत्वाद् नेदं वक्तुं युज्यते इति भावः । अत्रोत्तरम्—सुप्तमत्तमूर्च्छितादीनां सूक्ष्मबोधवदव्यक्तं ज्ञानमुच्यते इति न दोषः । सुप्तादयः स्वयमपि तद् आत्मीयविज्ञानं नाऽवबुध्यन्ते—न संवेदयन्ति, अतिसूक्ष्मत्वात् ।"—विशेषा० बृ० गा० १९७ ।

"तर्हि तत् तेषामस्तीति एतत् कथं लक्ष्यते ?, इत्याह—सुप्तादयोऽपि हि स्वप्नायमानाद्यवस्थायां केचित् किमपि भाषमाणा दृश्यन्ते, शब्दिताश्चौघतो वाचं प्रयच्छन्ति, सङ्कोचविकोचाऽङ्गभङ्ग-जृम्भित-कूजित-कण्डूयनादिचेष्टाश्च कुर्वन्ति, न च तास्ते तदा वेदयन्ते, नापि च प्रबुद्धाः स्मरन्ति । तर्हि कथं तच्चेष्टाभ्यस्तेषां ज्ञानमस्ति इति लक्ष्यते ? यस्मात् कारणात् नाऽमतिपूर्वास्ता वचनादिचेष्टा विद्यन्ते, किन्तु मतिपूर्विका एव, अन्यथा काष्ठादीनामपि तत्प्रसङ्गात् ।"—विशेषा० बृ० गा० १९८ ।

दृष्टेत्यत आह—**एकेति** । प्रचुरतराः तेजोऽवयवाः प्रकाशस्वभावा यद्यपि दृश्यन्त एव, तथाप्येकः तेजोऽवयवोऽतिसूक्ष्मः प्रकाशस्वभावोऽपि न दर्शनपथमुपयाति, तथा व्यञ्जनावग्रहो ज्ञान-स्वभावत्वेन प्रकाशस्वभावोऽप्यतीवाल्पत्वेनाऽव्यक्तं तद् ज्ञानं स्वसंवेदनेनाऽपि । न व्यक्तमपि व्यज्यते इति भावः ।

**तस्य** = व्यञ्जनावग्रहस्य, **तनुत्वेन** = अतिसूक्ष्मत्वेन, **अनुपलक्षणात्** = स्वसंवेदने सत्यपि तेन व्यक्तमनवभासनात् । तत् स्वसंविदितमपि न भवतीति तु न वाच्यम्, ज्ञानमात्रस्य जडेभ्यो वैलक्षण्यार्थं स्वसंविदितत्वस्याऽवश्यमभ्युपेयत्वात्, अन्यथा सर्वथाऽभासमाने तस्मिन् जडत्वस्यैवाऽऽपत्तेरिति बोध्यम् ।

व्यञ्जनावग्रहस्य भेदं दर्शयति—

**स च नयनमनोवर्जेन्द्रियभेदात् चतुर्धा,**

**स** = व्यञ्जनावग्रहः । **नयनमनोवर्जेन्द्रियेति** । नयनमनोभिन्नेत्यर्थः । **चतुर्धेति** । श्रावण-घ्राणज-रासन-त्वाचव्यञ्जनावग्रहा इत्यर्थः ।

नयनमनसोः कुतो न व्यञ्जनावग्रह इत्यपेक्षायामाह—

**नयनमनसोरप्राप्यकारित्वेन व्यञ्जनावग्रहासिद्धेः,**

विषयेण सह संयुज्य ज्ञानलक्षणकार्यकारित्वं श्रोत्रादीन्द्रियाणां प्राप्यकारित्वम् । नयनमनसोस्तु स्वविषयेण सह संयोगलक्षणसम्बन्धमन्तरेणैव स्वकार्यकारित्वमित्यप्राप्य-कारित्वेन तयोर्व्यञ्जनावग्रहासिद्धेरित्यर्थः ।

**अन्यथा तयोर्ज्ञेयकृतानुग्रहोपघातपात्रत्वे जलानल-दर्शनचिन्तनयोः क्लेद-दाहापत्तेः ।**

---

**'स च नयन०'**—''इदमुक्तं भवति-विषयस्य इन्द्रियस्य च यः परस्परं सम्बन्धः प्रथममुपश्लेषमात्रम्, तद् व्यञ्जनावग्रहस्य विषयः । स च विषयेण सहोपश्लेषः प्राप्यकारिष्वेव स्पर्शन-रसन-घ्राण-श्रोत्रलक्षणेषु चतुरिन्द्रियेषु भवति, न तु नयनमनसोः । अतस्ते वर्जयित्वा शेषस्पर्शनादीन्द्रियचतुष्टयभेदाच्चतुर्विध एव व्यञ्जनावग्रहो भवति ।

कुतः पुनरेतान्येव प्राप्यकारीणि ? इत्याह—उपघातश्चाऽनुग्रहश्चोपघातानुग्रहौ तयोर्दर्शनात्—कर्कशकम्बलादिस्पर्शने त्वक्क्षणनाद्युपघातदर्शनात्, चन्दनाङ्गनाहंसतूलादिस्पर्शने तु शैत्याद्यनु-ग्रहदर्शनात् । नयनस्य तु निशितकरपत्र-सेल्ल-भल्लादिवीक्षणेऽपि पाटनाद्युपघातानवलोकनात्, चन्दनागुरुकर्पूराद्यवलोकनेऽपि शैत्याद्यनुग्रहाननुभवात् । मनसस्तु वह्न्यादिचिन्तनेऽपि दाहाद्युप-घातादर्शनात्, जलचन्दनादिचिन्तायामपि च पिपासोपशमाद्यनुग्रहासम्भवाच्च ।''—विशेषा० बृ० गा० २०४ ।

**अन्यथा** = चक्षुर्मनसोः प्राप्यकारित्वाभ्युपगमे । **तयोः** = चक्षुर्मनसोः । **जलेति** । चक्षुषा जलस्य दर्शने मनसा जलस्य चिन्तने च जलेन संयुक्तयोः चक्षुर्मनसोर्जलरूपज्ञेय-कृतक्लेदलक्षणोऽनुग्रहः, चक्षुषाऽनलस्य दर्शने मनसाऽनलस्य चिन्तने चाऽनलेन संयुक्तयोः चक्षुर्मनसोरनललक्षणज्ञेयकृतदाहरूप उपघातश्च प्रसज्येतेत्यर्थः ।

चक्षुषो ज्ञेयकृतानुग्रहोपघातौ क्वचिद् दृश्येते एवेत्युक्तापादानं नाऽनिष्टमिति शङ्कते—

**रविचन्द्राद्यवलोकने चक्षुषोऽनुग्रहोपघातौ दृष्टावेवेति चेद्,**

सूर्यावलोकने यदि चक्षुषः सूर्येण संयोगः तदा सकृद् रविदर्शनेऽपि चक्षुष उपघातः स्याद्, न च तथा भवति, अनवरतसूर्यावलोकने तु सूर्यकिरणा एव चक्षुर्देशं प्राप्ताः तं तापयन्तीति, एवं चन्द्रदर्शने तु उपघाताभावत एवाऽनुग्रहाभिमान इति न चक्षुषो रविचन्द्रदेशं प्रति गमनेनाऽनुग्रहोपघाताविति समाधत्ते—

**न, प्रथमावलोकनसमये तददर्शनाद्, अनवरतावलोकने च प्राप्तेन रविकिरणा-दिनोपघातस्य, नैसर्गिकसौम्यादिगुणे चन्द्रादौ चाऽवलोकने उपघाताभावादनुग्रहाभि-मानस्योपपत्तेः ।**

**प्रथमेति** । सूर्यावलोकनेनोपघातस्य चन्द्रावलोकनेनाऽनुग्रहस्य चाऽदर्शनादित्यर्थः ।

मनसोऽपि विषयविशेषचिन्तने यौ अनुग्रहोपघातौ दृश्येते तौ न मनसः, किन्तु जीवस्यैव तौ, इति न ताभ्यां मनसोऽपि प्राप्यकारित्वसिद्धिरित्याह—

---

'**रविचन्द्र०**'—"अथ परो हेतोरसिद्धतामुद्भावयन्नाह—जल-घृत-नीलवसन-वनस्पतीन्दु-मण्डलाद्यवलोकनेन नयनस्य परमाश्वासलक्षणोऽनुग्रहः समीक्ष्यते, सूर-सितभित्त्यादि-दर्शने तु जलविगलादिरूप उपघातः सन्दृश्यते ।"—विशेषा० बृ० २०९ ।

'**न, प्रथमावलोकन०**'—"नैतदेवम्—अभिप्रायापरिज्ञानात्, यतः प्रथमत एव विषय-परिच्छेदमात्रकालेऽनुग्रहोपघातशून्यता हेतुत्वेनोक्ता, पश्चात्तु चिरमवलोकयतः प्रतिपत्तुः प्राप्तेन रविकरादिना, चन्द्रमरीचि-नीलादिना वा मूर्त्तिमता निसर्गत एव केनाप्युपघातकेन, अनुग्राहकेन च विषयेणोपघातानुग्रहौ भवेतामपि इति ।"—विशेषा० बृ० २११ ।

"नहि वयमेतद् ब्रूमो यदुत चक्षुषः कुतोऽपि वस्तुनः सकाशात् कदाचित् सर्वथैव अनुग्रहोपघातौ न भवतः । ततो रविकरादिना दाहाद्यात्मकेन उपघातवस्तुना परिच्छेदानन्तरं पश्चाच्चिरमवलोकयतः प्रतिपत्तुः चक्षुः प्राप्य-समासाद्य स्पर्शनेन्द्रियमिव दह्येत तथा यत् स्वरूपेणैव सौम्यं शीतलं शीतरश्मि वा जलघृतचन्द्रादिकं वस्तु, तस्मिंश्चिरमवलोकिते उपघाताभावादनुग्रहमिव मन्येत चक्षुः, को दोषः ? ॥"—विशेषा० बृ० गा० २१० ।

**मृतनष्टादिवस्तुचिन्तने इष्टसङ्गमविभवलाभादिचिन्तने च जायमानौ दौर्बल्योरः-क्षतादि-वदनविकासरोमाञ्चोद्गमादिलिङ्गकावुपघातानुग्रहौ न मनसः,**

जायमानावित्यस्य **उपघातानुग्रहावित्यनेनाऽन्वयः** । मृतनष्टादिवस्तुचिन्तने दौर्बल्योरः-क्षतादिलिङ्गक उपघातः, इष्टसङ्गमविभवलाभादिचिन्तने वदनविकासरोमाञ्चोद्गमादि-लिङ्गकोऽनुग्रहश्च न मनस इत्यर्थः ।

अत्र-'मनः-मृतनष्टादिवस्तुचिन्तननिमित्तकोपघातवत्-मृतनष्टादिवस्तुचिन्तनानन्तरं दौर्बल्योरःक्षतादिमत्त्वात्,' 'मनः-इष्टसङ्गमविभवलाभादिचिन्तननिमित्तकानुग्रहवत्-इष्ट-सङ्गमविभवलाभादिचिन्तनानन्तरं वदनविकासरोमाञ्चोद्गमादिमत्त्वा'दिति प्रयोगौ द्रष्टव्यौ ।

यदीमावुपघातानुग्रहौ न मनसः तर्हि कस्य तौ ? नेमौ निराश्रयौ सम्भवत इति जिज्ञासायामाह—

**किन्तु मनस्त्वपरिणतानिष्टेष्टपुद्गलनिचयरूपद्रव्यमनोऽवष्टम्भेन हृन्निरुद्धवायु-भेषजाभ्यामिव जीवस्यैवेति न ताभ्यां मनसः प्राप्यकारित्वसिद्धिः ।**

मनस्त्वरूपेण परिणतानि यान्यनिष्टेष्टपुद्गलनिचयरूपाणि द्रव्याणि तद्रूपं यद् मनः तदवष्टम्भेन = तदात्मकनिमित्तेन जीवस्यैवोपघातानुग्रहौ इत्यर्थः । अन्यावष्टम्भेन जीवस्योप-घातानुग्रहौ भवत इत्यत्र निदर्शनमाह—**हृन्निरुद्धे**ति । हृदि निरुद्धः कफादिदोषप्राबल्येना-ऽवरुद्धोऽध ऊर्ध्वं च गन्तुमसमर्थः तत्रैव गोलादिरूपपरिणामेनाऽवस्थितो य उदानादिवायुः तेन जीवस्योपघातो वायूपशामकभेषजेनाऽनुग्रहश्च यथा तथेत्यर्थः ।

विषयदेशे मनोगमनस्य प्रतीत्या विषयीक्रियमाणत्वात् प्राप्यकारित्वमेव मनस इत्या-शङ्कते—

---

**'मृतनष्ट०'**—"यः शोकाद्यतिशयात् देहापचयरूपः आर्त्तादिध्यानातिशयाद् हृद्रोगादि-स्वरूपश्चोपघातः, यश्च पुत्रजन्माद्यभीष्टप्राप्तिचिन्तासमुद्भूतहर्षादिरनुग्रहः, स जीवस्य भवन्नपि चिन्त्यमानविषयात् मनसः किल परो मन्यते, तस्य जीवात् कथञ्चिदव्यतिरिक्तत्वात् । ततश्चैवं मनसोऽनुग्रहोपघातयुक्तत्वात् तच्छून्यत्वलक्षणो हेतुरसिद्धः ।"—विशेषा० बृ० गा० २१९ ।

"तदेतत्सर्वं परस्याऽसम्बद्धभाषितमिवेति दर्शयन्नाह-मनस्त्वपरिणतानिष्टपुद्गलनिचयरूपं द्रव्यमनः अनिष्टचिन्ताप्रवर्त्तनेन जीवस्य देहदौर्बल्याद्यापत्त्या हृन्निरुद्धवायुवदुपघातं जनयति, तदेव च शुभपुद्गलपिण्डरूपं तस्याऽनुकूलचिन्ताजनकत्वेन हर्षाद्यभिनिर्वृत्त्या भेषजवदनुग्रहं विधत्त इति । अतो जीवस्यैतौ अनुग्रहोपघातौ द्रव्यमनः करोति ।"—विशेषा० बृ० गा० २२० ।

**ननु यदि मनो विषयं प्राप्य न परिच्छिनत्ति तदा कथं प्रसुप्तस्य 'मेर्वादौ गतं मे मन' इति प्रत्यय इति चेद्,**

अत्र—"मनः-विषयं प्राप्य परिच्छिनत्ति-प्रसुप्तस्य 'मेर्वादौ गतं मे मन' इति प्रत्ययस्य तथैवोपपत्ते"रिति प्रयोगो ज्ञेयः ।

प्रसुप्तस्य स्वस्वप्नानुभवदशायां भवति प्रतीतिः 'अहमिदानीं मेरुशिखरेऽनुपमकुसुम-परिमलामोदमनुभवन्नस्मी'ति, परं तच्छरीरं शयनदेशस्थितमेव तन्निकटसंस्थितैः सर्वैरपि प्रमातृभिरनुभूयते इत्यवश्यमेवाऽभ्युपगन्तव्यम् । यदुत तच्छरीरं तद्देशस्थितमेव मेरुशिखरगततया प्रतीयते इति तज्ज्ञानं भ्रमो यथा, तथा मनोऽपि शरीरान्तर्गतमेव मेर्वादिगततया प्रतीयते इति तज्ज्ञानमसत्यमेवेति नाऽतो मनसो प्राप्यकारित्वसिद्धिरिति समाधत्ते—

**न, मेर्वादौ शरीरस्येव मनसो गमनस्वप्नस्याऽसत्यत्वाद्,**

शरीरमपि सुप्तस्य मेरुदेशादिगमनस्वप्नदर्शनसमये मेर्वादौ गच्छत्येवेति दृष्टान्ता-सिद्धिरित्याशङ्कायामाह—

**अन्यथा विबुद्धस्य कुसुमपरिमलाद्यध्वजनितपरिश्रमाद्यनुग्रहोपघातप्रसङ्गात् ।**

**अन्यथा** = तदानीं शरीरस्य मेर्वादिदेशगमने, **विबुद्धस्य** = स्वप्नमनुभूय प्रबोधदशा-मुपगतस्य, कुसुमपरिमलाघ्राणजनितामन्दानन्दलक्षणानुग्रहस्याऽतिदूरमेरुशिखरगमनागमन-प्रयुक्तातिशीघ्रायासभ्रान्तशरीराङ्गोपाङ्गपीडाप्रभवदुःखौघलक्षणोपघातस्य च प्रसङ्गात् । न च तदानीं कुसुमपरिमलकणिकाऽप्याघ्रायते, न वाऽध्वजपरिश्रमलेशोऽपि समस्तीति, न स्वप्नकाले मेर्वादौ शरीरगमनम्, न वा मनसोऽपि गमनमित्यप्राप्यकार्येव मन इत्यर्थः ।

ननु विबुद्धस्याऽनुग्रहोपघाताभावात् स्वप्नस्याऽसत्यत्वमिति न ततो मनसो मेरुगमन-सिद्धिरिति भवदभिप्रायो न युक्तो-विबुद्धस्य स्वप्नानुभूतसुखरागलिङ्गहर्षस्य स्वप्नानुभूत-

---

**'ननु यदि'**—"ननु जाग्रदवस्थायां मा भूद् मनसो विषयप्राप्तिः, स्वापावस्थायां तु भवत्वसौ अनुभवसिद्धत्वात्-तथाहि 'अमुत्र मेरुशिखरादिगतजिनायतनादौ मदीयं मनो गतम्' इति सुप्तैः स्वप्नेऽनुभूयत एव-इत्याशङ्क्य स्वप्नेऽपि मनसः प्राप्यकारितामपाकर्तुमाह-इह 'मदीयं मनोऽमुत्र गतम्' इत्यादिरूपो यः सुप्तैरुपलभ्यते स्वप्नः, स यथोपलभ्यते न तथारूप एव, तदुपलब्धस्य मनोमेरुगमनादिकस्याऽर्थस्याऽसत्यत्वात् । कथम् ? यथा कदाचिदात्मीयं मनः स्वप्ने मेर्वादौ गतं कश्चित् पश्यति, तथा कोऽपि शरीरमात्मानमपि नन्दनतरुकुसुमावचयादि कुर्वन्तं तद्गतं पश्यति, न च तत् तथैव, इह स्थितैः सुप्तस्य तस्याऽत्रैव दर्शनात्, द्वयोश्चाऽऽत्मनोरसम्भवात्, कुसुम-परिमलाद्यध्वजनितपरिश्रमाद्यनुग्रहोपघाताभावाच्च ।—विशेषा० बृ० गा० २२४ ।

दुःखद्वेषलिङ्गविषादस्य च दर्शनेनाऽनुग्रहोपघातस्य भावात् । यतः-

स्वप्ने दृष्टो मयाऽद्य त्रिभुवनमहितः पार्श्वनाथः शिशुत्वे,
द्वात्रिंशद्भिः सुरेन्द्रैरहमहमिकया स्नाप्यमानः सुमेरौ ।
तस्माद् मत्तोऽपि धन्यं नयनयुगमिदं येन साक्षात् स दृष्टो,
द्रष्टव्यो यो महीयान् परिहरति भयं देहिनां संस्मृतोऽपि ॥

एतत्पद्यतो विबुद्धस्य स्वप्नानुभूतसुखरागलिङ्गहर्षस्य, तथा-

प्राकारत्रयतुङ्गतोरणमणिप्रेङ्खत्प्रभाव्याहता,
नष्टाः क्वाऽपि रवेः करा द्रुततरं यस्यां प्रचण्डा अपि ।
तां त्रैलोक्यगुरोः सुरेश्वरवतीमास्थायिकामेदिनीं,
हा ! यावत् प्रविशामि तावदधमा निद्रा क्षयं मे गता ॥

इत्यस्मात् पद्याद् विबुद्धस्य स्वप्नानुभूतदुःखद्वेषलिङ्गविषादस्य चाऽवगतेरित्याशङ्कते-

**ननु स्वप्नानुभूतजिनस्नात्रदर्शन-समीहितार्थालाभयोरनुग्रहोपघातौ विबुद्धस्य सतो दृश्येते एवेति चेद्,**

स्वप्नानुभूतजिनस्नात्रदर्शनतोऽनुग्रहः स्वप्नानुभूतसमीहितार्थालाभत उपघातश्च, **विबुद्धस्य सतः** = जाग्रद्दशामुपगतस्य सतः पुरुषस्योपलभ्येते एवेत्यर्थः ।

सुखानुभवादिविषयकविज्ञानलक्षणात् स्वप्नज्ञानादुत्पद्यमाना हर्षविषादादयो नाऽपलपितुं शक्याः । जाग्रद्दशायामपि केषाञ्चिद् वस्तुत इष्टविषयस्याऽभावेऽपि स्वोत्प्रेक्षितसुखानुभवादिविषयकज्ञानाद् हर्षस्य, द्विष्टविषयस्याऽभावेऽपि स्वोत्प्रेक्षितद्वेषविषयानुभवविज्ञानाद् दुःखस्य भावादिति स्वप्नविज्ञानकृतावनुग्रहोपघातौ स्यातां नाम । भोजनादिक्रियाफलं तु तृप्त्यादिकं स्वप्नविज्ञानाद् न भवत्येव, स्वप्ने सम्यगोदनमोदकादिभोजनादिकमात्मीयमनुभूय विबुद्धस्य भोजनफलतृप्त्यादिलक्षणानुग्रहादेरदर्शनात् । स्वप्नविज्ञानात् तद्भावे तु कल्प्येताऽपि मनसः प्राप्तिकारिता, न चैवमिति समाधत्ते -

---

**'ननु स्वप्नानु०'**–"अत्र विबुद्धस्य सतस्तद्गतानुग्रहोपघातानुपलम्भादित्यस्य हेतोरसिद्धतोद्भावनार्थं परः प्राह-इह कस्यचित्पुरुषस्य स्वप्नोपलम्भानन्तरं विबुद्धस्य सतः स्फुटं दृश्यन्ते हर्षविषादादयः । तत्र–'स्वप्ने दृष्टे...' (रत्नप्रभावद्) इत्यादिस्वप्नानुभूतसुखरागलिङ्गं हर्षः, तथा 'प्राकारत्रय....' (रत्नप्रभावद्) इत्यादिकः स्वप्नानुभूतदुःखद्वेषलिङ्गं विषादः इति विबुद्धस्याऽनुग्रहोपघातानुपलम्भात् इत्यसिद्धो हेतुः ।"–विशेषा० बृ० गा० २२६ ।

**दृश्येतां स्वप्नविज्ञानकृतौ तौ, स्वप्नविज्ञानकृतं क्रियाफलं तु तृप्त्यादिकं नास्ति, यतो विषयप्राप्तिरूपा प्राप्यकारिता मनसो युज्येतेति ब्रूमः ।**

स्वप्नविज्ञानकृतं तृप्त्यादिकक्रियाफलं नाऽस्तीत्यर्थः । तृप्तीत्यनेन स्वप्नोपलभ्यमान-भोजनादिक्रियाजन्यानुग्रहस्य कथनम्, आदिपदात् शत्रुकृतस्वशिरःकृन्तनजन्यस्य शिरोध-रादितः शोणितादिनिस्यन्दनलक्षणोपघातस्य परिग्रहः ।

ननु जाग्रति केलिगृहादावेकान्तगृहे रूपयौवनलावण्यसम्भृतया कामिन्या निधुवनक्रीडां कुर्वाणस्य कामिनो व्यञ्जनविसर्गः प्राप्तकामिनीसम्पर्कादेव भवति, नान्यथेति 'यत्र शुक्रविसर्गः तत्राऽवश्यं कामिनीसम्पर्क' इति व्याप्तिरवध्रियते । स्वप्ने च जाग्रदवस्थानुभूतकामिनीं तत्समान-गुणामन्यां वा कामिनीं निधुवनक्रीडाकलितामतिदृढालिङ्गननिपीडितकुचतटामनुभवतो यूनो यत् शुक्रस्खलनं भवति तद् नाऽन्तरेण कामिनीसम्पर्केणेति तत्प्राप्तिरवश्यमेवेति कथं न प्राप्यकारित्वं मनसः ? क्रियाफलस्य शुक्रविसर्गस्य स्वप्नव्यपगमानन्तरमप्युपलम्भादित्याशङ्कते-

**क्रियाफलमपि स्वप्ने व्यञ्जनविसर्गलक्षणं दृश्यत एवेति चेत्;**

---

**'दृश्येताम्'**-"अत्रोत्तरमाह-स्वप्ने सुखानुभवादिविषयं विज्ञानं स्वप्नविज्ञानं तस्मादुत्प-द्यमाना हर्षविषादादयो न विरुद्ध्यन्ते—न तान् वयं निवारयामः जाग्रदवस्थाविज्ञानहर्षादिवत् । तथाहि—दृश्यन्ते जाग्रदवस्थायां केचित् स्व[य]मुत्प्रेक्षितसुखानुभवादिज्ञानाद् हृष्यन्तः, द्विषन्तो वा, ततश्च दृष्टस्य निषेद्धुमशक्यत्वात् स्वप्नविज्ञानादपि नैतन्निषेधं ब्रूमः । तर्हि किमुच्यते भवद्भिः ? क्रिया भोजनादिका, तस्याः फलं तृप्त्यादिकम्, तत्पुनः स्वप्नविज्ञानाद् नास्त्येव, इति ब्रूमः । यदि ह्येतत् तृप्त्यादिकं भोजनादिक्रियाफलं स्वप्नविज्ञानाद् भवेत् तदा विषयप्राप्तिरूपा प्राप्यकारिता मनसो युज्यते, न चैतदस्ति, तथोपलम्भस्यैवाऽभावात् ।"—विशेष० बृ० गा० २२७ ।

**'क्रियाफलमपि स्वप्ने'**—"क्रियाफलं जाग्रदवस्थायामपि परो दर्शयन्नाह-यत्र व्यञ्जन-(शुक्र)विसर्गः तत्र योषित्संगमेनाऽपि भवितव्यम्, यथा वासभवनादौ, तथा च स्वप्ने, ततोऽत्रापि योषित्प्राप्त्या भवितव्यम् इति कथं न प्राप्यकारिता मनसः ? ।"—विशेषा० बृ० गा० २२८ ।

"अथ योषित्संगमे साध्ये व्यञ्जनविसर्गहेतोरनैकान्तिकतामुपदर्शयन्नाह—स्वप्ने योऽसौ व्यञ्जनविसर्गः स तत्प्राप्तिमन्तरेणापि 'तां कामिनीमहं परिषजामि' इत्यादिस्वयमुत्प्रेक्षिततीव्राध्य-वसायकृतो वेदितव्यः । जाग्रतोऽपि तीव्रमोहस्य प्रबलवेदोदययुक्तस्य कामिनीं स्मरतः दृढं ध्यायतः प्रत्यक्षामिव पश्यतो बुद्ध्या परिषजतः परिभुक्तामिव मन्यमानस्य यत् तीव्राध्यवसानम्, तस्मात् यथा व्यञ्जनविसर्गो भवति तथा स्वप्नेऽपि, अन्यथा तत्क्षण एव प्रबुद्धः सन्निहितां प्रियतमा-मुपलभेत, तत्कृतानि च स्वप्नोपलब्धानि नखदन्तपदादीनि पश्येत्, न चैवम् ।"—विशेषा० बृ० गा० २२९ ।

**क्रियाफलं** = कामिनीनिधुवनक्रियाकार्यं, **व्यञ्जनविसर्गलक्षणं** = शुक्रस्खलनरूपम्। जाग्रद्दशायामपि प्रबलवेदोदयात् तीव्रमोहस्य निरन्तरकामिनीध्यानप्राबल्यात् प्रत्यक्षामिव कामिनीं पश्यतो, दुष्टाध्यवसायसमुत्थकल्पनाजालेनाऽसतीमपि सतीमिव तां परिष्वजतो, अपरिभुक्तामपि परिभुक्तां मन्यमानस्य पुंसः तीव्राध्यवसायादेव कामिनीसम्पर्कमन्तरेणाऽपि व्यञ्जनविसर्गो यथा जायते, तथा स्वप्नेऽपि कामिनीसम्पर्कं विनैव तथाविधाध्यवसायत एव रेतोविसर्गः-'यत्र रेतोविसर्गः तत्र कामिनीसम्पर्क' इत्यत्रोक्तदिशा व्यभिचारस्य स्फुटमुपलब्धेः, स्वप्ने रेतोविसर्गसमनन्तरमेव प्रबुद्धेन पुंसा सम्यगवलोकमानेनाऽपि कामिन्या अनवलोकनेन स्वप्नानुभूतकामिनीकृतनखदन्तच्छेदाद्यदर्शनेन च तदानीं सन्निहितैव कामिनीत्यस्य वक्तुमशक्यत्वाच्चेति समाधत्ते—

**तत् तीव्राध्यवसायकृतम्, न तु कामिनीनिधुवनक्रियाकृतमिति को दोषः ?**

**तत्** = रेतोविसर्गरूपं फलम्। **को दोष** इति। एवमभ्युपगमे न कोऽपि दोष इत्यर्थः।

ननु स्त्यानर्द्धिनिद्रोदयकः पुमान् तदानीं यत्किमपि करोति तत् स्वप्नकृतमेवाऽसौ जानाति, यतः तदानीमस्यैवमभिमानः प्रादुरस्ति-द्विरददन्तोपाटनादिकं सर्वमिदमहं स्वप्ने पश्यामीति। तथा च तस्य द्विरददन्तोत्पाटनादिक्रियाकलापकालः स्वप्नकाल एव, तदानीमस्य क्रिया मनोविकल्पपूर्विकैवेति मनसः प्राप्यकारित्वम्, ततो मनसो व्यञ्जनावग्रहः सिद्धिपथमेवैति। तदानीं च यद् गीतादिकं शृणोति तत्रापि मनस एव व्यापार इति मनोविकल्पपूर्वकात् तत्कालीनगीतादिश्रवणादपि मनः प्राप्यकारि सिद्ध्यद् मनोव्यञ्जनावग्रहं साधयदेव भविष्यतीति शङ्कते—

**ननु स्त्यानर्द्धिनिद्रोदये गीतादिकं शृण्वतो व्यञ्जनावग्रहो मनसोऽपि भवतीति चेद्,**

---

**'ननु स्त्यानर्धि'**—"ननु स्त्यानर्द्धिनिद्रोदये वर्त्तमानस्य द्विरददन्तोत्पाटनादिप्रवृत्तस्य स्वप्ने मनसः प्राप्यकारिता तत्पूर्वको व्यञ्जनावग्रहश्च सिद्ध्यति। तथाहि-स तस्यामवस्थायां 'द्विरददन्तोत्पाटनादिकं सर्वमिदमहं स्वप्ने पश्यामि' इति मन्यते इत्ययं स्वप्नः, मनोविकल्पपूर्विकां च दशनाद्युत्पाटनक्रियामसौ करोति इति मनसः प्राप्यकारिता तत्पूर्वकश्च मनसो व्यञ्जनावग्रहो भवत्येव इत्याशङ्क्याह-स्त्यानगृद्धिनिद्रोदये पुनर्वर्त्तमानस्य जन्तोः मांसभक्षण-दशनोत्पाटनादि कुर्वतो गाढनिद्रोदयपरवशीभूतत्वेन स्वप्नमिव मन्यमानस्य स्यात् व्यञ्जनावग्रहः, न वयं तत्र निषेद्धारः। सिद्धं तर्हि परस्य समीहितम्। सिद्ध्येत् यदि सा व्यञ्जनावग्रहता मनसो भवेत्, न पुनः सा तस्य। कस्य तर्हि सा ? सा खलु प्राप्यकारिणां श्रवणरसनघ्राणस्पर्शनानाम्। इदमुक्तं भवति—स्त्यानर्द्धिनिद्रोदये प्रेक्षणकरङ्गभूम्यादौ गीतादिकं शृण्वतः श्रोत्रेन्द्रियस्य व्यञ्जनावग्रहो भवति।"—विशेषा० बृ० गा० २३४।

**स्त्यानर्द्धिनिद्रोदये** = गाढनिद्रोदये । एतदनन्तरं प्रेक्षणकनृत्यस्थानादिगतस्येति दृश्यम् ।

स्त्यानर्द्धिनिद्रोदये[१] वर्त्तमानस्य प्राणिनो द्विरददन्तोत्पाटनादिकं मांसाद्यभक्ष्यभक्षणादिकं च कुर्वतोऽस्वप्नमपि स्वप्नं मन्यमानस्य व्यञ्जनावग्रहो न मनसः, किन्तु प्राप्यकारिणां स्वस्वविषये व्याप्रियमाणानां श्रवणरसनघ्राणस्पर्शनानामेव । तथा प्रेक्षणकनृत्यस्थानादिगतस्य गाढनिद्रोदयवशीभूतस्य तस्य गीतादिश्रवणे श्रवणेन्द्रियस्यैव व्यञ्जनावग्रहः, यत एवम्भूतस्याऽपि बधिरस्य न भवत्येव गीतादिश्रवणम्, मनसा तु तद्भावे बधिरस्याऽपि मनसः सद्भावात् तद् भवेदिति न मनोव्यञ्जनावग्रहता तद्व्यञ्जनावग्रहस्य सतोऽपि । नाऽतोऽपि मनसः प्राप्यकारितेति समाधत्ते—

**न, तदा स्वप्नाभिमानिनोऽपि श्रवणाद्यवग्रहेणैवोपपत्तेः ।**

**तदा** = स्त्यानर्द्धिनिद्रोदयसमये ।

ननु 'भविष्यत् [२]च्यवनं जानाति, भूतं च च्यवनमवगच्छति, वर्त्तमानच्यवनं[३] तु न जानाती'त्याद्यर्थप्रतिपादनपरात् 'च्यवमानो न जानाती'तिवचनात् सिद्धान्ते सर्वोऽपि च्छद्मस्थोपयोगोऽसङ्ख्येयैः समयैर्न तु एकद्व्यादिसमयैः[४] । एवं चोपयोगसम्बन्धिनोऽसङ्ख्येयाः समयाः सिद्धाः । तेषु सर्वेषु समयेषु प्रत्येकमनन्तानि मनोद्रव्याणि मनोवर्गणाभ्यो गृह्णाति[५] जीवः । इत्थं च यानि मनोद्रव्याणि जीवगृहीतानि, यश्च तत्सम्बन्धः, स व्यञ्जनावग्रह एव, यथा श्रोत्रादीन्द्रियेण गृह्यमाणानि शब्दादिपरिणतद्रव्याणि तत्सम्बन्धो वा व्यञ्जनावग्रह इति मनसः स्यादेव व्यञ्जनावग्रह इति शङ्कते—

**ननु 'च्यवमानो न जानाती'त्यादिवचनात् सर्वस्याऽपि च्छद्मस्थोपयोगस्या-**

---

**'ननु च्यवमानो न जानाति'**-"यस्मात् कारणात् 'च्यवमानो न जानाति' इत्यादिवचनात् सर्वोपि च्छद्मस्थोपयोगोऽसङ्ख्येयैः समयैर्निर्दिष्टः सिद्धान्ते, न तु एकद्व्यादिभिः । यस्माच्च तेषु उपयोगसम्बन्धिषु असङ्ख्येयेषु समयेषु सर्वेष्वपि प्रत्येकमनन्तानि मनोद्रव्याणि मनोवर्गणाभ्यो गृह्णाति जीवः, द्रव्याणि च तत्सम्बन्धो वा प्रागत्रैव भवद्भिर्व्यञ्जनमुक्तम् । तेन कारणेन तत् तादृशं द्रव्यं तत्सम्बन्धो वा व्यञ्जनावग्रह इति युज्यते मनसः । यथाहि-श्रोत्रादीन्द्रियेण असङ्ख्येयान्

---

१. यस्यां निद्रायां वर्त्तमानो जीवो दिवा गाढं चिन्तितं कार्यं निष्पादयति सा निद्रा स्त्यानर्द्धिरित्युच्यते ।

२. भवान्तरगमनम् ।

३. वर्त्तमानच्यवनस्यैकसामयिकत्वात् ।

४. समयः सूक्ष्मातिसूक्ष्मः कालविशेषः । तस्येयं व्याख्या-यं कालखण्डं केवल्यपि स्वप्रज्ञया द्विधा कर्तुं न शक्नुयात् स कालखण्डः समयः । अक्षिनिमीलनेऽप्यसङ्ख्येयाः समया व्यतीता भवन्ति ।

५. जीवो विचारार्थं मनोवर्गणातो मनोद्रव्याणि गृहीत्वा मनस्त्वरूपेण परिणमय्य मुञ्चति ।

**ऽसङ्ख्येयसमयमानत्वात्, प्रतिसमयं च मनोद्रव्याणां ग्रहणाद् विषयमसम्प्राप्तस्याऽपि मनसो, देहादनिर्गतस्य तस्य च स्वसन्निहितहृदयादिचिन्तनवेलायां कथं व्यञ्जनावग्रहो न भवतीति चेत्;**

**प्रतिसमय**मिति । छद्मस्थोपयोगसम्बन्धिष्वसङ्ख्यसमयेषु प्रत्येकं तत्तत्समयमित्यर्थः । **ग्रहणा**दिति । जीवेन ग्रहणाद् । इत्थं च **विषयं** = मेर्वादिकं प्रति, **असम्प्राप्तस्याऽपि** = अगतस्याऽपि, **मनसः कथं व्यञ्जनावग्रहो न भवती**ति सम्बन्धः । तथा च विषयासम्प्राप्तावपि मनसो व्यञ्जनावग्रह उक्तदिशा स्यादेवेति भावः ।

यदि च मनसो विषयप्राप्तौ सत्यामेव व्यञ्जनावग्रहो, नान्यथा, श्रोत्रादीन्द्रियेष्वेवमेव दर्शनादिति भवतां मतिः, तदापि स्वस्थानस्थितस्याऽपि मनसो देहादनिर्गस्याऽपि हृदयादिकमतीवसन्निहितत्वादतिसम्बद्धं स्वकार्यं वा चिन्तयता, ज्ञेयेन स्वकायस्थितहृदयादिना सम्बन्धलक्षणो व्यञ्जनावग्रहः स्यादेवेत्याह–**देहा**दिति । **देहादनिर्गतस्य** = शरीराद् बहिर्निर्गतस्य, **तस्य** = मनसः । **स्वसन्निहिते**ति = स्वाधिष्ठितकायस्थितत्वेन स्वातिसम्बद्धेत्यर्थः । **हृदयादी**त्यादिपदात् स्वाधिष्ठितकायादेरप्युपग्रहः । **कथ**मिति । अन्यत्र व्यञ्जनावग्रहव्यवहारनिबन्धनस्याऽतिसम्बद्धत्वस्याऽत्राऽपि सद्भावाद् व्यञ्जनावग्रहः स्यादेवेति भावः ।

चिन्ताद्रव्यमनसो ग्रहणत्वमेव न ग्राह्यत्वम् । ग्राह्यवस्तुग्रहणे एव व्यञ्जनावग्रहोऽधिकृतः, स च बाह्यवस्तुमेरुशिखरादिग्रहणे तेन समं मनसः प्राप्तौ सत्यामेव सम्भवी, मनोद्रव्यं तु न ग्राह्यतया गृह्यते इति तत्सम्बन्धे व्यञ्जनावग्रहत्वं न युक्तिसङ्गतम् । स्वकायसन्निहितहृदयादिकं सर्वदैव सन्निहितम्, न तु सर्वदाऽऽत्मप्रदेशेन सम्बद्धं तत् कदाप्यसम्बद्धम्, येन तद्व्यतिरेके तदग्रहणे तस्मिन् तद्ग्रहणे तन्निबन्धनं व्यञ्जनावग्रहमननं युज्येताऽपि । यतः इन्द्रियादेः प्राप्याप्राप्यकारित्वविचारो बाह्यविषयापेक्षयैवाऽधिकृतः, न तु यद् अन्तः सदैव सन्निहितं तदपेक्षयेति समाधत्ते–

---

समयान् यावद् गृह्यमाणानि शब्दादिपरिणतद्रव्याणि, तत्सम्बन्धो वा व्यञ्जनावग्रहः तथाऽत्रापि ।" विशेषा० बृ० गा० २३७-८ ।

"तदेवं विषयासंप्राप्तावपि भङ्ग्यन्तरेण मनसो व्यञ्जनावग्रहः किल परेण समर्थितः । साम्प्रतं विषयसंप्राप्त्यापि तस्य तं समर्थयन्नाह-शरीराद् अनिर्गतस्याऽपि मेर्वाद्यर्थमगतस्याऽपि स्वस्थानस्थितस्याऽपि स्वकाये स्वकायस्य वा हृदयादिकमतीव सन्निहितत्वादतिसम्बद्धं विचिन्तयतो मनसो योऽसौ ज्ञेयेन स्वकायस्थितहृदयादिना सम्बन्धः तत्प्राप्तिलक्षणः तस्मिन्नपि ज्ञेयसम्बन्धे व्यञ्जनावग्रहः मनसः" युज्यत एव ।–विशेषा० बृ० गा० २३९ ।

**शृणु, ग्रहणं हि मनः, न तु ग्राह्यम् । ग्राह्यवस्तुग्रहणे च व्यञ्जनावग्रहो भवतीति न मनोद्रव्यग्रहणे तदवकाशः । सन्निहितहृदयादिदेशग्रहवेलायामपि नैतदवकाशः- बाह्यार्थापेक्षयैव प्राप्यकारित्वाप्राप्यकारित्वव्यवस्थानात्, क्षयोपशमपाटवेन मनसः प्रथममर्थानुपलब्धिकालासम्भवाद् वा ।**

**ग्रहणमिति** । गृह्यते = अवगम्यते शब्दादिरर्थोऽनेनेति व्युत्पत्त्या यतो ग्रहणं मनः ततो न **तदवकाशः** = व्यञ्जनावग्रहावकाश इति सम्बन्धः । स्वसन्निहितहृदयादिचिन्तनवेलायां सम्बन्धस्य व्यञ्जनावग्रहव्यवहारनिबन्धनस्य भावे कथं न व्यञ्जनावग्रहावकाश इत्यपेक्षायामाह- **बाह्येति** ।

अपि च मनसः स्वकीयहृदयादिचिन्तनवेलायां प्राप्यकारित्वसम्भवेऽपि व्यञ्जना- वग्रहस्य न सम्भवः, यतः क्षयोपशमपाटवेन तस्य प्रथममर्थानुपलब्धिकालासम्भवेन प्रथमसमये

---

**'इति चेत्, शृणु'**—"तदेवं प्रकारद्वयेन मनसः परेण व्यञ्जनावग्रहे समर्थिते आचार्यः प्रथमपक्षे तावत् प्रतिविधानमाह-चिन्ताद्रव्यरूपं मनो न ग्राह्यम्, किन्तु गृह्यते अवगम्यते शब्दादिरर्थोऽनेन इति ग्रहणम् अर्थपरिच्छेदे करणम् इत्यर्थः । ग्राह्यं तु मेरुशिखरादिकं मनसः सुप्रतीतमेव । अतः कोऽवसरः तस्य करणभूतस्य मनोद्रव्यराशेः व्यञ्जनावग्रहे अधिकृते ? । न कोपि इत्यर्थः । ग्राह्यवस्तुग्रहणे हि व्यञ्जनावग्रहो भवति । न च मनोद्रव्याणि ग्राह्यरूपतया गृह्यन्ते ।"—विशेषा० बृ० गा० २४० ।

"या च मनसः प्राप्यकारिता प्रोक्ता साऽपि न युक्ता, स्वकायहृदयादिको हि मनसः स्वदेश एव । यच्च यस्मिन् देशेऽवतिष्ठते तत् तेन सम्बद्धमेव भवति कस्तत्र विवादः ? । किं हि नाम तद्वस्त्वस्ति यद् आत्मदेशेनाऽसम्बद्धम् ? एवं हि प्राप्यकारितायामिष्यमाणायां सर्वमपि ज्ञानं प्राप्यकार्येव, पारिशेष्याद् बाह्यार्थापेक्षयैव प्राप्यकारित्वाप्राप्यकारित्वचिन्ता युक्ता ।"—विशेषा० बृ० गा० २४१ ।

**'क्षयोपशमपाटवेन'**—"भवतु वा मनसः स्वकीयहृदयादिचिन्तायां प्राप्यकारिता तथापि न तस्य व्यञ्जनावग्रहसंभव इति दर्शयन्नाह-यस्मात् मनसः प्रथमसमय एव अर्थावग्रहः समुत्पद्यते न तु श्रोत्रादीन्द्रियस्येव प्रथमं व्यञ्जनावग्रहः, तस्य हि क्षयोपशमापाटवेन प्रथममर्थानुपलब्धि- कालसम्भवात् युक्तो व्यञ्जनावग्रहः, मनसस्तु पटुक्षयोपशमत्वात् चक्षुरादीन्द्रियस्येव अर्थानुप- लम्भकालस्याऽसंभवेन प्रथममेव अर्थावग्रह एव उपजायते । अत्र प्रयोगः-इह यस्य ज्ञेयसंबन्धे सत्यप्यनुपलब्धिकालो नास्ति न तस्य व्यञ्जनावग्रहो दृष्टः, यथा चक्षुषः, नास्ति चार्थसंबन्धे सत्यनुपलब्धिकालो मनसः, तस्माद् न तस्य व्यञ्जनावग्रहः, यत्र तु अयमभ्युपगम्यते न तस्य ज्ञेयसंबन्धे सत्यनुपलब्धिकालासंभवः, यथा श्रोत्रस्येति व्यतिरेकः । तस्मादुक्तप्रकारेण मनसो न व्यञ्जनावग्रहसम्भवः ।"—विशेषा० बृ० गा० २४१ ।

एव चक्षुरिन्द्रियस्येवाऽर्थावग्रहस्यैव समुत्पादो भवति । श्रोत्रादीन्द्रियस्य तु तादृशक्षयोपशम-पाटवाभावेन प्रथममर्थानुपलब्धिसम्भवेन प्रथमं व्यञ्जनावग्रहस्य युक्तत्वादित्याह—**क्षयोपश-मेति**।

ननु मनः श्रोत्रादीन्द्रियजज्ञानेऽपि व्यापिपर्त्तीति तत्रापि प्रथमर्थावग्रह एव स्यादित्यत आह—

**श्रोत्रादीन्द्रियव्यापारकालेऽपि मनोव्यापारस्य व्यञ्जनावग्रहोत्तरमेवाऽभ्युपगमात्। 'मनुतेऽर्थान् मन्यन्तेऽर्था अनेनेति वा मन' इति मनःशब्दस्याऽन्वर्थत्वाद्, अर्थभाषणं विना भाषाया इव अर्थमननं विना मनसोऽप्रवृत्तेः ।**

**श्रोत्रादी**ति । श्रोत्रादीन्द्रियजज्ञानस्थले न पूर्वं मनसो व्यापारः, किन्तु व्यञ्जनाव-ग्रहानन्तरमेवेति तदनन्तरमेवाऽर्थावग्रहो न प्रथमसमय इति ।

'मनः'शब्दस्याऽन्वर्थताऽप्येवं सत्येव घटते इत्यतः तस्य स्वविषयग्रहणे श्रोत्रादीन्द्रि-

---

**'श्रोत्रादीन्द्रिय'**—"इदमुक्तं भवति-न केवलं मनसः केवलावस्थायां प्रथममर्थावग्रह एव व्यापारः, किन्तु श्रोत्रादीन्द्रियोपयोगकालेऽपि तथैव । तथाहि-श्रोत्रादीन्द्रियोपयोगकाले व्याप्रियते मनः केवलमर्थावग्रहादेव आरभ्य, न तु व्यञ्जनावग्रहकाले । अर्थानवबोधस्वरूपो हि व्यञ्जनाव-ग्रहः तदवबोधकारणमात्रत्वात् तस्य, मनस्तु अर्थावबोधरूपमेव 'मनुतेऽर्थान् मन्यन्ते अर्था अनेन इति वा मनः' इति सान्वर्थाभिधानाऽभिधेयत्वात् । किञ्च, यदि व्यञ्जनावग्रहकाले मनसो व्यापारः स्यात् तदा तस्याऽपि व्यञ्जनावग्रहसद्भावादष्टाविंशतिभेदभिन्नता मतेर्विशीर्येत, तस्मात् प्रथम-समयादेव तस्याऽर्थग्रहणमेष्टव्यम् । यथा हि स्वाभिधेयानर्थान् भाषमाणैव भाषा भवति, नाऽन्यथा, यथा च स्वविषयभूतानर्थानवबुध्यमानान्येवाऽवध्यादिज्ञानान्यात्मलाभं लभन्ते, अन्यथा तेषाम-प्रवृत्तिरेव स्यादिति, एवं स्वविषयभूतानर्थान् प्रथमसमयादारभ्य मन्वानमेव मनो भवति, अन्यथा अवध्यादिवत् तस्य प्रवृत्तिरेव न स्यात् । तस्मात् तस्याऽनुपलब्धिकालो नास्ति, तथा च न व्यञ्जनावग्रह इति स्थितम् ।"—विशेषा० बृ० गा० २४२, २४३ ।

**'स्वरूप'**—"ग्राह्यवस्तुनः सामान्य-विशेषात्मकत्वे सत्यप्यर्थावग्रहेण सामान्यरूपमेवाऽर्थं गृह्णाति, न विशेषरूपम्-अर्थावग्रहस्यैकसामयिकत्वात्, समयेन च विशेषग्रहणायोगादिति । सामान्यार्थश्च कश्चिद् ग्राम-नगर-वन-सेनादिशब्देन निर्देश्योऽपि भवति, तद्व्यवच्छेदार्थमाह-स्वरूपनामादिकल्पनारहितम्, आदिशब्दात् जाति-क्रिया-गुण-द्रव्यपरिग्रहः । तत्र रूपरसाद्यर्थानां य आत्मीयचक्षुरादीन्द्रियगम्यः प्रतिनियतः स्वभावः तत् स्वरूपम् । रूपरसादिकस्तु तदभिधायको ध्वनिर्नाम । रूपत्व-रसत्वादिका तु जातिः । प्रीतिकरमिदं रूपं पुष्टिकरोऽयं रसः इत्यादिकस्तु शब्दः क्रियाप्रधानत्वात् क्रिया । कृष्ण-नीलादिकस्तु गुणः । पृथिव्यादिकं पुनर्द्रव्यम् । एषां स्वरूप-

योपयोगकाले चाऽर्थावग्रहकालादारभ्यैव व्यापारः । अर्थावबोधस्वभावे मनसि अर्थानवबोधस्वभावस्य व्यञ्जनावग्रहस्य न सम्भव इत्याह—**मनुतेऽर्थानि**ति । इदं च कर्त्तरि । करणे आह-**मन्यन्त** इति । 'मनः'शब्दस्याऽन्वर्थाभिधानत्वेऽनुगुणं दृष्टान्तमाह-**अर्थभाषण**मिति । भाषाया इत्युपलक्षणमवध्यादिज्ञानादेरपि । तथा च यथा स्वाभिधेयानर्थान् भाषमाणैव भाषा, स्वविषयीभूतानर्थानवबुध्यमानान्येवाऽवध्यादिज्ञानानि स्वस्वरूपमासादयन्ति तथा स्वविषयभूतानर्थान् प्रथमसमयादारभ्य मन्वानमेव मनो भवति । ततश्चाऽर्थानुपलब्धिकालाभावाद् न मनसो व्यञ्जनावग्रहसम्भव इति ।

इत्थमुपपादितं नयनमनसोर्व्यञ्जनावग्रहासम्भवमुपसंहरति—

**तदेवं नयनमनसोर्न व्यञ्जनावग्रह इति स्थितम् ।**

## अर्थावग्रहनिरूपणम्

**स्वरूपनामजातिक्रियागुणद्रव्यकल्पनारहितं सामान्यग्रहणमर्थावग्रहः ।**

स्वरूपं च, नाम च, जातिश्च, क्रिया च, गुणश्च, द्रव्यं च स्वरूपनामजातिक्रियागुणद्रव्याणि, तेषां **कल्पना** = स्वरूपादिप्रकारेणाऽर्थावगाहिता, तया **रहितं** यत् **सामान्यग्रहणम्** = अवान्तरविशेषानवगाहि वस्तुसामान्यस्वरूपावगाहि ज्ञानं तद् अर्थावग्रह इत्यर्थः । अत्र **स्वरूपे**त्यादि **सामान्यग्रहण**मित्यन्तं लक्षणनिर्देशः, **अर्थावग्रह** इति लक्ष्यनिर्देशः ।

ननु स्वरूपनामादिकल्पनारहितार्थज्ञानस्याऽर्थावग्रहत्वे तद्विषयः स्वरूपनामादिरहितोऽवगृहीत इति प्राप्तम् । तथा च "से जहानामए केइ पुरिसे अव्वत्तं सद्दं सुणेज्जत्ति, तेणं सद्देत्ति उग्गहिए, न उण जाणइ के वेस सद्दा" इति **नन्द्य**ध्ययनसूत्रे "तेणं सद्देत्ति उग्गहिए" इत्यनेन 'तेन प्रतिपत्त्राऽर्थावग्रहेण शब्दोऽवगृहीत' इति प्रतिपादितोऽर्थः शब्दोल्लेखाकलितो विरुद्धः स्यात्, तस्य शब्दाद्युल्लेखरहितत्वेनाऽभिमतार्थावग्रहविषयत्वस्याऽसम्भवादिति शङ्कते—

**कथं तर्हि 'तेन शब्द इत्यवगृहीत' इति सूत्रार्थः, तत्र शब्दाद्युल्लेखराहित्याभावादिति चेद्,**

---

नामजात्यादीनां कल्पना अन्तर्जल्पारूषितज्ञानरूपा, तया रहितमेवाऽर्थमर्थावग्रहेण गृह्णाति जीवः ।" —विशेषा० बृ० गा० २५२ ।

**'कथं तर्हि'**—"यदि स्वरूपनामादिकल्पनारहितोऽर्थोऽर्थावग्रहस्य विषयः-इत्येवं व्याख्यायते भवद्भिः तर्हि **यन्नन्द्यध्ययनसूत्रे** (सू० ३६.) प्रोक्तम्-'से जहानामए केइ पुरिसे अव्वत्तं सद्दं सुणेज्जा, तेणं सद्देत्ति उग्गहिए, न उण जाणइ के वेस सद्दाइ त्ति' तदेतत् कथमविरोधेन नीयते ? अस्मि**न्नन्दिसूत्रे** अयमर्थः प्रतीयते-यथा तेन प्रतिपत्त्रा अर्थावग्रहेण शब्दोऽवगृहीत इति ।

**कथमिति** । अस्य **सूत्रार्थ** इत्यनेनाऽन्वयः । **सूत्रार्थः** = उक्तनन्द्यध्ययनसूत्रैकदेशार्थः । **कथमि**त्याक्षेपे, विरोधादुक्तसूत्रार्थो न घटते इत्यर्थः । सूत्रार्थाघटने हेतुमाह–**तत्रे**ति । 'तेन शब्द इत्यवगृहीत' इत्यस्मिन्नित्यर्थः ।

एकसामयिकेऽर्थावग्रहे नामाद्युल्लेखस्याऽसम्भवाद् न शब्दात्मकवस्तुनि तद्वाचकस्य 'शब्द'इत्येवंरूपस्य शब्दस्य योजनाऽवगृह्यते, किन्तु शब्दस्य यत् सामान्यमात्रं स्वरूपं तदेवाऽवान्तरसामान्यविशेष-शब्दत्वादिविनिर्मोकेण रूपरसादि-शब्दान्यविशेषव्यावृत्त्य-नाकलितरूपतयाऽवगृह्यते । तथाविधे चाऽवग्रहे शब्दवाच्यत्वेन शब्दात्मकवस्तु नाऽवभासते एव । केवलमवग्रहविषयवस्तुनः परिचयार्थं वक्त्रा = सूत्रकृतैव 'शब्द' इति भण्यते, तद्भणनेन [ज्ञायते यद् प्रतिपत्त्रा तद् अवगृहीतं] यद् वस्तुस्थित्या 'शब्द'इत्येवंस्वरूपशब्दवाच्यम्, नाऽन्यद् रूपरसादीति समाधत्ते–

**न, 'शब्दः' इति वक्त्रैव भणनाद्, रूपरसादिविशेषव्यावृत्त्यनवधारणपरत्वाद् वा ।**

**वक्त्रैव** = अवग्रहविषयवक्त्रा सूत्रकृतैव ।

अथवा तत्र 'शब्द' इति शब्दमात्रपरम्, तेन च रूपरसादिभ्यः तस्य व्यावर्त्तकस्य शब्दत्वलक्षणावान्तरसामान्यविशेषस्य ग्रहणव्यवच्छेदः । तथा च रूपरसादिव्यावृत्तिमत्तया-ऽनवधृतं शब्दत्वेनाऽनिश्चितं वस्तुमात्रमवगृह्यते इति तदर्थ इत्याह–**रूपरसादी**ति ।

किञ्च, शब्दवाच्यत्वेन 'शब्द'वस्तुनोऽवग्रहे भाने तस्य 'शब्दोऽय'मित्याकारः स्यात् । ततश्च शब्दोल्लेखस्याऽऽन्तर्मुहूर्त्तिकत्वादेकसामयिकत्वं तस्य सिद्धान्तसिद्धं भज्येतेत्याह–

**यदि च 'शब्दोऽय'मित्यध्यवसायोऽवग्रहे भवेत् तदा शब्दोल्लेखस्याऽऽन्तर्मुहूर्त्ति-कत्वादर्थावग्रहस्यैकसामयिकत्वं भज्येत ।**

---

भवन्तस्तु शब्दाद्युल्लेखरहितं सर्वथाऽमुं प्रतिपादयन्ति ततः कथं न विरोधः ? ।"–विशेषा० बृ० गा० २५२ ।

**'शब्दः' इति–**"अत्रोत्तरमाह–'शब्दस्तेन अवगृहीतः' इति यदुक्तं तत्र 'शब्दः' इति सूत्रकारः प्रतिपादयति । अथवा शब्दमात्रं रूपरसादिविशेषव्यावृत्त्या अनवधारितत्वात् शब्दतया-ऽनिश्चितं गृह्णाति इति एतावतांऽशेन 'शब्दस्तेन अवगृहीतः' इत्युच्यते, न पुनः शब्दबुद्ध्या 'शब्दोऽयम्' इत्यध्यवसायेन तच्छब्दवस्तु तेन अवगृहीतम्, शब्दोल्लेखस्य आन्तर्मुहूर्त्तिकत्वात्, अर्थावग्रहस्य तु एकसामयिकत्वादसम्भव एवाऽयमिति भावः । यदि पुनरर्थावग्रहे शब्दनिश्चयः स्यात् तदा अपाय एवाऽसौ स्यात् नत्वर्थावग्रहः, निश्चयस्याऽपायरूपत्वात् । "–विशेषा० बृ० गा० २५३ ।

ननु प्रथमसमये एव 'शब्दोऽय'मित्याकारकोऽर्थावग्रहोऽस्तु । तत्र शब्दमात्रत्वेन यद् भानं तदेव सामान्यग्रहणम् । तदनन्तरं 'प्रायः शाङ्खेनाऽनेन भवितव्यम्, शाङ्खशब्दधर्मस्य माधुर्यादेरत्र सम्भवात्, शाङ्र्गशब्दधर्मस्य कर्कशत्वादेरत्राऽनवलोकना'दिति विमर्शबुद्धिरीहा । ततः 'शाङ्ख एवाऽय'मिति ज्ञानमपायोऽस्त्विति शङ्कते–

**स्याद् मतं–'शब्दोऽय'मिति सामान्यविशेषग्रहणमप्यर्थावग्रह इष्यताम्, तदुत्तरं 'प्रायो माधुर्यादयः शङ्खशब्दधर्मा इह, न तु शाङ्र्गधर्माः खरकर्कशत्वादय' इतीहोत्पत्तेः इति ।**

**सामान्यविशेषग्रहणं** = शब्दत्वलक्षणस्य महासामान्यसत्त्वापेक्षयाऽवान्तरसामान्यस्य ग्रहणम् । **अपी**त्यनेन सत्तामात्रेण शब्दग्रहणस्याऽर्थावग्रहत्वाभ्यनुज्ञानम् । ईहापूर्ववर्तित्वे सत्येव 'अयं शब्द' इति ज्ञानस्याऽर्थावग्रहत्वं युज्येत, अतः तदनन्तरमीहासम्भवं दर्शयति–**तदुत्तर**मिति । 'शब्दोऽय'मिति ज्ञानानन्तरमित्यर्थः ।

'शब्दोऽय'मित्येवं निश्चयात्मकावग्रहे 'नाऽशब्दोऽय'मित्येवमशब्देभ्यो रूपादिभ्यो व्यावृत्तिग्रहणमवश्यमेवेष्टं भवेत्–अशब्दव्यावृत्तिग्रहणमन्तरेण शब्दत्वनिश्चयस्याऽसम्भवात् । तथा च विशेषाध्यवसायित्वेनाऽपायत्वमेवाऽस्य स्याद्, नाऽर्थावग्रहत्वम् । यदि च शाङ्खत्वादिव्याप्यजात्यपेक्षया शब्दत्वस्य सामान्यत्वमिति तद्रूपावगाहिज्ञानस्य सामान्यग्रहणत्वेनाऽर्थावग्रहत्वमिष्यते तदा 'शाङ्खोऽय'मिति ज्ञानस्याऽपि तदवान्तरविशेषापेक्षया सामान्यस्य शाङ्खत्वस्य ग्राहकत्वेनाऽर्थावग्रहत्वमेव स्यादित्यपायापलाप एव प्रसज्येतेति समाधत्ते–

**मैवम्, अशब्दव्यावृत्त्या विशेषावभासेनाऽस्याऽपायत्वात्, स्तोकग्रहण-**

---

**'स्यान्मतम्'**–"ननु प्रथमसमय एव रूपादिव्यपोहेन 'शब्दोऽयम्' इति प्रत्ययोऽर्थावग्रहत्वेन अभ्युपगम्यताम्, शब्दमात्रत्वेन सामान्यत्वात्, उत्तरकालं तु 'प्रायो माधुर्यादयः शङ्खशब्दधर्मा इह घटन्ते, न तु शाङ्र्गधर्माः खरकर्कशत्वादयः' इति विमर्शबुद्धिरीहा, तस्मात् 'शाङ्ख एवाऽयं शब्दः' इति तद्विशेषस्त्वपायोऽस्तु ।"–विशेषा० बृ० गा० २५४ ।

**'मैवम्, अशब्द'**–"यस्माद् न रूपादिरयम्, तेभ्यो व्यावृत्तत्वेन गृहीतत्वात्, अतो 'नाऽशब्दोऽयम्' इति निश्चीयते । यदि तु रूपादिभ्योऽपि व्यावृत्तिर्गृहीता न स्यात्, तदा 'शब्दोऽयम्' इति निश्चयोऽपि न स्यादिति भावः । तस्मात् 'शब्दोऽयं नाऽशब्दः' इति विशेषप्रतिभास एवाऽयम् । तथा च सत्यस्याऽप्यपायप्रसङ्गतोऽवग्रहाभावप्रसङ्ग इति स्थितम् ।"–विशेषा० बृ० गा० २५४ ।

**'स्तोकग्रहणम्'**–"अथ परोऽवग्रहापाययोर्विषयविभागं दर्शयन्नाह–इदं शब्दबुद्धिमात्रकं शब्दमात्रस्तोकविशेषावसायित्वात् स्तोकविशेषग्राहकम्, अतोऽपायो न भवति, किन्तु अवग्रह

**स्योत्तरोत्तरविशेषापेक्षयाऽव्यवस्थितत्वात् ।**

**अस्य** = 'शब्दोऽय'मिति ज्ञानस्य ।

ननु बृहद्विशेषावगाहिज्ञानत्वमपायत्वम्, स्तोकविशेषावगाहिज्ञानत्वमर्थावग्रहत्वमिति 'शब्दोऽय'मिति ज्ञानस्य शब्दमात्रस्तोकविशेषावगाहित्वेनाऽर्थावग्रहत्वम्, 'शाङ्खोऽय'मिति ज्ञानस्य तु बृहद्विशेषावगाहित्वेनाऽपायत्वमिति सुव्यवस्थितत्वमर्थावग्रहापाययोरिति पराकूत-प्रतिविधानायाऽऽह-**स्तोकग्रहणस्ये**ति । एवमुपगमे समुच्छिन्नैवाऽपायकथा—उत्तरोत्तर-विशेषावगाहिज्ञानापेक्षया पूर्वपूर्वविशेषग्रहणस्य स्तोकविशेषविषयकत्वेनाऽर्थावग्रहत्वस्यैव प्राप्तेरित्यभिसन्धिः ।

अपि च शब्दगतानुगामिधर्माणां शब्दभिन्नेभ्यो रूपादिभ्यो व्यावृत्तिग्रहणे सत्येव 'शब्दोऽय'मिति लक्षणोऽर्थावग्रहो भवेत्-अशब्दाद् व्यावृत्तत्वाग्रहेऽशब्दत्वसद्भावसंशये शब्दत्वनिश्चयासम्भवात् । शब्दान्वयधर्माणामन्यव्यावृत्तिग्रहणं च विमर्शलक्षणेहामन्तरेण न सम्भवदुक्तिकम् । तथा च पूर्वमीहाभावे एव 'शब्दोऽय'मिति ग्रहः । तथा च कुतोऽस्या-ऽर्थावग्रहत्वम्, व्यञ्जनावग्रहानन्तरसमुद्भूतस्यैवाऽर्थावग्रहत्वस्याऽस्माभिरुपगमाद्, अस्य च नैवंभावादित्याह—

**किञ्च 'शब्दोऽय'मिति ज्ञानं शब्दगतान्वयधर्मेषु रूपादिव्यावृत्तिपर्यालोचन-रूपामीहां विनाऽनुपपन्नम् । सा च नाऽगृहीतेऽर्थे सम्भवतीति तद्ग्रहणमस्मदभ्युप-**

---

एवाऽयम् । कः पुनस्तर्हि अपायः ? 'शाङ्खोऽयं शब्दः' इत्यादि विशेषणविशिष्टं यद् ज्ञानं तद् अपायः बृहद्विशेषावसायित्वादिति । हन्त ! यदि यत् यत् स्तोकं तत् तत् नाऽपायः, तर्हि निवृत्ता सांप्रतमपायज्ञानकथा, उत्तरोत्तरार्थग्रहणापेक्षया पूर्वपूर्वार्थविशेषावसायस्य स्तोकत्वात् । एव-मुत्तरोत्तरविशेषग्राहिणामपि ज्ञानानां तदुत्तरोत्तरभेदापेक्षया स्तोकत्वादपायत्वाभावो भावनीयः ।'' —विशेषा० बृ० गा० २५५ ।

**'किञ्च शब्दोऽयमिति'**—''किञ्च, शब्दगतान्वयधर्मेषु रूपादिभ्यो व्यावृत्तौ च गृहीतायां 'शब्द एव' इति निश्चयज्ञानं युज्यते । तद्ग्रहणं च विमर्शमन्तरेण नोपपद्यते, विमर्शश्च ईहा, तस्मादीहामन्तरेण अयुक्तमेव 'शब्द एव' इति निश्चयज्ञानम् । अथ निश्चयकालात् पूर्वमीहित्वा भवतोऽपि 'शब्द एवाऽयम्' इति ज्ञानमभिमतम्, हन्त ! तर्हि निश्चयज्ञानात् पूर्वमसावीहा भवद्वचनतोऽपि सिद्धा ।''—विशेषा० बृ० गा० २५७ ।

**'सा च नाऽगृहीते'**—''नन्वीहायाः पूर्वं किं तद् वस्तु प्रमात्रा गृहीतम्, यद् इहमानस्य तस्य 'शब्द एवाऽयम्' इति निश्चयज्ञानमुपजायते ? नहि कश्चिद् वस्तुन्यगृहीतेऽकस्मात् प्रथमत एवेहां

**गतार्थावग्रहकालात् प्राक् प्रतिपत्तव्यम् । स च व्यञ्जनावग्रहकालोऽर्थपरिशून्य इति यत्किञ्चिदेतत् ।**

**किञ्चेति** । भवतूक्तार्थावग्रहात् पूर्वमीहा, किं नः छिन्नमित्यत आह—**सा चेति** । सा च = ईहा पुनः । भवतु गृहीत एवाऽर्थे ईहासमुदयः, ईहातः प्रागर्थग्रहणमपि स्वीकरिष्याम इत्यत आह—**तद्ग्रहणमिति** । यस्मिन् गृहीते ईहा स्यात् तत् सामान्यार्थग्रहणमित्यर्थः ।

**अस्मदभ्युपगतेति** । अयमभिप्रायः-यदेतदीहार्थमीहातः प्राक् सामान्यार्थावग्रहणं तत्कालः कश्चिदवश्यमभ्युपेयः । स यद्यस्मदभ्युपगतार्थावग्रहकाल एव, तदाऽस्मदभ्युपगतार्थावग्रह एवाऽयमर्थावग्रहः स्यात्, तथा च तदनन्तरोत्पन्नेहानन्तरजायमानस्य 'शब्दोऽय'मिति ज्ञानस्याऽपायत्वमेव कक्षीकृतं स्यादिति पर्यवसितं विवादेन । तस्मादस्मदभ्युपगतार्थावग्रहकालात् प्राक्काले एव सोऽभ्युपेयः, न च तत् सम्भवति-तत्कालस्य व्यञ्जनावग्रहत्वेनाऽर्थपरिशून्यत्वात्, तदानीं कस्याप्यर्थस्य सामान्यरूपस्य विशेषरूपस्य वा प्रतिभासासम्भवादिति । **स च** = अस्मदभ्युपगतार्थावग्रहकालपूर्वकालश्च ।

ननु शब्दत्वं यद्यर्थावग्रहे गृहीतं न स्यात् तदा तदनन्तरं 'क एष शब्द' इत्येवमीहायाः प्रवृत्तिर्न स्यादतः शब्दत्वेन शब्दावग्राहित्वमर्थावग्रहस्याऽभ्युपेयमित्याशङ्कते—

**नन्वनन्तरं 'क एष शब्द' इति शब्दत्वावान्तरधर्मविषयकेहानिर्देशात् 'शब्दोऽयमि' त्याकार एवाऽवग्रहोऽभ्युपेय इति चेद्,**

---

कुरुते । ''—विशेषा० बृ० गा० २५८ ।

''ईहायाः पूर्वं यत् सामान्यं गृह्यते तस्य तावद् ग्रहणकालेन भवितव्यम् । स चाऽस्मदभ्युपगतसामयिकार्थावग्रहकालरूपो न भवति, अस्मदभ्युपगताङ्गीकारप्रसङ्गात् । किं तर्हि ? अस्मदभ्युपगतार्थावग्रहात् पूर्वमेव भवदभिप्रायेण तस्य सामान्यस्य ग्रहणकालेन भवितव्यम्, पूर्वं च तस्याऽस्मदभ्युपगतार्थावग्रहस्य व्यञ्जनकाल एव वर्तते । भवत्वेवम्, तथापि तत्र सामान्यार्थग्रहणं भविष्यति इत्याशङ्क्याह—स च व्यञ्जनकालः अर्थपरिशून्यः, न हि तत्र सामान्यरूपो विशेषरूपो वा कश्चनाऽप्यर्थः प्रतिभाति, तदा मनोरहितेन्द्रियमात्रव्यापारात्, तत्र चार्थप्रतिभासायोगात् । तस्मात् पारिशेष्याद् अस्मदभ्युपगतार्थावग्रह एव सामान्यग्रहणम्, तदनन्तरं चाऽन्वयव्यतिरेकधर्मपर्यालोचनरूपा ईहा, तदनन्तरं च 'शब्द एवाऽयम्' इति निश्चयज्ञानमपायः ।''—विशेषा० बृ० गा० २५९ ।

**'नन्वनन्तरम्'**—''न उण जाणइ के वेस सद्देत्ति'' अस्मिन् **नन्दिसूत्रे** 'न पुनर्जानाति कोप्येष शाङ्खशाङ्गाद्यन्यतरः शब्दः' इति विशेषस्यैवाऽपरिज्ञानमुक्तम् । शब्दसामान्यमात्रग्रहणं तु अनुज्ञातमेव । शब्दसामान्ये गृहीत एव तद्विशेषमार्गणस्य युज्यमानत्वात् ।''—विशेषा० बृ० गा० २६० ।

अर्थावग्रहानन्तरं 'न उण जाणइ के वेस सद्देत्ति' **नन्दिसूत्रे** 'न पुनर्जानाति, को वैष शब्द' इत्येवं शब्दत्वावान्तरशाङ्खत्वादिविशेषापरिज्ञानस्यैवोक्तत्वेन शब्दत्वलक्षण-सामान्य-परिज्ञानं तत्राऽनुमतमेव । न हि शब्दत्वेन रूपेण शब्देऽगृहीते शब्दत्वावान्तरविशेषमार्गणं युज्यते—सामान्यावान्तरधर्मेण धर्मिजिज्ञासायां सामान्यधर्मप्रकारकज्ञानस्य हेतुत्वादिति शङ्कितु-रभिप्रायः ।

यत्र कुत्रापि शब्दात्मकवस्त्ववग्रहस्वरूपोपवर्णनं तत्र सर्वत्र शब्दवस्तुस्वरूपवाचकस्य 'शब्द'इत्येवंरूपस्य शब्दस्य प्रयोगं वक्तैव = तत्प्ररूपको विदधाति । न तु तत्र ज्ञाने शब्दत्वेन शब्दोऽवभासते, तथा सत्येकसामयिकत्वमर्थावग्रहस्य भज्येत । अपि तु अर्थावग्रहेऽव्यक्त-शब्दस्वरूपप्रतिभासनमेव सूत्रसम्मतम्, अव्यक्तज्ञानं चाऽनाकारोपयोगरूपमव्यक्तशब्दार्थ-ग्राहकमेवेति समाधत्ते-

**न, 'शब्दः शब्दः' इति भाषकेणैव भणनाद् अर्थावग्रहेऽव्यक्तशब्दश्रवणस्यैव सूत्रे निर्देशाद्, अव्यक्तस्य च सामान्यरूपत्वाद्, अनाकारोपयोगरूपस्य चाऽस्य तन्मात्र-विषयत्वात् ।**

**सूत्रे** = **नन्द्यध्ययने** 'से जहानामए केइ पुरिसे अव्वत्तं सद्दं सुणेज्जत्ति' अस्मिन् सूत्रे । **अव्यक्तं** = 'शब्दोऽयम्, रूपादिर्वे'त्यादिना प्रकारेणाऽव्यक्तम् । अर्थावग्रहस्याऽनाकारोप-योगरूपतया सूत्रे पठितत्वेन, अनाकारोपयोगत्वस्य सामान्यमात्रविषयकत्वे सत्येव घटमानत्वेन, 'शब्द'इत्येवमुल्लेखस्य शाङ्खशाङ्र्गभेदापेक्षयाऽव्यक्तत्वेऽपि महासामान्यसत्तापेक्षया व्यक्तत्वस्यैव भावेनाऽव्यक्तशब्दार्थत्वासम्भवादिति भावः । **अस्य** = अर्थावग्रहस्य । **तन्मात्रविषयत्वात्** = अव्यक्तमहासामान्य-सन्मात्रविषयत्वात् ।

---

**'नः शब्दः शब्दः'**—"अत्रोत्तरमाह-सर्वत्रावग्रहस्वरूपं प्ररूपयन् 'शब्दः शब्दः' इति प्रज्ञापक एव वदति, न तु तत्र ज्ञाने शब्दप्रतिभासोऽस्ति, अन्यथा न समयमात्रे अर्थावग्रहकाले 'शब्दः' इति विशेषणं युक्तम्, आन्तर्मुहूर्तिकत्वात् शब्दनिश्चयस्य ।"—विशेषा० बृ० गा० २६१ ।

**'अर्थावग्रहे'**—"यदि तव गाढः श्रुतावष्टम्भः तदा तत्राप्येतत् भणितं यदुत प्रथममव्यक्तस्यैव शब्दोल्लेखरहितस्य शब्दमात्रस्य ग्रहणम् । केन पुनः सूत्रावयवेनेदमुक्तम् ? **नन्द्यध्ययने** 'से जहानामए केइ पुरिसे अव्वत्तं सद्दं सुणेज्जत्ति'—अत्र अव्यक्तमिति कोऽर्थः ? 'शब्दोऽयम्' 'रूपादिर्वा' इत्यादिना प्रकारेणाऽव्यक्तमित्यर्थः । न च वक्तव्यम्-शाङ्ख-शाङ्र्गभेदा-पेक्षया शब्दोल्लेखस्याऽप्यव्यक्तत्वे घटमाने कुत इदं व्याख्यानं लभ्यते ? इति, अवग्रहस्याऽना-कारोपयोगरूपतया सूत्रेऽधीतत्वात्, अनाकारोपयोगस्य च सामान्यमात्रविषयत्वात्, प्रथममेवा-ऽपायप्रसक्त्याऽवग्रहेहाऽभावप्रसङ्ग इत्याद्युक्तत्वाच्च ।"—विशेषा० बृ० गा० २६२ ।

ननु सूत्रेऽव्यक्तशब्दश्रवणं व्यञ्जनावग्रहेऽव्यक्तभानमाश्रित्यैव भविष्यतीत्यत आह–

**यदि च व्यञ्जनावग्रहे एवाऽव्यक्तशब्दग्रहणमिष्येत तदा सोऽप्यर्थावग्रहः स्याद्-अर्थस्य ग्रहणात् ।**

एवं सति व्यञ्जनावग्रहस्याऽव्यक्तशब्दरूपार्थविषयकत्वेनाऽर्थावग्रहत्वं स्याद्, न तु व्यञ्जनावग्रहत्वम् । एवमपि व्यञ्जनावग्रहत्वेऽर्थावग्रहत्वेनाऽभिमतस्याऽपि व्यञ्जनावग्रहत्वं स्यादिति भावः । **सोऽपि** = व्यञ्जनावग्रहोऽपि ।

ये च–सर्वविशेषविमुखसामान्यमात्रलक्षणाव्यक्तग्रहणं प्रथमसमये तत्क्षणजातमात्र-शिशोः सङ्केतादिविकलस्य भवति, सङ्केतादिपरिकर्मितमतेः परिचितविषयस्य तु प्रमातुः प्रथमशब्दश्रवणसमये एव विशेषविषयकमप्यर्थावग्रहणं भवति । अथ च परिचितविषय-प्रमातारमधिकृत्यैव 'तेणं सद्देत्ति उग्गहिए' इति सूत्रं 'शब्दः तेनाऽवगृहीत' इत्यर्थकं प्रवृत्तम् । तथा च 'शब्दोऽय'मिति निश्चयात्मकावग्रहेण 'शब्द इत्यवगृहीत' इति यथाश्रुत एव सङ्गच्छते– इति मन्यन्ते, तन्मतं प्रतिक्षेप्तुमुपन्यस्यति–

**केचित्तु–सङ्केतादिविकल्पविकलस्य जातमात्रस्य बालस्य सामान्यग्रहणम्, परिचितविषयस्य त्वाद्यसमये एव विशेषज्ञानमित्येतदपेक्षया 'तेन शब्द इत्यवगृहीत' इति नाऽनुपपन्नम्-इत्याहुः,**

**केचित्त्विति** । अस्य **आहुरित्यनेन** सम्बन्धः । **सङ्केतादिविकल्पविकलस्य** = 'अनेन शब्देनाऽयमर्थो बोद्धव्य, इदं पदममुमर्थं बोधयत्वि'त्यादिपुरुषेच्छालक्षणसङ्केतादिज्ञानरहितस्य, **जातमात्रस्य** = तत्क्षणादावेव जातस्य, **सामान्यग्रहणम्** = अशेषविशेषानवगाहि महासामान्य-

---

**'यदि च व्यञ्जनावग्रहे'**–"ननु यदि व्यञ्जनावग्रहेऽपि अव्यक्तशब्दग्रहणं भवेत् तदा को दोषः स्यात् ? इत्याह–यदि च व्यञ्जनावग्रहे असौ अव्यक्तशब्दः प्रतिभासत इत्यभ्युपगम्यते तदा व्यञ्जनावग्रहो न प्राप्नोति, अर्थावग्रह एवाऽसौ अव्यक्तार्थावग्रहणात् । अथ अस्याऽपि सूत्रे प्रोक्तत्वादस्तित्वं न परिह्रियते तर्हि द्वयोरप्यविशेषः सोऽपि अर्थावग्रहः सोऽपि व्यञ्जनावग्रहः प्राप्नोति ।" –विशेषा० बृ० गा० २६५ ।

**'केचित्तु'**–"केचिदेवमाहुः-यदेतत् सर्वविशेषविमुखस्याऽव्यक्तस्य सामान्यमात्रस्य ग्रहणं तत् शिशोस्तत्क्षणजातमात्रस्य भवति नात्र विप्रतिपत्तिः, असौ सङ्केतादिविकलोऽपरिचितविषयः । यः परिचितविषयः तस्य आद्यशब्दश्रवणसमय एव विशेषविज्ञानं जायते स्पष्टत्वात् तस्य, ततश्चाऽमुमाश्रित्य 'तेणं सद्देत्ति उग्गहिए' इत्यादि यथाश्रुतमेव व्याख्यायते, न कश्चिद्दोषः ।"– विशेषा० बृ० गा० २६८ ।

सन्मात्रावगाहि ज्ञानम्, अर्थावग्रहणमिति शेषः । **परिचितविषयस्य तु** = गृहीतसङ्केतादिकस्य पुंसः पुनः, **आद्यसमये एव** = प्रथमशब्दश्रवणसमय एव, **विशेषज्ञानं** = 'शब्दोऽयम्, रूपादिरय'मित्येवं विशेषनिश्चयात्मकं ज्ञानम्, अर्थावग्रहणमित्यत्राऽपि ज्ञेयम् । **एतदपेक्षया** = परिचितविषय-प्रमातृनिष्ठविशेषज्ञानलक्षणार्थावग्रहापेक्षया ।

यथा च परिचितविषयस्य पुंस आद्यसमयेऽपि 'शब्दोऽय'मिति निश्चयात्मकं ज्ञानं भवति, तथा ततोऽपि परिचिततरविषयस्य पटुतरमतेः तन्निश्चयादप्यधिकतरशाङ्खत्वादि-विशेष-निर्णयात्मकं ज्ञानमाद्यसमये एव भवेत्-पुरुषेषु शक्तितारतम्यस्योपलभ्यमानस्याऽपनेतुम-शक्यत्वात् । न चैतदिष्टापादनतया परिहर्तुं शक्यं—विशिष्टमतेरपि शब्दरूपधर्मिग्रहणे सत्ये-वोत्तरोत्तरक्रमिकबहुधर्मविशेषग्रहणस्य न्याय्यत्वात्, प्रथमसमये एव बहुतरग्रहणस्य 'न उण जाणइ के वेस सद्देत्ति' इति सूत्रविरुद्धत्वाच्चेत्यभिप्रायेण तन्मतखण्डनमुपनिबध्नाति—

**तन्न, एवं हि व्यक्ततरस्य व्यक्तशब्दज्ञानमतिक्रम्याऽपि सुबहुविशेषग्रहप्रसङ्गात् । न चेष्टापत्तिः- 'न पुनर्जानाति क एष शब्द' इति सूत्रावयवस्याऽविशेषेणोक्तत्वात्, प्रकृष्टमतेरपि शब्दं धर्मिणमगृहीत्वोत्तरोत्तरसुबहुधर्मग्रहणानुपपत्तेश्च ।**

**तन्नेति** । उक्तमतं न समीचीनमित्यर्थः । **व्यक्ततरस्य** = अतिपरिचितविषयस्य प्रमातुः । **व्यक्तशब्दज्ञानमतिक्रम्याऽपीति** । जातमात्रस्य बालस्य प्रथमसमयेऽव्यक्तशब्दज्ञानम् । तदतिक्रम्य परिचितविषयस्य जन्तोर्यथा प्रथमसमये एव व्यक्तशब्दज्ञानम्, तत्र यथा प्रथम-मव्यक्तशब्दज्ञानम्, ततो व्यक्तशब्दज्ञानमिति न क्रमः, किन्तु प्रथममेव व्यक्तशब्दज्ञानम्, तथाऽतिपरिचितविषयस्य पटुतरमतेः प्रथमसमये एव व्यक्तशब्दज्ञानमतिक्रम्याऽपि शाङ्खत्वादि-बहुविशेषग्रहः प्रसज्येतेत्यर्थः ।

उक्तापादनस्येष्टापत्तितया परिहरणं सूत्रविरोधेन निषेधति-**न चेष्टापत्तिरि**ति । **अवि-**

---

**'तन्न, एवं हि'**—"अत्रोत्तरमाह-यदि परिचितविषयस्य जन्तोः अव्यक्तशब्दज्ञानमुल्लङ्घ्य तस्मिन्नर्थावग्रहैकसमयमात्रे शब्दनिश्चयज्ञानं भवति, तदा अन्यस्य कस्यचित् परिचिततरविषयस्य पटुतरावबोधस्य तस्मिन्नेव समये व्यक्तशब्दज्ञानमप्यतिक्रम्य 'शाङ्खोऽयं शब्दः' इत्यादिसङ्ख्या-तीतविशेषग्राहकमपि ज्ञानं भवदभिप्रायेण स्यात् । दृश्यन्ते च पुरुषशक्तीनां तारतम्यविशेषाः । भवत्येव कस्यचित् प्रथमसमयेऽपि सुबहुविशेषग्राहकमपि ज्ञानमिति चेत्, न, 'न उण जाणइ के वेस सद्दे' इत्यस्य सूत्रावयवस्य अगमकत्वप्रसङ्गात् । विमध्यमशक्तिपुरुषविषयमेतत् सूत्रमिति चेत्, न, अविशेषेण उक्तत्वात् सर्वविशेषविषयत्वस्य च युक्त्यनुपपन्नत्वात् । नहि प्रकृष्टमतेरपि शब्दधर्मिणमगृहीत्वा उत्तरोत्तरसुबहुधर्मग्रहणसंभवोऽस्ति निराधारधर्माणामनुपपत्तेः ।—विशेषा० बृ० गा० २६९ ।

**शेषेण** = जातमात्र-परिचितविषय-परिचिततरप्रमातृ-साधारण्येन ।

विशेषधर्मग्रहणे सामान्यधर्मिग्रहणस्य कारणत्वेन प्रथमं शब्दरूपधर्मिग्रहणं विना तद्गतबहुविशेषग्रहणं विशिष्टमतेरपि प्रमातुर्न सम्भवतीत्याह- **प्रकृष्टमतेरपी**ति ।

विषयविषयिसन्निपातानन्तरं सामान्यमात्रग्राहि दर्शनं भवति, तदनन्तरमवान्तर-शब्दत्वादिसामान्यविशेषावग्राह्यर्थावग्रहो भवतीति केचिदभ्युपगच्छन्ति । तन्मतं प्रतिक्षेप्तुमुप-न्यस्यति-

**अन्ये तु–आलोचनपूर्वकमर्थावग्रहमाचक्षते । तत्राऽऽलोचनमव्यक्तसामान्यग्राहि, अर्थावग्रहस्त्वितरव्यावृत्तवस्तुस्वरूपग्राहीति न सूत्रानुपपत्तिः इति ।**

"अस्ति ह्यालोचनाज्ञानं, प्रथमं निर्विकल्पकम् ।
बालमूकादिविज्ञान-सदृशं शुद्धवस्तुजम् ॥"

इति वचनाद् निर्विकल्पकं ज्ञानमव्यक्तं सामान्यग्राहि **आलोचनम्**, **तत्पूर्वकं** = तदुत्तरकालीन**मर्थावग्रहमाचक्षते** = कथयन्तीत्यर्थः । **तत्र** = उक्तमते, **अव्यक्तसामान्यग्राहि** = अवान्तरविशेषमात्राप्रतिभासिसामान्यग्राहि, **अर्थावग्रहस्तु** = 'शब्दोऽय'मित्यवान्तरशब्दत्व-लक्षणसामान्यविशेषग्राहि ज्ञानं पुनः, **इतरव्यावृत्तवस्तुस्वरूपग्राही** = शब्देतररूपादिव्यावृत्त-शब्दात्मकवस्तुस्वरूपग्राहि । **इति** = एवमभ्युपगमेन, **न सूत्रानुपपत्तिः** = 'तेणं सद्देत्ति उग्गहिए' इति सूत्रस्य 'शब्दोऽय'मित्यवग्रहेण 'शब्द इत्यवगृहीत' इत्यर्थकस्य नाऽनुपपत्तिः । अर्थावग्रहे शब्दत्वेन शब्दभानस्य स्वीकारात् तथा तदर्थस्य सम्भवादित्याशयः ।

भवदभ्युपगतमालोचनाज्ञानं व्यञ्जनावग्रहात् पूर्वं तत्पश्चाद् व्यञ्जनावग्रहरूपं वा न सम्भवति, प्रकारान्तरेण तत्सम्भवः चाऽसम्भावित एवेति न तदुपगमो ज्यायानिति प्रतिक्षिपति-

**तदसद्, यत आलोचनं व्यञ्जनावग्रहात् पूर्वं स्यात्, पश्चाद् वा, स एव वा ?**

---

**'अन्ये तु आलोचना'**–"विषयविषयिसन्निपातसमयानन्तरमाद्यग्रहणमवग्रहः । विषय-विषयिसन्निपाते सति दर्शनं भवति तदनन्तरमर्थस्य ग्रहणमवग्रहः ।"–सर्वार्थ० १.१५ ।

**'यत आलोचनम्'**–"यदेतत् भवदुत्प्रेक्षितं सामान्यग्राहकमालोचनं तत् व्यञ्जनावग्रहात् पूर्वं वा भवेत्, पश्चाद्वा भवेत्, स एव व्यञ्जनावग्रहोऽपि आलोचनं भवेत् ? इति त्रयी गतिः । किञ्चाऽतः ? ।" विशेषा० बृ० गा० २७४ ।

"पूर्वं तत् नास्ति । कुतः ? अर्थव्यञ्जनसम्बन्धाभावादिति । अर्थः-शब्दादिविषयभावेन परिणतद्रव्यसमूहः, व्यञ्जनं तु श्रोत्रादि, तयोः सम्बन्धः, तस्याऽभावात् । सति हि अर्थव्यञ्जनसम्बन्धे सामान्यार्थालोचनं स्यात्, अन्यथा सर्वत्र सर्वदा तद्भावप्रसङ्गात् । व्यञ्जनावग्रहाच्च पूर्वम्

**नाऽऽद्यः—अर्थव्यञ्जनसम्बन्धं विना तदयोगाद् । न द्वितीयः—व्यञ्जनावग्रहान्त्यसमयेऽर्थावग्रहस्यैवोत्पादादालोचनानवकाशात् । न तृतीयः-व्यञ्जनावग्रहस्यैव नामान्तरकरणात्, तस्य चाऽर्थशून्यत्वेनाऽर्थालोचनानुपपत्तेः ।**

**स एव वा** = अथवा व्यञ्जनावग्रह एवाऽऽलोचनाज्ञानम् । **नाद्य** इति । व्यञ्जनावग्रहात् पूर्वमालोचनाज्ञानमिति प्रथमविकल्पो न युक्त इत्यर्थः । व्यञ्जनावग्रहात् पूर्वं शब्दादिपरिणतद्रव्यनिकुरम्बात्मकार्थेन सह श्रोत्रादीन्द्रियलक्षणव्यञ्जनस्य सम्बन्धसद्भावे व्यञ्जनावग्रह एव स्याद्, नाऽऽलोचनम् । उक्तसम्बन्धस्याऽभावे चाऽव्यक्तसामान्यग्रहणलक्षणालोचनाज्ञानस्य कारणाभावादेव न सम्भव इत्याह—**अर्थव्यञ्जने**ति । आलोचनाज्ञानासम्भवादित्यर्थः ।

**न द्वितीय** इति । व्यञ्जनावग्रहात् पश्चादालोचनाज्ञानमिति द्वितीयपक्षोऽपि न युक्त इत्यर्थः । तत्र कारणमाह—**व्यञ्जनावग्रहान्त्ये**ति । व्यञ्जनावग्रहार्थावग्रहयोरन्तरालकालस्य ताभ्यां विमुक्तस्याऽभावाद्, व्यञ्जनावग्रहान्त्यसमयेऽर्थावग्रहसद्भावस्यैवोपगमेन न तदानीमालोचनाज्ञानसम्भवादित्यर्थः ।

---

अर्थव्यञ्जनसम्बन्धो नास्ति, तद्भावे च व्यञ्जनावग्रहस्यैव इष्टत्वात् तत्पूर्वकालता न स्यादिति ।''—विशेषा० बृ० गा० २७४ ।

**'न द्वितीयः—**''द्वितीयविकल्पं शोधयन्नाह—अर्थावग्रहोऽपि यस्मात् व्यञ्जनावग्रहस्यैव चरमसमये भवति तस्मात् पश्चादपि व्यञ्जनावग्रहादालोचनज्ञानं न युक्तम्, निरवकाशत्वात् । नहि व्यञ्जनार्थवग्रहयोरन्तरे कालः समस्ति यत्र तत् त्वदीयमालोचनज्ञानं स्यात्, व्यञ्जनावग्रहचरमसमय एवाऽर्थावग्रहसद्भावात् ।''—विशेषा० बृ० गा० २७५ ।

**'न तृतीयः'—**''पूर्वपश्चात्कालयोर्निषिद्धत्वात् पारिशेष्याद् मध्यकालवर्ती तृतीयविकल्पोपन्यस्तो व्यञ्जनावग्रह एव भवताऽऽलोचनाज्ञानत्वेनाभ्युपगतो भवेत् । एवं च न कश्चिद् दोषः, नाममात्र एव विवादात् ।''—विशेषा० बृ० गा० २७५ ।

**'तस्य च'—**''क्रियतां तर्हि प्रेरकवर्गेण वर्धापनम्, त्वदभिप्रायाविसंवादलाभादिति चेत्, नैवम्, विकल्पद्वयस्येह सद्भावात्, तथाहि-तद्व्यञ्जनावग्रहकालेऽभ्युपगम्यमानमालोचनम्-किमर्थस्याऽऽलोचनम्, व्यञ्जनानां वा ? इति विकल्पद्वयम् । तत्र प्रथमविकल्पं दूषयन्नाह-तत्समालोचनं यदि सामान्यरूपस्य अर्थस्य दर्शनमिष्यते तर्हि न व्यञ्जनावग्रहात्मकं भवति, व्यञ्जनावग्रहस्य व्यञ्जनसम्बन्धमात्ररूपत्वेन अर्थशून्यत्वात् । अथ द्वितीयविकल्पमङ्गीकृत्याह-अथ व्यञ्जनस्य शब्दादिविषयपरिणतद्रव्यसम्बन्धमात्रस्य तत्समालोचनमिष्यते तर्हि कथम् आलोचकत्वं तस्य घटते ? अर्थशून्यस्य व्यञ्जनसम्बन्धमात्रान्वितत्वेन सामान्यार्थालोचकत्वानुपपत्तेः ।'' विशेषा० बृ० गा० २७६ ।

**न तृतीय** इति । व्यञ्जनावग्रह एवाऽऽलोचनाज्ञानमिति तृतीयविकल्पोऽपि न सम्भवतीत्यर्थः । व्यञ्जनावग्रहस्यैवाऽऽलोचनाज्ञानमिति नामकरणे न नो विवादः-परिभाषाया अपर्यनुयोज्यत्वात्, परं तस्याऽर्थविषयकत्वाभावादर्थालोचनत्वं न सम्भवतीत्याह- **व्यञ्जनावग्रहस्यैवेति** ।

यदि च व्यञ्जनावग्रहतयाऽभ्युपगम्यमानमालोचनाज्ञानं सामान्यमात्रविषयकमभ्युपेयते तदापि तदनन्तरमेव 'शब्दोऽय'मिति सामान्यविशेषस्वरूपशब्दत्वस्य निश्चयरूपोऽर्थावग्रहो भवदभिमतो न स्यादेव-ईहित एवाऽर्थे विशेषनिश्चयसम्भवो नाऽनीहिते । न चाऽऽलोचनानन्तरक्षणे युगपदेवेहार्थावग्रहौ स्यातामिति कल्पना युक्ता-अर्थावग्रहकालस्यैकसमयत्वाद्, ईहाकालस्य चाऽसङ्ख्येयसमयत्वात्, 'शब्दोऽय'मित्यवग्रहस्य च वस्तुतोऽपायरूपत्वेन तत्कालस्येहासङ्ख्येयकालात् पृथगेवाऽसङ्ख्येयकालत्वादित्याशयेनाऽऽह–

**किञ्च, आलोचनेनेहां विना झटित्येवाऽर्थावग्रहः कथं जन्यताम् ? युगपच्चेहावग्रहौ पृथगसङ्ख्येयसमयमानौ कथं घटेताम् ? इति विचारणीयम् ।**

अपि च भवदुपगतोऽर्थावग्रहो निश्चयरूपः, ईहा चाऽनिश्चयरूपा । न चैकस्मिन्नर्थे एकदैवैकपुरुषस्य निश्चयानिश्चयौ इत्यपि युक्तिर्बोध्या ।

ननु 'क्षिप्रमवगृह्णाती'त्यादिना क्षिप्र-चिर-बहु-अबहु-बहुविध-अबहुविध-निश्रित-अनिश्रित-सन्दिग्ध-असन्दिग्ध-ध्रुव-अध्रुवत्वलक्षणद्वादशविशेषणैर्विशेषिताः क्षिप्रावग्रहणादिस्वरूपा द्वादशार्थावग्रहाः **तत्त्वार्थे** प्ररूपिताः । ततश्च नैकसामयिक एवाऽर्थावग्रहः, किन्त्वसङ्ख्येयसमयमानोऽप्यसाविति ईहया समसमयमानत्वसम्भवेन समकालमुत्पत्तिर्विशेषविषयकत्वं च सम्भविष्यतीति शङ्कते-

---

**'किञ्च, आलोचनेन'**–"भवतु तस्मिन् व्यञ्जनावग्रहे सामान्यं गृहीतम्, तथापि कथमनीहिते तस्मिन् अकस्मादेव अर्थवग्रहकाले 'शब्द एषः' इति विशेषज्ञानं युक्तम् ? 'शब्द एव एषः' इत्ययं हि निश्चयः । न चायमीहामन्तरेण झगित्येव युज्यते । अतो नाऽर्थावग्रहे 'शब्दः' इत्यादिविशेषबुद्धिर्युज्यते ।"–विशेषा० बृ० गा० २७८ ।

**'युगपच्च'**–"अथ अर्थावग्रहसमये शब्दाद्यवगमेन सहैवेहा भविष्यतीति मन्यसे, तत्राऽऽह-यदिदमर्थावग्रहे विशेषज्ञानं त्वया इष्यते सोऽपायः, स च अवगमस्वभावो निश्चयस्वरूप इत्यर्थः । या च तत्समकालमीहाऽभ्युपेयते सा तर्कस्वभावा अनिश्चयात्मिका इत्यर्थः । तत एतौ ईहापायौ अनिश्चयेतरस्वभावौ कथमर्थावग्रहे युगपदेव युक्तौ, निश्चयानिश्चययोः परस्परपरिहारेण व्यवस्थितत्वात् । अपरञ्च समयमात्रकालोऽर्थावग्रहः, ईहापायौ तु प्रत्येकमसङ्ख्येयसमयनिष्पन्नौ कथम् एकस्मिन्नर्थावग्रहसमये स्याताम्-अत्यन्तानुपपन्नत्वात् ।"–विशेषा० बृ० गा० २७९ ।

**नन्ववग्रहेऽपि क्षिप्रेतरादिभेदप्रदर्शनादसङ्ख्येयसमयमानत्वं विशेषविषयत्वं चाऽविरुद्धमिति चेद्;**

**अवग्रहे** = अर्थावग्रहे, अपिनेहाया असङ्ख्येयसमयमानत्वस्याऽऽम्रेडनम् ।

बहुबहुविधादिग्राहकस्य विशेषविषयकनिश्चयरूपस्यैव सम्भवेन तथाविधस्येहानन्तरभावित्वेनाऽपायत्वमेव । उक्तविशेषणकापायकारणत्वादेवाऽवग्रहे उपचारमाश्रित्य क्षिप्रावग्रहणत्वादिना **तत्त्वार्थादौ** द्वादशविधत्वप्ररूपणम् । कारणेऽप्यर्थावग्रहे सामान्यग्राहिणि विशेषग्राहिकार्यापायस्वरूपं शक्त्यात्मना योग्यतयाऽस्तीति तथा प्ररूपणं नाऽसङ्गतम् । अन्यथाऽशेषविशेषापरामृष्टसामान्यग्राहिण्यर्थावग्रहेऽनुपचरितस्य विशेषविषयकत्वनियतस्योक्तद्वादशविधत्वस्याऽसम्भवादिति समाधत्ते-

**न, तत्त्वतस्तेषामपायभेदत्वात्, कारणे कार्योपचारमाश्रित्याऽवग्रहभेदत्वप्रतिपादनात्, अविशेषविषये विशेषविषयत्वस्याऽवास्तवत्वात् ।**

---

**'नन्ववग्रहे'**–"क्षिप्रमवगृह्णाति, चिरेणावगृह्णाति, बह्ववगृह्णाति, अबह्ववगृह्णाति, बहुविधमवगृह्णाति, अबहुविधमवगृह्णाति, एवमनिश्रितम्, निश्रितम्, असन्दिग्धम्, सन्दिग्धम्, ध्रुवम्, अध्रुवमवगृह्णाति-इत्यादिना ग्रन्थेनाऽवग्रहादयः शास्त्रान्तरे द्वादशभिर्विशेषणैर्विशेषिताः । ततः 'क्षिप्रं चिरेण वाऽवगृह्णाति' इति विशेषणान्यथानुपपत्तेर्ज्ञायते नैकसमयमात्रमान एवाऽर्थावग्रहः, किन्तु चिरकालिकोऽपि, नहि समयमात्रमानतयैकरूपे तस्मिन् क्षिप्रचिरग्रहणविशेषणमुपपद्यत इति भावः । तस्मादेतद्विशेषणबलात् असङ्ख्येयसमयमानोऽप्यर्थावग्रहो युज्यते । तथा, बहूनां श्रोतृणामविशेषेण प्राप्तिविषयस्थे शङ्खभेर्यादिबहुतूर्यनिर्घोषे क्षयोपशमवैचित्र्यात् कोऽप्यबहु अवगृह्णाति-सामान्यं समुदिततूर्यशब्दमात्रमवगृह्णाति इत्यर्थः । अन्यस्तु बह्ववगृह्णाति-शङ्खभेर्यादितूर्यशब्दान् भिन्नान् बहून् गृह्णातीत्यर्थः । अन्यस्तु स्त्रीपुरुषादिवाद्यत्व-स्निग्धमधुरत्वादिबहुविधविशेषविशिष्टत्वेन बहुविधमवगृह्णाति । अपरस्तु अबहुविधविशेषविशिष्टत्वादबहुविधमवगृह्णाति । अत एतस्माद् बहुबहुविधाद्यनेकविकल्पनानात्ववशात् अवग्रहस्य क्वचित् सामान्यग्रहणम्, क्वचित्तु विशेषग्रहणम् इत्युभयमप्यविरुद्धम् । अतो यत् सूत्रे 'तेणं सद्देत्ति उग्गहिए' इति वचनात् 'शब्दः' इति विशेषविज्ञानमुपदिष्टम्, तदप्यर्थावग्रहे युज्यत एव इति केचित् ।"–विशेषा० बृ० गा० २८० ।

**'नः तत्त्वतः'**–"अत्रोत्तरमाह-बहुबहुविधादिग्राहको हि विशेषावगमो निश्चयः, स च सामान्यार्थग्रहणमीहां च विना न भवति, यश्च तदविनाभावी सोऽपाय एव, कथमर्थावग्रह इति भण्यते ? आह-यदि बहुबहुविधादिग्राहकोऽपाय एव भवति तर्हि कथमन्यत्र अवग्रहादीनामपि बह्वादिग्रहणमुक्तम् ? सत्यम्, किन्तु अपायस्य कारणमवग्रहादयः । कारणे च योग्यतया कार्यस्वरूपमस्ति इति उपचारतस्तेऽपि बह्वादिग्राहकाः प्रोच्यन्ते इत्यदोषः । यद्येवं तर्हि वयमपि

**तत्त्वतः** = परमार्थतः, **तेषां** = क्षिप्रेतरादिभेदानाम् । **कारणे** = क्षिप्रेतरादिग्रहणस्वभावापायकारणेऽर्थावग्रहे, **कार्यस्य** = क्षिप्रेतरादिग्रहणस्वभावापायस्य, **उपचारं** = तद्गतधर्मस्य स्वरूपयोग्यतयाऽर्थावग्रहे कल्पितं सत्त्वम्, **आश्रित्य** = अवलम्ब्य । क्षिप्रग्रहणत्वादिकमनुपचरितमेव कुतो नाऽर्थावग्रहस्येत्याकाङ्क्षायामाह—**अविशेषे**ति । विशेषविषयकत्वविकले सामान्यमात्रग्राहिण्यर्थावग्रहे इति यावत् ।

मुख्यतोऽप्यर्थावग्रहे क्षिप्रेतरादिभेदत्वमुपपादयितुं कल्पान्तरमाह—

**अथवा अवग्रहो द्विविधः-नैश्चयिकः, व्यावहारिकश्च । आद्यः सामान्यमात्रग्राही । द्वितीयश्च विशेषविषयः-तदुत्तरमुत्तरोत्तरधर्माकाङ्क्षारूपेहाप्रवृत्तेः, अन्यथा अवग्रहं**

---

अपायगतं विशेषज्ञानमर्थावग्रहेऽपि उपचरिष्याम इति । नैतदेवम्, यतो मुख्याभावे सति प्रयोजने निमित्ते च उपचारः प्रवर्तते । न चैवमुपचारे किञ्चित् प्रयोजनमस्ति । 'तेणं सद्देत्ति उग्गहिए' इत्यादिसूत्रस्य यथाश्रुतार्थनिगमनं प्रयोजनमिति चेत्, न, 'सद्देत्ति भणइ वत्ता' इत्यादि प्रकारेणाऽपि तस्य निगमितत्वात् । सामर्थ्यव्याख्यानमिदम्, न यथाश्रुतार्थव्याख्येति चेत्, तर्हि यद्युपचारेणाऽपि श्रौतोऽर्थः सूत्रस्य व्याख्यायत इति तवाऽभिप्रायः, तर्हि यथा युज्यत उपचारः तथा कुरु । न चैतत् सामयिकेऽर्थावग्रहेऽसङ्ख्येयसामयिकं विशेषग्रहणं कथमप्युपपद्यते ।''—विशेषा० बृ० गा० २८१ ।

'**अथवा अवग्रहो**'—''प्रथमं नैश्चयिके अर्थावग्रहे रूपादिभ्योऽव्यावृत्तमव्यक्तं शब्दादिवस्तुसामान्यं गृहीतम्, ततः तस्मिन्नीहिते सति 'शब्द एवाऽयम्' इत्यादिनिश्चयरूपोऽपायो भवति । तदनन्तरं तु 'शब्दोऽयं किं शाङ्खः शाङ्र्गो वा' इत्यादिशब्दविशेषविषया पुनरीहा प्रवर्तिष्यते, 'शाङ्ख एवाऽयं शब्दः' इत्यादिशब्दविशेषविषयोऽपायश्च यो भविष्यति तदपेक्षया 'शब्द एवाऽयम्' इति निश्चयः प्रथमोऽपायोऽपि सन्नुपचारादर्थावग्रहो भण्यते ईहापायापेक्षात इति, अनेन चोपचारस्यैकं निमित्तं सूचितम् ।

'शाङ्खोऽयं शब्दः' इत्याद्येष्यविशेषापेक्षया येनाऽसौ सामान्यशब्दरूपं सामान्यं गृह्णाति इति, अनेन तूपचारस्यैव द्वितीयं निमित्तमावेदितम्, तथाहि-यदनन्तरमीहापायौ प्रवर्तेते, यश्च सामान्यं गृह्णाति सोऽर्थावग्रहः, यथाऽऽद्यो नैश्चयिकः, प्रवर्तते च 'शब्द एवाऽयम्' इत्याद्यपायानन्तरमीहापायौ, गृह्णाति च 'शाङ्खोऽयम्' इत्यादिभाविविशेषापेक्षयाऽयं सामान्यम् । तस्मादर्थावग्रह एष्यविशेषापेक्षया सामान्यं गृह्णातीति उक्तम् । ततस्तदनन्तरं किं भवति ? ततः सामान्येन शब्दनिश्चयरूपात् प्रथमापायादनन्तरम् 'किमयं शब्दः शाङ्खः शाङ्र्गो वा' इत्यादिरूपेहा प्रवर्तते । ततस्तद्विशेषस्य-शङ्खप्रभवत्वादेः शब्दविशेषस्य 'शाङ्ख एवायम्' इत्यादिरूपेणाऽपायश्च निश्चयरूपो भवति । अयमपि च भूयोऽन्यतद्विशेषाकाङ्क्षावतः प्रमातुर्भाविनीमीहामपायं चापेक्ष्य, एष्यविशेषापेक्षया सामान्यालम्बनत्वाच्चार्थावग्रह इत्युपचर्यते ।

**विनेहानुत्थानप्रसङ्गात् । अत्रैव क्षिप्रेतरादिभेदसङ्गतिः । अत एव चोपर्युपरि ज्ञानप्रवृत्तिरूपसन्तानव्यवहार इति द्रष्टव्यम् ।**

**अवग्रहः** = अर्थावग्रहः । **आद्यः** = नैश्चयिकोऽर्थावग्रहः, **सामान्यमात्रग्राही** = रूपादिभ्योऽव्यावृत्तस्याऽव्यक्तस्य शब्दादिवस्तुसामान्यस्य ग्राहकः । **द्वितीयश्च** = व्यावहारिकोऽर्थावग्रहः पुनः, **विशेषविषयः** = शब्दादिवस्तुसामान्यसत्तालक्षण-महासामान्यावान्तर-शब्दत्वादिसामान्यविशेषविषयकः ।

नन्वव्यक्तशब्दादिवस्तुसामान्यग्राह्यवग्रहस्य नैश्चयिकावग्रहत्वं युक्तं-यतः तेनाऽवगृहीते सामान्ये 'किमयं शब्दोऽशब्दो वे'तीहाप्रवृत्त्यनन्तरं 'शब्द एवाऽय'मित्यपायस्य सम्भवः । 'शब्द एवाऽय'मिति व्यावहारिकार्थावग्रहानन्तरं त्वीहाद्यभावात् कथमस्याऽर्थावग्रहत्वमित्यत आह—

---

इयं च सामान्यविशेषापेक्षा तावत् कर्तव्या यावदन्त्यो वस्तुनो विशेषः । यस्माच्च विशेषात् परतो वस्तुनोऽन्ये विशेषा न सम्भवन्ति सोऽन्त्यः, अथवा सम्भवत्स्वपि अन्यविशेषेषु यतो विशेषात् परतः प्रमातुस्तज्जिज्ञासा निवर्तते सोऽन्त्यः, तमन्त्यं विशेषं यावद् व्यावहारिकार्थवग्रहेहापायार्थं सामान्यविशेषापेक्षा कर्तव्या ।"—विशेषा० बृ० गा० २८२-४ ।

"सर्वत्र विषयपरिच्छेदे कर्तव्ये निश्चयतः ईहापायौ भवतः, 'ईहा, पुनरपायः, पुनरीहा, पुनरप्यपायः' इत्ययं क्रमेण यावदन्त्यो विशेषः तावदीहापायावेव भवतः, नाऽर्थावग्रहः । किं सर्वत्रैवमेव ? न, आद्यमव्यक्तं सामान्यमात्रालम्बनमेकसामयिकं ज्ञानं मुक्त्वाऽन्यत्रेहापायौ भवतः । इदं पुनर्नेहा, नाप्यपायः, किन्तु अर्थावग्रह एव । संव्यवहारार्थं व्यावहारिकजनप्रतीत्यपेक्षं पुनः सर्वत्र यो योऽपायः स स उत्तरोत्तरेहाऽपायापेक्षया, एष्यविशेषापेक्षया चोपचारतोऽर्थावग्रहः । एवं च तावद् नेयं यावत्तारतम्येनोत्तरोत्तरविशेषाकाङ्क्षा प्रवर्तते ।"—विशेषा० बृ० गा० २८५ ।

"लोकेऽपि हि यो विशेषः सोऽपि अपेक्षया सामान्यम्, यत् सामान्यं तदप्यपेक्षया विशेष इति व्यवह्रियते । तथाहि-'शब्द एवाऽयम्' इत्येवमध्यवसितोऽर्थः पूर्वसामान्यापेक्षया विशेषः, 'शाङ्खोऽयम्' इत्युत्तरविशेषापेक्षया तु सामान्यम् । अयं चोपर्युपरिज्ञानप्रवृत्तिरूपेण सन्तानेन लोके रूढः सामान्यविशेषव्यवहारः औपचारिकावग्रहे सत्येव घटते, नान्यथा, तदनभ्युपगमे हि प्रथमापायानन्तरमीहानुत्थानम्, उत्तरविशेषाग्रहणं चाऽभ्युपगतं भवति । उत्तरविशेषाग्रहणे च प्रथमापायव्यवसितार्थस्य विशेषत्वमेव न सामान्यत्वम् इति पूर्वोक्तरूपो लोकप्रतीतः सामान्यविशेषव्यवहारः समुच्छिद्येत । अथ प्रथमापायानन्तरमभ्युपगम्यत ईहोत्थानम्, उत्तरविशेषग्रहणं च, तर्हि सिद्धं तदपेक्षया प्रथमापायव्यवसितार्थस्य सामान्यत्वम्, यश्च सामान्यग्राहकः, यदनन्तरं च ईहादिप्रवृत्तिः सोऽर्थावग्रहः नैश्चयिकाद्यर्थावग्रहवत् इत्युक्तमेव । इति सिद्धो व्यावहारिकार्थावग्रहः, तत्सिद्धौ च सन्तानप्रवृत्त्याऽन्त्यविशेषं यावत् सिद्धः सामान्यविशेषव्यवहारः ।"—विशेषा० बृ० गा० २८८ ।

**तदुत्तरमिति** । तदुत्तरं = 'शब्दोऽय'मिति व्यावहारिकार्थावग्रहानन्तरम् ।

**उत्तरोत्तरेति** । 'शब्दोऽय'मिति निश्चये जातेऽपि 'किमयं शब्दः शाङ्खः शार्ङ्गो वे'ति सन्दिह्य 'प्रायः शाङ्खेनाऽनेन भवितव्य'मितीहा प्रवर्त्तते, ततः 'शाङ्ख एवाऽय'मिति निश्चयात्माऽपायो भवति । एतस्मात् कारणाद् युज्यते 'शब्दोऽय'मिति ज्ञानस्याऽर्थावग्रहत्वम् । एवं 'शाङ्ख एवाऽय'मिति निश्चयानन्तरं 'देवदत्तेन यज्ञदत्तेन वा ध्मातस्य शङ्खस्य शब्दोऽय'मिति सन्दिह्य 'प्रायो देवदत्ताध्मातशङ्खशब्देनाऽनेन भवितव्य'मितीहा प्रवर्त्तते, ततो 'देवदत्ताध्मातशङ्खशब्द एवाऽय'मिति निर्णयात्मकोऽपायो भवतीति तदपेक्षया 'शाङ्ख एवाऽय'मित्यस्याऽर्थावग्रहत्वमित्येवं यद्यद्धर्मापेक्षया विशेषधर्मः सम्भवति तत्तद्धर्मग्रहणं भविष्येहापायपूर्वकालीनमवग्रहस्वरूपं स्वविषयगतावगृहीतसामान्यधर्मापेक्षया विशेषावगाहित्वादपायस्वरूपं च । यदपायविषयीभूतधर्मापेक्षया परतो विशेषधर्मा न सन्ति, तत्राऽनन्तरमीहापायाप्रवृत्तेः सोऽप्यपाय एव, न व्यावहारिकार्थावग्रह इति भावः ।

**अन्यथा** = नैश्चयिकावग्रहगृहीते सामान्ये ईहिते चाऽनन्तरभावित्वेनाऽपायरूपस्य 'शब्द एवाऽय'मिति निश्चयस्य व्यावहारिकावग्रहत्वानभ्युपगमे, **अवग्रहं विना** = अर्थावग्रहं विना, **ईहानुत्थानप्रसङ्गात्** = 'किमयं शब्दः शाङ्खः शार्ङ्गो वे'त्याद्युत्तरविशेषाकाङ्क्षणरूपेहानुत्थानप्रसङ्गात्—ईहां प्रति अवग्रहस्य कारणत्वात्, कारणाभावे कार्यासम्भवादिति ईहाकार्यान्यथानुपपत्त्याऽवग्रहोऽवश्यमेव कल्पनीयः, अथ चाऽन्यस्याऽर्थावग्रहस्य प्रकृतेऽसम्भवात् 'शब्दोऽयमि'त्यपाय एव तत्राऽर्थावग्रह इति । **अत्रैव** = व्यावहारिकार्थावग्रहे एव ।

**अत एव** = प्राथमिकापायस्य व्यावहारिकार्थावग्रहत्वाभ्युपगमादेव । **उपर्युपरीति** । प्रथमापायानन्तरं तद्रूपव्यावहारिकार्थावग्रहगृहीते शब्दत्वरूपे, महासामान्यसत्त्वापेक्षया विशेषस्वरूपेऽपि शाङ्खत्वाद्युत्तरविशेषापेक्षया सामान्यस्वरूपे, ईहातोऽपायात्मा 'शाङ्खोऽय'मिति ज्ञानं भवति । तदनन्तरं तद्रूपव्यावहारिकार्थावग्रहगृहीते शाङ्खत्वरूपे, शब्दत्वलक्षणसामान्यापेक्षया विशेषरूपेऽपि देवदत्ताध्मातशङ्खप्रभवत्वाद्युत्तरविशेषापेक्षया सामान्यरूपे, ईहातोऽपायात्मा 'देवदत्ताध्मातशङ्खप्रभव एवाऽय'मिति ज्ञानं भवति । इत्येवं क्रमेणोपर्युपरि ज्ञानधाराप्रवृत्तिलक्षण-ज्ञानसन्ततिरूपव्यवहारः सङ्गच्छते । प्रथमापायस्याऽवग्रहरूपत्वाभावे च तद्विषयस्य विशेषस्याऽवगृहीतत्वाभावाद् न तत्रेहा, तदभावाच्च न द्वितीयापाय, एवं न तृतीयापाय इत्युक्तक्रमिकज्ञानसन्तानलक्षणव्यवहारविलोप एव प्रसज्येतेति भावः ।

## ईहादिनिरूपणम्

अथ ईहां निरूपयति–

**अवगृहीतविशेषाकाङ्क्षणमीहा । व्यतिरेकधर्मनिराकरणपरोऽन्वयधर्मघटनप्रवृत्तो बोध इति यावत् । यथा-श्रोत्रग्राह्यत्वादिना प्रायोऽनेन शब्देन भवितव्यम्, मधुरत्वादि-धर्मयुक्तत्वात् शाङ्खादिना वेति ।**

अत्र **ईहे**ति लक्ष्यनिर्देशः, **अवगृहीतविशेषाकाङ्क्षण**मिति लक्षणनिर्देशः । अत्र अवगृहीतेत्यत्र, नैश्चयिकार्थावग्रहग्रहणे–अवगृहीतं तद्विषयीभूतं रूपाद्यव्यावृत्ताव्यक्तशब्दादि-वस्तुमात्रम्, तत्र विशेषस्य = महासामान्यसत्त्वापेक्षया शब्दत्वादिलक्षणावान्तरसामान्यरूपस्या-ऽऽकाङ्क्षणं विमर्शो मीमांसेति यावत्, तच्च 'किमिदं वस्तु मया गृहीतं शब्दोऽशब्दो वे'-त्यादिरूपम्, तच्च नैश्चयिकेहा । व्यावहारिकार्थावग्रहग्रहणे–'शब्दोऽय'मित्यवग्रहविषयीभूतं शब्दत्वं शाङ्खत्वाद्यपेक्षया सामान्यम्, तत्र विशेषस्य शब्दत्वापेक्षया शाङ्खत्वादेराकाङ्क्षणं 'कोऽयं शब्दः ? शाङ्खः शाङ्र्गो वे'ति, एतच्च व्यावहारिकेहास्वरूपमवगन्तव्यम् ।

अवगृहीतेत्यादिलक्षणपर्यवसितार्थमादाय ईहालक्षणमावेदयति–**व्यतिरेके**ति । विमर्शे-ऽन्वयधर्मो विधिरूपो व्यतिरेकधर्मश्च तदभावरूपः तदभावव्याप्यरूपश्चाऽवभासते । तत्र यादृशबोधो व्यतिरेकधर्मनिराकरणपरोऽन्वयधर्मसङ्घटनपरश्च स बोध ईहेत्यर्थः । उदाहरति–**यथे**ति । श्रोत्रग्राह्यत्वादिरसाधारणो धर्मः शब्दस्यैव, रूपादौ तु स नाऽस्तीति शब्दत्वाभावस्य तद्व्याप्यस्य रूपत्वादेश्च व्यतिरेकधर्मस्य निराकरणमन्वयधर्मस्य शब्दत्वस्य सङ्घटनं च 'श्रोत्रग्राह्यत्वादिना प्रायोऽनेन शब्देन भवितव्य'मिति बोधेन क्रियते इति स बोध ईहा । इयं चेहा सामान्यमात्रग्राहिणो नैश्चयिकावग्रहस्याऽनन्तरं भवति ।

---

**'अवगृहीत'**–"नैश्चयिकार्थावग्रहे यत् सामान्यग्रहणं रूपाद्यव्यावृत्त्याऽव्यक्तवस्तु-मात्रग्रहणम्, तथा व्यवहारार्थावग्रहेऽपि यदुत्तरविशेषापेक्षया शब्दादिसामान्यग्रहणम्, तस्मादनन्तर-मीहा प्रवर्तते । कथम्भूतेयम् ? । तत्र विद्यमानस्य गृहीतार्थस्य विशेषविमर्शद्वारेण मीमांसा। केनोल्लेखेन ? 'किमिदं वस्तु मया गृहीतम्-शब्दः, अशब्दो वा रूपरसादिरूपः ?' इदं च निश्चयार्थावग्रहानन्तरभाविन्या ईहायाः स्वरूपम् । अथ व्यवहारार्थावग्रहानन्तरसम्भविन्याः स्वरूपमाह-'शाङ्ख-शाङ्र्गयोर्मध्ये कोऽयं भवेत् शब्दः शाङ्खः शाङ्र्गो वा' ? इति ।

ननु 'किं शब्दः अशब्दो वा' इत्यादिकं संशयज्ञानमेव कथमीहा भवितुमर्हति ?, सत्यम्, किन्तु दिङ्मात्रमेवेदमिह दर्शितम्, परमार्थतस्तु व्यतिरेकधर्मनिराकरणपरः अन्वयधर्मघटन-प्रवृत्तश्चाऽपायाभिमुख एव बोधः-ईहा द्रष्टव्या ।"–विशेषा० बृ० गा० २८९ ।

'शब्दोऽय'मिति विशेषावगाहिनो व्यावहारिकावग्रहस्याऽनन्तरं येहा समुद्भवति तामुदाहरति-**मधुरत्वादी**ति । मधुरत्वादिरसाधारणधर्मः शाङ्खादिशब्दविशेषस्यैव, न स शाङ्र्गादिशब्दविशेषेऽस्तीति तेन धर्मेण शाङ्खादित्वाभावस्य तद्व्याप्यस्य शाङ्र्गत्वादेश्च व्यतिरेकधर्मस्य निराकरणमन्वयधर्मस्य शाङ्खत्वादेः सङ्घटनं च 'मधुरत्वादिना प्रायोऽनेन शाङ्खादिना भवितव्य'मिति बोधेन क्रियते इति स बोध ईहेत्यर्थः ।

संशयस्य विधिव्यतिरेकयोर्दोलायमानतया समभावेन प्रवृत्तिः, ईहायाश्च व्यतिरेकापाकरणेनाऽन्वयधर्मसङ्घटनद्वारा निश्चयात्मकापायाभिमुखत्वेन संशयाद् भेद इत्याह-

**न चेयं संशय एव-तस्यैकत्र धर्मिणि विरुद्धनानार्थज्ञानरूपत्वाद्, अस्याश्च निश्चयाभिमुखत्वेन विलक्षणत्वात् ।**

ईहायाः संशयत्वनिषेधे हेतुमाह—**तस्ये**ति । तस्य = संशयस्य । **एकत्रे**ति । एकस्मिन् धर्मिणि विरुद्धनानाधर्मप्रकारकं ज्ञानं संशय इति तस्य व्यतिरेकधर्मेऽन्वयधर्मे च दोलायमानतैव, न तु निश्चयाभिमुखत्वमिति । **अस्याश्च** = ईहायाः पुनः ।

मतिज्ञानस्य तृतीयभेदमपायं निरूपयति—

**ईहितस्य विशेषनिर्णयोऽवायः, यथा-'शब्द एवाऽयम्', 'शाङ्ख एवाऽय'मिति वा ।**

अत्र **ईहितस्य विशेषनिर्णय** इति लक्षणनिर्देशः, **अपाय** इति लक्ष्यनिर्देशः । श्रोत्रग्राह्यत्वादिना **ईहितस्य** = ईहया विषयीकृतस्य = निश्चयाभिमुखीकृतस्य, **विशेषनिर्णयः** = 'श्रोत्रग्राह्यत्वादितः शब्द एवाऽयं न रूपादि'रिति निश्चयात्मको यो बोधः सोऽपाय इत्यर्थः । उदाहरति- **यथा—शब्द एवाऽय**मिति । निश्चयावग्रहानन्तरभाव्यपायस्वरूपकथनमेतत् ।

**शाङ्ख एवाऽयमिति वे**ति । वा = अथवा शाङ्ख एवाऽयमिति निर्णयोऽपायः । अनेन व्यावहारिकार्थावग्रहानन्तरभाव्यपाय उक्तः । अत्र ईहितस्य = 'मधुरत्वादिना प्रायः शाङ्खेनाऽनेन भवितव्य'मित्येवमीहया विषयीकृतस्य=निश्चयाभिमुखीकृतस्य 'मधुरस्निग्धत्वादिगुणत्वात्

---

**'न चेयं संशय'**—''निर्णयादर्शनात् ईहायां तत्प्रसङ्ग इति चेत्, न, अर्थादानात् ।'' ''संशयपूर्वकत्वाच्च ।''—तत्त्वार्थरा० १.१५. ११, १२ । प्र० न० २.११ ।

**'ईहितस्य'**—''मधुरस्निग्धादिगुणत्वात् शङ्खस्यैवाऽयं शब्दः, न शृङ्गस्य इत्यादि यद् विशेषविज्ञानम्, सोऽपायो निश्चयज्ञानरूपः । कुतः ? पुरोवर्त्यर्थधर्माणामनुगमभावादस्तित्वनिश्चयसद्भावात्, तत्राऽविद्यमानार्थधर्माणां तु व्यतिरेकभावात् नास्तित्वनिश्चयसत्वात् । अयं च व्यवहारार्थावग्रहानन्तरभावी अपाय उक्तः, निश्चयावग्रहानन्तरभावी तु श्रोत्रग्राह्यत्वादिगुणतः 'शब्द एवाऽयं न रूपादिः' इति ।''—विशेषा० बृ० गा० २९० ।

शङ्खस्यैवाऽयं शब्दो न शाङ्र्गस्ये'ति यो विशेषनिर्णयः सोऽपाय इत्येवं लक्षणानुगमो विधेयः ।

मतिज्ञानस्य चतुर्थभेदं धारणाज्ञानं निरूपयति—

**स एव दृढतमावस्थापन्नो धारणा । सा च त्रिविधा-अविच्युतिः, स्मृतिः, वासना च । तत्रैकार्थोपयोगसातत्यानिवृत्तिः अविच्युतिः । तस्यैवाऽर्थोपयोगस्य कालान्तरे 'तदेव' इत्युल्लेखेन समुन्मीलनं स्मृतिः । अपायाहितः स्मृतिहेतुः संस्कारो वासना । द्वयोरवग्रहयोरवग्रहत्वेन तिसृणां धारणानां च धारणात्वेनोपग्रहाद् न विभागव्याघातः ।**

अत्र **स एव दृढतमावस्थापन्न** इति लक्षणनिर्देशः, **धारणे**ति लक्ष्यनिर्देशः । दृढतमावस्थापन्नोऽपाय एव धारणेति कञ्चित् कालमवस्थितः सन् दार्ढ्यभावमापन्नोऽपायो धारणेति यावत् । तां विभजते-**सा चे**ति । धारणा चेत्यर्थः । अविच्युत्यादीनां क्रमेण लक्षणमुपदर्शयति **तत्रे**ति । तेषु मध्ये इत्यर्थः ।

**एकार्थोपयोगसातत्यानिवृत्ति**रिति लक्षणम्, **अविच्युति**रिति लक्ष्यम् । अपायेन निश्चितेऽर्थे कियत्कालपर्यन्तमुपयोगः सातत्येन वर्त्तते, न तु तस्माद् निवर्त्तते । अर्थादन्तराऽन्तरा तमर्थं परित्यज्य नाऽन्यविषयकोपयोगो भवति । सैकार्थोपयोगसातत्यानिवृत्तिः अविच्युतिर्नाम धारणायाः प्रथमभेद इत्यर्थः ।

स्मृतिनामकं धारणाया द्वितीयभेदं लक्षयति-**तस्यैवे**ति । अविच्युतिलक्षणा धारणा कियत्कालानन्तरं विषयान्तरसञ्चारादिना विनश्यति, परं तया धारणया वासनालक्षणः संस्कार आत्मनि स्मृतिहेतुराधीयते, तादृशसंस्कारवशात् तिरोहितस्याऽपि तस्याऽर्थोपयोगस्यैव कालान्तरे **तदेवोल्लेखेन** यत् **समुन्मीलनं** = प्रकटनम् = उत्तरकालं तदेवेत्युल्लेखशालि यद् ज्ञानमाविर्भवति तत् स्मृतिरूपा धारणेत्यर्थः ।

वासनारूपं तृतीयं धारणाभेदं लक्षयति—**अपायाहित** इति । यद्यपि संस्कार इत्येव

---

**'स एव दृढ०'**—"अपायेन निश्चितेऽर्थे तदनन्तरं यावदद्यापि तदर्थोपयोगसातत्येन वर्त्तते न तु तस्मान्निवर्त्तते तावत् तदर्थोपयोगादविच्युतिर्नाम सा धारणायाः प्रथमभेदो भवति । ततः तस्य अर्थोपयोगस्य यद् आवरणं कर्म तस्य क्षयोपशमेन जीवो युज्यते, येन कालान्तरे इन्द्रियव्यापारादि-सामग्रीवशात् पुनरपि तदर्थोपयोगः स्मृतिरूपेण समुन्मीलति, सा चेयं तदावरणक्षयोपशमरूपा वासना नाम द्वितीयस्तद्भेदो भवति । कालान्तरे च वासनावशात् तदर्थस्य इन्द्रियैरुपलब्धस्य अथवा तैरनुपलब्धस्याऽपि मनसि या स्मृतिराविर्भवति सा तृतीयस्तद्भेद इति । एवं त्रिभेदा धारणा विज्ञेया ।"—विशेषा० बृ० गा० २९१ ।

वासनाया लक्षणं संभवति, तथापि **न्याय**मते क्रियाजनकवेग-स्थितिस्थापकसंस्कारयोरपि संस्कारत्वात् तद्व्यावृत्तये अपायाहित इति । अवायात्मकज्ञानस्यैवाऽपाय इति नामान्तरम्, तथा च अपायजन्यः स्मृतिहेतुर्यो भावनाख्यः संस्कारः स वासनेत्यर्थः ।

यद्यपि[१] किञ्चित्कालं सातत्येनाऽनुवर्त्तमानस्याऽपायस्यैवाऽविच्युतिलक्षणधारणा-रूपतया, तस्य स्वावरणकर्मक्षयोपशमेन[२] स्वाधारजीवगतेन कालान्तरे उद्बोधकसमवहितेन भावनाख्यसंस्कारात्मतामुपगतेन तदेवमित्याकारस्मृतिरूपेण यद् उन्मीलनं तस्य स्मृतिरूपेण, तत्पूर्वभाविन्या अपायान्तरभाविन्याश्च वासनाया तयोर्मध्ये एव निरूपणमुचितमिति द्वितीयभेदतया वासनायाः तृतीयभेदतया स्मृतेरभिधानं न्याय्यम्; तथापि अविच्युतिलक्षण-धारणास्मृत्योः स्वसंवेदनसिद्धतया, स्मृतिं प्रति अविच्युतिलक्षणधारणाया एवाऽन्वय-व्यतिरेकाभ्यां कारणत्वस्याऽवधृततया, अपायस्योपेक्षात्मकस्याऽपि सम्भवेनाऽपायस्याऽति-प्रसक्ततया, उपेक्षानात्मकज्ञानमात्रस्वरूपाविच्युतिमात्रवृत्तित्वेनाऽविच्युतित्वस्य स्मृतिकारण-तावच्छेदकत्वेन, तेन रूपेण कारणीभूताया अविच्युतेः चिरं विनष्टायाः कालान्तरभाविनी स्मृतिं प्रति कारणत्वं न सम्भवतीत्येतदर्थं तद्व्यापारतया वासनाकल्पनमिति स्मृत्यन्यथानुपपत्त्यैव वासनायाः कल्पनीयत्वेन, तस्याः स्मृतिनिरूप्यत्वेन स्मृतिनिरूपणानन्तरं निरूपणं नाऽयुक्तमिति तृतीयभेदतया वासनानिरूपणमिति बोध्यम् ।

यद्यपि व्यञ्जनावग्रहार्थावग्रहेहापायाविच्युतिस्मृतिवासनाभेदेन मतिज्ञानस्य सप्तविधत्वम्, तथापि व्यञ्जनावग्रहार्थावग्रहयोरवग्रहत्वेनैक्यमविच्युतिस्मृतिवासनानां च धारणात्वेनैक्यमभि-सन्धाय मतिज्ञानस्य सांव्यवहारिकप्रत्यक्षरूपस्य चतुर्धा विभजनं सुसङ्गतमेवेत्याशयेनाऽऽह-**द्वयो**रिति । द्वयोः = व्यञ्जनार्थभेदेन द्विधयोः, तिसृणाम् = अविच्युतिस्मृतिवासनाभेदेन त्रिविधानाम् । **न विभागव्याघात** इति । मतिज्ञानस्य सप्तविधत्वे न्यूनाधिकसङ्ख्याव्यवच्छेद-कत्वासम्भवेन चतुर्धा विभजनस्य यो व्याघातः स नेत्यर्थः ।

व्युत्पत्त्यर्थाश्रयणेनाऽपायधारणयोः स्वरूपतो भेदमभ्युपगच्छतां मतं प्रतिक्षेप्तुमुपन्यस्यति—

**केचित्तु—अपनयनमपायः, धरणं च धारणेति व्युत्पत्त्यर्थमात्रानुसारिणः—**

---

**'केचित्तु—अपनयन'**—"तत्र विद्यमानात् स्थाण्वादेर्योऽन्यः तत्प्रतियोगी, तत्राऽविद्यमानः

---

१. कथमविच्युति-वासना-स्मृतिक्रमेण निरूपणमुचितम् ? किमर्थं च तथाऽकृत्वाऽविच्युति-स्मृति-वासना-क्रमेण निरूपणं कृतम् ? - इतीह चर्च्यते ।

२. अविच्युतिलक्षणधारणारूपापायस्य स्वाधारजीवे स्वावरणकर्मक्षयोपशमरूपेण स्थितिः, सैव भावनेत्युच्यते । तस्योद्बोधकसमवहितेन कालान्तरे उन्मीलनं स्मृतिः कथ्यते ।

**'असद्भूतार्थविशेषव्यतिरेकावधारणमपायः, सद्भूतार्थविशेषावधारणं च धारणा—इत्याहुः,**

**केचित्त्वित्यस्य आहुरित्यनेनाऽन्वयः । अपनयनमित्यादि अनुसारिणइत्यन्तं केचिदि**-त्यस्य विशेषणम् । अपनयनमपाय इति व्युत्पत्त्याश्रयणेन योऽर्थः पर्यवसितः तमाह—**असद्भूतेति** । 'अयं स्थाणु'रिति ज्ञाने 'नाऽयं पुरुष' इति ज्ञानमपायः, तत्रोक्तलक्षणसङ्गमना—सन् = स्थाण्वादिरर्थः, तदन्यः पुरुषादिरर्थोऽसद्भूतोऽर्थः, तस्य ये विशेषाः शिरःकण्डूयनचलनस्पन्दनादयः, तेषां पुरोवर्त्तिनि सद्भूते स्थाण्वादिरूपेऽर्थे यो व्यतिरेकः = अभावः, तस्याऽवधारणं = निर्णयः = 'नाऽयं पुरुष' इति ज्ञानम्, तदेवाऽसद्भूतार्थविशेषापनोदनक्षमत्वेन अपाय इत्यर्थः ।

तत्रैव धरणं च धारणेति व्युत्पत्त्यर्थावलम्बनेन यद् धारणास्वरूपं पर्यवसितं तदुपदर्शयति-**सद्भूतेति** । अनेन लक्षणेन 'स्थाणुरेवाऽय'मिति ज्ञानं धारणेति ज्ञायते । लक्षण-समन्वयः-सद्भूतोऽर्थः पुरोवर्त्तिनि देशे विद्यमानः स्थाण्वादिः, तस्य विशेषः स्थाणुत्वादिर-साधारणो धर्मः, तस्याऽवधारणं 'स्थाणुरेवाऽय'मिति ज्ञानं धारणेत्यर्थः ।

**तन्न, क्वचित् तदन्यव्यतिरेकपरामर्शात्, क्वचिदन्वयधर्मसमनुगमात्, क्वचिच्चोभाभ्यामपि भवतोऽपायस्य निश्चयैकरूपेण भेदाभावाद्, अन्यथा स्मृतेराधिक्येन मतेः पञ्चभेदत्वप्रसङ्गात् ।**

---

पुरुषादिः, तद्विशेषाः शिरःकण्डूयनचलनस्पन्दनादयः, तेषां पुरोवर्त्तिनि सद्भूतेऽर्थे अपनयनं निषेधनं तदन्यविशेषापनयनं तदेव तन्मात्रम् अपायमिच्छन्ति केचन अपायनमपनयनमपाय इति व्युत्पत्त्यर्थविभ्रमितमनस्काः । अवधारणं धारणा इति च व्युत्पत्त्यर्थभ्रमितास्ते धारणां ब्रुवते । किं तत् ? सद्भूतविशीषावधारणम्-सद्भूतस्तत्र विवक्षितप्रदेशे विद्यमानः स्थाण्वादिरर्थविशेषस्तस्य 'स्थाणुरेवाऽयम्' इत्यवधारणम् ।''—विशेषा० बृ० गा० १८५ ।

**'तन्न'**—''तदेतद् दूषयितुमाह-कस्यचित् प्रतिपत्तुः तदन्यव्यतिरेकमात्रादवगमनं निश्चयो भवति, तद्यथा-यतो नेह शिरःकण्डूयनादयः पुरुषधर्मा दृश्यन्ते ततः स्थाणुरेवाऽयमिति । कस्यापि सद्भूतसमन्वयतः यथा स्थाणुरेवाऽयं वल्ल्युत्सर्पणवयोनिलयनादिधर्माणामिहाऽन्वयादिति । कस्यचित् पुनः तदुभयाद् अन्वयव्यतिरेकोभयात् तत्र भूतेऽर्थेऽवगमनं भवेत्, तद्यथा यस्मात् पुरुषधर्मा शिरःकण्डूयनादयोऽत्र न दृश्यन्ते वल्ल्युत्सर्पणादयस्तु स्थाणुधर्माः समीक्ष्यन्ते तस्मात् स्थाणुरेवाऽयमिति । नचैवमन्वयात् व्यतिरेकात् उभयाद्वा निश्चये जायमाने कश्चिद्दोषः । परव्याख्याने तु वक्ष्यमाणन्यायेन दोषः ।''—विशेषा० बृ० गा० १८६ ।

**'अन्यथा स्मृतेः'**—''यस्माद् व्यतिरेकाद् अन्वयादुभयाद्वा भूतार्थविशेषावधारणं कुर्वतो योऽध्यवसायः स सर्वोऽपि अपायः न तु सद्भूतार्थविशेषावधारणं धारणा इति । व्यतिरेकोऽपायः अन्वयस्तु धारणा इत्येवं मतिज्ञानतृतीयभेदस्य अपायस्य भेदे अभ्युपगम्यमाने पञ्च भेदा भवन्ति

**तन्नेति** । उक्तमतं न समीचीनमित्यर्थः । तत्र हेतुमाह—**क्वचिदिति** । यत्राऽसद्भूतार्थविशेषापनयनम्, यत्र च सद्भूतार्थानुगमनम्, यत्र च तदुभयं—सर्वत्र तद्द्वारा जायमानोऽपायः 'स्थाणुरेवाऽय'मिति निश्चयरूप एवेति तस्याऽपायत्वमेव । न तु अन्यविशेषव्यतिरेकावधारणस्याऽपायत्वं सद्भूतान्वयधर्मावधारणस्य च धारणात्वमिति तयोर्भेदाकलनं युक्तं—तथा सत्युक्तप्रकाराभ्यां व्यतिरिक्ता स्मृतिरपि ज्ञानान्तरं स्यादिति मतेः पञ्चप्रकारत्वापत्त्या चतुर्विधत्वं व्याहन्येतेति सम्मुखीनोऽर्थः । अक्षरार्थस्तु—

**क्वचित्** = यत्र विषये प्रमातुः 'नेह शिरःकण्डूयनादयः पुरुषधर्मा दृश्यन्ते' इत्यसद्भूतार्थविशेषव्यतिरेकालोचनं तत्र, **तदन्यव्यतिरेकपरामर्शात्** = पुरोवर्तिस्थाणुगतधर्मान्याभावावधारणाद्, **भवतो** = जायमानस्य, **अपायस्य** = 'स्थाणुरेवाऽय'मिति ज्ञानस्य; **क्वचित्** = यत्र विषये प्रमातुः 'वल्ल्युत्सर्पण-वयोनिलयनादिकमत्र दृश्यते' इति सद्भूतार्थविशेषपर्यालोचनं तत्र विषये, **अन्वयधर्मसमनुगमात्** = पुरोवर्तिस्थाण्वनुगतधर्मस्य निश्चयनाद्, **भवतोऽपायस्ये**त्यस्योक्तार्थस्य सम्बन्धः; **क्वचिच्च** = यत्र च विषये प्रमातुः असद्भूतार्थविशेष-व्यतिरेकालोचनं सद्भूतार्थविशेषपर्यालोचनं च तत्र, **उभाभ्यामपि** = तदन्यव्यतिरेकपरामर्शान्वयधर्मसमनुगमाभ्यामपि, **भवतोऽपायस्ये**त्युक्तार्थक एव सम्बध्यते ।

**निश्चयैकरूपेण** = निश्चयत्वलक्षणापायसामान्यधर्मेण, **भेदाभावाद्** = विशेषाभावाद् । **अन्यथा** = पूर्वोक्तरीत्याऽपायधारणयोर्भेदेन स्वरूपनिर्वचने । **स्मृतेराधिक्येने**ति । व्यतिरेकावधारणलक्षणाया अविच्युतेः स्वसमानकालभाविनि व्यतिरेकावधारणलक्षणेऽपायेऽन्तर्भूतत्वाद्, अन्वयावधारणलक्षणायाः तस्या अन्वयावधारणलक्षणायां स्वसमानकालीनायां धारणायामन्तर्भूतत्वाद्, वासनायाः तु स्मृतावेवाऽन्तर्भावयितुं शक्यत्वात्, स्मृतेस्तु न कुत्राप्यन्तर्भाव इत्येवमाधिक्येनेत्यर्थः । **मतेः पञ्चभेदत्वप्रसङ्गा**दिति । अवग्रहेहापायधारणारूपाः चत्वारो भेदा मतेः त्वयाऽभ्युपगता एव, स्मृतिस्तु पञ्चमो भेद इत्येवं मतिज्ञानस्य पञ्चविधत्वप्रसङ्गादित्यर्थः ।

ननूक्तदिशा सद्भूतार्थविशेषावधारणस्याऽस्मदभिमतं धारणात्वं नाऽङ्गीक्रियते तदा भवदभिमतं मतेः चातुर्विध्यं न स्याद्—मत्युपयोगोपरमे कालान्तरे जायमानायाः स्मृतेर्मत्यंशत्वाभावाद्, वासनाया अपि मत्युपयोगोपरमे जायमानायाः स्मृतावेवाऽन्तर्भावाद्, उपयोग-

---

आभिनिबोधिकज्ञानस्य । तथाहि—अवग्रहेहापायधारणालक्षणाश्चत्वारो भेदास्तावत् त्वयैव पूरिताः, पञ्चमस्तु भेदः स्मृतिलक्षणः प्राप्नोति, अविच्युतेः स्वसमानकालभाविन्यपाये अन्तर्भूतत्वात्, वासनायास्तु स्मृत्यन्तर्गतत्वेन विवक्षितत्वात्, स्मृतेरनन्यशरणत्वात् मतेः पञ्चमो भेदः प्रसज्यते ।''—विशेषा० बृ० गा० १८७ ।

सातत्य-लक्षणाविच्युतेरपाये एवाऽन्तर्भावाच्चेति त्रैविध्यमेव मतिज्ञानस्य भवेत् । कालान्तरे जायमानायाः स्मृतेर्मतित्वाभ्युपगमेऽपि वाऽस्मन्मतेऽन्वयावधारणरूपायां धारणायामन्तर्भावाद् नाऽस्मन्मते पञ्चविधत्वं मतेरापतत्यपीति शङ्कते—

**अथ नास्त्येव भवदभिमता धारणेति भेदचतुष्टयव्याघातः । तथाहि—उपयोगोपरमे का नाम धारणा ? उपयोगसातत्यलक्षणाऽविच्युतिश्चाऽपायाद् नातिरिच्यते । या च घटाद्युपयोगोपरमे सङ्ख्येयमसङ्ख्येयं वा कालं वासनाऽभ्युपगम्यते, या च 'तदेव' इतिलक्षणा स्मृतिः, सा मत्यंशरूपा धारणा न भवति—मत्युपयोगस्य प्रागेवोपरतत्वात् । कालान्तरे जायमानोपयोगेऽप्यन्वयमुख्यां धारणायां स्मृत्यन्तर्भावादिति चेद्,**

**भवदभिमता** = स एव दृढतमावस्थापन्नो धारणेति भवल्लक्षणलक्षिता । भेद-चतुष्टयव्याघातमेव भावयति—**तथाहीति** । **उपयोगोपरमे** = मत्युपयोगोपरमे । ननूपयोगानुपरमे एवाऽविच्युतिलक्षणा धारणेष्यते सा मतिः स्यादित्यत आह—**उपयोगेति** । तथा च तस्या अपायरूपत्वाद् न तामादाय मतेः चातुर्विध्यमिति भावः । मत्युपयोगोपरमे जायमानस्य न मतित्वमित्यभिसन्धाय कालान्तरे जायमानाया वासनायाः स्मृतेश्च मत्युपयोगत्वमेव न सम्भवतीति न वासनां स्मृतिं वोपादाय मतेश्चातुर्विध्यसङ्घटना युक्तिमतीत्याह—**या चेति** । एवमपि मतित्वाभ्युपगमे, अस्मन्मतेऽपि न स्मृत्याधिक्यनिबन्धनस्य मतिज्ञाने पञ्चविधत्वस्य

---

**'अथ नास्त्येव'** ''ननु यथैव मया व्याख्यायते-व्यतिरेकमुखेन निश्चयोऽपायः, अन्वयमुखेन तु धारणा-इत्येवमेव चतुर्विधा मतिर्युक्तितो घटते । अन्यथा तु व्याख्यायमाने-अन्वयव्यतिरेकयोर्द्वयोरप्यपायत्वेऽभ्युपगम्यमाने-अवग्रहेहापायभेदतस्त्रिभेदा मतिर्भवति, न पुनश्चतुर्धा, धारणाया अघटमानत्वात् ।''—विशेषा० बृ० गा० १८७ ।

**'तथाहि उपयोगोपरमे'**—''कथं पुनर्धारणाऽभावः ? इह तावत् निश्चयोऽपायमुखेन घटादिके वस्तुनि अवग्रहेहापायरूपतया अन्तर्मुहूर्त्तप्रमाण एव उपयोगो जायते । तत्र च अपाये जाते या उपयोगसातत्यलक्षणाऽविच्युतिर्भवताऽभ्युपगम्यते सा अपाय एव अन्तर्भूता इति न ततो व्यतिरिक्ता । या तु तस्मिन् घटाद्युपयोगे उपरते सति सङ्ख्येयमसङ्ख्येयं वा कालं वासना-ऽभ्युपगम्यते 'इदं तदेव' इतिलक्षणा स्मृतिश्चाऽङ्गीक्रियते सा मत्यंशरूपा धारणा न भवति—मत्युपयोगस्य प्रागेवोपरतत्वात् । कालान्तरे पुनर्जायमानोपयोगेऽपि या अन्वयमुखोपजाय-मानाऽवधारणरूपा धारणा मया इष्यते सा यतोऽपाय एव भवताऽभ्युपगम्यते ततस्तत्रापि नास्ति धृतिः धारणा, तस्मादुपयोगकाले अन्वयमुखावधारणरूपाया धारणायाः त्वयाऽनभ्युपगमात् उपयोगोपरमे च मत्युपयोगाभावात् तदंशरूपाया धारणायाः अघटमानकत्वात् त्रिधैव भवदभि-प्रायेण मतिः प्राप्नोति न चतुर्धा इति पूर्वपक्षाभिप्रायः ।''—विशेषा० बृ० गा० १८८-९ ।

प्रसङ्गः-अन्वयावधारणरूपायां धारणायां तस्या अन्तर्भावसम्भवादित्याह-**कालान्तर** इति । भवतां तु अन्वयावधारणस्याऽप्यपायत्वेन, कालान्तरे जायमाने ज्ञाने मतित्वाभ्युपगमेऽपि, स्मृतेरपायत्वमेव भवितुमर्हतीत्येवमपि त्रैविध्यमेव मतेः प्रसज्यते इति शङ्कितुर्गूढाभिप्रायः ।

कालान्तरे जायमानायाः स्मृतेः, वस्तुनिश्चयमात्रफलकादपायात्, पूर्वापरदर्शनानुसन्धान-फलकत्वेन विभिन्नकालीनत्वेन चाऽऽधिक्यं निर्विवादमेव । सा च स्मृतिर्यस्मात् पूर्वोपलब्ध-वस्त्वाहितसंस्कारस्वरूपाद् वासनाविशेषात् प्रादुर्भवति, स वासनाविशेषोऽपि पूर्वापायाद् विभिन्नकालीनतया भिन्न एवेति त्रिष्वप्येषु धारणात्वमिति चतुर्धा मतिविभजनं नाऽसङ्गतमिति समाधत्ते—

**न, अपायप्रवृत्त्यनन्तरं क्वचिदन्तर्मुहूर्त्तं यावदपायधाराप्रवृत्तिदर्शनादविच्युतेः, पूर्वापरदर्शनानुसन्धानस्य 'तदेवेदम्[1]' इति स्मृत्याख्यस्य प्राच्यापायपरिणामस्य, तदाधायकसंस्कारलक्षणाया वासनायाश्चाऽपायाभ्यधिकत्वात् ।**

**अविच्युतेरि**त्यस्य **अपायाभ्यधिकत्वा**दित्यनेन सम्बन्धः । **पूर्वापरे**ति । तत्ता पूर्व-दर्शनविषयता, इदन्ता वर्त्तमानदर्शनविषयता, ताभ्यां पूर्वापरदर्शनविषयाभेदमवगाहमानायाः 'तदेवेद'मिति स्मृतेः पूर्वापरदर्शनानुसन्धानत्वम्—इत्येतावताऽपायात् स्मृतेः फलभेद उपदर्शितः । पूर्वापायस्य कालान्तरे संस्कारात्मनाऽनुस्यूतस्य स्मृतिरूपेण परिणमनात् परिणामि-परिणामभावादनयोर्भेद इत्यावेदनायाऽऽह—**प्राच्ये**ति । अस्या**ऽप्यपायाभ्यधिकत्वा**दित्यनेन सम्बन्धः । **तदाधायके**ति । प्राच्यापायपरिणामस्मृत्याधायकेत्यर्थः । तदाधायकत्वं तदुत्पादक-त्वम्, अनेन स्मृतेः कारणीभूताया वासनाया न स्मृतावन्तर्भाव इत्यप्यावेदितम् ।

---

**'न, अपाय'**—"अत्रोत्तरमाह-कालान्तरे या स्मृतिरूपा बुद्धिरुपजायते, नन्विह सा पूर्वप्रवृत्तादपायात् निर्विवादमभ्यधिकैव-पूर्वप्रवृत्तापायकाले तस्या अभावात् साम्प्रतापायस्य तु वस्तुनिश्चयमात्रफलत्वेन पूर्वापरदर्शनानुसन्धानायोगात् । यस्माच्च वासनाविशेषात् पूर्वोप-लब्धवस्त्वाहितसंस्कारलक्षणात्-'इदं तदेव' इतिलक्षणा स्मृतिर्भवति साऽपि वासनाऽपायद-भ्यधिका इति । या च अपायादनन्तरमविच्युतिः प्रवर्त्तते साऽपि । इदमुक्तं भवति-यस्मिन् समये 'स्थाणुरेवाऽयम्' इत्यादिनिश्चयस्वरूपोऽपायः प्रवृत्तः ततः समयादूर्ध्वमपि 'स्थाणुरेवाऽयं स्थाणुरेवायम्' इति अविच्युत्या या अन्तर्मुहूर्तं क्वचिदपायप्रवृत्तिः सापि अपायाविच्युतिः प्रथमप्रवृत्तापायादभ्यधिका । एवमविच्युति-वासना-स्मृतिरूपा धारणा त्रिधा सिद्धा ।"—विशेषा० बृ० गा० १८८-९ ।

---

१. स्मृतिजन्यप्रत्यभिज्ञाने स्मृतित्वोपचारादिदं कथनमिति भाति ।

अविच्युतिस्मृत्योर्गृहीतग्राहित्वेनाऽबाधितागृहीतग्राहिज्ञानत्वलक्षणप्रामाण्याभावे प्रमाण-विशेष-मतिज्ञानभेदत्वासम्भवाद्, वासनायाश्च विकल्पत्रयकवलितत्वाद् नोक्तत्रयस्य मतिज्ञान-भेद-धारणारूपत्वमिति न मतिज्ञानस्य चतुर्विधत्वमिति शङ्कते—

**नन्वविच्युतिस्मृतिलक्षणौ ज्ञानभेदौ गृहीतग्राहित्वाद् न प्रमाणम् । संस्कारश्च किं स्मृतिज्ञानावरणक्षयोपशमो वा, तज्ज्ञानजननशक्तिर्वा, तद्वस्तुविकल्पो वेति त्रयी गतिः । तत्र-आद्यपक्षद्वयमयुक्तं—ज्ञानरूपत्वाभावात्, तद्भेदानां चेह विचार्यत्वात् । तृतीयपक्षोऽप्ययुक्त एव—सङ्ख्येयमसङ्ख्येयं वा कालं वासनाया इष्टत्वाद्, एतावन्तं च कालं वस्तुविकल्पायोगादिति न काऽपि धारणा घटते इति चेद्;**

**तज्ज्ञानेति** । स्मृतिज्ञानेत्यर्थः । **तद्वस्तुविकल्प** इति । अपायविषयीभूतवस्तुनो विकल्पात्मकज्ञानमित्यर्थः । **तत्र** = उक्तविकल्पत्रये **आद्यपक्षद्वयं** = स्मृतिज्ञानावरण-क्षयोपशमः संस्कार इति प्रथमः पक्षः, तज्ज्ञानजननशक्तिः संस्कार इति द्वितीयः पक्षश्च । अयुक्तत्वे हेतुमाह—**ज्ञानरूपत्वाभावा**दिति । स्मृतिज्ञानावरणक्षयोपशम-स्मृतिज्ञानजनन-शक्त्योर्ज्ञानस्वरूपत्वासम्भवात् तद्विशेष-मतिज्ञानविशेष-धारणत्वासम्भवादित्यर्थः । **तद्भेदानां** = ज्ञानाविशेषाणाम् । **तृतीयपक्षोऽपि** = तद्वस्तुविकल्पः संस्कार इति कल्पोऽपि । वस्तु-विकल्पापेक्षया वासनालक्षणसंस्कारस्याऽधिककालस्थायित्वेन तयोरैक्यासम्भवादित्याह-**सङ्ख्येय**मिति । **एतावन्तं च कालं** = वासनास्थित्याश्रयतया सम्मतं यावत्कालम् ।

गृहीतग्राहित्वादविच्युतेरप्रामाण्यं तदा स्याद् यदि गृहीतमात्रग्राहिण्येव सा भवेद्, न चैवम्, पूर्वकालविशिष्टं हि वस्तु अपायेन गृह्यते, उत्तरकालविशिष्टं चाऽविच्युत्या । एवं स्पष्ट-स्पष्टतरस्पष्टतमलक्षणविभिन्नधर्मयोगिवासनाजनकत्वेनाऽविच्युतेरन्यान्यवस्तुग्राहित्वमवसीयते । स्मृतिस्तु प्रागननुभूतवस्त्वैक्यग्राहिणी सुतरामगृहीतविषया । एवमगृहीतग्राहित्वात् तयोः प्रामाण्यमनाबाधमेव । वासना तु विकल्परूपा नाऽभ्युपगम्यते एव, किन्तु स्मृतिज्ञानावरण-क्षयोपशमरूपा तज्ज्ञानजननशक्तिरूपा वा सा । कारणे कार्योपचारमाश्रित्य स्मृतिज्ञानजनिकायां तस्यां ज्ञानत्वमुपचर्यते । इत्यविच्युत्यादित्रयरूपाया धारणायाः सम्भवाद् मतिज्ञानस्य चतुर्विधत्वं

---

**'नन्वविच्युति०'**—"नन्वविच्युतिस्मृतिलक्षणौ ज्ञानभेदौ गृहीतग्राहित्वान्न प्रमाणम् । वासना तु किंरूपा ? इति वाच्यम् । संस्काररूपेति चेत्, कोऽयं संस्कारः-स्मृतिज्ञानावरणक्षयो-पशमो वा, तज्ज्ञानजननशक्तिर्वा, तद्वस्तुविकल्पो वा ? इति त्रयी गतिः । तत्राऽऽद्यपक्षद्वयमयुक्तम्-ज्ञानरूपत्वाभावात् । तृतीयपक्षोप्ययुक्त एव-सङ्ख्येयमसङ्ख्येयं वा कालं वासनाया इष्टत्वात्, एतावन्तं च कालं तद्वस्तुविकल्पायोगात् । तदेवमविच्युति-स्मृति-वासनारूपायास्त्रिविधाया अपि धारणाया अघटमानत्वात् त्रिधैव मतिः प्राप्नोति, न चतुर्धा ।"—विशेषा० बृ० गा० १८९ ।

सुयुक्तमेवेति समाधत्ते–

**न, स्पष्टस्पष्टतरस्पष्टतमभिन्नधर्मकवासनाजनकत्वेन अन्यान्यवस्तुग्राहित्वाद-विच्युतेः, प्रागननुभूतवस्त्वेकत्वग्राहित्वाच्च स्मृतेः, अगृहीतग्राहित्वात्; स्मृतिज्ञाना-वरणक्षयोपशमरूपायाः तद्विज्ञानजननशक्तिरूपायाश्च वासनायाः स्वयमज्ञानरूपत्वेऽपि कारणे कार्योपचारेण ज्ञानभेदाभिधानाविरोधादिति ।**

अवग्रहादीनां चतुर्णामुत्तरोत्तरं प्रति पूर्वपूर्वस्य कारणत्वादवग्रहानन्तरमीहा, तदनन्तर-मपायः तदनन्तरं धारणेति क्रम एव । न तु व्युत्क्रमेणैतेषामुत्पत्तिः । यत्राऽवग्रहस्य सद्भावः तत्रेहादीनामप्यवश्यमेव, न तु कस्यचिद् भावः कस्यचिच्चाऽभाव इति दर्शयति–

**एते चाऽवग्रहादयो नोत्क्रमव्यतिक्रमाभ्यां न्यूनत्वेन चोत्पद्यन्ते-ज्ञेयस्येत्थमेव ज्ञानजननस्वाभाव्यात् ।**

---

**'नः स्पष्ट०'**–"अत्रोच्यते-यत् तावत् गृहीतग्राहित्वादविच्युतेरप्रामाण्यमुच्यते, तदयुक्तम्, गृहीतग्राहित्वलक्षणस्य हेतोरसिद्धत्वात्, अन्यकालविशिष्टं हि वस्तु प्रथमप्रवृत्तापायेन गृह्यते, अपरकालविशिष्टं च द्वितीयादिवारा प्रवृत्तापायेन । एवं भिन्नधर्मकवासनाजनकत्वादप्य-विच्युतिप्रवृत्तद्वितीयाद्यपायविषयं वस्तु भिन्नधर्मकमेव, इति कथमविच्युतेर्गृहीतग्राहिता ? स्मृतिरपि पूर्वोत्तरदर्शनद्वयानधिगतं वस्त्वेकत्वं गृह्णाना न गृहीतग्राहिणी । किञ्च, स्पष्ट-स्पष्टतर-स्पष्टतमवासनापि स्मृतिविज्ञानावरणकर्मक्षयोपशमरूपा तद्विज्ञानजननशक्तिरूपा चेष्यते, सा च यद्यपि स्वयं ज्ञानरूपा न भवति तथापि पूर्वप्रवृत्ताविच्युतिलक्षणज्ञानकार्यत्वात् उत्तरकालभा-विस्मृतिरूपज्ञानकारणत्वाच्च उपचारतो ज्ञानरूपाऽभ्युपगम्यते । तद्वस्तुविकल्पपक्षस्तु अनभ्यु-पगमादेव निरस्तः । तस्माद-विच्युति-स्मृति-वासनारूपाया धारणायाः स्थितत्वात् न मतेस्त्रै-विध्यम्, किन्तु चतुर्धा सेति स्थितम् ।"–विशेषा० बृ० गा० १८९ ।

**'एते च अवग्रहा'**–"ननु एते अवग्रहादय उत्क्रमेण, व्यतिक्रमेण वा किमिति न भवन्ति, यद्वा ईहादयस्त्रयः, द्वौ, एको वा किं नाऽभ्युपगम्यन्ते, यावत् सर्वेऽप्यभ्युपगम्यन्ते ? इत्या-शङ्क्याऽऽह-तत्र पश्चानुपूर्वीभवनमुत्क्रमः अनानुपूर्वीभवनं त्वतिक्रमः, कदाचिदवग्रहमतिक्रम्येहा, तामप्यतिलङ्घ्याऽपायः, तमपि अतिवृत्य धारणेति-एवमनानुपूर्वीरूपोऽतिक्रमः । एताभ्यामुत्क्रम-व्यतिक्रमाभ्यां तावदवग्रहादिभिर्वस्तुस्वरूपं नाऽवगम्यते । तथा एषां मध्ये एकस्याप्यन्यतरस्य वैकल्ये न वस्तुस्वभावावबोधः, ततः सर्वेऽप्यमी एष्टव्याः, न त्वेकः, द्वौ, त्रयो वा ।"–विशेषा० बृ० गा० २९५ ।

"यस्मादवग्रहेणाऽगृहीतं वस्तु नेह्यते-ईहाया विचाररूपत्वात्, अगृहीते च वस्तुनि निरास्पदत्वेन विचारायोगादिति अनेन कारणेनाऽऽदाववग्रहं निर्दिश्य पश्चादीहा निर्दिष्टा । न

**नञः उत्पद्यन्ते** इत्यनेनाऽन्वयः । अत्र पश्चानुपूर्वीभवनमुत्क्रमः, तद् यथा—पूर्वं धारणा ततोऽपायः तत ईहा ततोऽवग्रह इति । अनानुपूर्वीभवनं व्यतिक्रमः, यथा-कदाचिदवग्रह-मतिक्रम्येहा, तामुल्लङ्घ्याऽप्यपायः, तमतिक्रम्य धारणेति । आभ्यामुत्क्रमव्यतिक्रमाभ्यामव-ग्रहादयो नोत्पद्यन्ते इत्यर्थः । **च** = पुनः ।

**न्यूनत्वेने**ति । एषां मध्ये कदाचिदवग्रहस्यैव भवनम्, कदाचिदवग्रहेहयोरेव भवनम्, कदाचिदवग्रहेहापायानामेव भवनमित्येवं न्यूनत्वेन नोत्पद्यन्ते, यतः चतुर्णामप्येषां क्रमेण भवने सत्येव वस्तुस्वभावावबोधो भवति, नाऽन्यथेति चत्वारोऽप्येतेऽभ्युपगन्तव्याः, नैकादिमात्र-मित्यर्थः ।

अयमभिप्रायः-अवग्रहागृहीते वस्तुनि तद्विचाररूपा नेहा सम्भवति—विचारस्य विचार्यमन्तरेणाऽसम्भवात् । निश्चयलक्षणस्य चाऽपायस्य विचारपूर्वकत्वेन विचाररूपेहामन्तरेण सम्भवाभावाद्, निश्चितवस्त्वधारणरूपाया धारणाया निश्चयपूर्विकाया निश्चयात्मकापायमन्तरेणा-ऽसम्भवाद्, वस्त्ववगमस्यैवंक्रमेणैव सम्भवित्वेनेत्थमेवैषां क्रमो युक्तो, नोत्क्रमव्यतिक्रमौ, नाऽपि न्यूनत्वमिति ।

ननु भूयो दृष्टे विकल्पिते भाषिते च वस्तुनि पुनश्चाऽवलोकितेऽवग्रहेहाद्वयमतिक्रम्य प्रथमत एवाऽपायप्रवृत्तिर्दृश्यते, क्वचित् पुनः पूर्वमुपलब्धे सुनिश्चिते दृढवासनाविषयी-कृतेऽर्थेऽवग्रहेहापायानतिक्रम्याऽपि स्मृतिलक्षणा धारणा जायते, इति रिक्तमिदमुच्यते यद् 'अवग्रहादयो नोत्क्रमव्यतिक्रमाभ्यां न्यूनत्वेन चोत्पद्यन्ते इती'त्यत आह—

**क्वचिदभ्यस्तेऽपायमात्रस्य, दृढवासने विषये स्मृतिमात्रस्य चोपलक्षणे-**

---

चाऽनीहितम् अपायविषयतां याति-अपायस्य निश्चयरूपत्वात्, निश्चयस्य च विचारपूर्वकत्वात् । एतदभिप्रायवता चाऽपायस्याऽऽदौ ईहा निर्दिष्टेति । न चाऽपायेनाऽनिश्चितं धारणाविषयीभवति वस्तु- धारणाया अर्थावधारणरूपत्वात्, अवधारणस्य च निश्चयमन्तरेणाऽयोगादित्यभिप्रायः । ततश्च धारणादौ अपायः । ततः किम् ? तेनाऽवग्रहादिक्रमो न्याय्यः, नोत्क्रमाऽतिक्रमौ, यथोक्तन्यायेन वस्त्ववगमाभावप्रसङ्गात् ।"—विशेषा० बृ० गा० २८६ ।

"ज्ञेयस्याऽपि शब्दादेः स स्वभावो नाऽस्ति य एतैरवग्रहादिभिरेकादिविकलैरभिन्नैः समकालभाविभिः उत्क्रमातिक्रमवद्भिश्चाऽवगम्येत, किन्तु शब्दादिज्ञेयस्वभावोऽपि तथैव व्यवस्थितो यथा अमीभिः सर्वैः भिन्नैः असमकालैः उत्क्रमातिक्रमरहितैश्च सम्पूर्णो यथावस्थितश्चाऽवगम्यते अतो ज्ञेयवशेनाऽप्येते यथोक्तरूपा एव भवन्ति ।"—विशेषा० बृ० गा० २९७ । प्र० न० २. १४-१७ ।

**'क्वचिदभ्यस्ते'**—"अत्र परः प्राह—अनवरतं दृष्टपूर्वे, विकल्पिते, भाषिते च विषये पुनः

**ऽप्युत्पलपत्रशतव्यतिभेद इव सौक्ष्म्यादवग्रहादिक्रमानुपलक्षणात् ।**

**उपलक्षणेऽपि** = दर्शनेऽपि ।

**उत्पलेति** । यथोत्पलपत्रशतव्यतिभेदने क्रमेणैव पत्राणां व्यतिभेदनं सौक्ष्म्याच्च क्रमस्याऽनुपलक्षणम्, तथैव यत्राऽभ्यस्ते विषयेऽपायमात्रस्य दर्शनम्, तत्राऽप्यपायात् पूर्वमस्त्येवाऽवग्रहेहयोर्भाव इति क्रमेणैवाऽवग्रहेहापायधारणाः तत्रापि भवन्ति, सौक्ष्म्याच्च क्रमानुपलक्षणाद् 'अपाय एवाऽत्रे'त्यभिमानः । एवं दृढवासनाविषयेऽपि अवग्रहेहापायपूर्विकैव स्मृतिः, सौक्ष्म्यात् क्रमानुपलक्षणात् 'स्मृतिरेवाऽत्र केवले'त्यभिमान इत्यर्थः ।

सामान्यतोऽवग्रहादिभेदेन चतुर्विधस्य मतिज्ञानस्येन्द्रियानिन्द्रियलक्षण-करणभेद-प्रयुक्तावान्तरभेदसङ्कलनयाऽष्टाविंशतिभेदत्वमुपसंहरति—

**तदेवमर्थावग्रहादयो मनइन्द्रियैः षोढा भिद्यमाना व्यञ्जनावग्रहचतुर्भेदैः सहाऽष्टा-**

---

क्वचित् कदाचिदवलोकितेऽवग्रहेहाद्वयमतिक्रम्य प्रथमतोऽप्यपाय एव लक्ष्यते निर्विवादमशेषैरपि जन्तुभिः, यथा 'असौ पुरुषः' इति । अन्यत्र पुनः क्वचित् पूर्वोपलब्धे सुनिश्चिते दृढवासने विषयेऽवग्रहेहापायानतिलङ्घ्य स्मृतिरूपा धारणैव लक्ष्यते, यथा 'इदं तद् वस्तु यदस्माभिः पूर्वमुपलब्धम्' इति । तत् कथमुच्यते—उत्क्रमातिक्रमाभ्याम् एकादिवैकल्ये च न वस्तु-सद्भावाधिगमः ?''—विशेषा० बृ० गा० २९८ ।

''भ्रान्तोऽयमनुभव इति दर्शयन्नाह-यथा तरुणः समर्थपुरुषः पद्मपत्रशतस्य सूच्यादिना वेधं कुर्वाण एवं मन्यते—मया एतानि युगपद् विद्धानि । अथ च प्रतिपत्रं तानि कालभेदेनैव भिद्यन्ते । न चासौ तं कालमतिसौक्ष्म्याद् भेदेनाऽवबुद्ध्यते । एवमत्रापि अवग्रहादिकालस्य अतिसूक्ष्मतया दुर्विभावनीयत्वेन अप्रतिभासः, न पुनरसत्त्वेन । तस्मादुत्पलपत्रशतवेधोदाहरणेन भ्रान्त एवाऽयं प्रथमत एव अपायादिप्रतिभासः । यथा शुष्कशष्कुलीदशने युगपदेव सर्वेन्द्रियविषयाणां उपलब्धिः प्रतिभाति, तथैषोऽपि प्राथम्येनाऽपायादिप्रतिभासः । पञ्चानामपि इन्द्रियविषयाणामुपलब्धिर्युगपदेवाऽस्य प्रतिभाति । न चेयं सत्या, इन्द्रियज्ञानानां युगपदुत्पादा-योगात् । तथाहि—मनसा सह संयुक्तमेवेन्द्रियं स्वविषयज्ञानमुत्पादयति, नान्यथा, अन्यमनस्कस्य रूपादिज्ञानानुपलम्भात् । न च सर्वेन्द्रियैः सह मनो युगपत् संयुज्यते तस्यैकोपयोगरूपत्वात्, एकत्र ज्ञातरि एककालेऽनेकैः संयुज्यमानत्वाऽयोगात् । तस्मात् मनसोऽत्यन्ताऽऽशुसंचारित्वेन कालभेदस्य दुर्लक्षत्वात् युगपत् सर्वेन्द्रियविषयोपलब्धिरस्य प्रतिभाति । परमार्थतस्तु अस्यामपि काल-भेदोऽस्त्येव । ततो यथाऽसौ भ्रान्तैर्नोपलक्ष्यते तथाऽवग्रहादिकालेऽपीति प्रकृतम् । तदेवम् अवग्रहादीनां नैकादिवैकल्यम्, नाऽप्युत्क्रमातिक्रमौ इति स्थितम् ।''—विशेषा० बृ० गा० २९९ ।

**'तदेवम् अर्थावग्रहादयः'**—विशेषा० बृ० गा० ३००, ३०१ ।

**विंशतिर्मतिभेदा भवन्ति ।**

**अवग्रहादयः** = अर्थावग्रहेहापायधारणाः चत्वारः, **मनइन्द्रियैः** = मन एकमिन्द्रियाणि चक्षुरादीनि पञ्च, तैः, **षोढा भिद्यमानाः** = प्रत्येकं षट्प्रकारैर्भिद्यमानाः, चतुर्णां प्रत्येकं षट्प्रकारैर्भिद्यमानत्वे चतुर्विंशतिर्भेदाः सम्पद्यन्ते, तत्र, **व्यञ्जनावग्रहचतुर्भेदैः** = मनोनयनयो-र्व्यञ्जनावग्रहाभावात् श्रोत्रादीन्द्रियप्रभवैः चतुर्भिर्व्यञ्जनावग्रहैः सह सङ्कलने **अष्टाविंशति-मतिभेदाः** = अष्टाविंशतिसङ्ख्याका मतिविशेषाः ।

अष्टाविंशतिसङ्ख्याकानामेषां बह्वादिविषयभेदनिबन्धन-बहुबहुविधादिद्वादशभेदानां प्रत्येकं सम्भवात्, सर्वेषां सङ्कलने षट्त्रिंशदधिकत्रिशतभेदा मतिज्ञानस्येत्याह—

**अथवा बहु-बहुविध-क्षिप्रा-ऽनिश्रित-निश्चित-ध्रुवैः सप्रतिपक्षैर्द्वादशभि-र्भेदैर्भिन्नानामेतेषां षट्त्रिंशदधिकानि त्रीणि शतानि भवन्ति ।**

बह्ववग्रह-बहुविधावग्रह-क्षिप्रावग्रह-अनिश्रितावग्रह-निश्चितावग्रह-ध्रुवावग्रहैः, एवं बह्वीहादिभिः तथा बह्वपायादिभिः तथा बहुधारणाभिः, **सप्रतिपक्षैः** = अबह्ववग्रहाद्यबह्वीहाद्य-बह्वपायाद्यबहुधारणादिसहितैः, **एतेषाम्** = अनन्तरनिर्दिष्टानामष्टाविंशतिसङ्ख्याकानामव-ग्रहादीनाम् । अन्यत् स्पष्टम् ।

अवग्रहादीनां बह्वादिभेदाः किंनिबन्धना इत्यपेक्षायामाह—

**बह्वादयश्च भेदा विषयापेक्षाः,**

बह्ववग्रहादीनां विषयापेक्षत्वमेव भावयति—

**तथाहि—कश्चिद् नानाशब्दसमूहमाकर्णितं बहुं जानाति—'एतावन्तोऽत्र शङ्खशब्दा एतावन्तश्च पटहादिशब्दा' इति पृथग्भिन्नजातीयं क्षयोपशमविशेषात् परिच्छिन्नतीत्यर्थः । अन्यस्त्वल्पक्षयोपशमत्वात् तत्समानदेशोऽप्यबहुम् ।**

**कश्चित्** = प्रमातृविशेषः । बहुं जानातीति सामान्योक्तमेव विशिष्याऽर्थप्रकटनेन स्पष्टयति—**एतावन्तोऽत्रेति** । **अत्र** = आकर्णिते नानाशब्दसमूहे । बहुग्रहणमुपदर्श्य तत्प्रतिपक्ष-मबहुग्रहणमुपदर्शयति—**अन्यस्त्विति** । **अन्यः** = बह्वर्थग्रहणकर्तृभिन्नः, **तत्समानदेशोऽपि** = बहुग्रहीतृप्रमातृदेशवर्त्यपि । **जानातीत्यनुवर्त्तते**, एवमग्रेऽपि ।

---

**'अथवा बहुबहु०'**—विशेषा० बृ० गा० ३०७ ।

**'बह्वादयश्च भेदाः'**—विशेषा० बृ० गा० ३०८-३१० ।

बह्ववग्रहादिनो बहुविधावग्रहादेर्विशेष्यांशावगाहित्वसाम्येऽपि प्रकारांशावगाहित्वेऽस्ति वैलक्षण्यं–बह्ववग्रहादिमतः पुरुषतो बहुविधावग्रहादिमत एकैकस्मिन्नपि विशेष्ये बहुधर्म-प्रकारावबोधत्वादिति बहुविधस्वरूपावेदनेन प्रकटयति–

**अपरस्तु क्षयोपशमवैचित्र्याद् बहुविधम्–एकैकस्याऽपि शङ्खादिशब्दस्य स्निग्ध-त्वादिबहुधर्मान्वितत्वेनाऽऽप्याकलनात् । परस्त्वबहुविधं–स्निग्धत्वादिस्वल्प-धर्मान्वितत्वेनाऽऽकलनात् ।**

बहुविधं जानातीत्येव हेतूपदर्शनेन द्रढयति–**एकैकस्याऽपीति** । एतद्विपरीतमबहुविधं निरूपयति-**परस्त्विति** । अबहुविधत्वे पूर्वस्माद् न्यूनधर्माकलनमर्थात् प्राप्तमपि स्पष्टप्रतिपत्तये दर्शयति–**स्निग्धत्वादीति** ।

शीघ्रपरिच्छेदकावग्रहादित्वं क्षिप्रावग्रहादित्वम्, चिरपरिच्छेदकावग्रहादित्वमक्षिप्राव-ग्रहादित्वमिति क्रमेण दर्शयति–

**अन्यस्तु क्षिप्रं-शीघ्रमेव परिच्छेदात् । इतरस्त्वक्षिप्रं-चिरविमर्शेनाऽऽकलनात् ।**

लिङ्गं विनैव वस्तुपरिच्छेदकावग्रहादित्वमनिश्रितावग्रहादित्वम्, लिङ्गावलम्बनेन वस्तु-परिच्छेदकावग्रहादित्वं निश्रितावग्रहादित्वमिति क्रमेण निरूपयति-

**परस्त्वनिश्रितं–लिङ्गं विना स्वरूपत एव परिच्छेदात् । अपरस्तु निश्रितं–लिङ्गनिश्रयाऽऽकलनात् ।**

विरुद्धधर्मानालिङ्गितत्वेन वस्त्ववग्राह्यवग्रहादित्वं निश्चितावग्रहादित्वम्, विरुद्ध-धर्मालिङ्गितत्वेन वस्त्ववग्राह्यवग्रहादित्वमनिश्चितावग्रहादित्वमिति क्रमेणोपदर्शयति–

**कश्चित्तु निश्चितं–विरुद्धधर्मानालिङ्गितत्वेनाऽवगतेः । इतरस्तु निश्चितं-विरुद्ध-धर्माङ्कितितयाऽवगमात् ।**

यस्य पुंसो यदा यदा यद्वस्तुनो बोधः तदा तदा नियतेन बह्वादिरूपेणैव बोधो भवति, स ध्रुवमवगृह्णाति; यस्य च प्रमातुः कदाचिद् यस्य वस्तुनो बह्वादिरूपेण बोधः, तस्यैव प्रमातुः तस्यैव वस्तुनः कदाचिदबह्वादिरूपेण बोधः, सोऽध्रुवमवगृह्णातीत्येवंव्यवस्थया ध्रुवावग्रहादि-कमध्रुवावग्रहादिकं च लक्षितं भवतीत्याह–

**अन्यो ध्रुवं-बह्वादिरूपेणाऽवगतस्य सर्वदैव तथा बोधात् । अन्यस्त्वध्रुवं-कदाचिद् बह्वादिरूपेण कदाचित्त्वबह्वादिरूपेणाऽवगमादिति ।**

इदं त्ववधेयं-सामान्यमात्रग्राहिणो नैश्चयिकार्थावग्रहस्य वस्त्वादिरूपेणाऽर्थावगमक-

त्वाभावाद् बह्ववग्रहत्वादिरूपेण द्वादशविधत्वाभावेऽपि, व्यावहारिकार्थावग्रहस्य वस्तुस्थित्याऽपायरूपस्योक्तद्वादशविधत्वमिति सामान्यतोऽर्थावग्रहस्य भवतु द्वादशविधत्वम् । परं व्यञ्जनावग्रहस्याऽज्ञानरूपतापक्षे[1] औपचारिकमेव ज्ञानत्वमिति कथं बह्वादिभेदः ? तस्य ज्ञानरूपत्वपक्षेऽपि च नाऽर्थविषयकज्ञानत्वम्, अव्यक्तार्थज्ञानताभ्युपगमोऽपि तत्राऽर्थज्ञानरूपार्थवग्रहोपादानत्वनिबन्धनोपचारत एव-तत्र मनोव्यापाराभावात्, मनोव्यापारमन्तरेण जायमाने ज्ञाने परमार्थतोऽर्थविषयकत्वस्याऽनुपचरितस्याऽसम्भवात् । तथा चाऽर्थविषयकत्वाभावेऽर्थबहुत्वादिनिबन्धनस्य बह्वादिरूपेणाऽवभासकत्वस्याऽप्यभावादुक्तद्वादशविधत्वमपि न सम्भवतीति मतिज्ञानस्य षट्त्रिंशदधिकत्रिशतविधत्वमप्यसम्भवदुक्तिकं यद्यपि, तथाप्युपचारतो यथा ज्ञानत्वादिकं व्यञ्जनावग्रहस्य, तथा तत्कार्यार्थावग्रहादिगत-बह्वाद्यवभासकत्वमप्युपचारत इति तदाश्रयेणोक्तभेदोपपत्तिरिति ।

मतिज्ञाननिरूपणमुपसंहरति-

**उक्ता मतिभेदाः ।**

## श्रुतज्ञाननिरूपणम्

तत्र श्रुतानुसारिज्ञानत्वं श्रुतज्ञानत्वमित्येवं श्रुतज्ञानलक्षणस्य पूर्वमभिहितत्वात् तद्विभागमेवाऽऽह-

**श्रुतभेदा उच्यन्ते-श्रुतम् अक्षर-सञ्ज्ञि-सम्यक्-सादि-सपर्यवसित-गमिकाऽङ्गप्रविष्टभेदैः सप्रतिपक्षैः चतुर्दशविधम् ।**

प्रतिपक्षाः चाऽक्षरादीनां सप्तानामनक्षरासंज्ञ्यसम्यगनाद्यपर्यवसितागमिकानङ्गप्रविष्टभेदाः सप्तेति मिलित्वा चतुर्दशविधं श्रुतमित्यर्थः ।

**तत्राऽक्षरं त्रिविधं-सञ्ज्ञा-व्यञ्जन-लब्धिभेदात् । सञ्ज्ञाक्षरं बहुविधलिपिभेदम्, व्यञ्जनाक्षरं भाष्यमाणमकारादि-एते चोपचारात् श्रुते । लब्ध्यक्षरं तु इन्द्रियमनोनिमित्तः श्रुतोपयोगः, तदावरणक्षयोपशमो वा ।**

---

**'श्रुतम् अक्षर'**—आव० नि० १९ । विशेषा० बृ० गा० ४५४ ।

**'तत्राक्षरं त्रिविधम्'**—विशेषा० बृ० गा० ४६४-४६६ ।

**'एते चोपचाराच्छ्रुते'**—"सञ्ज्ञाक्षरम्, व्यञ्जनाक्षरं चैते द्वे अपि भावश्रुतकारणत्वात् द्रव्यश्रुतम् ।"—विशेषा० बृ० गा० ४६७ ।

**'एतच्च परोपदेशं विनापि'**—"यदपि परोपदेशजत्वमक्षरस्य उच्यते तदपि सञ्ज्ञा-

---

१. व्यञ्जनावग्रहे ज्ञानाज्ञानरूपपक्षद्वयं ३५ पृष्ठ द्रष्टव्यम् ।

**तत्र** = उक्तचतुर्दशसु श्रुतेषु मध्ये, **अक्षरम्** = अक्षरश्रुतम् । **बहुविधलिपिभेदमिति** । भाष्यमाणाकाराद्यक्षरावबोधनाय विविधनिर्मितिविषयीकृतरेखादिलक्षणलिपीनां प्रतिनियतस्व-स्वसङ्केतिताक्षराणां स्वरूपतो यथाऽन्योन्यं भेद एकदेशीयपुरुषरचनावैशिष्ट्यकृतः तथा देशभेदेन तत्तद्देशीयपुरुषकृतसङ्केतभेदेनैकस्याऽप्यकारादे रेखादिसन्निवेशविशेषाविर्भावितस्वरूपतो व्यञ्जिकानां लिपीनां भेद इति बहुविधत्वं बोध्यम् । लिप्याऽक्षरं सञ्ज्ञायते इति सञ्ज्ञाक्षरत्वम् । **भाष्यमाणं** = वक्त्रोच्चार्यमाणम् ।

ननु सञ्ज्ञाक्षरं व्यञ्जनाक्षरं चाऽज्ञानरूपत्वात् कथं श्रुतम्, श्रुतानुसारिज्ञानस्यैव श्रुतत्वेन लक्षितत्वादित्यत आह—**एते चेति** । सञ्ज्ञाक्षरव्यञ्जनाक्षरे त्वित्यर्थः । **उपचारादिति** । परम्परया साक्षाद् वा तज्जन्यस्य शाब्दबोधात्मकज्ञानस्य भावश्रुतत्वेन, तत्कारणत्वादनयोरपि श्रुतत्वोपचारत एते श्रुते इत्यर्थः ।

अक्षरस्य तृतीयभेदं लब्ध्यक्षरं निरूपयति—**लब्ध्यक्षरं त्विति** । श्रुतोपयोगस्य साक्षात् श्रुतत्वम्, तदावरणक्षयोपशमस्याऽज्ञानरूपस्य तु श्रुतोपयोगलक्षणभावश्रुतकारणत्वादुपचारात् ।

यद्यपीन्द्रियमनोनिमित्तस्य, सङ्केतविषयपरोपदेशं श्रुतग्रन्थं वाऽनुसृत्य वाच्यवाचक-भावेन संयोज्य 'घटो घट' इत्याद्यन्तर्जल्पाकारग्राहिज्ञानस्य, सांव्यवहारिकप्रत्यक्षरूपस्य श्रुतोपयोगस्याऽस्त्येव परोपदेशापेक्षा, तथापि मुग्धानां गवादीनां च शब्दश्रवणमात्रेणाऽपि उपयोगस्य श्रुताख्यस्य तदीयचेष्टाविशेषतोऽनुमीयमानस्य भावेन, लब्ध्यक्षरं परोपदेशं विनापि सम्भवतीत्याह—

**एतच्च परोपदेशं विनापि नाऽसम्भाव्यम्-अनाकलितोपदेशानामपि मुग्धानां गवादीनां च शब्दश्रवणे तदाभिमुख्यदर्शनाद्, एकेन्द्रियाणामप्यव्यक्ताक्षरलाभाच्च ।**

**नाऽसम्भाव्यमिति** निषेधद्वयात् सम्भाव्यमेवेत्यर्थः । परोपदेशं विनापि लब्ध्यक्षरेण सम्भाव्यमित्यनुभवतो व्यवस्थापयति—**अनाकलितेति** । **मुग्धानाम्** = अतीवमुग्धप्रकृतीनां

---

व्यञ्जनाक्षरयोरेवाऽवसेयम् । लब्ध्यक्षरं तु क्षयोपशमेन्द्रियादिनिमित्तमसञ्ज्ञिनां न विरुध्यते ।''— विशेषा० बृ० गा० ४७५ ।

''यथा वा संज्ञिनामपि परोपदेशाभावेन केषाञ्चिदतीवमुग्धप्रकृतीनां पुलिन्दबालगोपाल-गवादीनामसत्यपि नरादिवर्णविशेषविषये विज्ञाने लब्ध्यक्षरं किमपीक्ष्यते, नरादिवर्णोच्चारणे तच्छ्रवणात् अभिमुखनिरीक्षणादिदर्शनाच्च । गौरपि हि शबलाबहुलादिशब्देन आकारिता सती स्वनाम जानीते प्रवृत्तिनिवृत्त्यादि च कुर्वती दृश्यते । नचैषां गवादीनां तथाविधः परोपदेशः समस्ति ।''—विशेषा० बृ० गा० ४७६ ।

पुलिन्दगोपालबालादीनाम्, **गवादीनां** = शबलबाहुल्यादीनां **च शब्दश्रवणे** = नरादिवर्णश्रवणे स्वस्वाम्युच्चरितस्वाह्वानसंसूचकशाबल्यादिशब्दश्रवणे च, लौकिकपरीक्षकभिन्नानां रथ्या-पुरुषादीनां च, **तदाभिमुख्यदर्शनात्** = यद्देशादित आगतः शब्दः तद्देशाद्याभिमुख्यदर्शनाद् वक्तृमुखावलोकन-तत्पृच्छादेर्लाङ्गूलादिचालनकर्णोन्नयनादिचेष्टादेर्दर्शनाद् । एतच्च श्रुतज्ञानं परोपदेशाजनितमेकेन्द्रियाणामप्यस्तीत्यतोऽपि परोपदेशं विना सम्भाव्यमित्याह-**एकेन्द्रि-याणामपीति** ।

अक्षरश्रुतप्रतिपक्षमनक्षरश्रुतं निरूपयति—

**अनक्षरश्रुतमुच्छ्वासादि—तस्याऽपि भावश्रुतहेतुत्वात्, ततोऽपि 'सशोको-ऽय'मित्यादिज्ञानाविर्भावात् ।**

उच्छ्वासादेरज्ञानरूपस्य कथं श्रुतत्वमित्यपेक्षायामाह-**तस्याऽपीति** । उच्छ्वासादितो ज्ञानजनने सत्येव भावश्रुतहेतुत्वं भवेदित्यत आह—**ततोऽपीति** । उच्छ्वासादितोऽपीत्यर्थः । उच्छ्वसन्तं पुरुषं दृष्ट्वा 'उच्छ्वासादितः सशोकोऽय'मिति ज्ञानमाविर्भवति, श्रुते चैवं निर्णीतमस्ति-'यदुतोच्छ्वासादिः शोकप्रभव'—इति श्रुतानुसारितया तज्ज्ञानं श्रुतज्ञानमिति तज्जनकतयोच्छ्वासादेः श्रुतत्वमिति ।

उच्छ्वासादिलक्षणपुरुषव्यापारस्यैव श्रुतस्वरूपम्, व्यापारान्तरस्य भावश्रुतहेतुत्वेन श्रुतरूपत्वेऽपि अनक्षररूपतया न प्रसिद्धिरित्यत्र विनिगमकमाह—

**अथवा श्रुतोपयुक्तस्य सर्वात्मनैवोपयोगात् सर्वस्यैव व्यापारस्य श्रुतरूपत्वेऽपि अत्रैव शास्त्रज्ञलोकप्रसिद्धा रूढिः ।**

**अत्रैव** = उच्छ्वासादावेव । शास्त्रानभिज्ञप्रसिद्धरूढेरपरीक्षाक्षेत्रत्वेनाऽनादरणीयत्वात् **शास्त्रज्ञेति** लोकस्य विशेषणम् । **रूढिरिति** । 'अनक्षरश्रुत'शब्दस्येति शेषः । शास्त्रज्ञा इत्थमेव व्यवहरन्तीति तथैवाऽभ्युपगन्तव्यमिति ।

---

'**अनक्षरश्रुत**'—आव० नि० २० ।

"इह उच्छ्वसिताद्यनक्षरश्रुतं द्रव्यश्रुतमात्रमेवाऽवगन्तव्यं शब्दमात्रत्वात् । शब्दश्च भावश्रुतस्य कारणमेव । यच्च कारणं तद् द्रव्यमेव भवतीति भावः । भवति च तथाविधोच्छ्वसितनिः-श्वसितादिश्रवणे 'सशोकोऽयम्' इत्यादिज्ञानम् । एवं विशिष्टाभिसन्धिपूर्वकनिष्ठ्यूतकासित-क्षुतादिश्रवणेऽपि आत्मज्ञानादि ज्ञानं वाच्यमिति । अथवा श्रुतज्ञानोपयुक्तस्य आत्मनः सर्वात्म-नैवोपयोगात् सर्वोऽपि उच्छ्वसितादिको व्यापारः श्रुतमेवेह प्रतिपत्तव्यम् इति उच्छ्वसितादयः श्रुतं भवन्त्येवेति ।"—विशेषा० बृ० गा० ५०२ ।

सञ्ज्यसञ्ज्ञिश्रुते निरूपयति–

**समनस्कस्य श्रुतं सञ्ज्ञिश्रुतम्, तद्विपरीतमसञ्ज्ञिश्रुतम् ।**

स्मरणचिन्तादिदीर्घकालिकज्ञानवान् सञ्ज्ञी = समनस्कपञ्चेन्द्रियः, तस्य श्रुतं **सञ्ज्ञिश्रुतम्**, अमनस्कसम्मूर्च्छनपञ्चेन्द्रियोऽसंज्ञी, तस्य श्रुतं चा**ऽसञ्ज्ञिश्रुत**मित्यर्थः ।

सम्यक्श्रुतं तद्विपरीतं मिथ्याश्रुतं च प्ररूपयति–

**सम्यक्श्रुतमङ्गानङ्गप्रविष्टम्, लौकिकं तु मिथ्याश्रुतम् ।**

**लौकिकम्** = [१]अङ्गानङ्गप्रविष्टभिन्नम् ।

स्वामिविशेषकृतं सम्यक्श्रुत-मिथ्याश्रुतयोर्विशेषं भावयति–

**स्वामित्वचिन्तायां तु भजना-सम्यग्दृष्टिपरिगृहीतं मिथ्याश्रुतमपि सम्यक्श्रुतमेव-वितथभाषित्वादिना यथास्थानं तदर्थविनियोगात् । विपर्ययाद् मिथ्यादृष्टिपरिगृहीतं च सम्यक्श्रुतमपि मिथ्याश्रुतमेवेति ।**

**भजने**ति । मिथ्याश्रुतस्याऽपि सम्यक्श्रुतत्वम्, सम्यक्श्रुतस्याऽपि मिथ्याश्रुतत्वमित्यर्थः । भजनामेवोपपाद्य दर्शयति-**सम्यग्दृष्टी**ति । यदि स्वामिचिन्ता[२] नाऽऽश्रीयते

---

'**सञ्ज्ञिश्रुतम्**'–विशेषा० बृ० गा० ५०४ ।

"इदमुक्तं भवति-यतः स्मरणचिन्तादिदीर्घकालिकज्ञानसहितः समनस्कपञ्चेन्द्रियः संज्ञीत्यागमे व्यवह्रियते, असंज्ञी तु प्रसह्यप्रतिषेधमाश्रित्य यद्यप्येकेन्द्रियादिरपि लभ्यते तथापि समनस्कसंज्ञी तावत् पञ्चेन्द्रिय एव भवति, ततः पर्युदासाश्रयणात् असंज्ञ्यपि अमनस्क-संमूर्च्छनपञ्चेन्द्रिय एव आगमे प्रायो व्यवह्रियते । तदेवंभूतः संज्ञासंज्ञिव्यवहारो दीर्घकालिकोपदेशेनैव उपपद्यते ।"–विशेषा० बृ० गा० ५२६ ।

'**सम्यक्**'–"इह अङ्गप्रविष्टम् **आचारादि** श्रुतम्, अनङ्गप्रविष्टं तु **आवश्यकादि** श्रुतम् । एतद् द्वितयमपि स्वामिचिन्तानिरपेक्षं स्वभावेन सम्यक्श्रुतम् । लौकिकं तु **भारतादि** प्रकृत्या मिथ्याश्रुतम् । स्वामित्वचिन्तायां पुनः लौकिके **भारतादौ** लोकोत्तरे च **आचारादौ** भजनाऽवसेया । सम्यग्दृष्टिपरिगृहीतं **भारताद्यपि** सम्यक्श्रुतं सावद्यभाषित्व-भवहेतुत्वादियथावस्थित-तत्त्वस्वरूपबोधतो विषयविभागेन योजनात् । मिथ्यादृष्टिपरिगृहीतं तु **आचाराद्यपि** अयथा-वस्थितबोधतो वैपरीत्येन योजनादिति भावार्थ इति ।" विशेषा० बृ० गा० ५२७ ।

---

१. जैनेषु ये ग्रन्था मूलशास्त्रत्वेन परिगण्यन्ते ते 'आगम' इति कथ्यन्ते । तेषु ये साक्षाद् महावीरस्वामिना प्रणीता ते 'अङ्ग'सूत्राणि इति कथ्यन्ते । ते च ग्रन्था एकादश । तद्भिन्ना ग्रन्था 'अनङ्ग' इत्युच्यन्ते ।

२. क एतदधीते इत्यनधिकृत्य यदि विवक्ष्यते तर्हीत्यर्थः ।

तदाऽङ्गप्रविष्टं यद् **आचारादि**श्रुतं यच्चाऽनङ्गप्र**विष्टमावश्यका**दि श्रुतं तदुभयमपि स्वरूपतः सम्यक्श्रुतमेव-तत्प्रतिपाद्यार्थस्याऽनेकान्तात्मकत्वेनाऽबाधितत्वात् । तदुभयभिन्नं **भारता**दि **व्यासा**दिप्रणीतं लौकिकं बाधितैकान्तार्थकत्वेन स्वरूपतो मिथ्याश्रुतमेवेत्यभिहितम् । स्वामिचिन्ताश्रयणे पुनः **सम्यग्दृष्टिपरिगृहीतं** = सम्यग्दृष्टिनाऽध्ययनाध्यापनादिविषयीकृतं **मिथ्याश्रुतमपि भारता**दिकं **सम्यक्श्रुतमेव** । तत्र हेतुमाह—**वितथभाषित्वादिने**ति । आदि-पदाद् भवहेतुत्वादेरुपग्रहः ।

**महाभारता**दिरयं वितथभाषिणैकान्तवादिना यथावद्वस्त्वनभिज्ञेन **व्यासादि**नोपरचितः, एकान्ततया तदुक्तार्थानुष्ठानं भवभ्रमणहेतुरित्यादिरूपेण तदर्थाकलनं समीचीनमेव । न हि **भारता**दिप्रणेता वितथभाषी न भवति, न वा तदुपदर्शितक्रियाकलापानुष्ठानं भवभ्रमणहेतुर्न भवतीत्यतो, मिथ्यात्वनिबन्धनैकान्तघटनां परिचिन्त्य कथञ्चिदर्थसंयोजनेन यथास्थानं तदर्थ-विनियोगात् सम्यक्श्रुतमेव भवतीत्यर्थः ।

**विपर्ययाद्** =अयथावस्थितबोधतो **मिथ्यादृष्टिपरिगृहीतं** = सम्यक्श्रद्धानरहित-पुरुषेणाऽधीतं स्वरूपतः **सम्यक्श्रुतमपि** अनेकान्तार्थतां वास्तविकीं परिभूयैकान्तार्थताम-वास्तविकीं प्रापितं सद् **मिथ्याश्रुतमेव** भवतीत्यर्थः ।

द्रव्यक्षेत्रकालभावैः सादि सम्यक्श्रुतं निरूपयति—

**सादि द्रव्यत एकं पुरुषमाश्रित्य, क्षेत्रतश्च भरतैरावते,कालत उत्सर्पिण्य-वसर्पिण्यौ, भावतश्च तत्तज्ज्ञापकप्रयत्नादिकम् ।**

**द्रव्यत इति** । कस्यचिदेकस्य देवदत्तादेराधारीभूतद्रव्यस्य पूर्वं सम्यक्श्रुतं नाऽभूद्, इदानीमेव जातमिति तदपेक्षया **सादि** सम्यक्श्रुतमित्यर्थः । **क्षेत्रतश्चे**ति । [१]भरतैरावत-

---

**'सादि द्रव्यतः'**—विशेषा० बृ० गा० ५३८, ५४८ ।

**'क्षेत्रतश्च'**—"क्षेत्रे चिन्त्यमाने भरतैरावतक्षेत्राण्याश्रित्य सम्यक्श्रुतं सादि सनिधनं च भवति । एतेषु हि क्षेत्रेषु प्रथमतीर्थकरकाले तद्भवतीति सादित्वम्, चरमतीर्थकृत्तीर्थान्ते तु अवश्यं व्यवच्छिद्यते इति सपर्यवसितत्वमिति । काले तु अधिक्रियमाणे द्वे समे उत्सर्पिण्यवसर्पिण्यौ समाश्रित्य तत्रैव तेष्वेव भरतैरावतेष्वेतत् सादि सपर्यवसितं भवति, द्वयोरपि समयोः तृतीयारके प्रथमं भावात् सादित्वम्; उत्सर्पिण्यां चतुर्थस्याऽऽदौ, अवसर्पिण्यां तु पञ्चमस्याऽन्ते अवश्यं व्यवच्छेदात् सपर्यवसितत्वम् । भावे पुनः विचार्यमाणे प्रज्ञापकं गुरुम्, श्रुतप्रज्ञापनीयांश्च अर्थानासाद्य इदं सादि सपर्यवसितं स्यादिति ।"—विशेषा० बृ० गा० ५४६ ।

---

१. भरतादिक्षेत्राणामुत्सर्पिण्यादिकालगणनानां च ज्ञानार्थं बृहत्सङ्ग्रहण्यादीनि प्रकरणान्यवलोकनीयानि ।

क्षेत्राण्याश्रित्य सादि सनिधनं सम्यक्श्रुतं भवति । तत्र प्रथमतीर्थकृत्समये तद् भवतीति सादि, चरमतीर्थकृत्तीर्थान्तेऽवश्यं तद् विच्छिद्यते इति सनिधनमिति । **कालत** इति । काले त्वाश्रीयमाणे द्वे समे उत्सर्पिण्यवसर्पिण्यौ[1] समाश्रित्य तेष्वेव भरतैरावतेष्वेतत् सादि सपर्यवसितं भवति, द्वयोरपि समयोः तृतीयारके प्रथमं भावात् सादित्वम्, उत्सर्पिण्यां चतुर्थस्याऽऽदौ, अवसर्पिण्यां तु पञ्चमस्याऽन्तेऽवश्यं विच्छेदात् सपर्यवसितत्वमिति । **भावतश्चे**ति । भावतो विचार्यमाणे प्रज्ञापकं गुरुं श्रुतप्रज्ञापनीयान् चाऽर्थानासाद्य सादि सपर्यवसितमिदं भवतीति ।

सादिश्रुतप्रतिपक्षमनादिश्रुतं निरूपयति–

**अनादि द्रव्यतो नानापुरुषानाश्रित्य, क्षेत्रतो महाविदेहान्, कालतो नोउत्सर्पिण्यवसर्पिणीलक्षणम्, भावतश्च सामान्यतः क्षयोपशममिति ।**

**द्रव्यत इति** । द्रव्यविषये नारकतिर्यग्मनुष्यदेवगतान् नानासम्यग्दृष्टिजीवान्, **आश्रित्य** =अवलम्ब्य तदपेक्षयेति यावत्, सम्यक्श्रुतं सततं वर्त्तते, न तु कदाचिद् न भवति । एवं च नानापुरुषानाश्रित्येदमनाद्यपर्यवसितं भवतीति । **क्षेत्रत** इति । पञ्चमहाविदेहलक्षणान् विदेहानङ्गीकृत्य श्रुतज्ञानं सततं वर्त्तते इत्यनाद्यपर्यवसितं तदित्यर्थः । **कालत** इति । अनवसर्पिण्यनुत्सर्पिणीलक्षणं कालमाश्रित्य पञ्चमहाविदेहेष्वनाद्यपर्यवसितं श्रुतज्ञानमिति । **भावतश्चे**ति । सामान्यतः क्षायोपशमिकं भावमाश्रित्य श्रुतज्ञानं सततं वर्त्तते, यतः सामान्येन महाविदेहेष्वुत्सर्पिण्यवसर्पिण्यभावरूपकालविशिष्टेषु द्वादशाङ्गश्रुतं कदापि न व्यवच्छिद्यते–तीर्थकरगणधरादीनां तेषु सर्वदैव भावादित्यनाद्यपर्यवसितं तदित्यर्थः ।

सादिश्रुतप्ररूपणे तस्य सपर्यवसितत्वं भावितमनादिश्रुतप्ररूपणे च तस्याऽपर्यवसितत्वं भावितमिति न तत्र वक्तव्यमवशिष्यते किञ्चिदिति सपर्यवसितापर्यवसितयोर्भावनामतिदिशति–

**एवं सपर्यवसितापर्यवसितभेदावपि भाव्यौ ।**

---

**'अनादि द्रव्यतः'**–"द्रव्ये-द्रव्यविषये नानापुरुषान् नारकतिर्यङ्मनुष्यदेवगतान् नानासम्यग्दृष्टिजीवानाश्रित्य श्रुतज्ञानं सम्यक्श्रुतं सततं वर्त्तते । अभूत् भवति भविष्यति च । न तु कदाचिद् व्यवच्छिद्यते । ततस्तानाश्रित्य इदम् अनादि अपर्यवसितं च स्यादिति भावः । क्षेत्रे पुनः पञ्चमहाविदेहलक्षणान् विदेहानङ्गीकृत्य । काले तु यस्तेष्वेव विदेहेषु कालः अनवसर्पिण्युत्सर्पिणीरूपः तमाश्रित्य । भावे तु क्षायोपशमिके श्रुतज्ञानं सततं वर्त्तते अतोऽनादि अपर्यवसितम् । सामान्येन हि महाविदेहेषु उत्सर्पिण्यवसर्पिण्यभावरूपनिजकालविशिष्टेषु द्वादशाङ्गश्रुतं कदापि न व्यवच्छिद्यते तीर्थङ्करगणधरादीनां तेषु सर्वदैव भावात् ।"–विशेषा० बृ० गा० ५४८ ।

---

१. भरतादिक्षेत्राणामुत्सर्पिण्यादिकालगणनानां च ज्ञानार्थं बृहत्सङ्ग्रहण्यादीनि प्रकरणान्यवलोकनीयानि ।

गमिकागमिकश्रुते प्ररूपयति-

**गमिकं सदृशपाठं प्रायो [1]दृष्टिवादगतम् । अगमिकमसदृशपाठं प्रायः [2]कालिकश्रुतगतम् ।**

गमा = भङ्गका गणितादिविशेषाश्च, तद्बहुलं = तत्सङ्कुलं गमिकम्, अथवा गमाः = सदृशपाठाः, ते च कारणवशेन यत्र बहवो भवन्ति तद् गमिकमित्येवं **विशेषावश्यकभाष्ये** व्याख्यातम् । तत्र द्वितीयपक्षमाश्रयन्नाह—**सदृशपाठ**मिति । एतादृशं श्रुतं कुत्रेत्यपेक्षायामाह—**प्रायो दृष्टिवादगत**मिति । एतत्प्रतिपक्षीभूतागमिकश्रुतव्याख्या-तत्स्थाने आह-**अगमिक**मिति ।

अङ्गप्रविष्टानङ्गप्रविष्टश्रुते उदाहरति—

**अङ्गप्रविष्टं गणधरकृतम्, अनङ्गप्रविष्टं तु स्थविरकृतमिति ।**

"उप्पेइ वा विगमेइ वा धुवेइ वा" इति श्रीतीर्थकृद्भगवन्मुखाम्बुजनिर्गतत्रिपद्युपदेशनिष्पन्नं ध्रुवं च यत् श्रुतं गणधररचित**माचारादि** तदङ्गप्रविष्टमित्यर्थः । स्थविरकृत**मावश्यक**प्रकीर्णादिश्रुतमनङ्गप्रविष्टमित्यर्थः ।

वृत्ते च मतिश्रुतनिरूपणे सप्रभेदं तदुभयात्मकं सांव्यवहारिकप्रत्यक्षनिरूपणमपि निष्पन्नमेवेत्युपसंहरति-

**तदेवं सप्रभेदं सांव्यवहारिकं मतिश्रुतलक्षणं प्रत्यक्षं निरूपितम् ।**

## पारमार्थिकप्रत्यक्षनिरूपणम्

पारमार्थिकप्रत्यक्षसामान्यस्य लक्षणमाह-

**स्वोत्पत्तावात्मव्यापारमात्रापेक्षं पारमार्थिकम् ।**

---

**'गमिकम्'**—गमा भङ्गका गणितादिविशेषाश्च तद्बहुलं तत्सङ्कुलं गमिकम् । अथवा गमाः सदृशपाठाः ते च कारणवशेन यत्र बहवो भवन्ति तद् गमिकम्, तच्चैवंविधं प्रायः **दृष्टिवादे** । यत्र प्रायो गाथाश्लोकवेष्टकाद्यसदृशपाठात्मकं तदगमिकम्, तच्चैवंविधं प्रायः कालिकश्रुतम् ।" विशेषा० बृ० गा० ५४९ ।

**'अङ्गप्रविष्टम्'**—"गणधरकृतं पदत्रयलक्षणतीर्थकरादेशनिष्पन्नम्, ध्रुवं च यत् श्रुतं तद् अङ्गप्रविष्टमुच्यते, तच्च द्वादशाङ्गीरूपमेव । यत्पुनः स्थविरकृतं मुत्कलार्थाभिधानं चलं च तद् **आवश्यकप्रकीर्णा**दिश्रुतम् अङ्गबाह्यमिति ।"—विशेषा० बृ० गा० ५५० ।

---

१. बहुपूर्वमेव विच्छिन्नोऽयं ग्रन्थः । अस्य विषयसूची नन्द्यादिषु प्रतिपादिताऽस्ति ।

२. आगमविशेषाणां 'कालिके'ति संज्ञा ।

[1]स्वावरणक्षय-स्वावरणक्षयोपशमविशेषातिरिक्तानपेक्षात्मव्यापारमात्रापेक्षोत्पत्तिकं पारमार्थिकप्रत्यक्षमित्यर्थः ।

तद् विभजते—

**तत् त्रिविधम्-अवधि-मनःपर्यव-केवलभेदात् ।**

अवधिज्ञानम्, मनःपर्यवज्ञानम्, केवलज्ञानमित्येवं त्रिविधं पारमार्थिकप्रत्यक्षमित्यर्थः ।

अवधिज्ञानं निरूपयति—

**सकलरूपिद्रव्यविषयकजातीयमात्ममात्रापेक्षं ज्ञानमवधिज्ञानम् ।**

अत्र **अवधिज्ञान**मिति लक्ष्यनिर्देशः, **सकलरूपी**त्यादि लक्षणनिर्देशः ।

ज्ञानमित्येतावन्मात्रोक्तौ मतिज्ञानादावतिव्याप्तिरिति **आत्ममात्रापेक्ष**मिति तद्विशेषणम् । आत्ममात्रापेक्षं ज्ञानं मनःपर्यवज्ञानं केवलज्ञानं चेति तयोरतिव्याप्तिवारणाय **सकलरूपिद्रव्यविषयकजातीय**मिति । रूपिद्रव्यसमनियतविषयताकज्ञानवृत्तिज्ञानत्वव्याप्यजातिमदिति तदर्थः । तेन केवलज्ञानस्य सकलरूपिद्रव्यविषयकत्वेऽपि न तत्राऽतिव्याप्तिः—केवलज्ञानविषयताया रूपिद्रव्यातिरिक्तद्रव्यादावपि सत्त्वेन, तद्व्याप्यत्वे सति तद्व्यापकत्वलक्षणसमनियतत्वस्य रूपिद्रव्यनिरूपितस्य तत्राऽभावाद् । यतः तदभाववदवृत्तित्वं व्याप्यत्वं, तच्च प्रकृते रूपिद्रव्यत्वाभाववदवृत्तित्वम्, तद् रूपिद्रव्यत्वाभाववत्यरूपिद्रव्यादौ विद्यमानायां केवलज्ञानविषयतायां नाऽस्तीति ।

मनःपर्यायज्ञाननिरूपिता विषयता रूपिद्रव्यत्वव्याप्याऽपि न रूपिद्रव्यत्वव्यापिका। व्यापकत्वं हि तत्समानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वम्, तच्च रूपिद्रव्यत्वाधिकरणे मनोद्रव्यभिन्नघटादिलक्षणरूपिद्रव्ये विद्यमानस्य मनःपर्यायज्ञानविषयत्वाभावस्य प्रतियोगितावच्छेदकं यद् मनःपर्यायविषयतात्वं तद्वत्त्वेन मनःपर्यायज्ञानविषयतायां नाऽस्तीति ।

अवधिज्ञाने चोक्तलक्षणं सङ्गच्छते । रूपिद्रव्यत्वसमनियतविषयता परमावधिज्ञानविषयता, तन्निरूपकं ज्ञानं परमावधिज्ञानम्, तद्वृत्तिर्या ज्ञानत्वव्याप्या जातिः साऽवधिज्ञानत्वजातिः, तद्वदात्ममात्रापेक्षं ज्ञानमवधिज्ञानमिति । जातिघटितलक्षणोपादानात् [2]परमावधिभिन्नावधिज्ञानमात्रस्य सकलरूपिद्रव्यविषयकत्वाभावेऽपि न तत्राऽव्याप्तिः ।

एतेन इन्द्रियादिजन्यश्रुताननुसारिज्ञानवृत्तिज्ञानत्वव्याप्यजातिमत्त्वं मतिज्ञानस्य,

---

१. ज्ञानमात्रस्य स्वोत्पत्तौ स्वावरणक्षयक्षयोपशमान्यतरापेक्षेतीदं विशेषणम् ।

२. केवलं परमावधिरेव सकलरूपिद्रव्याणि विषयीकरोति ।

इन्द्रियादिजन्यश्रुतानुसारिज्ञानवृत्तिज्ञानत्वव्याप्यजातिमत्त्वं च श्रुतज्ञानस्येत्येवं लक्षणमावेदितं भवति । द्रव्यश्रुतस्य[१] ज्ञानत्वव्याप्यजातिमत्त्वाभावेऽपि भावश्रुतकारणत्वमेव लक्षणम्, तदन्यतरत्वं[२] च श्रुतसामान्यस्येति ।

अवधिज्ञानं विभजते—

**तच्च षोढा अनुगामि-वर्धमान-प्रतिपातीतरभेदात् ।**

अनुगाम्यननुगामिवर्धमानहीयमानप्रतिपात्यप्रतिपातिभेदादवधिज्ञानं षड्विधमित्यर्थः ।

**तत्रोत्पत्तिक्षेत्रादन्यत्राऽप्यनुवर्त्तमानमानुगामिकम्, भास्करप्रकाशवद् । यथा भास्करप्रकाशः प्राच्यामाविर्भूतः प्रतीचीमनुसरत्यपि तत्राऽवकाशमुद्योतयति, तथैतदप्येकत्रोत्पन्नमन्यत्र गच्छतोऽपि पुंसो विषयमवभासयतीति ।**

**तत्र** = अनुगाम्यादिषु षट्सु अवधिज्ञानेषु । **उत्पत्तिक्षेत्रे**ति । यस्मिन् क्षेत्रे स्थितस्य पुंसोऽवधिज्ञानमुत्पन्नं तस्मात् क्षेत्रादन्यत्र क्षेत्रे गतस्याऽपि तद् अवधिज्ञानमनुवर्त्तते इति कृत्वा तद् अवधिज्ञान**मानुगामिक**मित्यर्थः । एतदेवं स्पष्टदृष्टान्तावष्टम्भेन भावयति-**भास्करप्रकाशवद्**िति । दृष्टान्तदार्ष्टान्तिकयोः साम्यमावेदयति-**यथे**ति । **प्राच्यां** = पूर्वस्यां दिशि, **प्रतीचीं** =पश्चिमां दिशम्, **अनुसरत्यपि** = गच्छत्यपि, **तत्र** = सूर्ये । अन्यत्रोत्पन्नस्य प्रकाशस्याऽन्यत्राऽनुगमनमुपदर्श्याऽवधिज्ञानस्य तदुत्पादयति-**तथैतदपी**ति । एतद् = अवधिज्ञानम् । एकस्मिन् क्षेत्रे प्रतिनियते यस्य पुंसः उत्पन्नमवधिज्ञानम्, तस्माद् देशादन्यस्मिन् क्षेत्रे गच्छतोऽपि तस्य पुंसः तद् अवधिज्ञानं विषयं प्रकाशयतीत्यर्थः ।

तत्प्रतिपक्षमननुगामिकावधिज्ञानं निरूपयति—

**उत्पत्तिक्षेत्र एव विषयावभासकमननुगामिकम्, प्रश्नादेशपुरुषज्ञानवत् । यथा प्रश्नादेशः क्वचिदेव स्थाने संवादयितुं शक्नोति पृच्छ्यमानमर्थम्, तथेदमपि अधिकृत एव स्थाने विषयमुद्योतयितुमलमिति ।**

यस्मिन् क्षेत्रे स्थितस्य पुंसोऽवधिज्ञानमुत्पन्नं तत्क्षेत्रादन्यस्मिन् क्षेत्रे गतस्य पुंसो यद् अवधिज्ञानं नाऽनुवर्त्तते, अपि तु उत्पत्त्यवच्छेदकदेशे एव स्वविषयमवभासयति, तद् अवधिज्ञानमननुगामिकमित्यर्थः । एतदपि दृष्टान्तावष्टम्भेन भावयति-**प्रश्नादेश** इति । परेण कृतस्य प्रश्नस्य 'ममाऽमुकार्थसिद्धिर्भविष्यति न वे'त्यादिरूपस्य विषयीभूतार्थसिद्ध्यादिकमादिशति = कथयति यो गणकादिः पुमान् स प्रश्नादेशः पुरुषः, तस्य प्रश्नविषयार्थसिद्ध्यादि-

---

१. सञ्ज्ञाक्षरादेः ।

२. इन्द्रियानिन्द्रियजन्यश्रुतानुसारिज्ञानवृत्ति-ज्ञानत्वव्याप्यजातिमत्त्व-भावश्रुतकारणत्वान्यतरत्वम् ।

ज्ञानवदित्यर्थः । दृष्टान्तदार्ष्टान्तिकभावनामाह-**यथे**ति । **इदम्** = अननुगामिकावधिज्ञानम्, **अलं** = समर्थम् । अन्यत् स्पष्टम् ।

वर्धमानावधिज्ञानं निरूपयति—

**उत्पत्तिक्षेत्रात् क्रमेण विषयव्याप्तिमवगाहमानं वर्धमानम्, अधरोत्तरारणिनिर्मथनोत्पन्नोपात्तशुष्कोपचीयमानाधीयमानेन्धनराश्यग्निवद् । यथाऽग्निः प्रयत्नादुपजातः सन् पुनरिन्धनलाभाद् विवृद्धिमुपागच्छति, एवं परमशुभाध्यवसायलाभादिदमपि पूर्वोत्पन्नं वर्धते इति ।**

यस्मिन् क्षेत्रे पुंसोऽवधिज्ञानमुत्पन्नं तद् उत्पत्तिक्षेत्रम्, तत्र यावद्रूपिविषयकमवधिज्ञानं तदुत्तरोत्तरक्षणे क्रमेण तावद्विषयाधिकविषयमवगाहमानमवधिज्ञानमधिकाधिकविषयकत्वेन वर्धमानमिति वर्धमानावधिज्ञानं तदित्यर्थः । एतदेव दृष्टान्तावष्टम्भेन द्रढयति—**अधरोत्तरे**ति । एकमरणिं=शुष्कं काष्ठमधः स्थितमन्यं चाऽरणिं=शुष्कं काष्ठं तदुपरि स्थितं कृत्वा, तयोः परस्परनिघर्षणलक्षणनिर्मन्थनेनोत्पन्नोऽनन्तरोपादीयमानेन शुष्केन काष्ठेनोपचीयमानो वृद्धिङ्गतो यो निरन्तरमाधायमानानामिन्धनानां राशिना = समूहेन जन्योऽग्निः तद्वदित्यर्थः । दृष्टान्तदार्ष्टान्तिकयोर्भावनामाह-**यथे**ति । **इदम्** = वर्धमानावधिज्ञानम् । व्यक्तमन्यत् ।

हीयमानावधिज्ञानं निरूपयति-

**उत्पत्तिक्षेत्रापेक्षया क्रमेणाऽल्पीभवद्विषयं हीयमानम्, परिच्छिन्नेन्धनोपादानसन्तत्यग्निशिखावद्, यथाऽपनीतेन्धनाग्निज्वाला परिहीयते तथेदमपीति ।**

यस्मिन् क्षेत्रेऽवधिज्ञानं यावद्विषयकमुत्पन्नं तत्क्षेत्रापेक्षया क्रमेण तावद्विषयेभ्योऽपचीयमानविषयकं तद् अवधिज्ञानं भवतीति तद् हीयमानावधिज्ञानमित्यर्थः । अत्र निदर्शनमनुकूलमाह—**परिच्छिन्ने**ति । परिच्छिन्नस्य = अल्पस्य, इन्धनस्य = काष्ठस्य, उपादानं = सङ्ग्रहो यत्र तादृशी या सन्ततिः = अल्पेन्धनसमूहः, तया समुद्भूतस्याऽग्नेः शिखा = ज्वाला तद्वदित्यर्थः । भावनामाह—**यथे**ति । तत्राऽपरापरकाष्ठानामनाधीयमानत्वात् सञ्चितस्य काष्ठस्य प्रतिक्षणं दाहतोऽल्पीभवनादुत्तरोत्तरमग्निज्वालाऽल्पाल्पतरा भवतीति प्रत्यक्षसिद्धमेतत् । **इदं** = हीयमानावधिज्ञानम् ।

प्रतिपात्यवधिज्ञानं निरूपयति—

**उत्पत्त्यनन्तरं निर्मूलनश्वरं प्रतिपाति, जलतरङ्गवद्, यथा जलतरङ्ग उत्पन्नमात्र एव निर्मूलं विलीयते तथेदमपीति ।**

**निर्मूले**ति । सर्वथेत्यर्थः । **इदं** = प्रतिपात्यवधिज्ञानम् ।

अप्रतिपात्यवधिज्ञानं निरूपयति–

**आ केवलप्राप्तेरा मरणाद् वाऽवतिष्ठमानमप्रतिपाति, वेदवद्, यथा पुरुषवेदादि-रापुरुषादिपर्यायं तिष्ठति तथेदमपीति ।**

केवलज्ञानोत्पत्तिक्षणे तदनन्तरक्षणेषु च न क्षायोपशमिकं ज्ञानचतुष्टय[१]मित्यवधिज्ञानमपि नाऽस्तीति, यद् अवधिज्ञानमुत्पन्नं सत् केवलज्ञानपर्यन्तमवतिष्ठते तद् अवधिज्ञानमप्रतिपातीति । अथवा यद् अवधिज्ञानमुत्पन्नं सद् मरणाव्यवहितपूर्वसमयं यावदवतिष्ठते तद् अवधिज्ञानमप्रति-पातीति । अत्र दृष्टान्तमाह- **वेदवदि**ति । पुरुषवेदादिवदित्यर्थः । दृष्टान्तानुगमनं करोति-**यथे**ति । पुरुषवेदादीत्यादिपदात् स्त्रीवेदनपुंसकवेदयोरुपग्रहः । पुरुषवेदनीयं कर्म पुरुषवेदः, एवं स्त्रीवेद-नपुंसकवेदौ । यावत्कालं पुरुषभावेन जन्तोरवस्थितिः, तावत्कालं तस्य पुरुषवेदो-ऽवतिष्ठते । एषैव दिक् स्त्रीवेदनपुंसकवेदयोरपि । **इदम्** = अप्रतिपात्यवधिज्ञानम् । **तथा** = केवलावाप्तिपर्यन्तं मरणपर्यन्तं वाऽवतिष्ठते ।

मनःपर्यवज्ञानं निरूपयति–

**मनोमात्रसाक्षात्कारि मनःपर्यवज्ञानम् ।**

**मनोमात्रसाक्षात्कारी**ति लक्षणनिर्देशो, **मनःपर्यवज्ञान**मिति लक्ष्यनिर्देशः ।

यदा कश्चित् पुमान् मनसि किञ्चिद् बाह्यवस्त्वादिकं विचारयति तदा विचार्यमाण-बाह्यवस्त्वाद्याकारेण परिणतं तस्य मनोद्रव्यं मनःपर्यवज्ञानी जानातीति मनःपर्यवज्ञानिनो विशुद्धसंयमविशेषवतः साधोः क्षयोपशमविशेषाद् मनोद्रव्यतत्पर्यायमात्रसाक्षात्कारिज्ञानं मनःपर्यवज्ञानमित्यर्थः ।

केवलज्ञानमपि सकलवस्तुविषयकं मनोद्रव्यसाक्षात्कारि भवत्येवेति तत्राऽतिव्याप्ति-वारणाय **मात्र**पदम् । यद्यप्यवधिज्ञानं रूपिद्रव्यविषयकं पौद्गलिकस्य मनसोऽपि रूपिद्रव्यत्वेन तद्विषयकमपि, तथापि नैतादृशं किञ्चिदप्यवधिज्ञानं समस्ति-यद् मनोद्रव्यमेव विषयीकरोति, न मनोद्रव्यभिन्नं रूपिद्रव्यमिति मनोद्रव्यमात्रसाक्षात्कारित्वस्य तत्राऽप्यभावाद् नाऽवधि-

---

**'मनोमात्र'**–विशेषा० बृ० गा० ८१० ।

---

१. मत्यादिज्ञानचतुष्टयं ज्ञानावारककर्मणः किञ्चिदंशस्य निर्मूलीकरणेन (=क्षयेन) किञ्चिदंशस्य चाऽभिभवेन (=उपशमेन) जायते, अतस्तानि ज्ञानानि क्षायोपशमिकानि । आवारककर्मणः सर्वथा निर्मूलीकरणकाले = केवलज्ञानकाले एतस्मात् कारणादेव न तेषां सत्त्वम् ।

ज्ञानेऽतिव्याप्तिः ।

ननु मनः चिन्तनीयबाह्यवस्त्वाकारेण परिणतं मनःपर्यवज्ञानी जानानो मनसि स्वाकाराधायकं चिन्तनीयबाह्यवस्त्वपि जानीत एवेति मनःपर्यवज्ञानेऽपि मनोमात्रसाक्षात्कारित्वं नास्त्येव—मनोभिन्नचिन्तनीयबाह्यवस्तुसाक्षात्कारित्वस्याऽपि भावादित्यबोधविजृम्भिताशङ्कापनोदायाऽऽह–

**मनःपर्यायानिदं साक्षात् परिच्छेत्तुमलं, बाह्यानर्थान् पुनः तदन्यथाऽनुपपत्त्याऽनुमानेनैव परिच्छिनत्तीति द्रष्टव्यम् ।**

**इदं** = मनःपर्यवज्ञानम्, **अलं** = समर्थम्, **तद्** = मनसः चिन्तनीयबाह्यवस्त्वाकारपर्यायाः । अयमभिप्रायः- मनःपर्यवज्ञानस्य यदि मनोद्रव्यमात्रज्ञानत्वं लक्षणमुच्यते तदा तस्य लक्षणस्य समन्वयः तत्र न भवेत्-चिन्तनीयबाह्यपदार्थज्ञानस्याऽपि मनःपर्यवज्ञानत्वाभावात् । न चैवमुच्यते, किन्तु मनोमात्रसाक्षात्कारित्वं तल्लक्षणमुच्यते, तच्च सम्भवत्येव, यतो मनोद्रव्यस्यैव साक्षात्कारि मनःपर्यवज्ञानिनो ज्ञानम्, चिन्तनीयवस्तुनो बाह्यघटादेः त्वनुमित्यात्मकमेव, चिन्तकस्याऽयं मनसो घटाद्याकारपर्यायः-चिन्तनीयबाह्यवस्तुजनितः-तदाकारपर्यायत्वात्-यो यदाकारपर्यायः स तद्वस्तुजनितः, स्फटिके जपाकुसुमजनितरक्ताकारपर्यायवदित्येवमनुमानप्रयोगोऽत्र बोध्यः ।

**तद् द्विविधम्-ऋजुमतिविपुलमतिभेदात् ।**

**तद्** = मनःपर्यवज्ञानम् ।

**ऋज्वी = सामान्यग्राहिणी मतिः ऋजुमतिः । सामान्यशब्दोऽत्र विपुलमत्यपेक्षयाऽल्पविशेषपरः, अन्यथा सामान्यमात्रग्राहित्वे मनःपर्यायदर्शनप्रसङ्गात् ।**

**अल्पविशेषपरः** =अल्पविशेषप्रतिपादकतयाऽभीष्टः । तथा च विपुलमतिमनःपर्यवज्ञानं मनोद्रव्यस्य यावतो विशेषान् गृह्णाति ततोऽल्पतरविशेषान् ऋजुमतिर्गृह्णातीत्यर्थः ।

विपुलमतिमनःपर्ययज्ञानस्वरूपं प्रकटयति—

---

**'बाह्यानर्थान्'**—"तेन द्रव्यमनसा प्रकाशितान् बाह्यांश्चिन्तनीयघटादीननुमानेन जानाति, यत एव तत्परिणतानि एतानि मनोद्रव्याणि तस्मादेवंविधेनेह चिन्तनीयवस्तुना भाव्यम् इत्येवं चिन्तनीयवस्तूनि जानाति न साक्षादित्यर्थः । चिन्तको हि मूर्त्तममूर्त्तं च वस्तु चिन्तयेत् । न च छद्मस्थोऽमूर्त्तं साक्षात् पश्यति । ततो ज्ञायते अनुमानादेव चिन्तनीयं वस्त्ववगच्छति ।"—विशेषा० बृ० गा० ८१४ ।

**विपुला = विशेषग्राहिणी मतिर्विपुलमतिः । तत्र ऋजुमत्या घटादिमात्रमनेन चिन्तितमिति ज्ञायते, विपुलमत्या तु पर्यायशतोपेतं तत् परिच्छिद्यते इति ।**

**विपुले**ति । ऋजुमत्यपेक्षया बहुतरविशेषग्राहिणीत्यर्थः । उक्तमेवाऽर्थं स्पष्टयति-**तत्रे**ति । ऋजुमतिविपुलमत्योर्मध्ये इत्यर्थः । **तत्** = चिन्तितं घटादि ।

**एते च द्वे ज्ञाने विकलविषयत्वाद् विकलप्रत्यक्षे परिभाष्येते ।**

**एते** = अनन्तरनिरुपिते **द्वे ज्ञाने** = अवधिमनःपर्यवज्ञाने, **विकलविषयत्वाद्** = असकलवस्तुविषयकत्वाद् । **परिभाष्येते** इति । **जैना**चार्यकृतसङ्केतः-अवधिज्ञानं मनः-पर्यवज्ञानं च विकलप्रत्यक्षशब्दाद् बोद्धव्ये-इत्याकारकपरिभाषा, तद्विषयौ इत्यर्थः ।

केवलज्ञानं निरूपयति-

**निखिलद्रव्यपर्यायसाक्षात्कारि केवलज्ञानम् ।**

अत्र **निखिलद्रव्यपर्यायसाक्षात्कारी**ति लक्षणनिर्देशः, **केवलज्ञान**मिति लक्ष्य-निर्देशः । मत्यादिज्ञानानां क्षायोपशमिकानां चतुर्णामपि निखिलद्रव्यपर्यायसाक्षात्कारित्वाभावाद् न तेष्वतिव्याप्तिः । केवलज्ञानं च करामलकवद् विश्वमेव साक्षात्करोति, ज्ञानस्य सामान्यतो ज्ञेयमात्रावभासनस्वभावो निजगतावरणकर्मणा प्रतिरुध्यते, स्वाशेषावरणक्षयसमुत्थस्य तु केवलज्ञानस्य स्वविषये ज्ञेयस्वभावे जगति लेशतोऽप्यावरणाभावाद् युज्यते निखिलद्रव्य-पर्यायसाक्षात्कारित्वमिति लक्षणसमन्वयः ।

प्रमाणसामान्यलक्षणे पूर्वमेवोक्तं 'दर्शनेऽतिव्याप्तिवारणाय ज्ञानपद'मिति प्रमाणरूप-ज्ञानस्यैव प्रत्यक्षपरोक्षभेदेन प्रथमं द्वैविध्यम्, ततः प्रत्यक्षस्य सांव्यवहारिकपारमार्थिकभेदेन द्वैविध्यम्, तत्र पारमार्थिकेष्ववधिमनःपर्यवकेवलज्ञानलक्षणप्रत्यक्षेषु यदिदं केवलज्ञाननिरूपणं प्रक्रान्तम्, तत् केवलज्ञानानुगाम्येव न तु केवलदर्शनानुगामीति । ततः प्रकृतलक्षणमिदं केवल-दर्शने न गच्छेदित्येतदर्थं सामान्यधर्मानवच्छिन्न-निखिलधर्मनिष्ठप्रकारतानिरूपित-निखिल-धर्मनिष्ठविशेष्यताकसाक्षात्कारित्वं केवलज्ञानस्य लक्षणं वक्तव्यम् । दर्शने च केवले सामान्यात्मना सकलद्रव्यपर्यायसाक्षात्कारिण्यपि सप्रकारकत्वाभावाद् न परिष्कृतलक्षणवत्त्वम् । केवलोपयोगमात्रस्य लक्ष्यत्वे तु यथाश्रुतलक्षणमपि सङ्गतमेवेति बोध्यम् ।

**अत एवैतत् सकलप्रत्यक्षम् ।**

**अत एव** = निखिलद्रव्यपर्यायसाक्षात्कारित्वादेव, **एतत्** = केवलज्ञानं, **सकलप्रत्यक्षं**

---

'**निखिलद्रव्य**'—विशेषा० बृ० गा० ८२३ ।

= सकलवस्तुविषयकप्रत्यक्षम् । पारमार्थिकप्रत्यक्षत्वाविशेषेऽपि विकलविषयकत्वादवधिमनः-पर्यवज्ञानयोर्विकलप्रत्यक्षत्वम्, केवलज्ञानस्य तु सकलवस्तुविषयकत्वात् सकलप्रत्यक्षत्व-मित्यर्थः ।

सकलप्रत्यक्षस्याऽस्य विषयतया निखिलद्रव्यपर्याययोरेवोपादानाद् जगति द्रव्य-पर्यायानन्तर्भूतं नाऽस्त्येव तत्त्वमित्यावेदितम् । तत्र द्रव्याणि जीवपुद्गलधर्माधर्माकाशा-स्तिकायाः पञ्च, कालश्चेति षट् । जीवादीनां सप्रदेशत्वादस्तिकायत्वम् । यो ह्यवयवः प्रदेशिसम्बद्ध एव सर्वदाऽवतिष्ठते स प्रदेशः, ईदृशं प्रदेशमादाय सप्रदेशत्वं यद्यपि न पुद्गलानाम्, तथापि स्वात्मकसङ्घातनिविष्टैकदेशलक्षणावयवस्य[१] प्रदेशत्वमुपचर्य सप्रदेशत्वं ज्ञेयम् । कालस्तु परमनिरुद्धसमयैकस्वरूपत्वाद् नाऽस्तिकायः । गुणपर्यायवद् द्रव्यमिति द्रव्यलक्षणमिति । द्रव्यस्य सहभावी पर्यायो गुणः, क्रमभावी पर्यायस्तु पर्यायेति सामान्यसंज्ञया गीयते । द्रव्यपर्याययोरन्तर्भूतमेव सकलं वस्त्विति निखिलतदुभयसाक्षात्कारिणः केवलज्ञानस्य सकलप्रत्यक्षत्वं युक्त्योपपन्नमेवेति ।

यथा च पारमार्थिकप्रत्यक्षमप्यवधिज्ञानमनुगाम्यादिभेदेन षड्विधम्, मनःपर्यवज्ञानं च ऋजुमतिविपुलमतिभेदेन द्विविधं-तयोः कारणीभूतानां स्वावरणक्षयोपशमविशेषाणामवान्तर-तारतम्यसम्भवाद्, न तथा केवलज्ञानं सभेदं-तत्कारणस्याऽशेषस्वावरणक्षयस्यैकत्वात्-कारण-भेदाभावे कार्यभेदासम्भवादित्याह—

**तच्चाऽवरणक्षयस्य हेतोरैक्याद् भेदरहितम् । आवरणं चाऽत्र कर्मैव, स्वविषये-ऽप्रवृत्तिमतोऽस्मदादिज्ञानस्य सावरणत्वाद्, असर्वविषयत्वे व्याप्तिज्ञानाभावप्रसङ्गात्, सावरणत्वाभावेऽस्पष्टत्वानुपपत्तेश्च ।**

**तच्च** = केवलज्ञानं च, **भेदरहितम्** = अवान्तरविशेषशून्यम् । एकविधमेवेति यावत् ।

यथा हि कुड्याद्यन्तरितवस्तु चक्षुर्न विभासयतीति कुड्यादिकमावरणं तथा बाह्यमत्र नाऽवरणं-देशकालस्वभावविप्रकृष्टानां दूरादिव्यवस्थितातीतानागतकालीनाण्वादिस्वरूपाणा-मपि पदार्थानां ज्ञानेनाऽवभासनात्, किन्तु कर्मैव ज्ञानेऽवरणम्, यद्वशात् सन्निहितमपि वस्तु नाऽवभासयति, यस्य च क्षयोपशमादत्यन्तक्षयाद् वा व्यवहितमपि ज्ञानं प्रकाशयतीत्याह— **आवरणं चेति** । **अत्र** = ज्ञाने ।

चर्मचक्षुषामस्मादृशां ज्ञानमपि स्वभावतः सर्वविषयकमेव । एवमपि यत्किञ्चित्

---

१. स्व = अवयवः, तदात्मक एव सङ्घातः, तत्र निविष्ट एकदेशः = अवयवः ।

प्रकाशयति किञ्चिच्च न प्रकाशयति तत्र सावरणत्वमेव निबन्धनम् । यदुक्तं—'ज्ञो ज्ञेये कथमज्ञः स्यादसति प्रतिबन्धरि' । तथा च—अस्मदादिज्ञानं-सावरणं-स्वविषयेऽप्रवृत्तिमत्त्वाद्-यन्नैवं तन्नैवम्, यथा केवलज्ञानमित्याह-**स्वविषय** इति ।

अस्मदादिज्ञानमप्यस्पष्टतया सर्वं गृह्णात्येव । तत्काले यत् स्पष्टतया सर्वस्य न ग्रहणं तत्र सावरणत्वमेव निबन्धनम् । अस्पष्टतयाऽप्यस्मदादिज्ञानस्य सर्वविषयकत्वाभावे—'इदं वाच्यं-प्रमेयत्वादि'त्यादौ 'यद्यत् प्रमेयं तत्तद् वाच्य'मित्येवं प्रमेयत्ववाच्यत्वयोः सर्वोपसंहारेण व्याप्तिग्रहणमपि न भवेत्, तथा च तत्प्रभवाऽनुमितिरपि न स्यात् । तथा 'पर्वतो-वह्निमान्-धूमा'दित्यादौ 'यो यो धूमवान् स स वह्निमा'नित्येवं सर्वोपसंहारेण व्याप्तिज्ञानमपि कालान्तरीयदेशान्तरीयधूमवह्न्यादिग्रहणे सत्येव युज्यते, नाऽन्यथेति ज्ञानमात्रस्य सर्वविषयत्वम् । एवमपि यद् न विशेषतः स्वविषये प्रवृत्तिः तत्राऽवरणमेव तन्त्रमित्याह-**असर्वविषयत्वे** इति ।

ज्ञानं हि स्वप्रकाशस्वभावत्वात् स्पष्टमेव, तथापि यत् क्वचिद् विषयेऽस्पष्टम्, तत् परनिबन्धनम्, परं च तत्राऽवरणमेवेत्याह-**सावरणत्वाभाव** इति ।

सिद्धे चैवमावरणस्वरूपे कर्मणि सम्यग्दर्शनादिना[1] तस्याऽत्यन्तक्षये जायमानस्य ज्ञानस्य कैवल्यमपि निरावरणत्वलक्षणं सिद्धिपथमेतीत्याह—

**आवरणस्य च कर्मणो विरोधिना सम्यग्दर्शनादिना विनाशात् सिद्ध्यति कैवल्यम् ।**

योगाभ्यासजनितधर्मविशेषसहकृतमनसा योगिनः सर्वविषयकं ज्ञानं प्रादुरस्ति, तदेव केवलज्ञानमिति **वैशेषिकादयः** प्रलपन्ति । तन्मतमपाकर्तुमाह—

**[2]योगजधर्मानुगृहीतमनोजन्यमेवेदमस्तु—इति केचित्; तन्न, धर्मानुगृहीतेनाऽपि मनसा पञ्चेन्द्रियार्थज्ञानवदस्य जनयितुमशक्यत्वात् ।**

**इदं**=केवलज्ञानम्, **केचिद्**=**वैशेषिका**दयः, वदन्तीति शेषः । **तन्न**=उक्तमतं न समीचीनम्। यो यस्य विषयः तज्ज्ञानमेव तेन जन्यते । नहि रूपज्ञानं चक्षुर्भिन्नेन केनापीन्द्रियेण, किन्तु चक्षुषैव । एवं रसादिज्ञानमपि रसनादीन्द्रियेण । सहकारिकारणं तु स्वविषये एव करणस्य बलमादधाति, न तु स्वाविषये करणप्रवृत्तिमाधातुमलमिति आत्ममात्रापेक्षस्य स्वावरणक्षयसमुत्थस्य केवलज्ञानस्य जनने न योगाभ्यासजनितधर्मविशेषसहकृतस्याऽपि मनसः सामर्थ्यमिति न तादृशमनःप्रभवं तदित्याह—**धर्मानुगृहीतेनाऽपीति** । योगजधर्मसहकृतेनाऽपीत्यर्थः ।

---

१. ज्ञेयहेयोपादेयतत्त्वानां तत्तद्रूपेण ज्ञानं श्रद्धानं च सम्यग्दर्शनम् ।

२. योगजो द्विविधः प्रोक्तो, युक्तयुञ्जानभेदतः ॥ (कारिकावली-६५)

**पञ्चेन्द्रियेति** । यथा च चक्षुरादिजन्यत्वेनाऽभिमतस्य रूपादिज्ञानस्य जनने न मनसः सामर्थ्यम्, यतः तथा सति मनसैव रूपादिज्ञानजननसम्भवात् चक्षुरादिपञ्चेन्द्रियकल्पनवैयर्थ्यमेव प्रसज्येत, तथेत्यर्थः । **अस्य**=केवलज्ञानस्य ।

केवलिनो जिनस्य कवलाहारं [१]**दिगम्बरा** नाऽभ्युपगच्छन्ति–केवलज्ञानस्य ज्ञानान्तराद् यथा सर्वविषयकत्वलक्षणो विशेषः, तथा स्वयोगिनि पुरुषधौरेये कवलाहारं विनाऽपि शरीरधारणसामर्थ्याधानमिति । तथा च ये कवलभोजिनः ते न केवलज्ञानिनः, ये च केवलज्ञानवन्तः ते न कवलभोजिनः इति तन्मतमुपन्यस्य प्रतिक्षिपति–

**कवलभोजिनः कैवल्यं न घटते इति दिक्पटः ।**

**कवलभोजिनः**=कवलाहारकारिणः, **कैवल्यं**=केवलज्ञानवत्त्वम् । एतदुक्तिश्च [२]**श्वेताम्बराणामस्माकं** केवलिनि कवलाहारमभ्युपगच्छतां मतस्य विद्वेषेणेति । **दिक्पटः= दिगम्बरः ।**

**तन्न, आहारपर्याप्त्यसातवेदनीयोदयादिप्रसूतया कवलभुक्त्या कैवल्याविरोधाद्, घातिकर्मणामेव तद्विरोधित्वात् ।**

**तन्न**=उक्तमतं न समीचीनम् । केवलज्ञाने जातेऽपि केवलिनि [३]आहारपर्याप्तिनामकर्मणोऽसातवेदनीय[४]कर्मणश्चोदयादेः कवलभोजनकारणस्याऽस्मदादाविव सद्भावेन कवलाहारस्य तत्र सम्भवात् । न चोक्तकारणप्रसूतस्य कवलाहारस्य केवलज्ञानेन विरोधो, येन तस्मिन् सति स न भवेत् । [५]ज्ञानावरणादिकर्मणामेव केवलज्ञानेन सह विरोध इति तस्मिन् सति

---

**'कवलभोजिनः कैवल्यम्'–**

''जरवाहिदुक्खरहियं आहारणिहारवज्जियं विमलं ।
सिंहा(घा)णखेलसेओ णत्थि दुगंछा य दोसो य ॥'' बोधप्राभृत-३७

''कवलाभ्यवहारजीविनः केवलिनः इत्येवमादिवचनं केवलिनामवर्णवादः ।''

सर्वार्थसि० ६.१३. राजवा०. ६.१३

---

१. वस्त्राणां मोहकारणत्वात् श्रामण्यस्य नग्नत्वं लक्षणमित्यभ्युपगच्छन्तो जैनविशेषाः । दिगेवाऽम्बरं येषां ते दिगम्बरा इति विग्रहः ।

२. नग्नत्वं प्रवर्त्तमानदेशकालमाश्रित्य जिनैर्निषिद्धमिति वस्त्रं धर्त्तव्यम्, किन्तु तत्र मोहो न करणीयः, मोहरहितत्वमेव श्रामण्यमित्यभ्युपगच्छन्तो जिनानुयायिनः । ते श्वेतवस्त्रमेव धरन्तीति श्वेताम्बरा इत्युच्यन्ते ।

३. येनाऽदृष्टविशेषेणाऽऽहारग्रहणपाचनादि भवति तद् अदृष्टमाहारपर्याप्तिकर्मेत्युच्यते । तद् 'नाम'कर्मण उपभेदेष्वन्तर्भवति ।

४. येनाऽदृष्टविशेषेण क्षुधातृष्णावेदनादयोऽनुभूयन्ते तद् असातवेदनीयकर्मेत्युच्यते ।

५. यत् कर्म आत्मनः स्वाभाविकं ज्ञानमावृणोति तद् ज्ञानावरणीयेतिसंज्ञामश्नुते ।

तेषामभाव इत्याह—**आहारेति** ।

यस्य कर्मणो बलादाहारं कर्त्तुं प्रभवति जन्तुः तद् आहारपर्याप्तिनामकर्म, सातं=सुखम्, तद्भिन्नमसातं=दुःखम्, तद्वेदनं=तदुपभोगः, तदनुभवो यस्य कर्मण उदयाद् भवति तद् असात-वेदनीयकर्म, तदुयादिजन्यया **कवलभुक्त्या**=कवलाहारेण समं **कैवल्यस्य**=केवलज्ञानवत्त्वस्य विरोधाभावाद्, एककालावच्छेदेनैकत्राऽप्यात्मनि तयोः सम्भवादित्यर्थः ।

**घातिकर्मणामेवेति** । येन कर्मणाऽऽवेष्टितो=नितरां बद्धो जन्तुर्जगति नरामरतिर्यग्-नरकगतिषु जन्मादिकमनुभवति, तत् कर्म अष्टविधम् । तत्र नामादीनि चत्वारि कर्माणि अघातीनि=आत्मनो ज्ञानदर्शनचारित्रवीर्यरूपगुणानामविघातकानि-ज्ञानादीनां सद्भावकालेऽपि तेषां सद्भावात् । यानि तु ज्ञानावरणीय-दर्शनावरणीय-मोहनीया-ऽन्तरायाख्यानि ज्ञानादिगुणानां विघातकानि तेषामेव **तद्विरोधित्वात्**=कैवल्यविरोधित्वादित्यर्थः ।

ननु आहारपर्याप्त्यसातवेदनीयादिकर्म यद्यपि केवलिनि समस्ति, तथापि केवल-ज्ञानज्योतिषा दग्धरज्जुकल्पं तदिति न स्वकार्यकवलाहारकरणक्षममतो न कवलाहारो भगवत इत्याशङ्कते—

**दग्धरज्जुस्थानीयात् ततो न तदुत्पत्तिरिति चेद्,**

**दग्धेति** । दग्धरज्जुसदृशादित्यर्थः । सादृश्यं च स्वकार्यकरणाक्षमत्वेन । कर्म भावबन्धहेतू रज्जुश्च द्रव्यबन्धहेतुरित्येवं भेदेऽपि सामान्यतो बन्धहेतुत्वं तयोः समानम् । दग्धरज्जोर्यथा न बन्धहेतुत्वं तथा प्रकृतकर्मणोऽपि केवलज्ञानकाले इति भावः । **ततः**= आहारपर्याप्त्यादितः, **न तदुत्पत्तिः**=न कवलभुक्तिजन्म ।

यदि केवलज्ञानकाले सदपि आहारपर्याप्तिकर्म स्वकार्यं न कुर्याद्-दग्धरज्जुकल्प-त्वात्, तर्हि तदानीं दग्धरज्जुकल्पादायुःकर्मणोऽपि श्वासप्रश्वासादिलक्षणप्राणसञ्चारस्वरूप-भवोपग्रहो न भवेदिति केवलज्ञानानन्तरमेव मरणं प्रसज्येतेति समाधत्ते—

**नन्वेवं तादृशादायुषो भवोपग्रहोऽपि न स्यात् ।**

**तादृशात्**=केवलज्ञाने सति दग्धरज्जुकल्पत्वात्, **आयुषो**=जीवनादृष्टस्वरूपायुः-कर्मणः ।

**भवोपग्रहः**=कञ्चित्कालं संसारेऽवस्थानमपि केवलिन औदारिकशरीरे सत्येव । अतः तदन्यथानुपपत्त्याऽपि केवलिनि कवलाहारोऽभ्युपगन्तव्य इत्याह—

**किञ्च, औदारिकशरीरस्थितिः कथं कवलभुक्तिं विना भगवतः स्यात् ?**

**जैनमते** कार्मण-तैजस-वैक्रिय-आहारक-औदारिकभेदेन शरीरं पञ्चविधम् । तत्र-ज्ञानावरणीयाद्यष्टविधकर्मसमूहस्वरूपं कार्मणम् । तत्सहचरितमेव तैजसशरीरम्, यतः शरीरे औष्ण्योपलब्धिः । देवादीनां वैक्रियशरीरम्, यद्बलाद् यथेच्छति तथा शरीरमेषां भवति । आहारकलब्धिमतामाहारकशरीरमल्पकालस्थायि, यच्छरीरमुपादाय देशांतरस्थितकेवलिभगवन्निकटे स्वप्रश्नोत्तरावाप्त्यर्थं तूर्णं गच्छति, ततो झटित्येवाऽऽगत्य तत् शरीरं मुञ्चति । दृश्यमानं चेदं शरीरमौदारिकम्, एतस्य शरीरस्य स्थितिः कवलाहारबलादेवाऽस्मदादीनां दृष्टेति औदारिकशरीरस्थितिं प्रति कवलाहारस्य सामान्यत एव कार्यकारणभावस्य निर्णीतत्वेन कवलाहाररूपकारणं विना केवलिन औदारिकशरीरस्थितिरूपकार्यं कथं स्याद् ? न स्यादेवेत्यर्थः ।

यदि चाऽस्मदादीनामाहारमन्तरेण शरीरधारणे सामर्थ्यविशेषलक्षणवीर्यं नाऽस्तीति कवलाहारापेक्षा, केवली तु भगवाननन्तवीर्य इति वीर्यविशेषबलादेव तदौदारिकशरीरस्थितिः सम्भवतीति न तत्र कवलाहारापेक्षेति भवत्समीहितम्, तर्हि केवलाज्ञानात् पूर्वमपि तस्याऽपरिमितबलत्वमागमे [१]भणितमिति तद्बलात् छद्मस्थावस्थायां[२] केवलज्ञानोत्पत्तितः प्राक्कालीनायामपि कवलाहारः तस्य न स्यादेव—तं विनाऽपि तदीयशरीरस्थितिसम्भवादित्याह—

**अनन्तवीर्यत्वेन तां विना तदुपपत्तौ छद्मस्थावस्थायामप्यपरिमितबलत्वश्रवणाद् भुक्त्यभावः स्यादित्यन्यत्र विस्तरः ।**

**तां विना**=कवलभुक्तिमन्तरेण, **तदुपपत्तौ**=भगवत औदारिकशरीरस्थितिसमभवे ।

इत्थं निरूपितं प्रत्यक्षप्रमाणमुपसंहरति-

**उक्तं प्रत्यक्षम् ।**

## परोक्षप्रमाणेष्वाद्यायाः स्मृतेर्निरूपणम्

अथ परोक्षप्रमाणनिरूपणमधिकरोति—

**अथ परोक्षमुच्यते-अस्पष्टं परोक्षम् ।**

**अस्पष्ट**मिति लक्षणनिर्देशः, **परोक्ष**मिति लक्ष्यनिर्देशः ।

अस्पष्टता च प्रत्यक्षतोऽल्पतरविशेषप्रकाशनम्, अस्पष्टं जानामीत्यनुभवसिद्धो विषयताविशेषो वा । यस्य ज्ञानं स विषयः, तद्विषयकं च ज्ञानम् । विषये विषयता स्वरूप-

१. इन्द्रकोटीरपि तीर्थकृतोऽङ्गुष्ठचालने समर्था न भवतीत्यादिना ।

२. यस्यामवस्थायां केवलज्ञानं आवृतं भवति साऽवस्था छद्मस्थेत्युच्यते ।

सम्बन्धेन वर्त्तते । ज्ञानेन सह विषयगताया विषयताया निरूप्यनिरूपकभावः सम्बन्धः, तत्र विषयता ज्ञाननिरूपिता भवति, ज्ञानं च विषयतानिरूपकं भवति । तथा च निरूपकतासम्बन्धेन अस्पष्टताख्यविषयतावत्त्वम्, अस्पष्टताख्यविषयतानिरूपकत्वं वा परोक्षप्रमाणस्य लक्षणमिति भावः ।

परोक्षप्रमाणं विभजते—

**तच्च स्मरण-प्रत्यभिज्ञान-तर्का-ऽनुमाना-ऽऽगमभेदतः पञ्चप्रकारम् ।**

**तच्च**=परोक्षप्रमाणं च ।

पञ्चसु परोक्षप्रकारेषु प्रथमोद्दिष्टं स्मृतिप्रमाणं निरूपयति—

**अनुभवमात्रजन्यं ज्ञानं स्मरणं, यथा तत् तीर्थकरबिम्बम् ।**

**अनुभवमात्रजन्यं ज्ञान**मिति लक्षणनिर्देशः, **स्मरण**मिति लक्ष्यनिर्देशः । यद् वस्तुनः प्रथमत एव ज्ञानं तद् अनुभवः-प्रत्यक्षं, तर्कः, अनुमितिः, शाब्दबोधश्च । ततः पूर्वकालीनादुक्तस्वभावादनुभवाद् 'अयं घट'इत्याद्याकारकाद् यद् उत्तरकाले 'स घट' इत्याद्याकारकं ज्ञानमनुभूतपदार्थविषयकं प्रादुर्भवति तत्राऽनुभव एव करणम् । अनुभवजन्या वासना च भावना-संस्कारापरनामधेया तत्राऽनुभवस्मरणमध्यकालवर्त्तिनी अनुभवस्य व्यापारतया स्मरणे कारणमिति, करणतयाऽनुभवमात्रजन्यं ज्ञानं भवति स्मरणमिति लक्षणसमन्वयः ।

उक्तलक्षणलक्षितं स्मरणमुदाहरति—**यथे**ति । पूर्वं तीर्थकर्तुर्जिनस्य प्रतिमाऽनुभूता, कालान्तरे कुतश्चित् कारणात् तद्विषयिण्या वासनया 'तत् तीर्थकरबिम्ब'मिति ज्ञानं भवति तद् ज्ञानं स्मरणमित्यर्थः ।

अनुभूतार्थमात्रविषयकत्वाद् अगृहीतग्राहित्वाभावेन स्मृतेर्न प्रामाण्यमिति **मीमांसकादयः**, विकल्परूपत्वाद् न प्रामाण्यमिति **बौद्धाः**, यथार्थानुभवस्यैवाऽन्यानपेक्षस्य प्रमात्वम्, स्मृतेस्तु अनुभवत्वाभावात् स्वप्रमाण्येऽनुभवप्रामाण्यापेक्षणात् स्वातन्त्र्याभावेन न प्रामाण्यमिति **गौतमीया वैशेषिकाश्च** । स्याद्वादिनो **जैनास्तु** स्मृतेः प्रामाण्यमभ्युपगच्छन्तीति तन्मतमाशङ्क्य प्रतिक्षिपति—

**न चेदमप्रमाणं, प्रत्यक्षादिवद् अविसंवादकत्वात् ।**

इदं स्मरणमप्रमाणमिति नाऽऽशङ्कनीयमित्यर्थः । प्रामाण्येऽबाधितार्थविषयकत्वमेव प्रयोजकम्, नाऽगृहीतग्राहित्वानुभवत्वादिकमपि । तच्चाऽविसंवादकत्वात् स्मरणेऽप्यस्तीति प्रत्यक्षादिवत् तदपि प्रमाणमेवेत्याह-**प्रत्यक्षादिवदि**ति । 'आदि'पदादनुमानादिपरिग्रहः ।

**अविसंवादकत्वा**दिति । यया प्रवृत्त्याऽर्थप्राप्तिर्न भवति सा प्रवृत्तिर्विसंवादिनी, तस्या जनकं भ्रमात्मकं ज्ञानं विसंवादकम्, तादृशं यद् न भवति अर्थात् सत्यप्रवृत्तिजनकं ज्ञानमविसंवादकम्, तत्त्वादित्यर्थः । यस्मिन् मन्दिरे पूर्वमनुभूतं यत् तीर्थकरबिम्बम्, स्मृतौ सत्यां तद्देशगमने तत्र तत्तीर्थकरप्राप्तिर्भवतीत्यतो यथार्थप्रवृत्तिजनकत्वात् स्मरणं प्रमाणमेवेत्यर्थः । यथा च कस्यचित् प्रत्यक्षादेरयथार्थप्रवृत्तिजनकत्वेनाऽप्रमाण्येऽप्येतावता न तज्जातीयस्य सर्वस्य प्रत्यक्षादेरप्रामाण्यम्, तथैव कस्यचित् स्मरणस्य विसंवादकस्याऽप्रामाण्येऽपि बोध्यम् ।

ननु स घटोऽस्तीति स्मृतिरुपजायमाना दृश्यते, सा तद्देशकालवृत्तित्वरूपतत्ताविशिष्टघटे वर्त्तमानकालवृत्तित्वं बोधयन्ती न प्रमाणं-स्मृतस्य घटस्य विशेष्यीभूतस्य वर्त्तमानकालवृत्तित्वेऽपि, विशिष्टे[१]ऽपि तस्मिन् विशेषणीभूतायां वा तद्देशकालवृत्तित्वरूपायां तत्तायां वर्त्तमानकालवृत्तित्वस्य बाधादिति बाधितार्थविषयकत्वस्याऽप्रामाण्यनिबन्धनस्य तत्र भावादिति **चिन्तामणिका**रानुयायिनो **नव्यनैयायिकाः** प्रत्यवतिष्ठन्ते–

**अतीततत्तांशे वर्त्तमानत्वविषयत्वादप्रमाणमिदमिति चेद्,**

---

**न्याय-वैशेषिक-साङ्ख्य-योग-मीमांसा-बौद्धा**दिदर्शनानां स्मृतेरप्रमात्वं **जैन**दर्शनस्य पुनस्तस्याः प्रमात्वमभिमतम् । अत एव ग्रन्थकारेण अत्र स्मृत्यप्रमात्वसमर्थनपरां विविधां युक्तिं निरसितुकामेन पूर्वं **चिन्तामणिकारो**पन्यस्ता स्मृत्ययथार्थत्वसमर्थिका युक्तिः समालोचयितुमुपक्रान्ता '**अतीततत्तांशे**' इत्यादिना ।

**चिन्तामणिकारो** हि–"यद्वा स घटः इति स्मृतौ तत्ताविशिष्टस्य वर्त्तमानता भासते ।....तत्र विशेष्यस्य विशेषणस्य वा वर्तमानत्वाभावात् स्मृतिरयथार्थैव" [प्रत्यक्षचि० पृ० ८४५] इत्यादिना ग्रन्थेन 'स घटोऽस्ति' इत्यादिस्मृतौ तद्देशकालवर्तित्वरूपतत्ताविशिष्टे विशेष्यभूते घटे तद्देशकालवर्तित्वरूपे तत्ताविशेषणे वा वर्तमानकालीनास्तित्वावगाहितया तत्र च तथाभूते विशिष्टे विशेषणे वा वर्तमानकालीनास्तित्वस्य बाधात् स्मृतेरयथार्थत्वं दर्शितवान् ।

ग्रन्थकारस्तु **चिन्तामणिकारा**ङ्गीकृतं विशेषणे विशेष्यकालभाननियमं सार्वत्रिकत्वेन अनभ्युपगम्य तन्नियमबलेन **चिन्तामणिकार**समर्थितं स्मृत्ययथार्थत्वमपाकरोति '**सर्वत्र विशेषणे विशेष्यकालभानानियमात्**' इत्यादिना । तथा च ग्रन्थकारमते 'स घटः' इत्यादौ अतीततत्तांशे वर्तमानकालवर्तित्वस्य भानाभावात् एकस्मिन्नेव घटात्मके धर्मिणि अतीततत्तायाः वर्त्तमानकालवर्तित्वस्य च स्वातन्त्र्येणैव भानात् न स्मृतेरयथार्थत्वम् इति भावः ।

अत्रेदमाकूतम्-'चैत्रो धनवान् वर्तते' इत्यादिस्थलीयशाब्दबोधे चैत्राधिकरणकालवर्तित्वस्य धनांशे, 'भुञ्जानाश्शेरते' इत्यादिस्थलीयशाब्दबोधे तु भोजनाधिकरणकालवर्तित्वस्य

---

१. तद्देशकालवृत्तित्वविशिष्टघटे इत्यर्थः ।

इदं=स्मरणम् ।

यत्र विशेषणस्य सुखादेर्विशेष्यकालवृत्तित्वं सुखीत्यादौ—तत्र विशेषणे विशेष्यकालवृत्तित्वस्य भानेऽपि, सर्वत्र विशेषणे विशेष्यकालवृत्तित्वभाने मानाभावाद्, विशेषणे सर्वत्र विशेष्यकालनियमः परेषां निर्युक्तिकत्वाद् नोपादेय इति तत्तांशे वर्त्तमानकालवृत्तित्वमविषयीकृत्याऽपि 'स घट' इति स्मृतिर्भवन्ती न निरोद्धुं शक्येति तस्या अबाधितार्थविषयकत्वात् प्रामाण्यं स्यादेवेति समाधत्ते—

**न, सर्वत्र विशेषणे विशेष्यकालभानानियमात् ।**

वस्तुतः 'स घट' इत्येव स्मरणम्, न तु 'स घटोऽस्ती'ति । तथा च वर्त्तमानकालवृत्तित्वं विशेष्यांशेऽपि स्मृतिर्नाऽवगाहते एवेति कुतः तस्या विशेषणांशे तदवगाहित्ववार्त्ताऽपीति ।

**कुसुमाञ्जलौ** चतुर्थस्तबके **उदयनाचार्येणो**क्तं—

'अव्याप्तेरधिकव्याप्तेरलक्षणमपूर्वदृग् ।
यथार्थानुभवो मानमनपेक्षतयेष्यते ॥' इति । (४.१)

तस्याऽयमर्थः—अपूर्वदृग्=अनधिगतार्थाधिगन्तृ ज्ञानम्, अलक्षणं=प्रमाया लक्षणं न भवति । लक्षणं हि अव्याप्त्यतिव्याप्त्यसम्भवदोषरहितं सद् भवितुमर्हति । तत्र—अव्याप्तिः—लक्ष्यैकदेशे लक्षणस्याऽगमनं, यथा गोः शाबलेयत्वं लक्षणं कृतं चेत् तस्य लक्ष्यैकदेशे बाहुलेये गव्यसत्त्वेनाऽव्याप्तिदोषः । अलक्ष्ये लक्षणगमनमतिव्याप्तिः, यथा गोः शृङ्गित्वम्, तस्य अलक्ष्ये महिषे सत्त्वेनाऽतिव्याप्तिदोषः । लक्ष्यमात्रे लक्षणागमनमसम्भवः, यथा गोरेकशफवत्त्वं, गोमात्रस्य खुरद्वयवत्त्वेन एकखुरवत्त्वस्य गोमात्रे एवाऽभावादसम्भवः ।

**मीमांसको**क्तमपि अनधिगतार्थाधिगन्तृज्ञानत्वं प्रमाया लक्षणं—१. यत्र घटे चक्षुस्सन्निकर्षस्य चिरमवस्थाने 'अयं घटः, अयं घटः' इत्येवं ज्ञानधारा जायते, तत्र धारावाहिकज्ञाने पूर्वपूर्वज्ञानगृहीतस्यैव घटस्योत्तरोत्तरज्ञानेनाऽवगाहनाद्, गृहीतग्राहित्वेनाऽगृहीतग्राहित्वस्याऽभावादव्याप्तेः २. भ्रमे चेदं रजतमिति ज्ञाने पूर्वज्ञानागृहीतस्य शुक्तौ रजतत्वस्य ग्राहित्वादति-

---

शयनांशे भासमानतया क्वचित् विधेयांशे उद्देश्यसमानकालीनत्वस्य क्वचिच्च उद्देश्यतावच्छेदकसमानकालीनत्वस्य भानमिति सार्वत्रिको नियमः **चिन्तामणिकार**स्याभिप्रेतः । परन्तु 'ब्राह्मणः श्रमणः' इत्यादि स्थलीयशाब्दबोधे ब्राह्मणत्वांशे श्रमणाधिकरणवर्तमानकालवर्तित्वस्य श्रमणत्वाधिकरणतत्कालवर्तित्वस्य वा भानाभावात् नोक्तनियमस्य सार्वत्रिकत्वम् किन्तु प्रामाणिकप्रतीतिबलात् यत्र यत्र विधेयांशे उद्देश्यकालीनत्वं उद्देश्यतावच्छेदककालीनत्वं वा भासते तत्र तत्रैव उक्तनियमस्य प्रसरो न तु सर्वत्र इति ग्रन्थकाराभिप्रायः ।

व्याप्तेः—न सम्भवति ।

एवं च यथार्थानुभवः=अबाधितार्थग्राह्यनुभवो, मानं=प्रमा । स्मृतेर्यथार्थत्वेऽपि, 'अनुभवे प्रमाणे सत्येव तज्जन्या स्मृतिः प्रमा, नाऽन्यथे'ति स्वप्रामाण्ये स्वकरणीभूतस्य प्रामाण्यापेक्षणाद् वस्तुगत्या न प्रामाण्यमिति तद्व्यावृत्तये प्रमालक्षणेऽनुभवत्वं निवेश्यते । अनपेक्षतयैव चाऽनुभवो मानमिष्यते इति । ततश्च स्मृतिर्न प्रमाणमित्याशङ्कते—

**अनुभवप्रमात्वपारतन्त्र्यादत्राऽप्रमात्वमिति चेद्,**

**अत्र**=स्मरणे ।

स्वप्रमात्वेऽन्यदीयप्रमात्वनिरपेक्षत्वे सत्येव यदि प्रामाण्यमिष्यते, तदाऽनुमितिरपि प्रमा न भवेत्—साऽपि प्रमात्मकव्याप्तिज्ञानजन्यैव प्रमेति स्वप्रामाण्ये व्याप्तिज्ञानप्रामाण्यापेक्षणादित्यापत्तिमुखेन समाधत्ते—

**न, अनुमितेरपि व्याप्तिज्ञानादिप्रमात्वपारतन्त्र्येणाऽप्रमात्वप्रसङ्गात् ।**

**आदिपदात्** परामर्शपरिग्रहः ।

व्याप्तिज्ञानस्याऽनुमित्युत्पत्तावेवाऽपेक्षा, न त्वनुमितौ विषयप्रतिभासे इति स्वविषयप्रतिभासेऽनुमितेरन्यमुखनिरीक्षकत्वाभावात् प्रामाण्यमिति शङ्कते—

**अनुमितेरुत्पत्तौ परापेक्षा, विषयपरिच्छेदे तु स्वातन्त्र्यमिति चेद्,**

**परापेक्षा**=व्याप्तिज्ञानाद्यपेक्षा ।

तदेतत् प्रकृतेऽपि तुल्यमिति समाधत्ते—

**न, स्मृतेरप्युत्पत्तावेवाऽनुभवसव्यपेक्षत्वात्, स्वविषयपरिच्छेदे तु स्वातन्त्र्यात् ।**

उक्तप्रतिविधानमसहमानः परः शङ्कते—

**अनुभवविषयीकृतभावावभासिन्याः स्मृतेर्विषयपरिच्छेदेऽपि न स्वातन्त्र्यमिति चेत्,**

यद्यनुभवविषयीकृतभावविषयकत्वात् स्मृतेर्न स्वविषयपरिच्छेदे स्वातन्त्र्यम्, तर्हि

---

अन्यदीयप्रमाणत्वनिरपेक्षत्वे सत्येव प्रमात्वस्य प्रमाव्यवहारप्रयोजकतया स्मृतेर्यथार्थत्वेऽपि अनुभवप्रमात्वाधीनप्रमात्वशालितया न प्रमात्वमिति **उदयनाचार्या**दिभिस्समर्थितं (न्यायकु० ४.१) स्मृत्यप्रमात्वमाशङ्कते '**अनुभवप्रमात्वपारतन्त्र्यात्**' इत्यादिना ।

प्रतिबन्ध्या अनुमितेरप्रमात्वापादनेन निराकरोति '**अनुमितेरपि**' इत्यादिना ।

व्याप्तिज्ञानविषयीकृत-व्यापकीभूतसाध्यविषयकत्वादनुमितेरपि न स्वविषयपरिच्छेदे स्वातन्त्र्यमिति साऽपि प्रमा न भवेदिति समाधत्ते—

**तर्हि व्याप्तिज्ञानादिविषयीकृतानर्थान् परिच्छिन्दत्या अनुमितेरपि प्रामाण्यं दूरत एव ।**

ननु 'यो यो धूमवान् स स वह्निमा'निति व्याप्तिज्ञाने सामान्येनैव धूमाधिकरणे सामान्यत एव वह्निर्भासते, अनुमितौ तु विशेषतो धूमाधिकरणे पर्वतरूपपक्षे पर्वतीयो वह्निर्भासते। तथा व्याप्तिज्ञाने वह्निसम्बन्धतया संयोग एव भासते, अनुमितौ तु पक्षतावच्छेदकपर्वतत्वव्यापक-वह्निप्रतियोगिकसंयोगो वह्नेर्भासते—इति न व्याप्तिगृहीतमात्रस्याऽनुमितौ भानमिति विषयपरिच्छेदे स्वातन्त्र्यमस्त्येवाऽनुमितेरिति शङ्कते—

**नैयत्येनाऽभात एवाऽर्थोऽनुमित्या विषयीक्रियते इति चेत्,**

**नैयत्येने**ति । प्रतिनियतपर्वतत्वादिरूपपक्षतावच्छेकरूपेण पक्षतावच्छेदकव्यापक-विधेयप्रतियोगिकसंयोगत्वादिरूपेण चेत्यर्थः । **अभात एव**=व्याप्तिज्ञानेऽप्रतिभात एव, **अर्थः**= पर्वतादिः, **अनुमित्या**=पर्वतो वह्निमानित्याद्यनुमित्या ।

'अयं घट'इत्यनुभवे इदन्तैव भासते, न तु पूर्वकालवृत्तित्वरूपा तत्तेति तद्रूपेणाऽनुभवेऽप्रतिभात एव घटादिरर्थः 'स घट'इति स्मृत्या विषयीक्रियते इति स्मृतेरपि स्वविषय-परिच्छेदे स्वातन्त्र्यं समानमेवेति समाधत्ते—

**तर्हि तत्तयाऽभात एवाऽर्थः स्मृत्या विषयीक्रियते इति तुल्यमिति न किञ्चिदेतत् ।**

**न किञ्चिदेतद**िति । स्मृतेः पारतन्त्र्याद् न प्रामाण्यमिति न समीचीनमित्यर्थः ।

## प्रत्यभिज्ञाननिरूपणम्

प्रत्यभिज्ञानं निरूपयति—

**अनुभवस्मृतिहेतुकं तिर्यगूर्ध्वतासामान्यादिगोचरं सङ्कलनात्मकं ज्ञानं प्रत्यभिज्ञानम् ।**

---

अनुमित्याः स्मृतेर्वैलक्षण्यमुपपादयितुमाह—'**नैयत्येन**' इति । तथा च अनुमितिकारणीभूते व्याप्तिज्ञाने हेतुज्ञाने वा यः पक्षतावच्छेदकरूपो वा तद्व्यापकसाध्यप्रतियोगिकसंसर्गरूपो वा अर्थः अवश्यंतया न भासते सोऽपि अनुमितेर्विषय इति तस्याः स्वविषयपरिच्छेदे स्वातन्त्र्यमिति पूर्वपक्षार्थः ।

तुल्ययुक्त्या समाधत्ते—'**तर्हि**' इत्यादिना । तथा च पूर्वम् अनुभवेन विषयीकृतस्याऽपि अर्थस्य तत्तया अनवगाहनात्, स्मृत्या च अनुभूतस्याऽपि तस्यैव अर्थस्य तत्तया अवगाहनात्, तस्या अपि अनुमितिवत् विषयपरिच्छेदे स्वातन्त्र्यमबाधितमेव इति भावः ।

**प्रत्यभिज्ञान**मिति लक्ष्यनिर्देशः, **सङ्कलनात्मकं ज्ञान**मिति लक्षणनिर्देशः । अनुभव-स्मरणाभ्यां सम्भूय सङ्कलनात्मकमेकं ज्ञानं जन्यते इति **अनुभवस्मृतिहेतुक**मिति कारण-निर्देशः । **तिर्यगूर्ध्वतासामान्यादिगोचर**मिति विषयकथनम् ।

अनुभवस्मरणविषययोः तादात्म्यादिसम्बन्धेन विशेषणविशेष्यभावेनाऽवगाहि ज्ञानं प्रत्यभिज्ञानम् । तच्च 'अयं घट'इत्यादिर्यो वर्त्तमानविषयकोऽनुभवः, 'स घट'इत्यादिकं यत् पूर्वानुभूतार्थस्मरणम्, ताभ्यां जन्यते इत्यनुभवस्मृतिहेतुकम् । किञ्चित् प्रत्यभिज्ञानं तिर्यक्-सामान्यगोचरम्, किञ्चिच्च ऊर्ध्वतासामान्यगोचरम् । **आदि**पदात् सादृश्य-वैलक्षण्य-दूरत्व-समीपत्व-प्रांशुत्व-ह्रस्वत्वादिसनिरूपकधर्माणामुपग्रहः, तेन सादृश्यादिगोचरमपि ज्ञानं प्रत्यभिज्ञानमित्यर्थः । अत्र विभिन्नदेशकालस्थितानां घटादिव्यक्तीनां सदृशाकारपरिणामलक्षणं घटत्वादिसामान्यं तिर्यक्सामान्यम्, कुण्डलकटकादिपूर्वापरपर्यायानुगामिसुवर्णादिद्रव्यं च ऊर्ध्वतासामान्यमिति विवेकः ।

उदाहरति—

**यथा—'तज्जातीय एवाऽयं गोपिण्डः' 'गोसदृशो गवयः', 'स एवाऽयं जिनदत्तः, 'स एवाऽनेनाऽर्थः कथ्यते', 'गोविलक्षणो महिषः', 'इदं तस्माद् दूरम्, 'इदं तस्मात् समीपम्', 'इदं तस्मात् प्रांशु ह्रस्वं वा' इत्यादि ।**

**तज्जातीय एवाऽयं गोपिण्ड** इति तिर्यक्सामान्यावगाहि प्रत्यभिज्ञानम्—एको गोपिण्डः पूर्वमुपलब्धः, अनन्तरं यदाकदापि द्वितीयो गोपिण्डो दृश्यते, तदानीं पूर्वानुभूतां गोव्यक्तिं स्मरतः पुंसः 'तज्जातीय एवाऽयं गोपिण्ड' इति ज्ञानमुपजायते, तच्च ज्ञानं पूर्वानुभूतगो-व्यक्तिगतसमानाकारपरिणामलक्षणगोत्वजातिमत्त्वं पुरोवर्त्तिन्यां गोव्यक्ताववगाहते इति ।

**गोसदृशो गवय** इत्यपि प्रत्यभिज्ञानं गोत्वातिरिक्त-पूर्वानुभूतगोव्यक्तिगतकतिपय-समानाकारलक्षणतिर्यक्सामान्यवत्त्व-प्रयोज्यसादृश्यवत्त्वमेव गवये वर्त्तमानानुभवविषये-ऽवगाहते इति तिर्यक्सामान्यावगाह्येव सत् सादृश्यावगाहि प्रत्यभिज्ञानम् ।

**स एवाऽयं जिनदत्त** इति तु ऊर्ध्वतासामान्यावगाहि प्रत्यभिज्ञानम्, यतो बाल्यावस्था-कलितो जिनदत्तः पूर्वमनुभूतः, स एव युवा पुनरिदानीमनुभवपदवीमुपगतः, ततः पूर्वदृष्टं बालं तं स्मरतः, इदानीं युवानं पश्यतः पुंसः 'स एवाऽयं जिनदत्त'इति ज्ञानं भवति, अवयवोपचया-पचयाभ्यां च न बालयुवशरीरयोरैक्यमिति तच्छरीरद्वयानुगाम्येकजिनदत्तशरीरद्रव्यरूपोर्ध्वता-सामान्यम्, यदवलम्बनेनैक्यावगाह्युक्तज्ञानमिति । अनयैव दिशा 'स एवाऽयं घटः, स एवाऽयं पट' इत्यादिप्रत्यभिज्ञानानामप्यूर्ध्वतासामान्यावगाहित्वं विभावनीयम् ।

**स एवाऽनेनाऽर्थः कथ्यते** इत्यपि, पूर्वपुरुषकथितार्थेन सहैतत्पुरुषकथितार्थस्य [1]जात्याऽभेदे तिर्यक्सामान्यावगाहि, [2]व्यक्त्याऽभेदे तु पर्यायतो भेदस्याऽवश्यंभावत ऊर्ध्वता-सामान्यबलादेवाऽभेद इत्यूर्ध्वतासामान्यावगाहि प्रत्यभिज्ञानमिति ।

'को महिष'इति कस्यचिद् जिज्ञासायां 'यदेतद् गवां कदम्बके गोभ्यो विलक्षणः, स महिष' इति ज्ञानमुत्पद्यते तद् वैलक्षण्यावगाहि प्रत्यभिज्ञानमित्याह—**गोविलक्षणो महिष** इति । अन्यदाऽपि च केवलमहिषव्यक्तिदर्शने गवां च स्मरणे जायमानं 'गोविलक्षणो महिष' इति ज्ञानमनुभवस्मृतिहेतुकत्वात् प्रत्यभिज्ञानमवगन्तव्यम् ।

यदपेक्षया यद् दूरं तस्य स्मरणे सत्येव, दूरस्थवस्तुनोऽनुभवे सति '**इदं तस्माद् दूर**'मितिज्ञानमुत्पद्यते इत्यतोऽनुभवस्मृतिहेतुकत्वात् तत् प्रत्यभिज्ञानमवसेयम् । 'इदं तस्मात् समीप'मित्यादिज्ञानेऽप्युक्तदिशा प्रत्यभिज्ञानता भावनीया ।

यश्च **बौद्धः** प्रत्यभिज्ञानस्य प्रामाण्यं नाऽभ्युपगच्छति, तन्मतं प्रतिक्षेप्तुमुपन्यस्यति—

**तत्तेदन्तारूपस्पष्टास्पष्टाकारभेदाद् नैकं प्रत्यभिज्ञानस्वरूपमस्तीति शाक्यः,**

'सोऽय'मित्यत्र 'स'इत्यनेन तत्तारूपोऽस्पष्टाकारः, 'अय'मित्यनेनेदन्तारूपस्पष्टा-कारश्चाऽवभासते, स्पष्टास्पष्टाकारयोश्च विरोधाद् नैकत्र ज्ञाने सम्भव इति 'स'इति ज्ञानं पृथग् 'अय'मिति ज्ञानं च पृथगिति 'सोऽय'मित्येकज्ञानस्य प्रत्यभिज्ञानतयाऽभिमतस्याऽभावादेव न प्रामाण्यसम्भव इति **बौद्धाभिप्रायः** ।

अनुभूयमानस्याऽपलापो न सम्भवति, यथा तव मते आकाराकारिणोरभेदाद् ज्ञानान्तरं विभिन्नाकारं विभिन्नमेव, अथाऽपि नीलपीतेत्याकारकमेकं चित्रज्ञानमाकारभेदेऽपि स्वी-करणीयमेवेति समाधत्ते—

**तन्न, आकारभेदेऽपि चित्रज्ञानवदेकस्य तस्याऽनुभूयमानत्वात्, स्वसामग्रीप्रभव-स्याऽस्य वस्तुतोऽस्पष्टैकरूपत्वाच्च, इदन्तोल्लेखस्य प्रत्यभिज्ञानिबन्धनत्वात् ।**

**तस्य**='सोऽय'मितिज्ञानस्य । अथवा 'सोऽय'मितिज्ञानमस्पष्टैकरूपमेवेति नाऽऽकार-भेदः, इदन्तोल्लेखश्च स्मृतिस्वरूपव्यावृत्तिकृतं प्रत्यभिज्ञानस्वाभाव्यनिबन्धनमेव । प्रत्यभिज्ञान-सामग्री च अनुभवस्मृतिघटितस्वावरणक्षयोपशमरूपाऽस्पष्टतत्स्वरूपजनिकैवेति न स्पष्टता-सम्भव इत्याह—**स्वसामग्रीति** । **अस्य**=प्रत्यभिज्ञानस्य ।

---

१. द्वे अर्थव्यक्ती, अर्थत्वेन तयोरभेद इत्यभ्युपगमे ।

२. एकैवाऽर्थव्यक्तिरुभयपर्यायानुगतेति विवक्षणे ।

'स'इति स्मरणविषयः 'अय'मिति च प्रत्यक्षविषयः । तदुभयभिन्नं तु नाऽस्त्येव प्रत्यभिज्ञानस्य विषय इति विषयाभावे विषयिणोऽपि ज्ञानस्याऽभाव इति **बौद्धः** शङ्कते–

**विषयाभावान्नेदमस्तीति चेद्,**

**इदं**=प्रत्यभिज्ञानम् ।

पूर्वापरकालवर्त्तिनोः पर्याययोरनुगामि यद् द्रव्यं तद् न स्मरणस्य विषयो, नाऽपि प्रत्यक्षस्य विषय इति तदेव द्रव्यं प्रत्यभिज्ञानस्य विषयः, तद् द्रव्यं चाऽभेदस्वरूपं पूर्वापर-पर्यायविशिष्टं सत् प्रत्यभिज्ञाने भासते इत्यतिरिक्तविषयकत्वाद् भवति प्रत्यभिज्ञानं प्रमाणमिति समाधत्ते–

**न, पूर्वापरविवर्तवर्त्त्येकद्रव्यस्य विशिष्टस्यैतद्विषयत्वात् ।**

**पूर्वापरविवर्तवर्त्ती**=पूर्वापरपर्यायानुगामी । **एतद्विषयत्वात्**=प्रत्यभिज्ञानविषयत्वात् ।

भेदाख्यातिवादी **प्रभाकरस्तु** 'शुक्ताविदं रजत'मित्यादि-विशिष्टज्ञानलक्षण-भ्रमम-पलपन्, सर्वस्य ज्ञानस्य याथार्थ्यमेवोरीकुर्वन्, भ्रमस्थले–'इद'मिति ज्ञानं प्रत्यक्षं 'रजत'मिति ज्ञानं च स्मरणमित्यभ्युपेत्य तयोर्भेदाग्रहादेव विसंवादिप्रवृत्तिरिति मन्यमानः, प्रत्यभि-ज्ञानस्थलेऽपि 'स'इति स्मरणस्य 'अय'मिति प्रत्यक्षस्य विषयेण सहाऽसंसर्गाग्रहादेव प्रत्यभि-ज्ञानकार्यसम्भवात्, स्मरणप्रत्यक्षरूपज्ञानद्वयव्यतिरिक्तं विशिष्टज्ञानरूपं प्रत्यभिज्ञानं नाऽस्त्येवेति प्रलपति । तन्मतमपि प्रत्यभिज्ञानस्य पूर्वापरपर्यायानुगामिद्रव्यविषयकत्वव्यवस्थापनतो निरस्तमित्याह–

**अत एव-अगृहीतासंसर्गकमनुभवस्मृतिरूपं ज्ञानद्वयमेवैतद्-इति निरस्तम्, इत्थं सति विशिष्टज्ञानमात्रोच्छेदापत्तेः ।**

---

**प्राभाकरा** हि सर्वस्याऽपि ज्ञानस्य यथार्थत्वं मन्यमानाः 'शुक्तौ इदं रजतम्' इत्यादि-प्रसिद्धभ्रमस्थलेऽपि स्मृतिप्रत्यक्षरूपे द्वे ज्ञाने तयोश्च विवेकाख्यातिपरपर्यायं भेदाग्रहं कल्पयित्वा सर्वज्ञानयथार्थत्वगोचरं स्वकीयं सिद्धान्तं समर्थयमानाः तुल्ययुक्त्या प्रत्यभिज्ञास्थलेऽपि अगृहीतभेदं स्मृतिप्रत्यक्षरूपं ज्ञानद्वयमेव कल्पयन्ति इति तेषामपि कल्पना अत्र निरास्यत्वेन **'अत एव'** इत्यादिना निर्दिष्टा ।

यदि च सर्वज्ञानयथार्थत्वसिद्धान्तानुरोधेन भ्रमस्थले प्रत्यभिज्ञास्थले च ज्ञानद्वयमेव अभ्युपगम्यते न किञ्चिदेकं ज्ञानम्, तदा विशिष्टज्ञानस्याऽपि अनङ्गीकार एव श्रेयान्, सर्वस्याऽपि हि विशिष्टज्ञानस्य विशेष्यज्ञान-विशेषणज्ञानोभयपूर्वकत्वनियमेन अवश्यक्लृप्ततदुभयज्ञानेनैव अगृहीतभेदमहिम्ना विशिष्टबुद्ध्युपपादने तदुभयज्ञानव्यतिरिक्तस्य तदुत्तरकालवर्तिनो विशिष्टज्ञानस्य कल्पने गौरवाद् इत्यभिप्रायेण **प्राभाकरमतं** दूषयति–**'इत्थं सति'** इत्यादिना ।

**अत एवेति** । पूर्वापरविवर्त्तवर्त्त्येकद्रव्यस्य विशिष्टस्य प्रत्यभिज्ञानविषयत्वादेवेत्यर्थः । अस्य **निरस्तमित्यनेना**ऽन्वयः । **अगृहीतासंसर्गकं**=तत्ताविशिष्टेन सह इदन्ताविशिष्टस्याऽसंसर्गोऽभेदाभावलक्षणो न गृहीतो येन तथाभूतम् । **एतत्**='सोऽय'मिति प्रत्यभिज्ञानम् । विशिष्टज्ञानस्याऽगृहीतासंसर्गकज्ञानद्वयरूपतयोपपादने प्रत्यभिज्ञानवद् 'घटवद् भूतल'मिति ज्ञानानामपि तथैवोपपादनसम्भवाद् विशिष्टज्ञानमात्रमुच्छिद्येतेत्याह-**इत्थं सतीति** । विशिष्टज्ञानरूपस्याऽपि प्रत्यभिज्ञानस्य निरुक्तज्ञानद्वयरूपत्वे सतीत्यर्थः ।

प्रत्यभिज्ञानमिन्द्रियसन्निकर्षजन्यत्वात् प्रत्यक्षमेव, तत्तांशे इन्द्रियसंयुक्तमनस्संयुक्तात्मसमवेतसविषयकरूपो ज्ञानलक्षणालौकिकसन्निकर्ष[१]:, इदमंशे च संयोगादिलक्षण-लौकिकसन्निकर्षः । उद्बुद्धसंस्कारादेव प्रत्यभिज्ञानाभ्युपगमेऽलौकिकसन्निकर्षः संस्काररूपः[२], स्मरणोत्तरं तदभ्युपगमे स्मरणमेवाऽलौकिकसन्निकर्ष[३] इति प्रत्यभिज्ञानं न प्रमाणान्तरमिति **नैयायिक**मतं प्रतिक्षेप्तुमुपन्यस्यति—

**तथापि—अक्षान्वयव्यतिरेकानुविधायित्वात् प्रत्यक्षरूपमेवेदं युक्तम्-इति केचित्,**

**तथापीति** । प्रत्यभिज्ञानस्य विशिष्टरूपत्वेऽपीत्यर्थः । **अक्षेति** । चक्षुरादीन्द्रियसन्निकर्षे सति प्रत्यभिज्ञानोत्पादः, तदभावे प्रत्यभिज्ञानानुत्पाद इत्येवमक्षेण सह प्रत्यभिज्ञानस्याऽन्वयव्यतिरेकयोरनुविधानात् । **इदं**='सोऽयं घट' इत्यादि प्रत्यभिज्ञानम् ।

प्रत्यभिज्ञानस्य साक्षात् 'स' इति स्मरणम् 'अय'मिति च यत् प्रत्यक्षं, ताभ्यां सममेवाऽन्वयव्यतिरेकानुविधानम्, न तु साक्षादिन्द्रियेण सहेति नाऽस्य प्रत्यक्षत्वम्, अनुभवस्मरणहेतुकत्वेन प्रमाणान्तरत्वमेवेति प्रतिक्षिपति—

**तन्न, साक्षादक्षान्वयव्यतिरेकानुविधायित्वस्याऽसिद्धेः, प्रत्यभिज्ञानस्य साक्षात् प्रत्यक्षस्मरणान्वयव्यतिरेकानुविधायित्वेनाऽनुभूयमानत्वाद्, अन्यथा प्रथमव्यक्ति-**

---

प्रत्यभिज्ञानस्य प्रत्यक्षत्वमेव, न तु तद्व्यतिरिक्तज्ञानत्वमिति **नैयायिक**मतमाशङ्कते **'तथापि अक्षान्वय'** इत्यादिना ।

प्रत्यभिज्ञानस्य इन्द्रियसम्बन्धपश्चाद्भावित्वेऽपि न साक्षात् तत्सम्बन्धान्वयव्यतिरेकानुविधानम्, किन्तु साक्षात् प्रत्यक्षस्मरणान्वयव्यतिरेकानुविधानमेव इति प्रत्यभिज्ञानोत्पत्तौ प्रत्यक्ष-

---

१-३. इदमंशे संयोगादिलौकिकसन्निकर्ष इति निश्चप्रचम् । तत्तांशे पक्षत्रयं १. तत्तांशज्ञानात् तत्तांशभानम् २. तत्तांशसंस्कारोद्बोधनात् ३. तत्तांशस्मरणात् । आद्ये इन्द्रियसंयुक्तमनःसंयुक्तात्मसमवेतज्ञानविषयत्व (=ज्ञानलक्षणालौकिकसन्निकर्ष) सम्बन्धः, द्वितीये तृतीये च ज्ञानस्थाने क्रमशः संस्कारं स्मरणं च निवेश्य स एव सम्बन्धो ज्ञेयः ।

**दर्शनकालेऽप्युत्पत्तिप्रसङ्गात् ।**

**अन्यथा**=प्रत्यभिज्ञानस्येन्द्रियजन्यत्वे, **प्रथमव्यक्तिदर्शनकाले**=यत्कालात् पूर्वं यद्व्यक्तेर्दर्शनं नाऽभूदथ च तत्काले तद्व्यक्तेर्दर्शनमजनि, तत्काले एव, **उत्पत्तिप्रसङ्गात्**=प्रत्यभिज्ञानोत्पत्तिप्रसङ्गात् । साक्षादिन्द्रियसन्निकर्षजन्यमेव तद् भवतेष्यते, इन्द्रियसन्निकर्षश्च तदानीमपि समस्त्येव ।

प्रथमदर्शनसमये प्रत्यभिज्ञानोत्पत्तिवारणाय **नैयायिकः** स्वमन्तव्यं प्रकटयति—

**अथ पुनर्दर्शने पूर्वदर्शनाहितसंस्कारप्रबोधोत्पन्नस्मृतिसहायमिन्द्रियं प्रत्यभिज्ञानमुत्पादयतीत्युच्यते,**

प्रथमव्यक्तिदर्शनकाले चैवं सति न प्रत्यभिज्ञानोत्पत्तिप्रसङ्गः । ततः पूर्वं तद्दर्शनस्याऽभावेन तज्जनितसंस्काराभावे तत्प्रबोधस्याऽभावतः तज्जन्यस्मृतेरभावे तद्रूपसहकारिणोऽभावाद् नेन्द्रियं तदानीं प्रत्यभिज्ञानमुत्पादयितुमलमित्यर्थः ।

स्मृतिनिरपेक्षेन्द्रियजन्यत्वमेव प्रत्यक्षत्वे प्रयोजकमिति न स्मृतिरिन्द्रियस्य सहकारिणी। यदि च स्मृतिसहकारेणेन्द्रियस्य प्रत्यक्षजनकत्वमभ्युपगम्येत, तदा मन एव व्याप्तिस्मरणलक्षणं सहकारिणमासाद्य 'पर्वतो वह्निमा'निति ज्ञानं कुर्यादितीन्द्रियजन्यत्वात् तदपि ज्ञानं प्रत्यक्षं भवेदित्यनुमानमपि प्रमाणान्तरं न स्यादिति समाधत्ते—

**तदनुचितम्, प्रत्यक्षस्य स्मृतिनिरपेक्षत्वात् । अन्यथा पर्वते वह्निज्ञानस्याऽपि व्याप्तिस्मरणादिसापेक्षमनसैवोपपत्तौ अनुमानस्याऽप्युच्छेदप्रसङ्गात् ।**

**तदनुचित**मिति । उक्तकल्पनं **नैयायिक**स्य न समीचीनमित्यर्थः । **अन्यथा**=प्रत्यक्षस्य स्मृतिसापेक्षत्वाभ्युपगमे ।

यथा च प्रत्यक्षस्य प्रतीतिः 'साक्षात्करोमी'त्येवंरूपा, ततो विलक्षणा चाऽनुमानस्य 'अनुमिनोमी'त्येवंरूपेति प्रत्यक्षाद् व्यतिरिक्ताऽनुमितिरिष्यते, तथा प्रत्यभिज्ञानस्याऽपि प्रत्यक्ष-

---

स्मरणाभ्याम् इन्द्रियसंसर्गस्य व्यवहितत्वात् साक्षात् तज्जन्यत्वाभावेन प्रत्यभिज्ञानस्य न प्रत्यक्षत्वं कल्पनार्हमित्यभिप्रायेण दूषयति '**तन्न**' इत्यादिना ।

'**अनुमानस्याऽपि**'—अयं भावः—यदि स्मृतिमपेक्ष्य चक्षुरादिबहिरिन्द्रियं 'स एवाऽयं घटः' इत्यादिरूपं प्रत्यक्षजातीयमेव प्रत्यभिज्ञानं जनयेत् तदा तुल्ययुक्त्या व्याप्तिस्मृत्यादिसापेक्षमेव अन्तरिन्द्रियं पक्षे साध्यवत्ताज्ञानं प्रत्यक्षजातीयमेव जनयेत्, तथा च प्रत्यभिज्ञानवद् अनुमितेरपि प्रत्यक्षजातीयताप्रसञ्जनेन सिद्धान्तसम्मतस्य अनुमानप्रमाणपार्थक्यस्य विच्छेदापत्तिः ।

प्रतीतितो विलक्षणैव 'प्रत्यभिजानामी'ति प्रतीतिरिति प्रत्यक्षाद् भिन्नमेव प्रत्यभिज्ञानमभ्युपगन्तव्यमित्याह—

**किञ्च, 'प्रत्यभिजानामि' इति विलक्षणप्रतीतेरप्यतिरिक्तमेतत् ।**

**विलक्षणप्रतीतेरपि**=प्रत्यक्षप्रतीतिविसदृशप्रतीतिबलादपि **अतिरिक्तं**=प्रत्यक्षतो भिन्नम् **एतत्**=प्रत्यभिज्ञानम् ।

यदपि 'सोऽयं घट' इत्यत्र—विशेष्येण घटेन सह चक्षुरिन्द्रियस्य सन्निकर्षात्, 'स' इति तत्तारूपविशेषणस्मरणरूपज्ञाने सति जायमानस्य ज्ञानस्य विशेष्येन्द्रियसन्निकर्षजन्यत्वेन प्रत्यक्षत्वमेव युक्तमिति **नैयायिक**मतम्, तदपि 'प्रत्यभिजानामी'ति विलक्षणप्रतीतितोऽतिरिक्ततया प्रत्यभिज्ञानस्य सिद्धया निरस्तमित्याह—

**एतेन—विशेष्येन्द्रियसन्निकर्षसत्त्वाद् विशेषणज्ञाने सति विशिष्टप्रत्यक्षरूपमेतदुपपद्यते—इति निरस्तम्,**

**एतेने**ति । अस्य **निरस्त**मित्यनेनाऽन्वयः ।

तन्निरासे हेत्वन्तरमप्याह—

**'एतत्सदृशः स' इत्यादौ तदभावात्,**

**तदभावाद्**=विशेष्येन्द्रियसन्निकर्षाभावात् । 'स एवाऽयं घट' इत्यत्र पुरोवर्त्तिनो घटस्य विशेष्यत्वेन तेन सहेन्द्रियसन्निकर्षस्य भावेऽपि, 'एतत्सदृशः स' इत्यादौ सादृश्यरूपविशेषणे प्रतियोगितया 'एतद्'अर्थस्य विशेषणत्वमेव, तच्छब्दार्थस्य तत्ताविशिष्टस्यैव विशेष्यत्वम्, तेन सह नेन्द्रियसन्निकर्ष इति भवदभिमतस्य प्रत्यक्षत्वप्रयोजकस्य विशेषणज्ञानसहकृत-विशेष्येन्द्रियसन्निकर्षजन्यत्वस्य तत्राऽभावाद् न तस्य प्रत्यक्षत्वम्, किन्तु तदतिरिक्तत्वमेवेति तस्य प्रमाणान्तरप्रत्यभिज्ञानत्वव्यवस्थितौ 'सोऽयं घट'इत्यस्याऽपि प्रमाणान्तरप्रत्यभिज्ञानत्वमेवेति ।

---

'स एवाऽयं घटः' इत्यादौ विशेष्यीभूतघटांशे चक्षुरादीन्द्रियसन्निकर्षसत्त्वात् तत्तारूपविशेषणविषयकस्मृतिरूपज्ञानबलेन प्रत्यभिज्ञानं विशिष्टविषयकमेव प्रत्यक्षजातीयं भवितुमर्हतीति **नैयायिक**विशेषमतमाशङ्क्य निराकरोति **'एतेन'** इत्यादिना ।

**'एतत्सदृशः'**—'स एवाऽयं घटः' इत्यादौ विशेष्यांशे इन्द्रियसन्निकर्षसत्त्वेऽपि यत्र न पुरोवर्त्तिनो विशेष्यत्वं यथा 'एतत्सदृशः' इत्यादिस्थले, किन्तु तस्य विशेषणत्वम्, तत्र विशेष्येन्द्रियसन्निकर्षाभावेन विशेषणज्ञानसहकृतविशेष्येन्द्रियसन्निकर्षजन्यत्वस्याऽपि दुष्कल्पत्वात् न विशिष्टप्रत्यक्षजातीयत्वं समुचितमिति भावः ।

किञ्च, 'स' इति स्मृतिः, 'अय'मित्यनुभवः, 'सोऽय'मिति तयोः सङ्कलनमित्येवं क्रमोऽत्राऽनुभूयते, न चैवं प्रत्यक्षे इत्यतोऽपि प्रमाणान्तरत्वमित्याह—

**स्मृत्यनुभवसङ्कलनक्रमस्याऽऽनुभविकत्वाच्चेति दिक् ।**

**बौद्धा**भ्युपगतजगत्क्षणभङ्गुरत्ववादापकरणार्थं सर्वेऽपि स्थैर्यवादिनः प्रत्यभिज्ञानं प्रमाणतयोररीकुर्वन्त्येव । तत्र पूर्वापरकालीनयोरैक्यावगाहित्वेनैव प्रत्यभिज्ञानं स्थैर्यसाधनाय क्षणभङ्गबाधनाय च प्रगल्भमिति पूर्वापरैक्यावगाहिज्ञानस्यैव प्रत्यभिज्ञानत्वं **मीमांसक-नैयायिका**दयोऽभ्युपगच्छन्ति, न तु सादृश्यवैसदृश्यादिज्ञानानामपि । **जैनाः** पुनरनुभवस्मरण-प्रभवानां सादृश्यादिज्ञानानामपि सङ्कलनात्मकत्वाविशेषादेकत्वमात्रविषयकत्वस्य प्रत्यभिज्ञान-त्वेऽतन्त्रत्वात्[१] प्रत्यभिज्ञानत्वमामनन्ति । तत्र सादृश्यज्ञानस्योपमानत्वमेव, न तु प्रत्यभिज्ञान-त्वमिति **भट्ट**मतं कदाग्रहविलसितमेवेत्यावेदयितुमुपन्यस्यति—

**अत्राऽह भाट्टः—नन्वेकत्वज्ञानं प्रत्यभिज्ञानमस्तु, सादृश्यज्ञानं तूपमानमेव—गवये दृष्टे गवि च स्मृते सति सादृश्यज्ञानस्योपमानत्वात्[२] ।**

**तदुक्तं—तस्माद् यत् स्मर्यते तत् स्यात्, सादृश्येन विशेषितम् ।**
**प्रमेयमुपमानस्य, सादृश्यं वा तदन्वितम् ॥**
**प्रत्यक्षेणाऽवबुद्धेऽपि, सादृश्ये गवि च स्मृते ।**
**विशिष्टस्याऽन्यतोऽसिद्धेरुपमानप्रमाणता ॥ इति ।**

**भाट्टः**=**कुमारिलभट्टा**नुयायी । **एकत्वज्ञानं**=पूर्वदृष्टेन सहेदानीमनुभूयमानस्या-ऽभेदावगाहि ज्ञानम् । **सादृश्यज्ञानं तु**='गोसदृशो गवय' इति ज्ञानं यद् भवता प्रत्यभिज्ञान-तयोदाहृतं तत् पुनः । दृष्टे गवये स्मृतायां गवि जायमानस्य सादृश्यज्ञानस्योपमानत्वे **भट्ट**स्य

---

ननु क्लृप्तप्रत्यक्षप्रमाणान्तर्गतत्वेन प्रत्यभिज्ञायाः प्रामाण्यमभ्युपगच्छन्तोऽपि **मीमांसक-नैयायिका**दयः स्थैर्यरूपमेकत्वमेव तस्याः विषयत्वेन मन्यन्ते, न पुन**र्जैना** इव सादृश्य-वैसदृश्य-दूरत्व-समीपत्व-ह्रस्वत्व-दीर्घत्वादिकमपि । ते हि सादृश्यादिप्रमेयप्रतिपत्त्यर्थमुपमानादिप्रमाणा-न्तरमेव प्रत्यभिज्ञाविलक्षणं कल्पयन्ति इति एकत्ववत् सादृश्यवैसदृश्यादेरपि प्रत्यभिज्ञाविषयत्व-समर्थनेन तेषां मतमपासितुं ग्रन्थकारः पूर्वं **भाट्ट**पक्षं उपन्यस्यति '**ननु**' इत्यादिना ।

---

१. एकत्वमात्रविषयकं प्रत्यभिज्ञानमिति नियमाभावात् ।

२. अरण्ये गवयो दृष्टः, ततो गृहस्थस्वकीयगोः स्मृतिर्जाता, तदनन्तरमुभयोः सादृश्यज्ञानाद् 'अनेन सदृशी मदीया गौ'रिति गवयसादृश्यविशिष्टगोस्वरूपविषयकम् 'अनेन गवयेन सादृश्यं मदीयायां गवी'ति गोस्वरूप-विशिष्टगवयसादृश्यविषयकं वा ज्ञानं जायते, सा उपमितिः-इति भट्टमतम् ।

सम्मतिमाह—**तदुक्त**मिति । अयमर्थः-**तस्माद्**=दृष्टाद् गवयाद् **यत्**=पूर्वदृष्टं स्वकीयगोस्वरूपं **स्मर्यते तद्**=गोस्वरूपं **सादृश्येन विशेषितं**=गवयसादृश्यविशिष्टं सद् **उपमानस्य**='अनेन सदृशी मदीया गौ'रित्युपमितेः **प्रमेयं**=विषयः स्यात् । **वा**=अथवा **तदन्वितं**=स्मृत-गोव्यक्तिविशिष्टं **सादृश्यम्**=अनुभूयमानगवयसादृश्यम् **उपमानस्य**='अनेन गवयेन सादृश्यं मदीयायां गवी'त्युपमितेः **प्रमेयं** स्यात् ।

'अनेन सदृशी मदीया गौ'रित्यस्योपमितित्वे 'गोसदृशो गवय' इति ज्ञानं तत्करण-त्वादुपमानम् । 'अनेन सादृश्यं तत्रे'त्यस्योपमितित्वे 'तत्सादृश्यमस्ये'ति ज्ञानं तत्करणत्वादुपमानं बोध्यम् ।

दर्शितोपमितिप्रमेयस्याऽन्यप्रमाणादसिद्धेरुपमानमेव तत्र प्रमाणान्तरमास्थेयमित्याह—**प्रत्यक्षेणे**ति । **प्रत्यक्षेण**='गोसदृशोऽय'मिति प्रत्यक्षेण **अवबुद्धेऽपि**=ज्ञातेऽपि **सादृश्ये**=गवयनिष्ठगोसादृश्ये, **गवि च स्मृते**=स्मरणविषये गवि पुनः, **विशिष्टस्य**=गवयनिरूपित-सादृश्यविशिष्टस्य गोस्वरूपस्य, गवयनिरूपितस्य गोनिष्ठसादृश्यस्य वा **अन्यतोऽसिद्धेः**=उपमानप्रमाणव्यतिरिक्तप्रमाणात् सिद्ध्यभावाद् **उपमानप्रमाणता**=उक्तविशिष्टसिद्धये उपमानस्य प्रत्यक्षादिप्रमाणव्यतिरिक्तप्रमाणताऽऽस्थेयेति ।

यद्यत् सङ्कलनात्मकं ज्ञानं तत् सर्वं प्रत्यभिज्ञानमेवेत्युक्तसादृश्यज्ञानस्याऽपि सङ्कल-नात्मकत्वेन प्रत्यभिज्ञानत्वमेवेति तस्योपमानतया प्रमाणान्तरत्वमननं न युक्तमित्याह—

**तन्न, दृष्टस्य सादृश्यविशिष्टपिण्डस्य स्मृतस्य च गोः सङ्कलनात्मकस्य 'गोसदृशो गवय' इति ज्ञानस्य प्रत्यभिज्ञानताऽनतिक्रमात् । अन्यथा 'गोविसदृशो महिष' इत्यादेरपि सादृश्याविषयकत्वेनोपमानातिरेके प्रमाणसङ्ख्याव्याघातप्रसङ्गात् ।**

**दृष्टस्ये**त्यादि व्यक्तम् । **अन्यथा**=सङ्कलनात्मकस्याऽपि सादृश्यज्ञानस्य प्रत्यभिज्ञानत्व-मनभ्युपगम्य प्रमाणान्तरोपमानरूपत्वाभ्युपगमे । **आदि**पदाद् दूरत्वादिज्ञानस्योपग्रहः । **सादृश्या-विषयकत्वेने**ति । सादृश्यविषयकज्ञानमेव भवतोपमानतयाऽभ्युपगम्यते इति वैसदृश्यादिज्ञानस्य सादृश्याविषयकत्वेनोपमानभिन्नत्वप्राप्तौ, प्रत्यक्षानुमानोपमानशाब्दार्थापत्त्यनुपलब्धिभेदेन प्रमाणस्य षड्विधत्वं यद् भवता **मीमांसके**नाऽभ्युपेयते तस्य व्याघातः प्रसज्येतेत्यर्थः ।

सादृश्यज्ञानस्योपमितिरूपता यद्यपि **नैयायिके**न नाऽभ्युपगम्यते, यत उक्तम् **उदय-नाचार्येण**-

"साधर्म्यमिव वैधर्म्यं, मानमेवं प्रसज्यते ।
अर्थापत्तिरसौ व्यक्तमिति चेत् प्रकृतं न किम् ?" इति; (३.९)

तथापि—

"सम्बन्धस्य परिच्छित्तिः, संज्ञायाः सञ्ज्ञिना सह ।
प्रत्यक्षादेरसाध्यत्वादुपमानफलं विदुः ॥" (३.१०)

इत्यादिनो**दयनाचार्ये**ण 'अयं गवयपदवाच्य' इति 'गवयो गवयपदवाच्य' इति वा ज्ञानस्य, 'गवय'नाम्नो गवयरूपार्थेन सह शक्तिरूपसम्बन्धविषयकस्य, 'गोसदृशोऽय'मिति ज्ञानेन 'गोसदृशो गवय' इत्यतिदेशवाक्यार्थस्मृतिव्यापारकेण जनितस्योपमितित्वमभ्युपगम्यते । तदपि न समीचीनं—तादृशज्ञानस्याऽपि सङ्कलनात्मकत्वेन प्रत्यभिज्ञानत्वस्यैव व्यवस्थिते-रित्याह—

**एतेन—'गोसदृशो गवय' इत्यतिदेशवाक्यार्थज्ञानकरणकं सादृश्यविशिष्टपिण्ड-दर्शनव्यापारकम् 'अयं गवयपदवाच्य' इति सञ्ज्ञासञ्ज्ञिसम्बन्धप्रतिपत्तिरूपमुपमानम्—इति नैयायिकमतमप्यपहस्तितं भवति ।**

**एतेने**त्यस्य **अपहस्तितं भवती**त्यनेनाऽन्वयः । वनं गतस्य पुंसो यत् प्रथमतो गवय-पिण्डदर्शने सति 'गोसदृशोऽय'मिति ज्ञानमुत्पद्यते, तस्योपमितिकरणत्वमवतरणिकायां कतिपय**नैयायिका**भिप्रायमाश्रित्याऽस्माभिरुपदर्शितम्, **'गोसदृशो गवय' इत्यतिदेश-वाक्यार्थज्ञानकरणक**मिति तु **नैयायिकै**कदेशिमतमवलम्ब्य ग्रन्थकृतोक्तम् ।

अत्र आरण्यकं प्रति 'गवयः कीदृ'गिति ग्रामीणस्य 'गवय'शब्दवाच्यमजानानस्य प्रश्नानन्तरं गवयशब्दप्रवृत्तिनिमित्त-गवयत्वोपलक्षक-गोसादृश्यसामानाधिकरण्येन गवयशब्द-वाच्यत्वस्य प्रतिपादकं 'गोसदृशो गवय' इत्यतिदेशवाक्यमारण्यकेन ग्रामीणं प्रत्युक्तम्, तद्वाक्यार्थज्ञानम् 'अयं गवयपदवाच्य' इत्युपमितौ करणम्, वनं गतस्य तु ग्रामीणस्य यद् गवयदर्शने सति 'गोसदृशोऽय'मिति प्रत्यक्षम्, तत् तस्य व्यापारः, अनन्तरम् 'अयं गवयपद-वाच्य' इति ज्ञानमुपमितिः ।

तस्याः स्वरूपं विषयस्वरूपोदर्शनेन स्पष्टयति—**सञ्ज्ञे**ति । **सञ्ज्ञा**=गवयेति नाम, **सञ्ज्ञी**=गवयरूपोऽर्थः, तयोः **सम्बन्धः**='गवयपदाद् गवयो बोद्धव्य' इतीश्वरेच्छारूपसङ्केतः, तस्य **प्रतिपत्तिः**='अयं गवयपदवाच्य' इति 'गवयो गवयपदवाच्य' इति वा, **तद्रूपं**=तदात्मकम्,

---

**नैयायिकास्तु मीमांसक**वत् नोपमानस्य प्रमेयं सादृश्यादिकं मन्यन्ते किन्तु सञ्ज्ञा-सञ्ज्ञिसम्बन्धरूपमेव प्रमेयं तद्विषयत्वेन कल्पयन्ति इति सञ्ज्ञासञ्ज्ञिसम्बन्धस्याऽपि प्रत्यभिज्ञा-विषयत्वसमर्थनेन **नैयायिका**भ्युपगतम् उपमानस्य प्रमाणान्तरत्वं निरसितुं तन्मतमुपन्यस्यति **'एतेन'** इत्यादिना ।

**उपमानम्**=उपमितिरित्यर्थः ।

**एतेने**त्यादिष्टमेव तन्मतनिरासहेतुमुपदर्शयति—

**अनुभूतव्यक्तौ 'गवय'पदवाच्यत्वसङ्कलनात्मकस्याऽस्य प्रत्यभिज्ञानत्वानतिक्रमात् ।**

**अनुभूतव्यक्तौ**=प्रत्यक्षविषयव्यक्तौ । **अस्य**='अयं गवयशब्दवाच्य' इति ज्ञानस्य ।

ननु गवयत्वं प्रवृत्तिनिमित्तीकृत्य 'गवय'पदवाच्यत्वग्रहरूपमिदं ज्ञानमभिमतम्, तत् कथं प्रत्यभिज्ञानसामग्रीतो जायेत ? गवयत्वस्य प्रागननुभूततया, अतिदेशवाक्येन तदवच्छिन्ने गवयपदवाच्यत्वस्याऽप्रतिपादितत्वेन, स्वाविषये[1] तत्राऽतिदेशवाक्यार्थज्ञानेनोक्तज्ञानस्योत्पादनासम्भवात् । अन्यथा गोर्गवयत्वव्यतिरिक्तधर्मावच्छिन्नेऽपि गवयपदवाच्यत्वस्य प्रतिपत्तिर्भवेदित्यत आह—

**प्रत्यभिज्ञानावरणकर्मक्षयोपशमविशेषेण यद्धर्मावच्छेदेनाऽतिदेशवाक्यानूद्यधर्मदर्शनम्, तद्धर्मावच्छेदेनैव पदवाच्यत्वपरिच्छेदोपपत्तेः ।**

अतिदेशवाक्यं 'गोसदृशो गवय' इति । तत्र 'गवय'पदं 'गवय'पदवाच्यपरम्, तद् गोसादृश्यमनूद्य तत्सामानाधिकरण्येन 'गवय'पदवाच्यत्वं विदधातीति तदनूद्यो धर्मो गोसादृश्यम्, तस्य गवयत्वावच्छेदेन दर्शनमिति **प्रत्यभिज्ञानावरणकर्मक्षयोपशमविशेषेण** गवयत्वावच्छेदेनैव गवयपदवाच्यत्वस्य **परिच्छेदोपपत्तेः**=निर्णयात्मकज्ञानसम्भवादित्यर्थः ।

**अत एव 'पयोम्बुभेदी हंसः स्या'दित्यादिवाक्यार्थज्ञानवतां पयोम्बुभेदित्वादिविशिष्टव्यक्तिदर्शने सति 'अयं हंसपदवाच्य' इत्यादिप्रतीतिर्जायमानोपपद्यते ।**

**अत एव**=निरुक्तकार्यकारणभावबलादेव । अस्य **उपपद्यते** इत्यनेन सम्बन्धः । **पयोम्बुभेदी**=क्षीरनीरविवेककर्त्ता, अर्थात् क्षीरनीरयोरन्योन्यमिश्रितयोर्मध्याद् नीरं विहाय क्षीरस्य पानकर्त्ता, **हंसः स्यात्**= हंसपदवाच्यो भवेत् । अन्यत् स्पष्टम् ।

एवमनभ्युपगमे **नैयायिकस्य** स्वाभ्युपगतप्रत्यक्षानुमानोपमानागमाख्यप्रमाणचतुष्टयव्यतिरिक्तान्यपि सूक्ष्मत्वादिग्राहकज्ञानादिलक्षणप्रमाणान्यापतेरन् इत्याह—

**यदि च 'अयं गवयपदवाच्य' इति प्रतीत्यर्थं प्रत्यभिज्ञानारिक्तं प्रमाणमाश्रीयते तदा आमलकादिदर्शनाहितसंस्कारस्य बिल्वादिदर्शनाद् 'अतः तत् सूक्ष्म'मित्यादि-**

---

१. नैयायिकेनोपमितिरूपेणाऽभिमतं संज्ञासंज्ञिसम्बन्धज्ञानं= गवयत्वावच्छिन्ने गवयपदवाच्यत्वज्ञानम् । 'गोसदृशो गवय' इति वाक्यं न गवयत्वाच्छिन्ने गवयपदवाच्यत्वं प्रतिपादयति ।

**प्रतीत्यर्थं प्रमाणान्तरमादरणीयं स्यात् ।**

**अतो**=बिल्वात् **तद्**=आमलकम् । **इत्यादीत्यत्र** आदिपदाद् 'बिल्वादाम्रफलं महद्'- इत्यादिज्ञानानामुपग्रहः ।

ननु 'अतः तत् सूक्ष्म'मित्यादिज्ञानानामलौकिकमानसप्रत्यक्षत्वमेव **नैयायिकैरभ्युप**- गम्यते इति प्रत्यक्षप्रमाणे एवोक्तप्रतीतीनामन्तर्भावाद् न प्रमाणान्तरप्रसङ्ग इत्यत आह-

**मानसत्वे चाऽऽसामुपमानस्याऽपि मानसत्वप्रसङ्गात् ।**

**आसां**=सूक्ष्मत्वादिप्रतीतीनाम् ।

ननूपमानस्य मानसत्वप्रसङ्गस्य ममाऽनिष्टस्याऽऽपत्तौ भवतोऽपि तद् अनिष्टमेवा- ऽऽपतितमित्यत आह-

**'प्रत्यभिजानामी'ति प्रतीत्या प्रत्यभिज्ञानत्वमेवाऽभ्युपेयमिति दिक् ।**

भवेदेतद् यद्युक्तप्रतीतीनामनन्तरमनुव्यवसायत्वेन भवताऽधीतः प्रत्ययः[१], अस्माकं तु स्वसंवेदनरूपतयोक्तप्रतीतिस्वरूप एव प्रत्ययः[२], 'साक्षात्करोमी'त्येवंरूपः स्याद्, न चैवम्, किन्तु 'प्रत्यभिजानामी'त्येवंरूपैवाऽऽसां प्रतीतिरनुभूयते इति तया प्रत्यभिज्ञानत्वमेवाऽऽसाम- भ्युपेयमिति भावः ।

## तर्कनिरूपणम्

तर्कं निरूपयति—

**सकलदेशकालाद्यवच्छेदेन साध्यसाधनभावादिविषय ऊहः तर्कः ।**

अत्र **तर्क** इति लक्ष्यनिर्देशः, **सकले**त्यादि **ऊह** इत्यन्तं लक्षणवचनम् । भूता भविष्यन्तो वर्त्तमानाश्च ये धूमादिवह्न्याद्यधिकरणीभूता[देशाः], ये च तथाविधाः कालाः, **आदिपदाद्** ये च धूमवह्न्यादीनामवान्तरविशेषादयः, तदवच्छेदेन सर्वोपसंहारेणेति यावत् । **साध्यसाधन- भावादी**त्यादिपदाद् वाच्यवाचकभावादेरुपग्रहः, तद्विषयको बोध ऊहापरपर्यायः तर्क इत्यर्थः ।

---

**'आसाम्'**-सूक्ष्मत्व-स्थूलत्व-दूरत्व-समीपत्वादिगोचराणां सङ्कलनात्मिकानां सर्वासां प्रतीतीनामित्यर्थः ।

---

१-२. 'अयं घट' इति चाक्षुषादिज्ञानानन्तरं 'घटं साक्षात्करोमी'त्याद्यनुव्यवसायो भवतीति ज्ञानपरोक्षत्ववादिनो नैयायिकाः । तेषां मते 'अस्मात् तत् सूक्ष्म'मिति प्रतीतेर्मानसत्वे तदनन्तरं 'साक्षात्करोमी'ति प्रत्ययो जायेत । 'अयं घटः, तमहं जानामी'त्येक एव प्रत्ययो भवतीति ज्ञानस्य स्वपरोभयसंवेदनत्वमभ्युपगच्छन्तो जैनाः । तेषां मते 'अस्मात् तत् सूक्ष्मम्, तदहं साक्षात्करोमी'ति प्रत्ययः स्यात् । न चैवं भवतीति भावः ।

विषयविशेषघटितमूर्तिकबोधरूपस्य तर्कस्य प्रदर्शनम्—

**यथा—'यावान् कश्चिद् धूमः स सर्वो वह्नौ सत्येव भवति, वह्निं विना वा न भवति',**

**वह्नौ सत्येव भवती**त्यन्वयव्याप्तिग्रहाकारप्रदर्शनम्, **वह्निं विना वा न भवती**ति व्यतिरेकव्याप्तिग्रहाकारोपदर्शनम्, **यावान् कश्चिद् धूमः स सर्व** इत्युभयत्राऽन्वितम् ।

व्याप्तिग्रहलक्षणं तर्कमुदाहृत्य वाच्यवाचकभावसम्बन्धग्रहलक्षणं तर्कमुदाहरति—

**'घटशब्दमात्रं घटस्य वाचकम्, घटमात्रं घटशब्दवाच्य'**मित्यादि ।

व्याप्तिग्रहणमूहाख्यतर्कप्रमाणेनैव, न तु—प्रत्यक्षप्रमाणेन सहचारदर्शनादिसहकृतेन व्याप्तिग्रहणं वदन्-**नैयायिको** यथार्थवादीत्याह—

**स्वरूपप्रयुक्ताव्यभिचारलक्षणायां व्याप्तौ, भूयोदर्शनसहितान्वयव्यतिरेक-सहकारेणाऽपि प्रत्यक्षस्य तावदविषयत्वादेवाऽप्रवृत्तिः, सुतरां च सकलसाध्यसाधन-व्यक्त्युपसंहारेण तद्ग्रह इति साध्यसाधनदर्शनस्मरणप्रत्यभिज्ञोपजनितः तर्क एव तत्प्रतीतिमाधातुमलम् ।**

**स्वरूपप्रयुक्ता**=कार्यकारणभाव-तादात्म्यान्यतरलक्षणप्रतिबन्धप्रयुक्ता, स्वाभाविकीति यावत् । व्याप्तिर्द्विधा—अनौपाधिकी सोपाधिकी च । यथा धूमे वह्निव्याप्तिरनौपाधिकी । सोपाधिकी तु वह्नौ धूमव्याप्तिः, उपाधिः तत्राऽऽर्द्रेन्धनसंयोगः । साध्यव्यापकत्वे सति साधना-व्यापकत्वमुपाधेर्लक्षणम् । आर्द्रेन्धनसंयोगो हि धूमव्यापकत्वे सति वह्न्यव्यापक इति भवत्युपाधिः, तद्गता च धूमव्याप्तिः तत्सम्बन्धाद् वह्नौ प्रतिभाति । न साऽनुमितिनिबन्धना-

'अन्ये परप्रयुक्तानां, व्याप्तीनामुपजीवकाः ।
तैर्दृष्टैरपि नैवेष्टा व्यापकांशावधारणा ॥' इति ।

स्वरूपप्रयुक्ता कीदृशी व्याप्तिरित्यपेक्षायामाह—**अव्यभिचारे**ति । अव्यभिचारलक्षणा च पञ्चविधा व्याप्तिः-१. साध्याभाववदवृत्तित्व २. साध्यवद्भिन्नसाध्याभाववदवृत्तित्व ३.

---

**'स्वरूपप्रयुक्ता'**—स्वाभाविकाऽव्यभिचाररूपा व्याप्तिरित्यर्थः । तच्छून्यावृत्तित्वरूपो-ऽव्यभिचारो द्विविधः अनौपाधिकः औपाधिकश्च । धूमे वह्निशून्यावृत्तित्वस्य उपाध्यकृतत्वेन अनौपाधिकत्वात् स्वाभाविकत्वम् । वह्नौ तु धूमशून्यावृत्तित्वस्य आर्द्रेन्धनसंयोगरूपोपाधिकृतत्वेन औपाधिकत्वात् न स्वाभाविकत्वम् इति बोध्यम् । स्वाभाविकाव्यभिचारलक्षणैव व्याप्तिरनुमि-त्यौपयिकीत्यभिप्रायेण उक्तम् **'स्वरूपप्रयुक्ताव्यभिचारलक्षणायाम्'** इत्यादि ।

साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्य ४. सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्व ५. साध्यवदन्यावृत्तित्व-भेदात् । इयं च व्याप्तिः केवलान्वयिसाधकानुमानस्याऽलक्ष्यत्व-मभ्युपेत्य । तस्य लक्ष्यत्वे तु हेतुव्यापकसाध्यसामानाधिकरण्यमेव व्याप्तिः, तद्ग्रहस्याऽपि च साध्याभाववद्वृत्तित्वलक्षणव्यभिचारग्रहविरोधित्वमभ्युपेयते । तत्राऽव्यभिचारलक्षणव्याप्ता-वित्यर्थः ।

**भूयोदर्शने**ति । इदं च **मीमांसक**मतमवलम्ब्य । यत्र यत्र धूमस्य दर्शनं तत्र तत्र वह्नेरपि दर्शनम्, तत्सहितौ यौ अन्वयव्यतिरेकौ=साध्यहेतुसामानाधिकरण्य-साध्याभावहेत्वभाव-सामानाधिकरण्ये तत्सहकारेणाऽपीत्यर्थः ।

**प्रत्यक्षस्ये**ति । सन्निकृष्टवर्त्तमानमात्रविषयकस्य प्रत्यक्षस्य, **तावदि**ति वाक्यालङ्कारे । **अविषयत्वादे**वेति । साध्यसाधनमात्रगतायामव्यभिचारलक्षणायां व्याप्तावित्यस्याऽभिसम्बन्धेन विषयत्वाभावादेव, 'यो यस्य ज्ञानस्य विषयः, तत्रैव तज्ज्ञानस्य प्रवृत्ति'रिति नियमात् प्रत्यक्षस्य नाऽव्याभिचारलक्षणव्याप्तौ प्रवृत्तिः ।

यदा चाऽव्यभिचाररूपायामपि तस्यां न प्रवृत्तिः, तदाऽतीतानागतवर्त्तमानसाध्यसाधन-घटिता न प्रत्यक्षस्य वर्त्तमानमात्रविषयकस्य विषय इति न तत्र तस्य प्रवृत्तिरित्याह-**सुतरां चे**ति । केवलाव्यभिचारग्रहणेऽपि यस्य न सामर्थ्यम्, तस्य न सम्भवत्येव सकलसाध्यसाधन-व्यक्त्युपसंहारेण व्याप्तिग्रहणे इति भावः ।

प्रत्यक्षाग्राह्यत्वादेव तन्मूलकानुमानादिग्राह्यत्वमपि न व्याप्तेः, किन्तु **जैना**भिमतोहा-ख्यतर्कप्रमाणग्राह्यत्वमेवेत्यतः तर्कप्रमाणमभ्युपेयमित्याह-**साध्ये**ति । पूर्वं साध्यसाधनयोरेकत्र दर्शनम्, ततो हेतुदर्शने सति पूर्वदृष्टसाध्यसाधनसहचारस्य स्मरणम्, ततो वर्त्तमानदर्शनविषये धूमादिलिङ्गे पूर्वदृष्टवह्न्यादिसहचरितधूमस्य सजातीयत्वप्रतिसन्धानलक्षणप्रत्यभिज्ञानम्, ततः तत्सहचरितात् तर्काख्यज्ञानावरणकर्मक्षयोपशमविशेषाद् जातो 'यत्र यत्र धूमः तत्र तत्राऽग्नि'-रित्याकारकः तर्कः सकलसाध्यसाधनव्यक्त्युपसंहारेण **तत्प्रतीतिं**= व्याप्तिप्रतीतिम्, **आधातुं**= जनयितुम्, **अलं**=समर्थः ।

अव्यभिचारलक्षणव्याप्तेः प्रत्यक्षायोग्यत्वात् प्रत्यक्षेण तद्ग्रहणासम्भवेऽपि, सहचार-नियमलक्षणव्याप्तेः स्वव्यापकसाध्यसामानाधिकरण्यरूपायाः प्रत्यक्षयोग्यत्वात् प्रत्यक्षेण तद्ग्रहणं भविष्यतीति व्यर्थमेव तर्कप्रमाणकल्पनमिति **नैयायिकः** शङ्कते—

**अथ स्वव्यापकसाध्यसामानाधिकरण्यलक्षणाया व्याप्तेर्योग्यत्वाद् भूयोदर्शन-**

**व्यभिचारादर्शनसहकृतेनेन्द्रियेण व्याप्तिग्रहोऽस्तु, सकलसाध्यसाधनव्यक्त्युपसंहारस्याऽपि सामान्यलक्षणप्रत्यासत्त्या सम्भवादिति चेद्;**

**स्वं**=हेतुः-'पर्वतो वह्निमान् धूमा'दित्यत्र धूमः, **तद्व्यापकं साध्यं** वह्निः, **तत्सामानाधिकरण्यं** धूमेऽस्तीति लक्षणसमन्वयः । 'अयोगोलकं धूमवद् वह्ने'रित्यादौ व्यभिचारिणि वह्निहेतौ नेदं लक्षणं समस्ति, यतो व्यापकत्वं=तत्समानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वम्, प्रकृते 'तत्'पदेन वह्निर्धर्त्तव्यः, तत्समानाधिकरणः=तदधिकरणवृत्तिः अत्यन्ताभावो धूमात्यन्ताभावः-तस्य वह्न्यधिकरणेऽयोगोलके वृत्तित्वात्, तत्प्रतियोगितावच्छेदकमेव धूमत्वमिति न वह्निव्यापकं धूमलक्षणसाध्यमिति ।

ननु कालान्तरीयदेशान्तरीयवह्निधूमादिव्यक्तीनां प्रत्यक्षासम्भवात् सकलसाध्यसाधनव्यक्त्युपसंहारेण कथं प्रत्यक्षेण व्याप्तिग्रहणमित्यत आह—**सकले**ति । सामान्यलक्षणप्रत्यासत्त्या=इन्द्रियसम्बद्धविशेष्यक-ज्ञानप्रकारीभूतसामान्यरूपालौकिकसन्निकर्षेण । यदा कश्चिद् धूमः चक्षुःसन्निकृष्टः, ततः तद्विषयकं 'धूम' इति ज्ञानमुत्पद्यते तदा सकलधूमेन सह चक्षुष उक्तसन्निकर्षो वर्त्तते । तथाहि—इन्द्रियसम्बद्धः=चक्षुस्संयुक्तः पुरोवर्त्तिधूमः, तद्विशेष्यकं 'धूम' इति ज्ञानम्, तत्प्रकारीभूतं धूमत्वं सामान्यं सकलधूमे वर्त्तते इति तादृशसन्निकर्षबलात् चक्षुषा सकलधूमालौकिकप्रत्यक्षम् । उक्तदिशा सकलवह्नेरपि प्रत्यक्षमतः सकलोपसंहारेण प्रत्यक्षेण व्याप्तिग्रहणमित्यर्थः ।

ऊहाख्यतर्कमन्तरेण, ज्ञातेनाऽपि धूमत्वादिसामान्येन सकलधूमादिव्यक्तिज्ञानासम्भवात्, तर्कादेव व्याप्तिग्रहणसम्भवे, सामान्यलक्षणाप्रत्यासत्त्यभ्युपगमे मानाभावाद् नोक्तदिशा प्रत्यक्षेण व्याप्तिग्रहणसम्भव इति समाधत्ते—

**न, 'तर्कयामी'त्यनुभवसिद्धेन तर्केणैव सकलसाध्यसाधनव्यक्त्युपसंहारेण व्याप्तिग्रहोपपत्तौ सामान्यलक्षणप्रत्यासत्तिकल्पने प्रमाणाभावात् ।**

तर्क एव नाऽस्ति, कुतः तेन व्याप्तिग्रहोपपत्तिरित्याशङ्कापनोदायाऽऽह—**तर्कयामी**ति ।

---

ननु मा भूद् अव्यभिचारलक्षणा व्याप्तिरयोग्यत्वात् प्रत्यक्षस्य विषयः, किन्तु सामानाधिकरण्यरूपायाः व्याप्तेस्तु योग्यत्वात् प्रत्यक्षविषयत्वं सुशकमेव । सामानाधिकरण्यं व्यक्तिविश्रान्ततया तत्तद्व्यक्तियोग्यत्वे प्रत्यक्षयोग्यमेव इति तत्तद्व्यक्तिग्रहे तत्सामानाधिकरण्यस्याऽपि सुग्रहत्वम् । सकलसाध्यसाधनोपसंहारेण सामानाधिकरण्यज्ञानस्य लौकिकसन्निकर्षजन्यत्वासम्भवेऽपि सामान्यलक्षणाऽलौकिकसन्निकर्षद्वारा सुसम्भवत्वात् तादृशव्याप्तिज्ञानार्थं न प्रमाणान्तरकल्पनमुचितमित्याशयेन **नैयायिकः** शङ्कते '**अथ**' इत्यादिना ।

यथा 'साक्षात्करोमी'त्यनुभवबलात् प्रत्यक्षमुपेयते, यथा वाऽनुमिनोमीत्याद्यनुभवबलादनुमित्यादिरुपेयते, तथैव 'तर्कयामी'त्यनुभवबलात् तद्विषयः तर्कोऽभ्युपेय इत्याशयः ।

**सामान्यलक्षणाग्रन्थे गङ्गेशोपाध्यायेन** समर्थिताऽपि सामान्यलक्षणाप्रत्यासत्तिः **दीधितिकारेण** खण्डितैवेति स्वगोत्रकलहोऽपि **नैयायिका**नां तत्रेति तत्साधकतयोपन्यस्यमानं प्रमाणमाभास एवेत्याशयेनाऽऽह—**प्रमाणाभावा**दिति । सामान्यलक्षणाभ्युपगमपक्षपातिना**मालोकक**ृतां **पक्षधरमिश्राणां**—

"वक्षोजपानकृत् ! काण ! संशये जाग्रति स्फुटम् ।
सामान्यलक्षणा कस्मादकस्मादपलप्यते ?"—

इति वचनं सामान्यलक्षणानभ्युपगन्तारं **दीधितिकारं** प्रतीति किंवदन्त्यपि श्रूयते ।

किञ्च, प्राचीनमते ज्ञायमानं सामान्यं नवीनमते सामान्यज्ञानं सामान्यलक्षणाप्रत्यासत्तिरुपेयते **नैयायिकैः** । तत्र ज्ञाते सामान्ये सामान्यज्ञाने वा सति कुतः तत्प्रत्यासत्त्याऽतीतानागतवर्त्तमानसकलधूमज्ञानं भवतीति प्रश्ने, सकलधूमव्यक्तिषु धूमत्वसामान्यं समवायसम्बन्धेन धूमत्वज्ञानं वा स्वविषयवत्त्वसम्बन्धेनाऽस्तीति, सकलव्यक्तीनां तेन सम्बन्धेन सन्निकृष्टत्वाविशेषाद्, एकस्या व्यक्तेर्भानं नाऽन्यस्या इत्यत्र विनिगमकाभावाच्च सकलव्यक्तीनां भानमिति तैर्वाच्यं भवेत् । तत्र सकलास्वेव धूमव्यक्तिषु धूमत्वसामान्यस्य सम्बन्धो, न कतिपयधूमव्यक्तिमात्रे एवेत्यत्र किं निमित्तमित्येवं पृच्छायाम्, यदि सकलव्यक्तिषु तद् न समवेयाद् न सामान्यमेव भवेदित्यनिष्टापादनप्रसङ्गलब्धसत्ताका सकलधूमव्यक्तिवृत्तित्वमन्तरेणाऽनुपपद्यमानतैव व्याप्तिस्वरूपिणी आश्रयणीया, तज्ज्ञानार्थमूहाख्यतर्कोऽवश्यमभ्युपेय इति धूमवह्निव्याप्त्यवगतये प्रथमत एव सोऽभ्युपेय इत्याह—

**ऊहं विना ज्ञातेन सामान्येनाऽपि सकलव्यक्त्यनुपस्थितेश्च ।**

---

**'प्रमाणाभावात्'—न्यायन**येऽपि सामान्यलक्षणाप्रत्यासत्तिस्वीकारे नैकमत्यम् । तस्याः **चिन्तामणि**कृता **सामान्यलक्षणा**ग्रन्थे समर्थितायाः **दीधितिकृता** तत्रैव निष्प्रयोजनत्वोपपादनेन निरस्तत्वात् ।

**'ऊहं विना'**—ज्ञायमानसामान्यं सामान्यज्ञानं वा सामान्यलक्षणा प्रत्यासत्तिः । तथा च सामान्यमपि सकलव्यक्त्युपस्थापकं तदैव स्याद् यदा व्यक्तिसाकल्यं विना अनुपपद्यमानतया तद् ज्ञायेत । तथा च सकलव्यक्त्युपस्थितये सामान्ये व्यक्तिसाकल्यान्यथानुपपद्यमानताज्ञानमावश्यकम् । सामान्यनिष्ठा तादृश्यनुपपद्यमानता च व्यक्तिसाकल्यव्याप्तिरूपा । सा च 'यदि सामान्यं व्यक्तिसाकल्यव्यभिचारि स्यात् तदा सामान्यमेव न स्यात्' इत्याद्यूहं विना दुर्ज्ञानेति सकल-

वाच्यवाचकभावावगतिरपि तर्केणैव भवतीति व्यवस्थापयति—

**वाच्यवाचकभावोऽपि तर्केणैवाऽवगम्यते, तस्यैव सकलशब्दार्थगोचरत्वात् ।**

**तस्य**=तर्कस्य ।

यथा च वाच्यवाचकभावप्रतीतिर्दृश्यते तथा सा तर्केणैव सम्भविनीत्युपपाद्य दर्शयति—

**प्रयोजकवृद्धोक्तं श्रुत्वा प्रवर्त्तमानस्य प्रयोज्यवृद्धस्य चेष्टामवलोक्य, तत्कारण-ज्ञानजनकतां शब्देऽवधारयतोऽन्त्यावयवश्रवण-पूर्वावयवस्मरणोपजनित-वर्णपद-वाक्यविषयसङ्कलनात्मकप्रत्यभिज्ञानवत आवापोद्वापाभ्यां सकलव्यक्त्युपसंहारेण च वाच्यवाचकभावप्रतीतिदर्शनादिति ।**

**प्रयोजकः**=आज्ञापयिता, स चासौ **वृद्धः**=गृहीतशब्दार्थवाच्यवाचकभावसम्बन्धकः, **तेनोक्तम्**=उच्चरितं 'गामायने'त्यादिवाक्यम्, **श्रुत्वा**=तादृशवाक्यश्रवणानन्तरम्, **प्रवर्त्तमानस्य**=गवानयनगोचरप्रवृत्तिमतः, **प्रयोज्यवृद्धस्य**=आज्ञाकारिणो गृहीतशब्दार्थवाच्यवाचकभाव-सम्बन्धकस्य पुंसः, **चेष्टामवलोक्य**=गवानयनगोचरशरीरक्रियां दृष्टवा, **तत्कारणज्ञान-जनकतां**=प्रयोज्यवृद्धगत-गवानयनानुकूलचेष्टाजनकप्रवृत्तिद्वारकज्ञानस्य[१]='गवानयनं मदिष्ट-साधन'मित्याकारकस्य प्रयोज्यवृद्धज्ञानस्य जनकताम्, **शब्दे**=प्रयोजकवृद्धोच्चरिते 'गामानये'-त्यादिवाक्ये, **अवधारयतः**=अनुमिन्वतः ।

अनुमानप्रयोगश्च—प्रयोज्यवृद्धस्य गवानयनानुकूला चेष्टा-गवायनयनगोचरप्रवृत्तिजन्या-गवानयनानुकूलचेष्टात्वाद्-या यदनुकूलाचेष्टा सा तद्गोचरप्रवृत्तिजन्या, यथा मम भोजनानु-कूलचेष्टा भोजनगोचरप्रवृत्तिजन्येति । सा प्रवृत्तिः-गवानयनविशेष्यकेष्टसाधनत्वप्रकारक-ज्ञानजन्या-गवानयनगोचरप्रवृत्तित्वाद्-या यद्गोचरा प्रवृत्तिः सा तद्विशेष्यकेष्टसाधनत्व-प्रकारकज्ञानजन्या, यथा मम भोजनगोचरप्रवृत्तिः भोजनविशेष्यकेष्टसाधनत्वप्रकारकज्ञान-जन्येति। प्रयोज्यवृद्धस्य गवानयनविशेष्यकेष्टसाधनत्वप्रकारकज्ञानं-प्रयोजकवृद्धोच्चरित-'गामानये'तिवाक्यजन्यं—कारणान्तराभावे सति तदनन्तरं जायमानत्वादिति ।

पुनः कीदृशस्य ?—**अन्त्यावयवश्रवणे**ति । 'गामानये'त्यादिवाक्यस्य योऽन्त्यावयवो-ऽन्त्यपदरूपः तस्य श्रवणम्, तस्य वाक्यस्य यः पूर्वावयवः पूर्वपदरूपः तस्य स्मरणम्, ताभ्यां

---

व्यक्त्युपस्थापनोपयोगिसामान्यज्ञानार्थम् ऊहस्य सामान्यलक्षणापक्षेऽपि अवश्यस्वीकार्यत्वात् तेनैव सर्वत्र व्याप्तिज्ञानकल्पनं समुचितमिति भावः ।

---

१. ज्ञानात् प्रवृत्तिः (आत्मस्था), ततश्च चेष्टा (शरीरस्था) । अतो ज्ञानेन चेष्टया जनने प्रवृत्तिर्द्वारं भवति ।

जनितं यद् वर्णपदवाक्यविषयकसङ्कलनात्मकप्रत्यभिज्ञानं तद्वतः । अत्र पार्श्वस्थबालस्येति द्रष्टव्यम्, तत्र बालपदमगृहीततद्वाक्यघटकपदतदर्थवाच्यवाचकभावसम्बन्धकपुरुषपरम् । एतावता तर्ककारणानां दर्शनस्मरणप्रत्यभिज्ञानानां सम्पत्तिर्दर्शिता । तादृशस्य पुंसः '**वाच्य-वाचकप्रतीतिदर्शना**'दित्यत्र प्रतीतावन्वयः ।

**आवापोद्वापाभ्या**मिति । 'गामानये'त्यादिवाक्ये गामिति स्थाने अश्वमित्यस्य प्रक्षेप आवापः, गामित्यस्याऽपनयनमुद्वापः । एवमानयेत्यस्य स्थाने नय इत्यस्य प्रक्षेप आवापः, आनयेत्यस्याऽपनयनमुद्वापः । यथा—अश्वमानय, गां नयेत्यादि । ताभ्याम् अन्वयव्यतिरेकाभ्यामिति यावत् । पूर्वं गामानयेत्यादि वाक्यस्य गवानयनमिष्टसाधनमिति सामान्यतोऽवधारणम्, न तु गोपदस्य गौरर्थः, द्वितीयाविभक्तेः कर्मत्वमर्थः, आङित्युपसर्गसहितनीधातोरानयनमर्थः, आख्यातस्य चेष्टसाधनत्वमर्थः-इति विशेषतोऽवधारणम् । तादृशावधारणं चाऽऽवापोद्वापाभ्यामेव जायते इत्यर्थः ।

**सकलव्यक्त्युपसंहारेण चे**ति । सकलगवादिरूपार्थ-सकलगोशब्दादि-स्वस्व-शब्दव्यक्त्युपसंहारेण गोशब्दमात्रं गोर्वाचकं गोमात्रं च गोशब्दवाच्यमित्येवंरूपेति यावत् । वाच्यवाचकभावप्रतीतिरत्र तर्कात्मिका ज्ञेया ।

**नैयायिके**न-क्वचिद् वह्निं विनाऽपि धूमो भविष्यति, वह्निविरहिण्यपि धूमः स्याद्-इत्यादिव्यभिचारशङ्कानिवारणाय 'धूमो यदि वह्निव्यभिचारी स्याद् वह्निजन्यो न स्या'दित्यादिरनिष्टप्रसञ्जनरूपः तर्कोऽङ्गीक्रियते । तल्लक्षणं तु व्यापकाभाववत्तया निर्णीते धर्मिणि व्याप्यारोपेण व्यापकारोप[१] इति । तत्राऽऽपाद्यस्य वह्निजन्यत्वाभावस्याऽऽपादकेन वह्निव्यभिचारित्वेन [२]व्याप्तिरपेक्षिता । तादृशव्याप्तिज्ञानस्याऽपि विरोधिनी आपाद्यविरहिण्यप्यापादकसत्त्वशङ्कालक्षणव्यभिचारशङ्का भवन्ती तर्केणैवाऽपरेणोन्मूलनीया । सोऽपि तर्को नाऽन्तरेणाऽऽपाद्यापादकव्याप्तिग्रहम् । तत्राऽपि विरोधिनी शङ्काऽऽपतन्ती तर्केणैव निवर्त्त्येत्येवमनवस्था यथा परमते । **स्याद्वादे** तु व्याप्तिप्रतिपत्तये स्वीकृतोऽयं तर्को नाऽनवस्थया परिभूयते—सम्बन्धप्रतीत्यन्तरमन्तरेण स्वयोग्यतासामर्थ्यादेव साध्यसाधनाविनाभावलक्षणसम्बन्धप्रतीतिमाधातुं समर्थत्वादित्याह—

---

१. वह्निजन्यत्वाभावाभाववति धूमे वह्निव्यभिचारित्वारोपेण वह्निजन्यत्वाभावारोपः ।

२. तर्के व्याप्यारोपरूपापादकेन व्यापक आपाद्यते । पश्चाद् व्यापकस्य निवृत्त्या व्याप्योऽपि निवर्त्तते । अत्र व्याप्यः शङ्कितधर्मो भवति—यथा धूमस्थले वह्निव्यभिचारित्वम् । व्यापको निश्चितहेतुनिष्ठत्वाभाववद्धर्मो भवति—यथा धूमस्थले वह्निजन्यत्वाभावः । परमुक्तप्रक्रियायामुभयोर्धर्मयोर्व्याप्यव्यापकभावोऽपेक्षितः । सोऽपि यदि शङ्कितः तर्हि तदर्थं तर्कान्तरमवतारणीयम् । एवमनवस्था ।

**अयं च तर्कः सम्बन्धप्रतीत्यन्तरनिरपेक्ष एव स्वयोग्यतासामर्थ्यात् सम्बन्धप्रतीतिं जनयतीति नाऽवस्था ।**

**अयम्**=अनन्तरोपवर्णितस्वरूपः ।

निर्विकल्पस्य प्रत्यक्षस्य प्रामाण्यम्, न तु तदनन्तरभाविनो विकल्पस्येत्यभ्युपगच्छन्तो **बौद्धा** विकल्परूपत्वात् तर्कस्य प्रामाण्यं नोररीकृतवन्त इति तन्मतं प्रतिक्षेप्तुमुपन्यस्यति–

**प्रत्यक्षपृष्ठभाविविकल्परूपत्वाद् नाऽयं प्रमाणमिति बौद्धाः,**

**प्रत्यक्षपृष्ठभावी**=प्रत्यक्षोत्तरकालभावी **अयं**=तर्कः ।

प्रत्यक्षानन्तरभाविनो विकल्पस्य यद् न प्रमाणत्वं तत्र गृहीतमात्राध्यवसायित्वमेव प्रयोजकम्, न तु विकल्परूपत्वं–विकल्परूपत्वेऽप्यनुमानस्य प्रमाणतया **बौद्धै**रुपगमात् । अयं च विकल्परूपोऽपि तर्को न प्रत्यक्षगृहीतमात्रग्राही–सर्वोपसंहारेण व्याप्तेः प्रत्यक्षागृहीताया एवाऽनेन ग्रहणादिति समाधत्ते–

**तन्न, प्रत्यक्षपृष्ठभाविनो विकल्पस्याऽपि प्रत्यक्षगृहीतमात्राध्यवसायित्वेन**

---

**'नाऽनवस्था'**–निरस्तशङ्कव्याप्तिज्ञानजननाय अन्तरोदीयमानां व्यभिचारशङ्कां निरसितुमनिष्टापादनं आवश्यकम् । तच्च न व्याप्तिज्ञानं विना सम्भवति इति व्याप्तिज्ञानेऽपि व्याप्तिज्ञानान्तरापेक्षा, तत्रापि तदन्तरापेक्षा एवं क्रमेण एकस्मिन्नेव व्याप्तिज्ञाने कर्तव्येऽनन्तानन्तव्याप्तिज्ञानानामपेक्षणीयतया अनवस्था समापतति इति तन्निरासः योग्यताबलात् ग्रन्थकृता दर्शितः ।

निर्विकल्पस्यैव मुख्यं प्रामाण्यं स्वीकुर्वतां **बौद्धानां** मते विचारात्मकस्य तर्कस्य विकल्परूपत्वेन प्रामाण्यं न सम्भवति इति तेषां मतमाशङ्कते **'प्रत्यक्षपृष्ठभाविविकल्प०'** इत्यादिना ।

**'तन्न'** इत्यादिना विकल्प्य दूषयति । तथाहि–ननु किं तर्कस्य विकल्परूपतया अप्रामाण्यं प्रत्यक्षपृष्ठभावित्वेन तद्गृहीतमात्रग्राहित्वकृतम्, आहोस्वित् तत्पृष्ठभावित्वेऽपि तदगृहीतसामान्यग्राहित्वकृतम् ? तत्र नाऽऽद्यः, प्रत्यक्षगृहीतस्वलक्षणमात्रग्राहित्वेन विकल्पस्य अप्रामाण्येऽपि तस्य सकलोपसंहारेण व्याप्त्यनवगाहितया अस्मदभ्युपगततर्कप्रामाण्यक्षतेरभावात् । न द्वितीयः, प्रत्यक्षागृहीतसामान्यविषयकत्वेऽपि प्रत्यक्षपृष्ठभाविनो विकल्पस्य अनुमानवत् प्रामाण्ये बाधाभावात् । **बौद्धा** अपि अवस्तुभूतसामान्यभासकत्वेन अनुमितेः प्रत्यक्षवत् साक्षात्स्वलक्षणात्मकग्राह्यजन्यत्वाभावेऽपि तस्याः अतद्व्यावृत्तिरूपसामान्यात्मना ज्ञायमानविशेषप्रतिबद्धस्वलक्षणात्मकलिङ्गजन्यतया 'प्रतिबद्धस्वभावस्य तद्धेतुत्वे समं द्वयम्' इत्यादिना प्रामाण्यं समर्थयन्ते । समर्थयन्ते च ते पुनः दृश्यप्राप्ययोरैक्याध्यवसायेन अविसंवादबलात् प्रत्यक्षस्य इव अनुमितेरपि प्राप्यानुमेययोरैक्याध्यवसायरूपाविसंवादबलादेव प्रामाण्यम् । एतदेव च तस्याः व्यवहारतः प्रामाण्यं गीयते ।

**सर्वोपसंहारेण व्याप्तिग्राहकत्वाभावात् । तादृशस्य तस्य सामान्यविषयस्याऽप्यनुमानवत् प्रमाणत्वाद्, अवस्तुनिर्भासेऽपि परम्परया पदार्थप्रतिबन्धेन भवतां व्यवहारतः प्रामाण्य-प्रसिद्धेः ।**

**तादृशस्य**=सर्वोपसंहारेण व्याप्तिग्राहकस्य, **तस्य**=तर्कस्य । **सामान्यविषयस्ये**ति । वस्तुभूतं सामान्यं न **बौद्धा**भ्युपगमे इत्यतोऽवस्तुभूतसामान्यविषयकस्याऽपीत्यर्थः । भवन्मते सामान्यं यद्यपि न वस्तुभूतं तथापि तद्विषयस्याऽनुमानस्य प्रामाण्यं भवतोऽप्यनुमतम्, तथैवाऽस्याऽपि प्रामाण्यं स्यादेवेत्यावेदयितुम् **अनुमानव**दिति दृष्टान्तोद्भावनम् ।

यथा चाऽवस्तुभूतसामान्यविषयकस्याऽप्यनुमानस्य न साक्षाद् वस्तुभूतस्वलक्षणा-त्मकग्राह्यजन्यत्वं प्रत्यक्षवत्, तथापि अतद्व्यावृत्तिलक्षणसामान्यरूपेण ज्ञायमानो यः स्वलक्षणात्मा विशेषः, तेन प्रतिबद्धं यत् स्वलक्षणात्मकं लिङ्गम्, तेन जन्यत्वात् परम्परया स्वलक्षणजन्यत्वं सम्भवत्येव । यथा च व्यवहारतोऽनुमानस्य प्रामाण्यं तथैव तर्कस्याऽपि । व्यवहारतः प्रामाण्यं नाम—अनुमाय प्रवृत्तौ स्वलक्षणं प्राप्यते इति प्रवृत्तिविषयस्वलक्षणा-ऽनुमानविषयसामान्ययोरैक्याध्यवसायादनुमानविषयस्याऽपि प्राप्तिरित्यर्थप्रापकत्वमेव । तच्च तर्केऽपि-तद्विषयस्याऽपि प्राप्यस्वलक्षणेन सहैक्याध्यवसायसम्भवादित्याशयेनाऽऽह-**अवस्तुनिर्भासेऽपि**=तर्के सामान्यस्य भवन्मतेनाऽवस्तुनः सामान्यस्य प्रतिभासनेऽपि, **पर-म्परया**=साध्यसाधनदर्शनविषयस्वलक्षणपरम्पराजन्यत्वतः, **पदार्थप्रतिबन्धेन**=दर्शनविषय-स्वलक्षणात्मकपदार्थसम्बन्धेन, **भवतां**=**बौद्धानां**, **व्यवहारतः प्रामाण्यस्य**=अर्थप्रापकत्व-लक्षण-सांव्यवहारिकप्रामाण्यस्य, प्राप्यविकल्पयोरैक्याध्यवसायतः स्वलक्षणस्य प्राप्तौ तदैक्याध्यवसितस्य विकल्पस्य सामान्यस्याऽपि प्राप्तेः, **प्रसिद्धेः**=सम्भवात् ।

अनुमानेऽपि अनुमेयसामान्यैक्याध्यवसितस्वलक्षणप्रतिबद्धलिङ्गस्वलक्षणजन्यत्व-लक्षणपरम्परया स्वलक्षणप्रतिबन्धेनैव भवतां व्यवहारतः प्रामाण्यप्रसिद्धिः, सा प्रकृतेऽपि तुल्यैवेति यद्यनुमानस्य प्रामाण्ये भवतामनुमतिः, तदा तर्कस्य प्रामाण्ये द्वेषो निर्निबन्धन एवेति भावः ।

**बौद्धा**नां प्रत्यक्षानुपलम्भपञ्चकाद् व्याप्तिग्रहाभ्युपगमस्य मिथ्यात्वं तदभ्युपगमोप-

---

तथा च यथा **बौद्ध**मते अनुमानस्य प्रामाण्यं व्यवहारतो न विरुद्धम् तथा अस्मन्मते तर्क-प्रामाण्यमपि न विरोधास्पदमिति भावः ।

**'अवस्तु०'**—अनुमानस्य वस्तुभूतस्वलक्षणविषयानवगाहित्वेऽपि इत्यर्थः ।

**'परम्परया'**—अनुमीयमानविषयव्याप्तस्वलक्षणात्मकलिङ्गजन्यत्वात् इत्यर्थः ।

दर्शनपुरस्सरमुपदर्शयति—

**यस्तु-अग्निधूमव्यतिरिक्तदेशे प्रथमं धूमस्याऽनुपलम्भ एकः, तदनन्तरमग्नेरुपलम्भः, ततो धूमस्येत्युपलम्भद्वयम्, पश्चादग्नेरनुपलम्भोऽनन्तरं धूमस्याऽनुपलम्भ इति द्वावनुपलम्भाविति प्रत्यक्षानुपलम्भपञ्चकाद् व्याप्तिग्रह-इत्येतेषां सिद्धान्तः । तदुक्तं-**

**"धूमाधीर्वह्निविज्ञानं, धूमज्ञानमधीस्तयोः ।**
**प्रत्यक्षानुपलम्भाभ्यामिति पञ्चभिरन्वयः ॥" इति ।**

**स तु मिथ्या—उपलम्भानुपलम्भस्वभावस्य द्विविधस्याऽपि प्रत्यक्षस्य सन्निहितमात्रविषयतयाऽविचारकतया च देशादिव्यवहितसमस्तपदार्थगोचरत्वायोगात् ।**

**एतेषां**=**बौद्धानाम्** । तत्र तेषां सम्मतिमुपदर्शयति-तदुक्तमिति । **धूमाधीः**= धूमस्याऽनुपलम्भः, **अधीस्तयोः**=वह्निधूमयोः क्रमेणाऽनुपलम्भौ, **अन्वयः**=व्याप्तिग्रहणम् । **स तु मिथ्या**=उक्त**बौद्ध**सिद्धान्तो मिथ्या । तत्र हेतुमाह-**उपलम्भेति** ।

**नैयायिकाः** त्वन्यादृशमेव तर्कमुपेत्य, तस्य प्रमाणसहकारित्वेन प्रमाणानुकूलत्वेन च प्रमाणानुग्राहकत्वमेव, न तु स्वतः प्रामाण्यमित्युपगच्छन्ति । तन्मतमुपदर्श्य प्रतिक्षिपति—

**यत्तु-व्याप्यस्याऽऽहार्यारोपेन व्यापकस्याऽऽहार्यप्रसञ्जनं तर्कः । स च विशेषदर्शनवद् विरोधिशङ्काकालीनप्रमाणमात्रसहकारी, विरोधिशङ्कानिवर्त्तकत्वेन तदनुकूल एव**

---

तर्कस्य न स्वतः प्रामाण्यं किन्तु प्रमाणसहकारितया प्रमाणानुकूलतया वा प्रमाणानुग्राहकत्वमेव इति **नैयायिक**मतमुपन्यस्यति **'यत्तु'** इत्यादिना ।

**'आहार्य्यप्रसञ्जनम्'**—बाधनिश्चयकालीनेच्छाजन्यं प्रत्यक्षं ज्ञानमाहार्यज्ञानम् । पर्वते धूमं स्वीकृत्य वह्निमाशङ्कमानं प्रति यत् 'यदि वह्निर्न स्यात् तर्हि अत्र धूमोऽपि न स्यात्' इत्यनिष्टापादनम्, तद् व्याप्यस्य आहार्यारोपेण व्यापकस्य आहार्यप्रसञ्जनम्, तत्र वह्न्यभावस्य व्याप्यत्वात् धूमाभावस्य च व्यापकत्वात् । धूमाभावाभावरूपधूमवत्तया निर्णीते पर्वते वह्न्यभावरूपव्याप्यारोपेण धूमाभावरूपव्यापकापादनस्य आहार्यज्ञानरूपत्वं सुस्पष्टमेव ।

**'विशेषदर्शनवद्'**—यथा स्थाणुर्वा पुरुषो वा इत्यादिसंशयदशायां एकतरकोटिव्याप्यवत्तारूपविशेषदर्शनम् एकतरकोटिविषयके निर्णये जननीये इन्द्रियं सहकरोति, यथा वा तद् अपरकोटिनिवारकमात्रम्, तथा तर्कोऽपि प्रमाणं सहकरिष्यति विरोधिशङ्कामात्रं वा निवर्त्त्य प्रमाणानुकूलो भविष्यति इत्यर्थः ।

**'विरोधिशङ्का०'**—तर्कस्य प्रमाणानुग्राहकत्वं द्वेधा सम्भवति-विरोधिशङ्काकालीनप्रमाणकार्यकारित्वरूपसहकारित्वेन प्रमाणकार्यप्रतिबन्धकविरोधिशङ्कापसारणमात्रेण वा । तत्र

**वा । न चाऽयं स्वतः प्रमाणम्—इति नैयायिकैरिष्यते;**

आहार्यारोपो बाधनिश्चयकालीनमिच्छाजन्यं तदभाववति तज्ज्ञानम्, स्वविरोधिधर्मितावच्छेदकस्वप्रकारकं[१] ज्ञानं वा । तच्च नियमतो मानसप्रत्यक्षमेव—परोक्षज्ञानस्याऽऽहार्यत्वानभ्युपगमात् । तथा च धूमस्य वह्निजन्यत्वलक्षणबाधनिश्चयकाले, वह्निजन्यत्वाभावव्याप्यस्य वह्निव्यभिचारित्वस्याऽऽहार्यारोपेण 'धूमो यदि वह्निव्यभिचारी स्या'दित्येवं रूपेण, वह्निव्यभिचारित्वव्यापकस्य वह्निजन्यत्वाभावस्याऽऽहार्यप्रसञ्जनं 'वह्निजन्यो न स्या'दित्येवंरूपं तत् तर्क इत्यर्थः ।

**स च**=उक्तलक्षणतर्कश्च । **विशेषदर्शनवदिति** । 'अयं स्थाणुर्न वे'ति विरोधिस्थाणुत्वस्थाणुत्वाभावकोटिसंशयकाले यथा स्थाणुत्वप्रकारकनिश्चयात्मकप्रत्यक्षप्रमाकरणेन्द्रियप्रमाणस्य सहकारि स्थाणुत्वव्याप्यशाखादिमत्त्वनिश्चयलक्षणं विशेषदर्शनम्, न तु स्वातन्त्र्येण प्रमाणम्; तथा तर्कोऽप्ययं व्याप्तिविरोधिव्यभिचारशङ्काकालीनस्य व्याप्तिग्राहकान्वयव्यतिरेकसहचारग्रहलक्षणप्रत्यक्षप्रमाणस्य सहकारी, न तु स्वातन्त्र्येण प्रमाणमित्यर्थः ।

एकधर्मावच्छिन्नकार्यतानिरूपितकारणतावत्त्वलक्षणस्य स्वासमवधानप्रयुक्तफलोपधायकत्वाभाववत्कारणान्तरकत्वलक्षणस्य वा सहकारित्वकल्पनापेक्षया विरोधिशङ्कानिवर्त्तकत्वकल्पने लाघवमभिसन्धायोक्तं-**विरोधिशङ्कानिवर्त्तकत्वेनेति** । व्याप्तिज्ञानविरोधिव्यभिचारशङ्कानिवर्त्तकत्वेनेत्यर्थः । **तदनुकूल एव**=व्याप्तिज्ञानानुकूल एव । **अयम्**= अनन्तरोपदर्शितः तर्कः, **स्वतः**=साक्षात् ।

**तन्न, व्याप्तिग्रहरूपस्य तर्कस्य स्वपरव्यवसायित्वेन स्वतः प्रमाणत्वात् । पराभिमततर्कस्याऽपि क्वचिदेतद्विचाराङ्गतया, विपर्ययपर्यवसायिन आहार्यशङ्का-**

---

प्रथमपक्षमपेक्ष्य द्वितीयपक्षानुसरणे लाघवात् उक्तम् '**विरोधिशङ्कानिवर्त्तकत्वेन**' इत्यादि । सहकारित्वं हि एकधर्मावच्छिन्नकार्यतानिरूपितकारणतावत्त्वम्, यथा—दण्डस्य कुम्भकारसहकारित्वम्, तदसमवधानप्रयुक्तफलोपधायकत्वाभाववत् तत्कत्वं वा, यथा—उत्तेजकमण्यादेः वह्निसहकारित्वम् यथा वा अदृष्टस्य कुम्भकारादिसहकारित्वम् । द्विविधस्याऽपि प्रमाणसहकारित्वस्य तर्के कल्पनमपेक्ष्य विरोधिशङ्कानिवर्तकत्वमात्रकल्पने लाघवात् ।

'**क्वचिदेतत्**'—यत्र व्याप्तिग्रहानन्तरं 'पक्षे हेतुरस्तु साध्यं मास्तु' इति व्यभिचाराशङ्का समुल्लसेत्, तत्र 'यदि पर्वते वह्निर्न स्यात् तदा धूमोऽपि न स्यात्' इति व्याप्यारोपाहितस्य व्यापकारोपस्य **नैयायिका**भिमतस्य तर्कस्य धूमाभावाभाववत्तया वह्न्यभावाभाववत्त्वरूपविपर्ययसाधन-

---

१. यस्मिन् ज्ञाने स्वं (=वह्निमत्त्वादि) प्रकारः, स्वस्य विरोधी धर्मो (=निर्वह्नित्वादि) धर्मितावच्छेदकः, तद् ज्ञानं (=निर्वह्निः पर्वतो वह्निमानित्यादि) आहार्यम् ।

**विघटकतया, स्वातन्त्र्येण शङ्कामात्रविघटकतया वोपयोगात् ।**

**तन्न**=उक्त**नैयायिक**मतं न समीचीनम् । पराभिमतश्च तर्को नाऽस्माभिर्व्याप्तिग्राहक-प्रमाणतयेष्यते, किन्तु सकलदेशकालाद्यवच्छेदेन साध्यसाधनभावादिविषयक ऊह एव तथेष्यते। तस्य च व्याप्तिग्रहरूपस्य स्वपरव्यवसायित्वलक्षणप्रामाण्याक्रान्तत्वेन स्वतः प्रामाण्यं स्यादेवेत्याह—**व्याप्तिग्रहे**ति ।

तत् किं व्याप्यारोपेण व्यापकारोपरूपस्य तर्कस्य **नैयायिका**भिमतस्य निरुपयोगित्व-मेव? नेत्याह—**पराभिमते**ति । **नैयायिका**भिमततर्कस्येत्यर्थः । **क्वचिद्**=यत्र तर्केणा-ऽस्मदभिमतेन व्याप्तिग्रहप्रसङ्गः तत्र । **एतद्विचाराङ्गतया**=तर्केण यद् व्याप्तिसमर्थनात्मा विचारः, तदनुकूलतया ।

कथं तत्राऽऽनुकूल्यमस्त्यस्येत्यपेक्षायामाह—**विपर्यये**ति । अनिष्टापादनरूपस्य तर्कस्य मूलशैथिल्यादिविरहेण[१] तर्काभासताविरहेण विपर्ययपर्यवसानमावश्यकम्, धूमो यदि वह्निव्य-भिचारी स्याद् वह्निजन्यो न स्यादित्यस्य विपर्ययस्तु 'अस्ति वह्निजन्यो धूमः, तस्माद् न वह्निव्यभिचारी' । अनेन विपर्ययेण वह्निव्यभिचारित्वाभावे निश्चिते वह्निव्यभिचारित्वशङ्का व्यवच्छिद्यते । ततश्चाऽनुकूलमेव व्याप्तिग्राहकः तर्कः स्वकार्यसाधनाय प्रभवतीति आहार्यशङ्का-विघटकत्वेन तर्कविचाराङ्गतयोपयोग इति नाऽस्याऽपि निरुपयोगित्वमित्यर्थः ।

यत्र तु व्याप्तिविचारो नाऽधिकृतः, तत्राऽऽहार्यशङ्काऽपि नाऽस्त्येव, अथापि विषय-परिशोधनाय स्वातन्त्र्येण तर्क आद्रियते-यदि वह्निर्न स्याद् धूमोऽपि न स्यादित्यादिः । तत्र वह्निं विनाऽपि धूमस्य या शङ्का, तादृशशङ्काविघटकतया स्वातन्त्र्येणैव पराभिमतस्य तर्कस्यो-पयोगः । अत एवाऽऽत्माश्रयान्योन्याश्रयचक्रकानवस्थालाघवगौरवादयो विषयपरिशोधका बहवः तर्कस्य भेदाः-तेष्वपि स्वं यदि सापेक्षं स्यात् स्वभिन्नं स्यादित्यादिरूपेणाऽनिष्टा-

---

पर्यवसायित्वेन आहार्यशङ्काविघटकतया व्याप्तिनिर्णय एव उपयोगः । यत्र पुनर्व्याप्तिविचारो न प्रस्तुतः न वा तादृशी आहार्यशङ्का तत्र विचारानङ्गत्वेपि स्वातन्त्र्येणैव शङ्कामात्रविघटकतया तादृशस्य तर्कस्य उपयोगित्वम् इति भावः ।

---

१. तर्के दोषत्रयं सम्भवति—१. इष्टापत्तिः-ह्रदो निर्वह्निः स्याद् निर्धूमः स्यादित्यत्र धूमाभावस्य ह्रदे इष्टत्वाद् न विपर्ययपर्यवसानम् । २. मूलशैथिल्यम्—ह्रदो निर्वह्निः स्याद् द्रव्यं न स्यादित्यत्र वह्न्यभावद्रव्यत्वाभाव-योर्व्याप्तिविरहः ३. विपर्यये तर्ककोटिमात्रापर्यवसानं-यदि रूपं चक्षुरितराग्राह्यत्वे सति चक्षुर्ग्राह्यं न स्यात्तर्हि ग्राह्यं न स्यादित्यत्र । एतद्दोषत्रयदुष्टस्तर्कस्तर्काभास इत्युच्यते । तादृशो यो न भवति तस्याऽवश्यं विपर्यये पर्यवसानं भवति । (न्यायसिद्धान्तमुक्तावली—किरणावली टीका, कारिका १३७)

पादनावतारसम्भवादित्याशयेनाऽऽह—**स्वातन्त्र्येणे**ति । **शङ्कामात्रे**ति । इदमत्राऽवच्छेदकमिदं कस्माद् न, इदं च कारणमिदं कस्माद् नेत्यादिशङ्कामात्रेत्यर्थः ।

ननु यदि शङ्कामात्रविघटकतया **नैयायिका**भिमतस्याऽपि तर्कस्योपयोगित्वमुपदर्श्य **नैयायिकं** प्रत्यनुग्रहः **स्याद्वादि**ना भवता क्रियते, तदाऽज्ञाननिवर्त्तकत्वेन तर्कस्य प्रामाण्यं समर्थयमानो **धर्मभूषणो**ऽपि भवताऽनुग्राह्य एव । अन्यथाऽपक्षपाति स्वात्मगतं न स्यादित्यत आह—

**इत्थं चाऽज्ञाननिवर्त्तकत्वेन तर्कस्य प्रामाण्यं धर्मभूषणोक्तं सत्येव तत्र मिथ्याज्ञानरूपे व्यवच्छेद्ये सङ्गच्छते, ज्ञानाभावनिवृत्तिः त्वर्थज्ञातताव्यवहारनिबन्धनस्वव्यवसितिपर्यवसितैव सामान्यतः फलमिति द्रष्टव्यम् ।**

**इत्थम्**=उक्तदिशा परकीयतर्कस्योपयोगित्वसमर्थने । **सत्येव मिथ्याज्ञानरूपे व्यवच्छेद्ये, तत्र** = ज्ञानरूपे तर्के**ऽज्ञाननिवर्त्तकत्वेन तर्कस्य प्रामाण्यं धर्मभूषणोक्तं सङ्गच्छते** इत्यन्वयः । अन्यज्ञानानामपि प्रामाण्यं समारोपलक्षणमिथ्याज्ञानव्यवच्छेदकत्वादेव, तत् तर्कस्याऽपि समस्तीति स्यात् तस्याऽपि प्रामाण्यम् । यदि च मिथ्याज्ञानं व्यवच्छेद्यमस्य नाऽङ्गीक्रियते तदा न भवेदेव प्रामाण्यमिति ।

यद्वा ज्ञानस्य फलमज्ञाननिवृत्तिः, यतश्चाऽर्थे ज्ञातताव्यवहारः, अज्ञानं च ज्ञानाभावः, तन्निवृत्तिर्ज्ञानम्, तच्च स्वसंविदितत्वात् फलम्, स्वव्यवसितित्वेन फलत्वस्य पूर्वं व्यवस्थापितत्वात्। स्वसंविदितं च तर्कज्ञानमपि, तदात्मकफलाव्यभिचारित्वादपि भवति प्रमाणमिति **धर्मभूषणो**ऽपि **स्याद्वादिना**ऽनुगृहीतः स्यादेवेत्याह—**ज्ञानाभावे**ति । **न्यायमते** व्यवसायस्य

---

'**नैयायिका**नुरोधेन यदि शङ्कामात्रविघटकतया तर्कस्य उपयोगित्वं **जैने**नापि स्वीक्रियते तर्हि **धर्मभूषणेन न्यायदीपिकायां** अज्ञाननिवर्तकतया समर्थितं तर्कस्य प्रामाण्यं कथं सङ्गमनीयमित्याशङ्कामपाकर्तुमाह '**इत्थं च**' इति । तथा च अज्ञानपदस्य तत्र मिथ्याज्ञानपरत्वेन मिथ्याज्ञाननिवर्तकत्वं तर्कस्य तत्र **धर्मभूषणा**भिप्रेतत्वेन बोद्धव्यम् इति न कश्चिद्विरोधः ।

ननु यदि व्याप्तिविषयकसंशयात्मकमिथ्याज्ञाननिवर्त्तकतया तर्कस्य प्रामाण्यं समर्थ्यते तर्हि प्रमाणसामान्यफलतया ज्ञानाभावरूपाऽज्ञाननिवृत्तिः **जैना**भिप्रेता तर्कप्रमाणफलत्वेन कथं निर्वहेत् इत्याशङ्कायामाह—'**ज्ञानाभावनिवृत्तिः**' इत्यादि । तथा च **जैनमते** ज्ञानमात्रस्य स्वप्रकाशतया तर्कस्याऽपि स्वप्रकाशत्वेन स्वव्यवसितिपर्यवसायित्वम् । स्वव्यवसितेश्च विषयव्यवसितिगर्भिततया बाह्यविषयज्ञातताव्यवहारप्रयोजकत्वेन विषयाज्ञाननिवृत्तिरूपत्वमिति वस्तुतः स्वव्यवसितेरेव ज्ञानाभावनिवृत्तिरूपतया न तर्कस्याऽपि अज्ञाननिवृत्तिरूपसामान्यफलानुपपत्तिः ।

फलमनुव्यवसायः, तस्मिन् सति ज्ञानलक्षणप्रत्यासत्त्या व्यवसायलक्षणज्ञानस्य विषयतयाऽर्थे प्रतिभासादर्थो ज्ञात इति व्यवहारो भवति, **जैनमते** च व्यवसायज्ञानमेव स्वसंविदितमनुव्यवसायस्थानम्, तदेवाऽर्थे ज्ञातताव्यवहारनिबन्धनत्वात् फलम्, तच्च सर्वस्य ज्ञानस्याऽविशिष्टमित्याशयः ।

## अनुमाननिरूपणम्

अनुमानं निरूपयति–

**साधनात् साध्यविज्ञानमनुमानम् ।**

अत्र **अनुमान**मिति लक्ष्यनिर्देशः, **साधनात् साध्यविज्ञान**मिति लक्षणनिर्देशः । एतच्चाऽनुमानसामान्यलक्षणम्, विशेषलक्षणमग्रे वक्ष्यते ।

स्वार्थपरार्थभेदेनाऽनुमानस्य द्वैविध्यं दर्शयति–

**तद् द्विविधं-स्वार्थं परार्थं च ।**

**तद्**=अनुमानम् ।

**तत्र हेतुग्रहण-सम्बन्धस्मरणकारणकं साध्यविज्ञानं स्वार्थम्, यथा गृहीतधूमस्य स्मृतव्याप्तिकस्य 'पर्वतो वह्निमा'निति ज्ञानम् ।**

**तत्र**=स्वार्थानुमान-परार्थानुमानयोर्मध्ये । **हेतुग्रहण-सम्बन्धस्मरणकारणकं साध्यविज्ञान**मिति लक्षणनिर्देशः, **स्वार्थ**मिति लक्ष्यनिर्देशः । यथा महानसे वह्निधूमयोर्गृहीताविनाभावस्य पुंसः पर्वतसमीपं गतस्य प्रथमं पर्वते धूमस्य ग्रहणं–'पर्वतोऽयं धूमवानि'ति, ततो वह्निधूमयोः पूर्वगृहीतस्य व्याप्तिरूपसम्बन्धस्य स्मरणं-'वह्निव्याप्तो धूम' इत्याकारकं, तदनन्तरं 'पर्वतो वह्निमा'निति ज्ञानं समुत्पद्यते तद् अनुमानम्=अनुमितिः ।

तत्र धूमग्रहणं करणं व्याप्तिस्मरणं व्यापार इत्येवाऽभ्युपेयते, न तु 'वह्निव्याप्यधूमवान् पर्वत' इति परामर्शस्याऽपि तत्र कारणत्वमिष्यते इत्याशयेन तद् उदाहरति-**यथे**ति । अनुमितेः प्राक्काले गृहीतो धूमो येन प्रमात्रा स गृहीतधूमः तस्य, धूमदर्शनलक्षणोद्बोधकवशात् स्मृता व्याप्तिर्वह्निधूमयोर्येन स स्मृतव्याप्तिकः तस्य, 'पर्वतो वह्निमा'निति पर्वतविशेष्यकवह्निप्रकारकं ज्ञानं स्वगताज्ञाननिवृत्तिप्रयोजकत्वात् स्वार्थानुमानमित्यर्थः ।

अत्र अनुमाने हेतुग्रहण-व्याप्तिलक्षणसम्बन्धस्मरणयोर्यत् कारणत्वं तत् समुदितयोरेव, न त्वेकैकस्य । येन पूर्वं व्यातिरनुभूता, इदानीं तु न स्मर्यते, येन च पूर्वं नाऽनुभूतैव व्याप्तिः, तयोः पुंसोर्लिङ्गग्रहेऽप्यनुमानानुदयादिति लिङ्गग्रहणमात्रस्य; यस्य च व्याप्तिस्मरणं समस्ति, लिङ्ग-

ग्रहणं तु तदानीं नाऽस्ति, तस्य व्याप्तिस्मरणे सत्यप्यनुमानानुत्पादादिति व्याप्तिस्मरणमात्रस्य च व्यभिचारेण कारणत्वासम्भवादित्याह—

**अत्र हेतुग्रहण-सम्बन्धस्मरणयोः समुदितयोरेव कारणत्वमवसेयम्, अन्यथा विस्मृताप्रतिपन्नसम्बन्धस्याऽगृहीतलिङ्गकस्य च कस्यचिदनुमानोत्पादप्रसङ्गात् ।**

**एव**कारेणैकैकस्य व्यवच्छेदः । **अन्यथेति**—केवलस्य हेतुग्रहणस्य केवलस्य व्याप्तिस्मरणस्य च कारणत्वाभ्युपगमे । **विस्मृताप्रतिपन्नसम्बन्धस्ये**त्यनेन विस्मृतसम्बन्धस्याऽप्रतिपन्नसम्बन्धस्य च ग्रहणम् । तत्राऽनुमानोत्पादश्च न भवतीत्यत एकैकस्य न कारणत्वमिति भावः ।

स्वार्थानुमानप्रसङ्गे हेतुग्रहणसम्बन्धस्मरणकारणकं साध्यविज्ञानं स्वार्थमित्युक्तम्, तत्र को हेतुरित्याकाङ्क्षायामाह—

**निश्चितान्यथानुपपत्त्येकलक्षणो हेतुः, न तु त्रिलक्षणकादिः ।**

निश्चिता या साध्यं विना हेतोरनुपपत्तिः, सा निश्चितान्यथानुपपत्तिः सैवेका लक्षणं यस्य स **निश्चितान्यथानुपपत्त्येकलक्षणः** । एवं च निश्चितान्यथानुपपत्तिमत्त्वं हेतोर्लक्षणमित्यर्थः । एकलक्षणेत्युक्तेर्व्यवच्छेद्यमाह—**न त्विति** । **आदिपदेन** पञ्चलक्षणकस्योपग्रहः । पक्षसत्त्व-सपक्षसत्त्व-विपक्षासत्त्वैतद्रूपत्रयवत्त्वं त्रिलक्षणकत्वम् । पक्षसत्त्व-सपक्षसत्त्व-विपक्षासत्त्वाऽबाधितत्वा-ऽसत्प्रतिपक्षितत्वेत्येतत्पञ्चरूपोपपन्नत्वं पञ्चलक्षणत्वम् ।

तत्रोक्तत्रिलक्षणको हेतुरिति **बौद्धा** अभ्युपगच्छन्ति । तन्मतं प्रतिक्षेप्तुमुपन्यस्यति—

**तथाहि-त्रिलक्षण एव हेतुरिति बौद्धाः । पक्षधर्मत्वाभावेऽसिद्धत्वव्यवच्छेदस्य, सपक्षे एव सत्त्वाभावे च विरुद्धत्वव्युदासस्य, विपक्षेऽसत्त्वनियमाभावे चाऽनैकान्तिकनिषेधस्याऽसम्भवेनाऽनुमित्यप्रतिरोधानुपपत्तेरिति ।**

**त्रिलक्षण एवे**त्येवकारेण एकलक्षणकस्य पञ्चलक्षणकस्य च-हेतोर्व्यवच्छेदः । उक्तत्रिलक्षणरहितस्य हेत्वाभासस्य सद्धेतुत्वापनोदाय त्रिलक्षणकत्वं हेतोरिष्यते **बौद्धैः** । तत्र त्रिरूपमध्यात् केन कस्य व्यपोह इत्यपेक्षायामाह—**पक्षे**ति । पक्षसत्त्वं पक्षधर्मत्वम्, तद्रूपस्य हेतुलक्षणघटकत्वाभावे 'शब्दोऽनित्यः-चाक्षुषत्वा'दित्यत्र शब्दरूपपक्षेऽसतः चाक्षुषत्वस्य

---

अनुमितिनिरूपितकारणतायां पक्षद्वयं वर्तते—हेतुग्रहण-संबन्धस्मरणयोर्द्वयोरेव समुदितयोः कारणत्वमिति एकः पक्षः, नोक्तयोर्द्वयोः कारणत्वं किन्तु तद्द्वयजन्यस्य एकस्यैव लिङ्गपरामर्शस्य अनुमितिकारणत्वमित्यपरः पक्षः । अत्र ग्रन्थकृता प्रथमं पक्षमाश्रित्योक्तम् '**समुदितयोः**' इति ।

स्वरूपासिद्धस्य, सपक्षे घटादौ सत्त्वेन, विपक्षे शशशृङ्गादावसत्त्वेन, सपक्षसत्त्वविपक्षासत्त्वलक्षणरूपद्वयसद्भावाद्, असिद्धत्वेऽपि हेतुत्वप्राप्तेरसिद्धत्वव्यवच्छेदस्याऽसम्भवेन चाक्षुषत्वहेतुनाऽपि शब्देऽनित्यत्वानुमितिः स्यादिति तत्प्रतिरोधो न भवेदित्यर्थः । **असिद्धत्वव्यवच्छेदस्ये**त्यस्य **असम्भवेने**त्यनेनाऽन्वयः । सपक्षसत्त्वस्य हेतुलक्षणघटकत्वाभावे च विरुद्धस्याऽपि साध्यानुमापकत्वं स्यादित्याह—**सपक्षे एवे**ति । **विरुद्धत्वव्युदासस्ये**त्यस्य **असम्भवेने**त्यनेनाऽन्वयः । विपक्षासत्त्वस्य हेतुलक्षणघटकत्वाभावे व्यभिचारिणो गमकत्वं प्रसज्येतेत्याह—**विपक्ष** इति । अनुमित्यप्रतिरोधेत्यत्र अनुमितिप्रतिरोधेति पाठो युक्तः ।

**बौद्ध**मतं प्रतिक्षिपति—

**तन्न, पक्षधर्मत्वाभावेऽपि-'उदेष्यति शकटं-कृत्तिकोदयाद्, उपरि सविता-भूमेरालोकवत्त्वाद्, अस्ति नभश्चन्द्रो-जलचन्द्राद्'-इत्यनुमानदर्शनात् ।**

अश्विन्यादिनक्षत्राणां पूर्वपूर्वोदये तदव्यवहितोत्तरनक्षत्राणामवश्यमेवोदय-इति नियमबलादेव, कृत्तिकोदयरोहिण्युदययोर्नैककालवृत्तित्वेऽपि, अव्यवहितपूर्वकालीनकृतिकोदयतः तदनन्तरोत्तरकालीनरोहिण्युदयलक्षणसाध्यस्याऽनुमितिर्जायते । तत्र यस्मिन् काले साध्यस्य सत्त्वम्, तस्मिन् काले कृत्तिकोदयलक्षणहेतोः सत्त्वाभावात् पक्षधर्मता नाऽस्ति, तथापि ततोऽनुमितिरुत्पद्यते इति । **शकटं**-रोहिणीनक्षत्रम् ।

विभिन्नकालीनयोः साध्यसाधनभावस्थले पक्षधर्मत्वस्य व्यभिचारमुपदर्श्य विभिन्नदेशस्थयोः साध्यसाधनभावस्थले तमाह—**उपरी**ति । उपरि=ऊर्ध्वदेशे, सविता=सूर्यः । प्रतिबिम्बस्य बिम्बानुमापकत्वं बिम्बमन्तरेण प्रतिबिम्बस्याऽनुपपत्तिलक्षणनियमबलादेवेति तत्रापि पक्षधर्मत्वाभावेऽपि प्रतिबिम्बलक्षणहेतुतो बिम्बलक्षणसाध्यानुमितिर्जायते इत्याह—**अस्ती**ति । नभश्चन्द्रः=आकाशस्थितः चन्द्रो बिम्बात्मा, जलचन्द्रो=जले चन्द्रप्रतिबिम्बनादाभासमानः चन्द्रः ।

आदिपदाद्-अभूत् कृत्तिकोदयः-शकटोदयाद्, वृद्धिमान् समुद्रः-चन्द्रोदयाद्, अयं ब्राह्मणः-पित्रोर्ब्राह्मण्याद्, उपरिदेशेऽभूद् वृष्टिः-अधोदेशे नदीपूरवत्त्वाद्, भविष्यति वृष्टिः-साण्डपिपीलिकोर्ध्वसञ्चाराद्-इत्यादेरुपग्रहः ।

पक्षधर्मत्वस्य साध्यगमकत्वाङ्गत्वं भट्टस्याऽपि न सम्मतम् ।

तदुक्तं—"पित्रोश्च ब्राह्मणत्वेन, पुत्रब्राह्मणतानुमा ।
सर्वलोकप्रसिद्धा न, पक्षधर्ममपेक्षते ॥

नदीपूरोऽप्यधोदेशे, दृष्टः सन्नुपरिस्थिताम् ।
नियम्यो[१] गमयत्येव, वृत्तां वृष्टिं नियामिकाम् ॥'' इति ।

ननु कृत्तिकोदयकालरोहिण्युदयकालद्वयव्यापकस्थूलकाल एव कृत्तिकोदयेन शकटोदयानुमाने पक्षीकरणीयः, तत्र साध्यहेत्वोरुभयोरप्यस्त्येव सद्भावः । एवं सर्वकालवर्तिन्याकाशात्मकदेशे तयोरस्ति सद्भाव इत्याकाशं पक्षीकृत्याऽपि पक्षधर्मता सुसम्पाद्येति पराकूतमाशङ्क्य प्रतिक्षिपति—

**न चाऽत्रापि 'कालाकाशादिकं भविष्यच्छकटोदयादिमत् कृत्तिकोदयादिमत्त्वाद्' इत्येवं पक्षधर्मत्वोपपत्तिरिति वाच्यम्, अननुभूयमानधर्मिविषयत्वेनेत्थं पक्षधर्मत्वोपपादने जगद्धर्म्यपेक्षया काककार्ष्ण्येन प्रासादधावल्यस्याऽपि साधनोपपत्तेः ।**

**अत्रापीत्यस्य वाच्यमित्यनेनाऽन्वयः** । **अत्रापि**=उदेष्यति शकटं कृत्तिकोदयादित्यादावपि । उदेष्यति शकटमित्याद्यनुमाने धर्मितया विषयत्वं कालाकाशादेर्नाऽनुभूयते इति न तस्य पक्षत्वम् । अननुभूयमानस्याऽपि पक्षतया विषयत्वाभ्युपगमे तु 'प्रासादधावल्यमस्ति काककार्ष्ण्या'दित्यप्यनुमानं भवेत्—जगद्रूपपक्षे प्रासादधावल्यकाककार्ष्ण्ययोः सद्भावादित्याह—**अननुभूयमानेति** । **इत्थं**=कालाकाशादिकं गृहीत्वा ।

ननु पक्षः साध्यं चेति द्वयं भासते । तत्र हेतोर्यद् व्याप्तिरूपं बलम्, तद्बलाद् व्यापकस्य साध्यस्य भानम्, यच्च पक्षधर्मतारूपं बलम्, तद्बलाद् धर्मिणः पक्षस्य भानमिति व्याप्तिवत् पक्षधर्मताऽपि हेतोरवश्यमभ्युपेया । हेतुबलमन्तरेणैव धर्मिणोऽनुमितौ भाने, नियतस्यैव धर्मिणो भानमिति नियामकाभावाद् न स्यादिति नियतधर्मिभानान्यथानुपपत्त्या पक्षधर्मताऽवश्यमुपेयेत्याशयेन पर आह—

**ननु यद्येवं पक्षधर्मताऽनुमितौ नाऽङ्गम्, तदा कथं तत्र पक्षभाननियम इति चेत्,**

**तत्र**=अनुमितौ ।

पक्षधर्मत्वस्याऽनङ्गत्वेऽपि, यद्धर्म्यवच्छेदेन हेतोः साध्यं विनाऽनुपपत्तिः प्रतिसन्धीयते, यद्धर्मिणि हेतोर्ग्रहणं वा साध्यानुमितिं जनयितुमलम्, तस्य धर्मिणोऽनुमितौ धर्मितया भानमित्येवं प्रतिनियतधर्मिभाननिर्वाहादिति ग्रन्थकृदाह—

**क्वचिदन्यथानुपपत्त्यवच्छेदकतया ग्रहणात् पक्षभानम्, यथा—नभश्चन्द्रास्तित्वं विना जलचन्द्रोऽनुपपन्न इत्यत्र । क्वचिच्च हेतुग्रहणाधिकरणतया, यथा-पर्वतो वह्निमान्**

---

१. नदीपूरो नियम्यः, वृष्टिस्तन्नियामिका ।

**धूमवत्त्वादित्यत्र धूमस्य पर्वते ग्रहणाद वह्नेरपि तत्र भानमिति । व्याप्तिग्रहवेलायां तु पर्वतस्य सर्वत्रानुवृत्त्यभावेन न ग्रह इति ।**

अन्यथानुपपत्तिलक्षणव्याप्त्यवच्छेदकतया यस्य धर्मिणो ग्रहणम्, तस्याऽनुमितौ धर्मितया भानमित्युदाहरति—**यथा नभश्चन्द्रे**ति । समुद्रादिदेशान्तरवर्त्तिचन्द्रं विना न हि जल-चन्द्रोऽनुपपन्नः, किन्तु नभसि चन्द्रं विनैवेति नभ एव बिम्बभूतचन्द्रानुमितौ धर्मितया भासते—तस्यैवाऽन्यथानुपपत्तिलक्षणव्याप्त्यवच्छेदकत्वात् ।

न ह्यन्यदेशस्थितो धूमो गृहीतः सन् स्वाधिकरणदेशातिरिक्तदेशस्थितवह्न्यनुमितिं जनयितुमलमिति यस्मिन् देशे गृहीतः सन् अनुमितं जनयति स एव देशोऽनुमितौ धर्मितया भासते इत्युदाहरति-**क्वचिच्चे**ति । तत्र=पर्वते ।

व्याप्त्यवच्छेदकतयैव पर्वतस्य कुतो न भानमिति न शङ्क्यं—सर्वोपसंहारेण व्याप्तिग्रहणे धूमाधिकरणमात्राननुगामिनः पर्वतस्य विशिष्याऽप्रतिभासनेनाऽवच्छेदकत्वासम्भवादित्याह—**व्याप्तिग्रहे**ति ।

अन्यथानुपपत्तिलक्षणव्याप्त्यवच्छेदकता, हेतुग्रहणीयाऽधिकरणविधया विषयता वा, नाऽनुमितौ पक्षस्य प्रतिनियतस्य धर्मिविधया भाने प्रयोजिका; किन्त्वन्तर्व्याप्तेरेवाऽनुमितौ प्रयोजकत्वेन, साध्यहेत्वोः पक्षे एव व्याप्तिरन्तर्व्याप्तिरिति लक्षणलक्षितान्तर्व्याप्तिग्रहे धर्मिविधया पक्षस्याऽवश्यम्भानेन तदीयधर्मविषयतैव तत्र प्रयोजिकेति पक्षधर्मत्वस्य हेतुलक्षणत्वाभावेऽपि नाऽनुमितौ प्रतिनियतधर्मिविषयतानुपपत्तिरिति कस्यचिद् मतं प्रतिक्षेप्तुमुपन्यस्यति—

**यत्तु अन्तर्व्याप्त्या पक्षीयसाध्यसाधनसम्बन्धग्रहात् पक्षसाध्यसंसर्गभानम्, तदुक्तं—"पक्षीकृत एव विषये साधनस्य साध्येन व्याप्तिरन्तर्व्याप्तिः, अन्यत्र तु बहिर्व्याप्तिरिति;"**

**अन्तर्व्याप्त्ये**त्यस्य **पक्षसाध्यसंसर्गभान**मित्यत्राऽन्वयः । कथम्भावाकाङ्क्षायामुक्तं—**पक्षीये**ति । अन्यथा पक्षीयसाध्यसाधनसम्बन्धस्यैवाऽन्तर्व्याप्तिरूपत्वेन, तत्र तृतीयार्थान्व-यानुपपत्तिः[१] स्यात् । अथवा पक्षीयसाध्यसाधनसम्बन्धग्रहोऽन्तर्व्याप्तिग्रहपर्यवसितः । विषयिणि

---

अन्तर्व्याप्तिरेव अनुमितिप्रयोजिका । अन्तर्व्याप्तौ चाऽवश्यमेव पक्षस्याऽन्तर्भावः । व्याप्ति-ज्ञानीया धर्मिविषयतैव अनुमितिधर्मिविषयतायां तन्त्रमिति हेतुलक्षणे पक्षधर्मत्वाऽप्रवेशेऽपि अन्तर्व्याप्तिज्ञानबलादेव तज्जन्यानुमितौ पक्षस्यैव धर्मितया भानं न पुनरन्यथानुपपत्त्यवच्छेदकतया हेतुग्रहणाधिकरणतया वा तस्य भानमित्यभिप्रायेण **प्रमाणनयतत्त्वालोकीयम्** अन्तर्व्याप्तिबहि-र्व्याप्तिलक्षणपरं सूत्रमवलम्ब्य कस्यचिदेकदेशिनो मतमुपन्यस्यति—**'यत्तु'** इत्यादिना ।

---

१. पक्षीयसाध्यसाधनसम्बन्ध एवाऽन्तर्व्याप्तिः । अतो वाक्यस्याऽस्य अन्तर्व्याप्त्याऽन्तर्व्याप्तिग्रहादित्यर्थः स्यात् ।

चोक्तग्रहे विषयस्य चाऽन्तर्व्याप्तेः कारणत्वविवक्षया तृतीयोपपत्तिः ।

पक्षीयसाध्यसाधनसम्बन्धस्याऽन्तर्व्याप्तित्वे **स्याद्वादरत्नाकर**सूत्रं प्रमाणयति-**तदुक्त**मिति। व्याप्तेरन्तरिति विशेषणं तदैव साफल्यमञ्चेद् यद्यन्यादृगपि व्याप्तिः स्यात् । अस्ति चेत् का सा, किञ्च तल्लक्षणमित्यनुयोगे, बहिर्व्याप्तिः सा, दृष्टान्ते एव विषये साध्यसाधनयोर्व्याप्तिर्बहिर्व्याप्तिरिति तल्लक्षणमिति प्रासङ्गिकविचारमवलम्ब्य **स्याद्वादरत्नाकर**सूत्रं बहिर्व्याप्तिलक्षणप्रकाशकमुपदर्शयति—**अन्यत्र त्विति** । **अन्यत्र**=पक्षीकृताद् भिन्ने, दृष्टान्ते इति यावद् ।

यद्ग्रहणं पक्षे एव भवति साऽन्तर्व्याप्तिः, यद्ग्रहणं पक्षबहिर्भूतदृष्टान्ते एव भवति सा बहिर्व्याप्तिरिति ग्रहणे पक्षान्तर्भावबहिर्भावकृतो नाऽन्तर्व्याप्तिबहिर्व्याप्त्योर्भेदः, किन्तु साध्यवदन्यावृत्तित्वादिलक्षणाऽव्यभिचारस्वरूपाऽन्तर्व्याप्तिः, सा यदि पक्षेऽपि हेतुसाध्ययोः सत्त्वं भवेत् तदैव स्यादित्येतावन्मात्रोपदर्शनार्थमेव 'पक्षीकृत एवे'त्यादि तल्लक्षणप्रणयनं **सूरेः**, बहिर्व्याप्तिस्तु नाऽव्यभिचारः, किन्तु साध्यहेत्वोः सामानाधिकरण्यमात्रम्, तच्च पक्षभिन्ने दृष्टान्तमात्रे साध्यहेत्वोः सद्भावतः उपपद्यते इत्येतावन्मात्रपरमेव 'अन्यत्र तु बहिर्व्याप्ति'रिति तल्लक्षणप्रणयनम्, न तु तयोर्व्याप्त्योर्विषयभेदख्यापनार्थं तत्-सार्वत्रिकत्वमन्तरेण व्याप्तेः स्वरूपलाभस्यैवाऽसम्भवेन विषयभेदप्रयुक्तभेदस्य तत्राऽसम्भवात् । तथा च स्वरूपप्रयुक्ताव्यभिचारलक्षणैवैका व्याप्तिर्वास्तविकी, अन्या त्वौपाधिक्येवेत्युक्तसूत्ररहस्यमित्याशयेन प्रदर्शितमतं प्रतिक्षिपति—

**तन्न, अन्तर्व्याप्त्या हेतोः साध्यप्रत्यायनशक्तौ सत्यां बहिर्व्याप्तेरुद्भावनव्यर्थत्वप्रतिपादनेन, तस्याः स्वरूपप्रयुक्ताऽव्यभिचारलक्षणत्वस्य, बहिर्व्याप्तेश्च सहचारमात्रत्वस्य**

---

न पक्षान्तर्भावानन्तर्भावकृतोऽन्तर्व्याप्तिबहिर्व्याप्त्योर्भेदः, किन्तु स्वरूपत एव तयोर्भेदः, अन्तर्व्याप्तेः साध्यशून्यावृत्तित्वरूपत्वात्, बहिर्व्याप्तेश्च साध्याधिकरणवृत्तित्वरूपत्वात् । तथा च अनुमितिप्रयोजकान्तर्व्याप्तौ पक्षस्याऽघटकतया न तद्भानबलाद् अनुमितिविषयता तत्र पक्षे निर्वाहयितुं शक्येति अनुमितौ तद्भाननिर्वाहाय अस्मदुक्तैव क्वचिदन्यथानुपपत्त्यवच्छेदकतया इत्यादिरीतिरनुसरणीया । यदि च अन्तर्व्याप्तौ नियमतः पक्षभानं स्यात् तदा अन्तर्व्याप्तिग्रह एव पक्षसाध्यसंसर्गस्य भासितत्वात् किं पृथगनुमित्या ? इत्याशयेन पूर्वोक्तमेकदेशिमतं निराकरोति **'तन्न'** इत्यादिना ।

---

ततस्तृतीयाविभक्तेरन्वयाऽनुपपत्तिः । अत एवमन्वयः कार्यः-अन्तर्व्याप्त्या पक्षसाध्यसंसर्गभानम्, कथं भानम् ? पक्षीयसाध्यसाधनसम्बन्धग्रहादिति । यतोऽन्तर्व्याप्तिः पक्षीयसाध्यसाधनसम्बन्धरूपा ततस्तद्ग्रहात् पक्षसाध्यसंसर्गभानमित्याशयः । यथाऽत्र-चक्रेण चक्रभ्रम्या घटो जायते । अथवा ज्ञानं प्रति विषयस्य कारणत्वादन्तर्व्याप्तिग्रहं प्रति अन्तर्व्याप्त्याः कारणत्वविवक्षायामपि तृतीयोपपत्तिः ।

**लाभात्, सार्वत्रिक्या व्याप्तेर्विषयभेदमात्रेण भेदस्य दुर्वचत्वात् ।**

यदा च स्वरूपत एवाऽन्तर्व्याप्तिबहिर्व्याप्त्योर्भेदो, न तु विषयभेदकृतः, तदाऽन्तर्व्याप्तिशरीरे पक्षस्याऽप्रविष्टत्वात् तद्‌ग्रहे न पक्षस्य धर्मितया भानमिति नाऽन्तर्व्याप्तिग्रहीया धर्मिविषयताऽनुमितौ धर्मिविषयतायाः प्रयोजिकेति क्वचिदन्यथानुपपत्त्यवच्छेदकतयेत्यादिदिगेवाऽस्मद्दर्शिताऽवलम्बनीयेत्याशयः ।

सहचारमात्रत्वस्येत्युक्त्या—वस्तुस्थित्या बहिर्व्याप्तिर्व्याप्तिरेव न भवति, नाऽतोऽस्याः साध्यप्रत्यायनशक्तिरपि, साध्यप्रत्यायनशक्तिमाबिभ्राणाया अन्तर्व्याप्तेः सकाशात् स्वरूपत एव भिन्नेयं न स्वगतभेदे विषयभेदमपेक्षते, सार्वत्रिकी त्वन्तर्व्याप्तिः साध्यसामानाधिकरण्यमपि स्वरूपाव्यभिचारात्मकस्वशरीरे प्रवेशयन्त्यपि तत्रोदासीनैव-नियमांशमात्रत एव स्वकार्य[१]-जनकत्वाद्, अतो हेतुव्यापकसाध्यसामानाधिकरण्यरूपतां बिभ्राणाऽपि सा नियमांशविनिर्मुक्त-साध्यसहचारमात्रस्वरूपबहिर्व्याप्तितः स्वरूपतो भिन्ना भवत्येव-इत्यावेदितम् ।

**न चेदेवं तदाऽन्तर्व्याप्तिग्रहकाले एव पक्षसाध्यसंसर्गभानादनुमानवैफल्यापत्तिः विना 'पर्वतो वह्निमा'नित्युद्देश्यप्रतीतिमिति यथातन्त्रं भावनीयं सुधिभिः ।**

**न चेदेवमिति ।** स्वरूपतोऽन्तर्व्याप्तिबहिर्व्याप्त्योर्भेदो नाऽभ्युपगम्यते, किन्त्वन्तर्व्याप्तौ पक्षस्य सन्निविष्टत्वात् तद्‌ग्रहे पक्षस्य धर्मितया भानादनुमितौ धर्मितया पक्षस्य भानम्, एतावतैव न हेतोः पक्षधर्मतापेक्षेत्येव यदि स्वीक्रियते इत्यर्थः । **तदाऽन्तर्व्याप्तिग्रहकाले एव**=यदा सर्वोपसंहारेण साध्यहेत्वोर्व्याप्तिग्रहणम्, तत्काले तस्मिन् व्याप्तिग्रहे एव । 'पक्षसाध्य-संसर्गभाना'दित्यस्य प्रागेव 'विना ''पर्वतो वह्निमा''नित्युद्देश्यप्रतीति'मिति ग्रन्थ आकर्षणीयः । तथा च **'पर्वतो वह्निमा'नित्युद्देश्यप्रतीतिं विनापि पक्षसाध्यसंसर्गभानाद्, अनुमान-वैफल्यापत्तिः**=पर्वतो वह्निमानित्यनुमितेर्वैफल्यं स्याद् । अनुमित्याऽपि पक्षसाध्यसंसर्ग एव बोधनीयः, स चाऽन्तर्व्याप्तिग्रहेण बोधित एवेत्यर्थः ।

अस्मत्पक्षो युक्तः पूर्वपक्षो वेत्यत्र स्वस्वशास्त्रनिष्णाताः कृतबुद्धयः सुधिय एव प्रमाणम् । तैर्यथा भावयिष्यते तथाऽस्माभिरपि विचारणीयमेवाऽवधारणीयमेव वेति ग्रन्थगौरव-भयाद् नाऽत्र विचारसम्भारः प्रकटीक्रियते । पक्षधर्मता तु नाऽनुमितावङ्गमित्येतत्प्रसिद्ध्यैव कृतकृत्या वयमित्याशयेनाऽऽह—**यथातन्त्र**मिति । स्वसिद्धान्तमनतिक्रम्येत्यर्थः । तथा चाऽपसिद्धान्ताद् बिभ्यतां सुधियामस्मद्दर्शित युक्तिमार्ग एवाऽनुभवपथमागमिष्यतीत्यभिप्रायः । **भावनीयं**=विचारणीयम् । तथा चाऽऽपाततः परपक्षस्य प्रथमं बुद्धौ भासनेऽपि, विचारतो

१. साध्यप्रत्यायनम् ।

बाध्यमानत्वादनुपादेयत्वमेवेत्याशयः । **सुधीभिरि**ति । एतेन-पक्षपाताचान्तस्वान्ताः कुधिय एव, तैरयथावद् विचारणेन परपक्षस्य समर्थनेऽपि न क्षतिः-इति प्रकटितम् ।

सिद्धे चोक्तदिशा पक्षधर्मताया अनुमित्यनङ्गत्वे, हेतोः पक्षधर्मत्वोपपादनायाऽननु-भूयमानप्रकारेण पक्षसाध्यहेतुघटितप्रयोगविन्यासः परस्याऽऽयासमात्रफलक एव । तथा व्यवस्थापिते हेतोरन्यथानुपपत्त्येकलक्षणत्वेन, **नैयायिक**स्य पक्षसत्त्व–सपक्षसत्त्व-विपक्षा-सत्त्वैतद्बौद्धोक्तत्रिरूपसहितस्याऽबाधितत्वासत्प्रतिपक्षत्वलक्षणरूपद्वयस्याऽनुमित्यङ्गत्वसमर्थनेन पाञ्चरूप्यस्य हेतुलक्षणत्वमित्यभिधानमप्यपहस्तितं भवतीत्याशयेनाऽऽह–

**इत्थं च–'पक्वान्येतानि सहकारफलानि एकशाखाप्रभवत्वाद्-उपयुक्तसहकार-फलव'दित्यादौ बाधितविषये, 'मूर्खोऽयं देवदत्तः-तत्पुत्रत्वाद्-इतरतत्पुत्रव'दित्यादौ सत्प्रतिपक्षे चाऽतिप्रसङ्गवारणाय अबाधितविषयत्वासत्प्रतिपक्षत्वसहितं प्रागुक्त-रूपत्रयमादाय पाञ्चरूप्यं हेतुलक्षणम्–इति नैयायिकमतमप्यपास्तम्,**

**इत्थं**=पक्षधर्मत्वाभावेऽपि उदेष्यति शकटं–कृत्तिकोदयादित्याद्यनुमानदर्शनेन पक्ष-धर्मत्वस्याऽनुमित्यनङ्गत्वव्यवस्थितौ । पक्वान्येतानीत्यादि हेतुलक्षणमित्यन्तं **नैयायिक**मत-गुम्फनम् । अत्र–**एतानि सहकारफलानि पक्वानी**ति प्रतिज्ञा, **एकशाखाप्रभवत्वादि**ति हेतुः, यद्यदेकशाखाप्रभवं तत्तत् पक्वं यथोपयुक्तसहकारफलमित्युदाहरणम्, एकशाखाप्रभवाणि चैतानि सहकारफलानीत्युपनयः, तस्मात् पक्वानीति निगमनम् । **नैयायिकैः** पञ्चावयवोपगमात् तन्मतोपदर्शने पञ्चाऽप्यवयवाः प्रयोक्तव्या इत्यावेदनायाऽऽदावित्युक्तम् ।

**बाधितविषये**=बाधितो विषयः=साध्यं यस्य हेतोरेकशाखाप्रभवत्वस्य, स बाधितविषयः तस्मिन् । अस्य **अतिप्रसङ्गवारणाये**त्यत्राऽतिप्रसङ्गेऽन्वयः । बाधश्च साध्या-भाववान् पक्षः । प्रकृतेऽपक्वान्येवाऽऽम्रफलानि पक्षीकृत्य तत्र पक्वत्वं साध्यते इति साध्याभाववान् पक्षः समस्तीति एकशाखाप्रभवत्वहेतुर्बाधितविषयः ।

**मूर्खोऽयमि**ति । अत्र–**अयं देवदत्त** इति पक्षः, **मूर्ख** इति मूर्खत्वं साध्यम्, **तत्पुत्रत्वात्**=चैत्रपुत्रत्वादिति चैत्रपुत्रत्वं हेतुः, **इतरतत्पुत्रवद्**=देवदत्तभिन्नचैत्रपुत्रवदिति दृष्टान्तः । **इत्यादावि**त्युपादानादत्राऽपि पञ्चावयवा उपलक्षिता भवन्ति, ते चोपदर्शिता भावनीयाः ।

अत्र **नव्यनैयायिक**मते 'साध्याभावव्याप्यवान् पक्षः सत्प्रतिपक्ष' इति लक्षणानुसाराद् मूर्खत्वाभावव्याप्यशास्त्रज्ञत्ववान् देवदत्त इति सत्प्रतिपक्षः । 'स्वसाध्यविरुद्धसाध्या-भावसाधक-साध्याभावव्याप्यवत्तापरामर्शकालीन-साध्यव्याप्यवत्तापरामर्शविषयः प्रकृतहेतुः

सप्रतिपक्ष इति **प्राचीनमते** तु-अयं न मूर्खः शास्त्रज्ञत्वादिति प्रतिस्थापनानुमाने सति, मूर्खत्वविरुद्धमूर्खत्वाभावसाधक-मूर्खत्वाभावव्याप्यशास्त्रज्ञत्ववत्तापरामर्शकालीन-मूर्खत्वव्याप्य-तत्पुत्रत्ववत्तापरामर्शविषयः तत्पुत्रत्वहेतुः सत्प्रतिपक्ष इति बोध्यम् ।

**अतिप्रसङ्गवारणाय**=बाधितसत्प्रतिपक्षितहेत्वोरलक्ष्ययोः सद्धेतुलक्षणस्याऽतिव्याप्तेर्वारणाय । **प्रागुक्तरूपत्रयं**=पक्षसत्त्व-सपक्षसत्त्व-विपक्षासत्त्वलक्षणरूपत्रयम् ।

**नैयायिकमतखण्डने** हेतुमाह—

**उदेष्यति शकटमित्यादौ पक्षधर्मत्वस्यैवाऽसिद्धेः**

अत्र कृत्तिकोदयहेतौ पक्षस्य कस्यचिदभावादेव पक्षधर्मत्वस्याऽसिद्ध्या पक्षधर्मघटित-पञ्चरूपत्वं सद्धेतुलक्षणं नाऽस्तीति लक्ष्ये तस्मिन् उक्तसद्धेतुलक्षणस्याऽभावादव्याप्तिरित्यर्थः ।

अलक्ष्येऽपि तत्पुत्रत्वादिलक्षणे दुष्टहेतावेतल्लक्षणमस्तीत्यतिव्याप्तिरप्यत्र दोष इत्याह—

**स श्यामः तत्पुत्रत्वादित्यत्र हेत्वाभासेऽपि पाञ्चरूप्यसत्त्वाच्च ।**

मित्रानाम्नी काचिदङ्गना । तस्याः पञ्च पुत्रा बभूवुः । तत्र चत्वारः श्यामरूपवन्तः, एकस्तु पञ्चमो गौरः । तं गौरं पक्षीकृत्य[1] मित्रापुत्रत्वेन हेतुना श्यामत्वं कश्चित् साधयन् 'स श्यामः तत्पुत्रत्वा'दित्यादिन्यायं प्रयुङ्क्ते । अत्र तत्पुत्रत्वहेतौ पक्षसत्त्वादीनि पञ्चाऽपि रूपाणि विद्यन्ते, परं नाऽयं सद्धेतुः-श्यामत्वलक्षणसाध्यव्यापकस्य तत्पुत्रत्वलक्षणहेत्वव्यापकस्य शाकपाकजत्वरूपोपाधेः सत्त्वेन, सोपाधिकत्वाद् व्याप्यत्वासिद्धिलक्षणदोषाक्रान्तत्वेन हेत्वाभासत्वात् । इत्थमलक्ष्यीभूते तस्मिन् लक्षणगमनादतिव्याप्तिरिति न निरुक्तपञ्चरूपोपपन्नत्वं हेतुलक्षणमित्यर्थः ।

एवं च परोक्तहेतुलक्षणे प्रत्याख्याते सति स्वाभिमतताया अन्यथानुपपत्तेरेकस्या एव सर्वसद्धेतुगतत्वाद् दुष्टहेत्ववृत्तित्वाच्च लक्षणत्वमुचितमित्याह—

**निश्चितान्यथानुपपत्तेरेव सर्वत्र हेतुलक्षणत्वौचित्यात् ।**

साध्यस्वरूपं निरूपयितुं तन्निरूपणानुकूलामुपोद्घातसङ्गतिमुपजीवन् परशङ्का-मुत्थापयति—

**ननु हेतुना साध्यमनुमातव्यम्, तत्र किंलक्षणं साध्यमिति चेद्,**

**तत्र**=अनुमानविषयीभूते साध्येऽवश्यवक्तव्ये सति । लक्षणाधीना लक्ष्यव्यवस्थितिरिति न हि साध्यस्य लक्षणमप्रदर्श्य साध्यस्वरूपमनुमानविषयतया निर्द्धारयितुं शक्यमिति **किं-**

---

१. यः श्यामत्वं साधयति स न जानाति यद् अयं गौर इतीह ज्ञेयम् । नो चेद् बाधितविषयत्वाभावो नोपलभ्येत ।

**लक्षणम्**=असाधारणधर्मत्वस्वरूपलक्षणत्वसामान्यधर्मप्रकारकजिज्ञासाविषयीभूतज्ञानविषयः[१] । जिज्ञासा च साध्यासाधारणधर्मप्रकारकज्ञानं मे जायतामित्याकारिका-किमो जिज्ञासार्थकत्वात् । अथवा किमित्याक्षेपे, यत्किमपि लक्षणं ग्रन्थकृतोपदर्शनीयम्, तत् सर्वं दोषकवलितमेव भविष्यतीति लक्षणाभावाद् नाऽस्त्येव साध्यमिति तद्विषयकमनुमानमपि न सम्भवति-विषयाभावे विषयिणोऽप्यभावादित्याक्षेपः ।

यत्प्रमाणमुपजीव्यैव प्रत्यक्षादीनि प्रमाणतया व्यवस्थितानि भवन्ति—'इदं प्रमाणं संवादिप्रवृत्तिजनकत्वा'दित्याद्यनुमानमन्तरेण प्रत्यक्षादीनां प्रामाण्याव्यवस्थितेः, तस्याऽनुमानस्य विषयोऽस्त्येव साध्यम् । तल्लक्षणं यद्यप्येकान्तवाद्यभिमतं सर्वं दोषकवलितम्, तथापि **स्याद्वादि**नामस्माकमभिमतं साध्यलक्षणं दोषलेशासम्पृक्तमस्त्येवेत्याशयवान् ग्रन्थकृदाह—

**उच्यते—अप्रतीतमनिराकृतमभीप्सितं च साध्यम् ।**

अत्र **साध्यमिति** लक्ष्यनिर्देशः, **अप्रतीतमनिराकृतमभीप्सितं चेति** लक्षणवचनम् । पर्वतो वह्निमान् धूमादित्यादौ वह्निः साध्यः । स च वह्नित्वेन सामान्यतः प्रतीतोऽपि पर्वतगततया साध्यत्वेनेष्टः पर्वतीयवह्निस्वरूपो न केनापि प्रमाणेन प्रतीत इत्यप्रतीतत्वं तस्य । तथा पर्वतरूपधर्मिणि न स केनापि प्रमाणेन निराकृतः—पर्वते वह्न्यभावसाधकस्य कस्यापि प्रमाणस्याऽभावादित्यनिराकृतत्वमपि तस्य । इष्टश्च पर्वते साधयितुं प्रमातुः सः-'पर्वते वह्निमनुमिनुया'मितीच्छाविषयानुमितिविषयत्वाद् । उभयं हि लोकेऽभीप्सितं भवति-सुखदुःखाभावान्यतररूपं फलं साक्षात् परम्परया वा तत्साधनं च, सुखसाधनशीतापनोद-पाकादिसाधनत्वाद् वह्निरपि तथेत्यभीप्सिततत्वमपि तस्य । एवमप्रतीतत्वादिविशेषण-त्रयवत्त्वलक्षणं तत्र वर्त्तते इति लक्षणसमन्वयः ।

तत्राऽप्रतीतत्वस्य कृत्यमुपदर्शयति—

**शङ्कितविपरीतानध्यवसितवस्तूनां साध्यताप्रतिपत्त्यर्थमप्रतीतमिति विशेषणम् ।**

यद्यपि संशयादेरपि ज्ञानत्वमेवेति तद्विषयोऽपि प्रतीत[२] एव, तथापि अप्रतीतत्वमत्र प्रमात्मकनिश्चयाविषयत्वं विवक्षितम् । लोके य एव प्रमात्मकनिश्चयविषयः स एव प्रतीत इति व्यवह्रियते । यः खलु प्रमाता 'पर्वतो वह्निमान् न वे'ति पर्वते वह्नि सन्दिग्धे, तं प्रति संशयात्मकज्ञानविषयत्वेन वह्नेः शङ्कितत्वादप्रतीतत्वम् । यश्च भ्रान्तः प्रतिपत्ता पर्वते सन्तमपि वह्नि 'नाऽस्त्यत्र वह्नि'रिति पर्वतवृत्त्यभावप्रतियोगित्वेनाऽवधारितवान्, तं प्रति विपर्ययात्मक-

---

१. अस्य साध्यपदार्थेऽन्वयः ।

२. संशितत्वादिना प्रतीतः ।

ज्ञानविषयाभावप्रतियोगित्वेन वह्नेर्विपरीतत्वादप्रतीतत्वम् । यश्च प्रतिपत्ता पर्वतेऽस्तित्वेन नास्तित्वेन च वह्निं न जानात्येव, जानानोऽपि वा 'किमप्यत्राऽस्ती'त्येवमेवाऽवगच्छति, तं प्रति वह्नेरनध्यवसितत्वादप्रतीतत्वम् । इत्थं सन्दिग्धविपर्यस्ताव्युत्पन्नान् प्रति भवति वह्नेः साध्यत्व-मित्येतदधिगतयेऽप्रतीतमिति विशेषणमित्यर्थः । तेन यश्च पर्वते वह्निं निश्चिनोत्येव, तं प्रति तस्य साध्यत्ववारणायाऽप्रतीतिमिति विशेषणमित्यावेदितं भवतीति ।

अनिराकृतमिति विशेषणस्य प्रयोजनमुपदर्शयति—

**प्रत्यक्षादिविरुद्धस्य साध्यत्वं मा प्रसाङ्क्षीदित्यनिराकृतग्रहणम् ।**

अत्र **आदिपदादागमादेर्ग्रहणम्** । 'वह्निरनुष्णः-कृतकत्वा'दित्यत्राऽनुष्णत्वम्= उष्ण-स्पर्शाभावः साध्यतया प्रयोक्तुरिष्टः, स च वह्नावुष्णस्पर्शग्राहिप्रत्यक्षविरुद्ध इति प्रत्यक्षप्रमाण-निराकृतत्वाद् न तस्य साध्यत्वम् । अनिराकृतत्वविशेषणानुपादाने तु तस्याऽप्यप्रतीत-त्वेनाऽभीप्सितत्वेन च साध्यत्वं प्रसज्येतेति तस्य साध्यत्वं मा प्रसाङ्क्षीदित्येतदर्थम-निराकृतमिति विशेषणम् । एवं '**जैनै** रजन्यां भोजनं भजनीयं-मनुष्यत्वाद्-उभयसम्प्रति-पन्नरात्रिभोजिजनव'दित्यत्र जैननिष्ठरात्रिभोजनकर्तृत्वं साध्यम्, तच्च जैनागमप्रमाणविरुद्धं-तत्र जैनानां रात्रिभोजननिषेधादिति तस्य साध्यत्वनिराकरणायाऽपि तद् उपादेयम् । तथा 'आत्मा-ज्ञानशून्यो-अमूर्त्तत्वाद्-धर्मास्तिकायादिव'दित्यत्र ज्ञानशून्यत्वस्य साध्यत्वेनाऽभिमतस्य धर्मिण आत्मनः साधकस्याऽनुमानप्रमाणस्य ज्ञानवत्त्वेनैवाऽऽत्मनो ग्राहकत्वेन, तद्विरुद्धस्याऽऽत्म-गतज्ञानाभाववत्त्वस्याऽनुमाननिराकृतस्य साध्यत्वापनोदायाऽपि तद् विशेषणमित्यर्थः ।

अभीप्सितत्वविशेषणस्य प्रयोजनमुपदर्शयति—

**अनभिमतस्याऽसाध्यत्वप्रतिपत्तयेऽभीप्सितग्रहणम् ।**

नैरात्म्यवादिनं **बौद्धं** प्रति स्थिरात्मसाधनाय **कपिलानुयायिनः साङ्ख्याः** 'चक्षुरादयः-परार्थाः-सङ्घातत्वाद्-ये ये सङ्घातरूपाः ते ते परार्था यथा शयनीयादय' इति प्रयोगमारचयन्ति। तत्र चक्षुरादीनां पारार्थ्यं यत् साध्यम्, तद् आत्मार्थत्वमेव **साङ्ख्यानामुक्तप्रयोगप्रयोक्तृणाम**-भीप्सितम्, न तु **बौद्धाभिमतं** चक्षुरादीनां संहतपरार्थत्वम् । तत्साधने हि न **साङ्ख्यानामात्मा** सिध्यति, तत्र वैफल्यमेवाऽनुमानस्येति **साङ्ख्यान**भिमतस्य संहतपरार्थत्वस्याऽसाध्यत्वाव-बोधनायाऽभीप्सितग्रहणं । तथा चाऽभीप्सितस्याऽऽत्मार्थत्वस्यैव साध्यत्वम्, न तु संहत-परार्थत्वस्य । चक्षुरादीनां संहतपरार्थत्वे तु सोऽपि संहतः परः सङ्घातरूपत्वात् संहतपरार्थः, एवं सोऽपीत्यनवस्था प्रसज्येत इति संहतपरार्थत्वसाधनप्रतिकूलः तर्क इत्यर्थः ।

शङ्कितस्यैव साध्यत्वम्, न तु विपरीतानध्यवसितयोरिति परमतमुपन्यस्य प्रतिक्षिपति—

**कथायां शङ्कितस्यैव साध्यस्य साधनं युक्तमिति कश्चित्,**

कथायां यथा सन्दिग्धार्थनिर्णयाय वादी समुपसर्पति, तथा विपरीतस्याऽप्यर्थस्य स्वयं सत्यतयैवाऽवधारितस्य 'परः कथमस्य वैपरीत्यं साधयितुं प्रगल्भते' इति जिज्ञासया विपर्यस्तः, 'ममाऽज्ञानमनध्यवसायो वा यथावस्थितार्थावबोधतो विनङ्क्ष्यती'ति मतिमास्थायाऽव्युत्पन्नश्चाऽपि कथायामुपसर्पत एवेति तौ प्रति विपर्ययानध्यवसायनिरासार्थमपि संशयनिरासार्थमिवाऽनुमानप्रयोगः सम्भवत्येवेति शङ्कितत्वमिव विपरीतत्वानध्यवसितत्वेऽपि साध्यविशेषणतयोपयुक्ते एवेत्याह—

**तन्न, विपर्यस्ताव्युत्पन्नयोरपि परपक्षदिदृक्षादिना कथायामुपसर्पणसम्भवेन, संशयनिरासार्थमिव विपर्ययानध्यवसायनिरासार्थमपि प्रयोगसम्भवात्, पित्रादेर्विपर्यस्ताव्युत्पन्नपुत्रादिशिक्षाप्रदानदर्शनाच्च ।**

न चैतत् कल्पनामात्रम् । दृश्यतेऽपि लोके विपर्यस्ताव्युत्पन्नपुत्रादिशिक्षणार्थं यथावस्थिततत्त्वावबोधकन्यायप्रयोगे यतमानः पित्रादिः । अन्यथा विपर्यस्तमव्युत्पन्नं वा पुत्रादिकं प्रति विपरीतस्याऽनध्यवसितस्य वा वस्तुनोऽसाध्यत्वेन, साधनासम्भवेऽशक्यानुष्ठाने प्रवर्त्तमानः पित्रादिः प्रेक्षावतामुपहसनीय एव स्यादित्यभिप्रायः ।

विपरीतानध्यवसितयोः साध्यत्वानङ्गीकारेऽनिष्टापत्तिमुपदर्शयति—

**न चेदेवं जिगीषुकथायामनुमानप्रयोग एव न स्यात्, तस्य साभिमानत्वेन विपर्यस्तत्वात् ।**

**न चेदेवं**=यदि विपरीतानध्यवसितयोः साध्यत्वं न स्यात् तदा । **तस्य**=जिगीषोः ।

अनिराकृतमिति चैकेन वादिना प्रतिवादिना वाऽनिराकृतमिति नाऽभिमतम्, किन्तु वादिप्रतिवादिभ्यामुभाभ्यामपि यत् प्रत्यक्षादिप्रमाणेन निराकृतं न भवति, तदेव साध्यत्वेनाऽभिमतमित्याह—

**अनिराकृतमिति विशेषणं वादिप्रतिवाद्युभयापेक्षया-द्वयोः प्रमाणेनाऽबाधितस्य कथायां साध्यत्वात् ।**

**द्वयोः**=वादिप्रतिवादिनोः ।

अभीप्सितमिति तु अनुमानप्रयोक्तुरेवाऽभिमतमित्येवं रूपमित्याह—

**अभीप्सितमिति तु वाद्यपेक्षयैव, वक्तुरेव स्वाभिप्रेतार्थप्रतिपादनायेच्छासम्भवात् ।**

**वाद्यपेक्षया**=अनुमानप्रयोगकर्त्रपेक्षया । तथा चाऽभीप्सितमित्यस्य वाद्यभीप्सित-

मित्यर्थः। तत्र हेतुमाह—**वक्तुरेवे**ति। अस्य **इच्छासम्भवा**दित्येतद्घटकेच्छायामन्वयः। **स्वाभिप्रेते**त्यत्र स्वपदेन वक्तुर्ग्रहणम्।

**ततश्च परार्थाश्चक्षुरादय इत्यादौ पारार्थ्यमात्राभिधानेऽप्यात्मार्थत्वमेव साध्यं सिद्ध्यति। अन्यथा संहतपरार्थत्वेन बौद्धैः चक्षुरादीनामभ्युपगमात् साधनवैफल्यात्, इत्यनन्वयादिदोषदुष्टमेतत् साङ्ख्यसाधनमिति वदन्ति।**

**ततश्च**=अभीप्सितत्वस्य वाद्यभीप्सितत्वरूपत्वतश्च, **परार्थाश्चक्षुरादय इत्यादौ**=**बौद्धं** प्रति 'चक्षुरादयः परार्थाः सङ्घातत्वा'दिति **साङ्ख्या**भिमतानुमाने, **पारार्थ्यमात्राभिधानेऽपि**=पारार्थ्यमात्रस्य साध्यतयाऽभिधानेऽपि, मात्रपदेनाऽऽत्मलक्षणपरार्थत्वाभिधानस्य व्यवच्छेदः। **सिद्ध्यती**ति। **ततश्चे**त्यस्याऽत्राऽन्वयादात्मसाधनार्थमुक्तानुमानप्रयोक्तुर्वादिन आत्मार्थत्वस्यैवाऽभीप्सितत्वादात्मार्थत्वमेव साध्यं सिद्ध्यतीत्यर्थः।

**अन्यथा**=वाद्यभीप्सितत्वरूपतयाऽभीप्सितत्वस्याऽविवक्षायाम्। **संहतपरार्थत्वेने**ति। **बौद्धैः चक्षुरादीनां संहतपरार्थत्वेनाऽभ्युपगमात् साधनवैफल्या**दित्यन्वयः। यदि वाद्यपेक्षयेव प्रतिवाद्यपेक्षयाऽभीप्सितमुपगतं भवेत् तदा प्रतिवादिनो **बौद्धस्य** चक्षुरादीनां परार्थत्वं संहतपरार्थत्वमेवाऽभीप्सितमिति तदपि साध्यं भवेत्। तत्साधनेन च **साङ्ख्यस्य** नाऽऽत्मा सिद्ध्यति, ततः तत्साधनं विफलमेव **साङ्ख्यस्य** स्यादित्यर्थः।

एतावताऽऽत्मार्थत्वस्य साध्यत्वं समर्थितम्, तेन समं च सङ्घातत्वहेतोर्न दृष्टान्ते शयनीयादावन्वय इति **रत्नाकरकारा अनन्वयादिदोषदुष्टमेतत्**=परार्थाः चक्षुरादय इति **साङ्ख्यसाधन**मिति **वदन्ती**त्यर्थः। तथा च **रत्नाकर**पाठः-"ततश्च परार्थाः चक्षुरादय इत्यादौ पारार्थ्यमात्राभिधानेऽप्यात्मार्थत्वमेव साध्यं प्रसिद्ध्यति, तद्धीच्छया व्याप्तं **साङ्ख्यस्य बौद्धं** प्रति साध्यमेव , आत्मा हि **साङ्ख्येन** साधयितुमुपक्रान्तः, ततोऽसावेव साध्यः, अन्यथा साधनस्य वैफल्यापत्तेः, संहतपरार्थत्वेन **बौद्धैः** चक्षुरादीनामुपगमाद्, एवं चाऽऽत्मनः साध्यत्वे हेतोरिष्टविघातकारितया विशेषविरुद्धत्वं साध्यस्य च दृष्टान्तदोषः साध्यवैकल्यमिति।" अत्र हेतोरिष्टविघातकारितयेति। हेतोः=सङ्घातत्वस्य शयनीयादिदृष्टान्तगतस्य सङ्घातपरार्थत्वेन व्याप्तस्य, इष्टो यः **साङ्ख्यस्या**ऽसंहत आत्मा तस्य यो विघातो=असंहतत्वस्वरूपापनोदः, तत्कारितया संहतात्मस्वरूपज्ञापकतयेति यावत्। विशेषविरुद्धत्वमिति। विशेषः=परार्थत्वलक्षणसाध्यस्याऽसंहतपरार्थत्वम्, [तदभावेन संहतपरार्थ]त्वेनैव व्याप्तस्याऽसंहतात्मार्थत्वेन सहैकाधिकरणावृत्तित्वम्। तथा च विरोधलक्षणो हेतुदोषः। साध्यस्य=**साङ्ख्या**भिमतात्मार्थत्वलक्षणसाध्यस्य, चकाराद् विशेषविरुद्धत्वं=हेतुविशेषेण दृष्टान्तगतेन सङ्घात-

परार्थत्वेनैकाधिकरणावृत्तित्वम् । तथा च सति दृष्टान्ते साध्याभावात् साध्यवैकल्यलक्षणो दृष्टान्तदोष इत्यर्थः ।

नन्वप्रतीतत्वादिकं परार्थानुमाने साध्यस्य विशेषकं भवति-तत्रैव विपरीतानध्यवसितादीनां साध्यता, प्रतिवादिना प्रत्यक्षादिप्रमाणेन साध्यस्य यद् निराकरणं तदभावः, साध्यस्य वाद्यभिमतत्वं च । इदानीं तु स्वार्थानुमानं निरूप्यते भवता, तत्राऽनवसर एवेदृशसाध्यस्वरूपोपवर्णनस्येत्याशङ्कापनोदायाऽऽह—

**स्वार्थानुमानावसरेऽपि परार्थानुमानोपयोग्यभिधानं परार्थस्य स्वार्थपुरःसरत्वेनाऽनतिभेदज्ञापनार्थम् ।**

**स्वार्थानुमानावसरेऽपि**=स्वार्थानुमाननिरूपणकालेऽपि, **परार्थानुमानोपयोग्यभिधानं**=परार्थानुमाने साध्यरूपविशेषकतयोपयुक्तस्याऽप्रतीतत्वादिविशेषणस्य यद् अभिधानं तत्, **परार्थस्य**=परार्थानुमानस्य, **स्वार्थपुरस्सरत्वेन**=स्वयं साध्यमनुमाय परस्य तत्प्रतिपत्तये यथासमयं प्रतिज्ञाद्यवयववाक्यं प्रयुङ्क्ते इत्येवं स्वार्थानुमानपूर्वकत्वेन, **अनतिभेदज्ञापनार्थं**=स्वार्थस्य स्वयमेव लिङ्गग्रहणादितो जायमानस्य, परार्थस्य च परप्रयुक्तावयवप्रभवलिङ्गज्ञानादितो जायमानस्य यत्किञ्चिद्विशेषसद्भावेऽप्यत्यन्तवैलक्षण्यं नाऽस्तीत्येतज्ज्ञापनार्थम् ।

पर्वतो-वह्निमान्-धूमादित्यादौ साध्यं-वह्न्यात्मको धर्मो वा पर्वतरूपो धर्मी वा वह्निविशिष्टपर्वतो वा ? नाऽऽद्यः-वह्निरूपधर्ममात्रस्य वादिप्रतिवादिभ्यामविगानेन प्रतीततया सिद्धस्य तस्य साध्यत्वायोगात् । अत एव न द्वितीयः-पर्वतरूपधर्मिणोऽपि वादिप्रतिवादिनोः सिद्धत्वात् । किञ्च, साध्येन सहाऽविनाभावो हेतोरपेक्षितोऽनुमाने, न च पर्वतरूपधर्मिणा समं धूमस्याऽविनाभाव इति कथं पर्वतस्य साध्यता ? अत एव न तृतीयोऽपि-वह्निविशिष्टपर्वतेनाऽपि समं धूमस्याऽविनाभावाभावादित्याशङ्कापनोदायाऽऽह—

**व्याप्तिग्रहणसमयापेक्षया साध्यं धर्म एव, अन्यथा तदनुपपत्तेः । आनुमानिकप्रतिपत्त्यवसरापेक्षया तु पक्षापरपर्यायः तद्विशिष्टः प्रसिद्धो धर्मी ।**

वह्निरूपधर्मेण सममेव धूमहेतोर्व्याप्तिर्गृह्यते, न तु पर्वतरूपधर्मिणा सममतो व्याप्तिग्रहकालापेक्षया वह्निरूपधर्म एव साध्यम् । धर्मविशिष्टधर्मिणोऽसिद्धस्य साध्यत्वे तदेकदेशे धर्मे उपचारात् साध्यपदप्रयोगोऽप्युपपद्यते इत्याशयः । **अन्यथा**=वह्निरूपधर्मस्य साध्यत्वानङ्गीकारे, **तदनुपपत्तेः**=हेतोः साध्येन समं व्याप्तिग्रहणस्याऽनुपपद्यमानत्वात् । यतोऽसिद्धत्वाद् वस्तुतः साध्यं वह्निविशिष्टः पर्वत एव, न च तेन समं धूमहेतोर्व्याप्तिग्रहणमुपपद्यते इत्यर्थः ।

**आनुमानिकप्रतिपत्त्यवसरापेक्षया**=पर्वतो वह्निमानित्यनुमित्यपेक्षया, **पक्षापरपर्यायः**=पक्ष इति द्वितीयं नाम यस्य सः, **तद्विशिष्टः**=वह्निरूपधर्मविशिष्टः, **प्रसिद्धः**=प्रत्यक्षादिप्रमाणसिद्धो विकल्पसिद्धो वा-'अस्ति सर्वज्ञ' इत्यादौ पूर्वं विकल्पसिद्धस्याऽपि सर्वज्ञादेर्धर्मित्वाभ्यनुज्ञानात्, **धर्मी**=पर्वतः, **साध्य**मित्यनुवर्त्तते । केवलस्य तु धर्मिणः साध्यत्वाभ्युपगमे न किञ्चित् प्रयोजनमिति तस्य साध्यत्वं नाऽङ्गीक्रियते । वह्निपर्वतयोर्विशकलितयोः पूर्वं सिद्धत्वेऽपि वह्निविशिष्टपर्वतस्याऽनुमितितः प्रागसिद्धत्वेन युक्तं तस्याऽनुमित्यपेक्षया साध्यत्वमित्याशयः ।

एवं च यान्यङ्गानि, तानि दर्शयति—

**इत्थं च स्वार्थानुमानस्य त्रीण्यङ्गानि-धर्मी साध्यं साधनं च । तत्र साधनं गमकत्वेनाऽङ्गम्, साध्यं तु गम्यत्वेन, धर्मी पुनः साध्यधर्माधारत्वेन-आधारविशेषनिष्ठतया साध्यसिद्धेरनुमानप्रयोजनत्वात् ।**

**इत्थम्**=उक्तदिशा साधनादीनां स्वरूपनिर्धारणे । साधनादीनां कथं स्वार्थानुमानाङ्गत्वमित्यपेक्षायामाह—**तत्रे**ति । **तत्र**=धर्मिसाध्यसाधनानां मध्ये । अन्ते उद्दिष्टस्याऽपि साधनस्य प्रथममङ्गत्वोपपादनमनुमितिहेतुत्वेन तत्र तस्य प्राधान्यमिति ख्यापनाय । **गम्यत्वेन**= अनुमितिविषयत्वेन, **अङ्ग**मित्यनुवर्त्तते । साध्यमनुमित्या कुत्र विधेयमित्याकाङ्क्षायामाधारोऽप्यवश्यं साध्यस्योद्देश्यतयाऽनुमितावङ्गमित्याह-**धर्मी**ति । **अङ्ग**मिति सम्बध्यते । अत्र हेतुमाह—**आधारविशेषे**ति ।

पक्षो हेतुरिति द्वयमेव स्वार्थानुमानेऽङ्गम् । पक्षश्च साध्यविशिष्टो धर्मी । तथा च विशेषणविशेष्याभ्यां कथञ्चिदभिन्नस्य विशिष्टस्याऽङ्गत्वे, तदभिन्नस्य वह्न्यादिसाध्यस्वरूपधर्मात्मकविशेषणस्य पर्वतादिधर्मिविशेषस्वरूपविशेष्यस्य चाऽङ्गत्वं प्राप्तमेवेति पक्षान्तरमुपदर्शयति-

**अथवा पक्षो हेतुरित्यङ्गद्वयं स्वार्थानुमाने—साध्यधर्मविशिष्टस्य धर्मिणः पक्षत्वाद्, इति धर्मधर्मिभेदाभेदविवक्षया पक्षद्वयं द्रष्टव्यम् ।**

साध्यरूपधर्मस्य पृथगङ्गत्वं धर्मिविशेषस्य च पृथगङ्गत्वमिति धर्मधर्मिणोर्भेदविवक्षया प्रथमः पक्षः । तदभिन्नाभिन्नस्य तदभिन्नत्वमिति नियमतो विशेषणाभिन्नविशिष्टाभिन्नस्य विशेष्यरूपधर्मिणो विशेषणीभूतधर्माभिन्नत्वमित्येवं धर्मधर्मिणोरभेदविवक्षया च द्वितीयः पक्षः । **स्याद्वादे** सर्वस्य घटमानत्वादित्याशयेनाऽऽह—**धर्मधर्मी**ति ।

पूर्वं पक्षापरपर्यायः तद्विशिष्टः प्रसिद्धो धर्मीत्युक्तम्, तत्र धर्मिणः प्रसिद्धिः कथमित्य-

पेक्षायामाह–

**धर्मिणः प्रसिद्धिश्च-क्वचित् प्रमाणात्, क्वचिद् विकल्पात्, क्वचित् प्रमाण-विकल्पाभ्याम् ।**

तेषां स्वरूपमुपदर्शयति–

**तत्र निश्चितप्रामाण्यकप्रत्यक्षाद्यन्यतमावधृतत्वं प्रमाणप्रसिद्धत्वम् । अनिश्चित-प्रामाण्याप्रामाण्यप्रत्ययगोचरत्वं विकल्पप्रसिद्धत्वम् । तद्द्वयविषयत्वं प्रमाण-विकल्पप्रसिद्धत्वम् ।**

**तत्र**=प्रमाणप्रसिद्धत्व-विकल्पप्रसिद्धत्व-प्रमाणविकल्पोभयप्रसिद्धत्वानां मध्ये । **प्रत्यक्षादी**त्यादिपदात् परोक्षप्रकाराणां स्मृतिप्रत्यभिज्ञातर्कानुमानागमानामुपग्रहः । **अवधृतत्वं** निश्चितत्वम् । 'शब्दानुपाती वस्तुशून्यो विकल्प' इति परलक्षितविकल्पस्य वस्तुमात्रविषय-कत्वाभावेन निर्णीततया, तत्प्रसिद्धत्वमसम्भवदुक्तिकमित्यतो विकल्पप्रसिद्धत्वमन्यथा निर्वक्ति-**अनिश्चिते**ति । न निश्चितमनिश्चितम्, अनिश्चिते प्रामाण्याप्रामाण्ये यस्य सोऽनिश्चित-प्रामाण्याप्रामाण्यः, तादृशो यः प्रत्ययः=ज्ञानम्, तद्गोचरत्वं=तद्विषयत्वम्, तदेव विकल्प-प्रसिद्धत्वमिह विवक्षितमित्यर्थः । तद्द्वयविषयत्वं=निश्चितप्रामाण्यकप्रत्यक्षाद्यन्यतमप्रमाण-अनिश्चित-प्रामाण्याप्रामाण्यप्रत्ययोभयविषयत्वम् ।

तत्र प्रमाणप्रसिद्धं धर्मिणमुदाहरति–

**तत्र प्रमाणसिद्धो धर्मी यथा धूमवत्त्वादग्निमत्त्वे साध्ये पर्वतः, स खलु प्रत्यक्षेणाऽनुभूयते ।**

**तत्र**=निरुक्तत्रयाणां मध्ये, **स**=पर्वतः ।

विकल्पसिद्धं धर्मिणं दर्शयति–

**विकल्पसिद्धो धर्मी यथा 'सर्वज्ञोऽस्ति-सुनिश्चितासम्भवद्बाधकप्रमाणत्वा'दि-त्यस्तित्वे साध्ये सर्वज्ञः, अथवा 'खरविषाणं नाऽस्ती'ति नास्तित्वे साध्ये खरविषाणम् । अत्र हि सर्वज्ञखरविषाणेऽस्तित्वनास्तित्वसिद्धिभ्यां प्राग् विकल्पसिद्धे ।**

**अत्र**=सर्वज्ञोऽस्तीत्यनुमाने, खरविषाणं नाऽस्तीत्यनुमाने च, **हि**=यतः ।

उभयसिद्धं धर्मिणमुदाहरति–

**उभयसिद्धो धर्मी यथा 'शब्दः-परिणामी-कृतकत्वा'दित्यत्र शब्दः । स हि वर्त्तमानः प्रत्यक्षगम्यः, भूतो भविष्यन् च विकल्पगम्यः, स सर्वोऽपि धर्मीति प्रमाण-**

**विकल्पसिद्धो धर्मी ।**

**स**=शब्दः, **हि**=यतः । **वर्तमान** इति । वादिप्रतिवादिकर्णविवरवर्त्ती सन् वर्त्तमान-कालीत्यर्थः । यस्तु वर्त्तमानोऽपि न वादिप्रतिवादिकर्णविवरवर्त्ती स भूतभविष्यशब्दवद् विकल्पसिद्ध एवेति बोध्यः ।

'सर्वज्ञोऽस्ती'त्यनुमानम्, सर्वज्ञानभ्युपगन्तृ**मीमांसका**दीन् प्रतिवादिनः प्रति, सर्वज्ञाभ्युपगन्त्रा **जैना**दिना क्रियते । ततो यद्यपि वाद्यपेक्षयाऽऽगमप्रमाणसिद्ध एव सः, तथापि सर्वज्ञप्रतिपादक आगमो न **मीमांसका**दीन् प्रति निश्चितप्रामाण्यक इति विकल्पसिद्धत्वं तस्य पूर्वमभिहितम् ।

'खरविषाणं नाऽस्ती'त्यनुमानं तु—'असतः खरविषाणादेः ख्यातिरेव नाऽस्तीति तस्य सत्त्वमसत्त्वं वेति पृच्छायां मूकीभवनमेव न्याय्यम्, तत्र विधिनिषेधवचनान्यतरोद्गारवाच्यत्वे प्रमेयत्वस्याऽपि प्रसक्ततया निर्धर्मकत्वाभावतोऽलीकत्वमेव भज्येते'त्यादियुक्तिजालं पुरस्कुर्वतो **नैयायिका**दीन् प्रति—**स्याद्वादि**ना क्रियते । 'असतो नाऽस्ति निषेध' इति त्वेकनयमाश्रित्य । अत्रैव[1] वा ग्रन्थकारोऽस्योपपत्तिं करिष्यति । अन्यथा 'विधिनिषेधयोरेकाभावेऽपरस्याऽवश्यम्भाव' इति निषेधाभावे सत्त्वमेव प्रसज्यते । तत्र कथायां मूकीभवने निगृहीत एव वादी स्यादतोऽनुमानेन नास्तित्वं तस्य साधनीयमेव । तथा च निश्चितप्रामाण्यकप्रत्यक्षादिसिद्धत्वं वादिप्रतिवाद्युभयापेक्षयाऽपि खरविषाणादेर्नाऽस्त्येव । अस्ति च 'खरविषाण'मिति प्रत्ययः । स च खरविषाणनास्तित्वानुमितितः प्राग् यथा प्रामाण्येन न निश्चितः तथाऽप्रामाण्येनाऽपीति भवति तद्विषयत्वाद् विकल्पसिद्धत्वमित्यभिप्रायेण खरविषाणस्याऽपि विकल्पसिद्धत्वं प्रागभिहितम् ।

'शब्दः परिणामी'त्यनुमानं तु **नैयायिका**दीन् प्रति **जैनेन** क्रियते । तत्र तु शब्दत्वेन सर्वोऽपि शब्दः पक्षीकृत इति वर्त्तमानस्य तस्य वादिप्रतिवाद्युभयापेक्षयैव प्रत्यक्षप्रमाणसिद्धत्वेऽपि, भूतभविष्ययोश्च शब्दयोः पक्षीकृतयोर्न विशेषतोऽस्मदादिप्रत्यक्षविषयत्वमिति तज्ज्ञानमनिश्चितप्रामाण्याप्रामाण्यकमेव तं प्रतीति तद्विषयत्वात् तयोर्विकल्पसिद्धत्वमिति कृत्वा शब्दरूपो धर्मी प्रमाणविकल्पोभयसिद्ध इत्यर्थः ।

यश्च प्रमाणसिद्धो धर्मी यो वा प्रमाणविकल्पोभयसिद्धः, तत्राऽमुकमेव साध्यं भवितुमर्हतीति नाऽस्ति नियमः; किन्तु यं यं धर्मं तत्र साधयितुमिच्छति वादी, स सर्वोऽपीच्छाविषयो धर्मः साध्यो भवितुमर्हति । विकल्पमात्रसिद्धे तु धर्मिण्यस्तित्वनास्तित्वान्यतरस्यैव साध्यत्वम्—अलब्धसत्ताके तस्मिन् धर्मान्तरस्य साधनायोग्यत्वादित्याह—

---

१. असतो नाऽस्ति निषेध इति पक्षे एव ।

**प्रमाणोभयसिद्धयोर्धर्मिणोः साध्ये कामचारः । विकल्पसिद्धे तु धर्मिणि सत्तासत्तयोरेव साध्यत्वमिति नियमः । तदुक्तं–'विकल्पसिद्धे तस्मिन् सत्तेतरे साध्ये' इति ।**

प्रमाणोभयसिद्धयोः=प्रमाणसिद्ध-प्रमाणविकल्पोभयसिद्धयोः । विकल्पसिद्धे धर्मिणि सत्त्वासत्त्वयोरेव साध्यत्वमित्यत्र प्राचां वचनं संवादकतया दर्शयति–**तदुक्त**मिति । **तस्मिन्**=धर्मिणि, **सत्तेतरे**=सत्त्वासत्त्वे ।

विकल्पसिद्धे सर्वज्ञधर्मिणि सत्त्वसाधनमसहमानस्य बौद्धस्य मतं प्रतिक्षेप्तुमुपन्यस्यति–

**अत्र बौद्धः-सत्तामात्रस्याऽनभीप्सितत्वाद् विशिष्टसत्तासाधने वाऽनन्वयाद्, विकल्पसिद्धे धर्मिणि न सत्ता साध्या-इत्याह;**

**अत्र**=धर्मिणो विकल्पसिद्धत्वे । **बौद्ध** इत्यस्य **आह** इत्यनेन सम्बन्धः । तद्वक्तव्यमुपदर्शयति-**सत्तामात्रस्ये**ति । **अनभीप्सितत्वाद्**=वादिनो जैनस्याऽनभिलषितत्वाद् । **विशिष्टसत्तासाधने**=सर्वज्ञवृत्तित्वविशिष्टसत्तासाधने, **वा**=अथवा, अस्य पूर्वमेवाऽन्वयः, **अनन्वयात्**=सुनिश्चितासम्भवद्बाधकप्रमाणत्वेन हेतुना सममन्वयस्य=व्याप्तेरसिद्ध्याऽभावात्। न हि 'यत्र सुनिश्चितासम्भवद्बाधकप्रमाणत्वं तत्र सर्वज्ञवृत्तित्वविशिष्टसत्त्वमित्यन्वयग्रहोऽस्ति । दृष्टान्ते एव तु व्याप्तिग्रहो वाच्यः, [स च न सम्भवति-] तत्र सर्वज्ञवृत्तित्वविशिष्टसत्त्वस्याऽभावात् । पक्षे एव तु व्याप्तिग्रहाभ्युपगमे, तत एव सर्वज्ञस्याऽसिद्धत्वादनुमानवैफल्यमित्यभिसन्धिः । ततश्च विकल्पसिद्धे सर्वज्ञे धर्मिणि न सत्ता साध्या=सत्त्वं साध्यम्=अनुमितिविषयो न भवति ।

**तदसत्, इत्थं सति प्रकृतानुमानस्याऽपि भङ्गप्रसङ्गाद्-वह्निमात्रस्याऽनभीप्सितत्वाद्, विशिष्टवह्नेश्चाऽनन्वयादिति ।**

**तदसद्**=एतद् **बौद्ध**मतमयुक्तम् । तत्र हेतुमाह–**इत्थं सती**ति । उक्तप्रकारेण सर्वज्ञधर्मिणि सत्त्वानुमानस्य निराकरणे सति, **प्रकृतानुमानस्याऽपि**='पर्वतो वह्निमा'निति सर्वजनप्रसिद्धानुमानस्याऽपि । अत्र सर्वजनप्रसिद्धत्वमेव प्रकृतत्वं-'पर्वतो वह्निमा'नित्यनुमानस्येदानीं प्रस्तावाभावेन प्रस्तुतत्वलक्षणप्रकृतत्वस्य तत्राऽघटनात् ।

कथं 'पर्वतो वह्निमा'नित्यनुमानस्य भङ्ग इत्यपेक्षायामाह–**वह्नी**ति । **वह्निमात्रस्य**=वह्निसामान्यस्य, **अनभीप्सितत्वात्**=पर्वतगततया वह्नेः साधनाय यतमानस्य वादिनः 'पर्वते वह्निमनुमिनुया'मितीच्छाया एव भावेन वह्निसामान्यस्य तदविषयत्वाद्, वह्निसामान्यस्य सिद्धत्वेन तत्रेच्छाया असम्भवाच्च । **विशिष्टवह्नेश्च**=पर्वतीयत्वविशिष्टवह्नेश्च, **अनन्वयाद्**=धूमेन हेतुना सममन्वयस्य व्याप्तेरसिद्ध्याऽभावाद्, महानसरूपदृष्टान्ते एव तयोरन्वयग्रहो वाच्यः, स च न सम्भवति–महानसे धूमस्य सत्त्वेऽपि पर्वतीयवह्निरूपसाध्यस्याऽभावादित्यर्थः ।

तथाच यथा तत्र वह्निधूमसामान्ययोरेव व्याप्तिग्रहः, हेतोः पर्वते ग्रहणाच्च पर्वतीयवह्निसिद्धिः, तथा प्रकृतानुमानेऽप्यस्तित्व-सुनिश्चितासम्भवद्बाधकप्रमाणत्वयोरेव व्याप्तिग्रहः, सर्वज्ञे धर्मिणि सुनिश्चितासम्भवद्बाधकप्रमाणत्वग्रहाच्च तत्र सत्त्वसिद्धिरिति किमनुपपन्नमिति भावः ।

पुनर्दुर्दुरूढो **बौद्धः** सत्त्वसाधकहेतूनेव विकल्पकवले प्रक्षिपन् सर्वज्ञधर्मिकसत्त्वसाधकानुमित्युन्मूलनाय शङ्कते—

**अथ तत्र सत्तायां साध्यायां तद्धेतुः-भावधर्मः, भावाभावधर्मः, अभावधर्मो वा स्यात् ? आद्येऽसिद्धिः-असिद्धसत्ताके भावधर्मासिद्धेः । द्वितीये व्यभिचारः-अस्तित्वाभाववत्यपि वृत्तेः । तृतीये च विरोधो—अभावधर्मस्य भावे क्वचिदप्यसम्भवात् । तदुक्तम्—**

**"नाऽसिद्धे भावधर्मोऽस्ति, व्यभिचार्युभयाश्रयः ।**
**धर्मो विरुद्धोऽभावस्य, सा सत्ता साध्यते कथम् ? ॥" इति चेद्,**

**तत्र**=सर्वज्ञे, **तद्धेतुः**=सत्त्वसाधकहेतुः । **आद्ये**=भावधर्मस्य हेतूकरणे **असिद्धिः**=सर्वज्ञे धर्मिणि भावधर्मरूपहेतोः सिद्ध्यभावः । तत्र हेतुमाह—**असिद्धसत्ताक** इति । असिद्धा सत्ता यस्य सोऽसिद्धसत्ताकः, तस्मिन् सर्वज्ञे धर्मिणि, **भावधर्मासिद्धेः**=भावधर्मो हि भावरूपधर्मिणि वर्त्तते, सर्वज्ञस्य त्वद्याऽपि सत्तैव न सिद्धा, तामन्तरेण न भावत्वमिति भावधर्मलक्षणहेतोः तत्राऽसिद्धेः ।

**द्वितीये**=भावाभावधर्मस्य सत्तासाधकहेतुत्वमिति कल्पे, **व्यभिचारः**=अस्तित्वलक्षणा सत्ता विधिस्वरूपे भावे एव वर्त्तते, भावाभावधर्मश्च भावेऽस्तित्वाभाववत्यभावे च वर्त्तते इत्यनैकान्तिकत्वम् । व्यभिचारमेव ग्राहयति-**अस्तित्वाभावेति** । **तृतीये**=अभावधर्मो हेतुरिति पक्षे पुनः, **विरोधः**=अस्तित्वरूपसाध्यासामानाधिकरण्यम् । अत्रैव हेतुमाह—**अभावधर्मस्येति** । उक्तार्थम् ।

वृद्धवचनेन संवादयति—**तदुक्तमिति** । **असिद्धे** इति । असिद्धसत्ताके सर्वज्ञधर्मिणि भावधर्मलक्षणो हेतुर्नाऽस्ति । **उभयाश्रयः**=भावाभावोभयधर्मलक्षणो हेतु**र्व्यभिचारी**=अनैकान्तिकः । **अभावस्य धर्मो**=अभावधर्मलक्षणो हेतु**र्विरुद्धः**=सत्तारूपसाध्यासमानाधिकरणः । ततश्च, **सा सत्ता**=सर्वज्ञवर्तिनी सत्ता, **कथं साध्यते**=न कथञ्चिदपि साधयितुं शक्येति ।

उक्ताशङ्कां प्रतिक्षिपति—

**न, इत्थं वह्निमद्धर्मत्वादिविकल्पैर्धूमेन वह्न्यनुमानस्योच्छेदापत्तेः ।**

**इत्थम्**=उक्तविकल्पत्रयकवलीकरणेन सत्तासाधकहेत्वपाकरणेन सत्तासाध्यकानुमान-निराकरणे । **वह्निमद्धर्मत्वादिविकल्पै**रिति । 'पर्वतो-वह्निमान्-धूमा'दित्यत्र वह्नौ साध्ये, तद्धेतुर्धूमो वह्निमद्धर्मो वह्निमदवह्निमद्धर्मोऽवह्निमद्धर्मो वा स्यात् । आद्ये-पर्वतस्याऽनुमानात् प्राग् वह्निमत्त्वानिश्चये, तदीयो धूमो न वह्निमद्धर्मतया निश्चितः, किन्तु महानसीयधूम एव, स पर्वतेऽसिद्धः कथं वह्निं साधयेत् ? द्वितीये व्यभिचारः-वह्न्यभाववत्यपि तस्य वृत्तेः । तृतीये विरुद्धः-अवह्निमद्धर्मस्य धूमस्य क्वचिदपि वह्निमत्यभावादित्येवं विकल्पग्रासैर्धूमेन **वह्न्य-नुमानस्याऽप्युच्छेदप्रसङ्गा**दित्यर्थः ।

'प्रमेयसिद्धिः प्रमाणाद् ही'ति वचनात् प्रमाणेनैव वस्तुसिद्धिर्भवति । विकल्पस्तु न प्रमाणम्, ततो विकल्पसिद्धिर्न भवत्येव । तथा च प्रमाणप्रसिद्धत्वमेकमेव धर्मिणो, न विकल्पप्रसिद्धत्वं नाऽपि प्रमाणविकल्पोभयप्रसिद्धत्वमिति **नैयायिक**मतस्योपन्यासपूर्वक-मयुक्तत्वं प्रपञ्चयति—

**विकल्पस्याऽप्रमाणत्वाद् विकल्पसिद्धो धर्मी नाऽस्त्येवेति नैयायिकः । तस्येत्थंवचनस्यैवाऽनुपपत्तेः तूष्णीम्भावापत्तिः—विकल्पसिद्धधर्मिणोऽप्रसिद्धौ तत्प्रतिषेधानुपपत्तेरिति ।**

**तस्य=नैयायिकस्य, इत्थंवचनस्य**='विकल्पसिद्धो धर्मी नाऽस्ती'त्येवंरूपवचनस्य । कथमीदृग्वचनस्याऽनुपपत्तिरित्याकाङ्क्षायामाह—**विकल्पसिद्धधर्मिण** इति । प्रसिद्धस्यैव प्रतिषेधो भवति—प्रतियोगिनिरूप्यत्वादभावस्य, विकल्पस्याऽप्रसिद्धौ तन्निरूप्यनिरूपणानुप-पत्तिः । 'विकल्पसिद्धो धर्मी नाऽस्ती'त्यनेन वचनेन विकल्पसिद्धधर्मिणो निषेधः क्रियते **नैयायिके**न, तन्निषेधस्य च प्रतियोगी विकल्पसिद्धो धर्मी, तस्य चाऽप्रसिद्धौ तत्प्रतिषेधस्य 'विकल्पसिद्धो धर्मी नाऽस्ती'त्येवंरूपस्याऽनुपपत्तेः । 'एतद्विषये भवतु तूष्णीम्भावापत्तिरेवा-ऽस्माक'मित्येवमिष्टपादप्रसारिका च न निस्ताराय **नैयायिकस्य**-कथायां तूष्णीम्भावस्याऽपि निग्रहस्थानत्वादिति भावः ।

ननु 'असतो नत्थि निसेहो' इति [१]भवतामपि सिद्धान्तवचनमसन्निषेधप्रतिक्षेपकं जागर्त्येव । तथा च **नैयायिकवद्** भवन्तोऽपि [२]नाऽसत्ख्यातिमुरीकुर्वन्तीति अभावांशेऽसतः प्रतियोगिनो विशेषणतया भानस्याऽसत्ख्यातिभयादनभ्युपगमे सति, 'शशशृङ्गं नाऽस्ती'ति वाक्यात् प्रतियोगितासम्बन्धेन शशशृङ्गप्रकारकाभावविशेष्यकबोधस्याऽनुपपत्तौ, तदर्थं

१. जैनानाम् ।

२. असतः ख्यातिरित्यसत्ख्यातिः ।

'शशशृङ्गं नाऽस्ती'ति वचनलक्षणव्यवहारस्याऽप्यसम्भवे, अत्राऽर्थे भवतामपि मूकीभवनमेव न्याय्यमिति—

"यत्रोभयोः समो दोषः, परिहारोऽपि वा समः ।
नैकः पर्यनुयोज्यः स्यात्, तादृश्यर्थविचारणे ॥"

इति वचनाद् न **नैयायिकं** प्रति तूष्णीम्भावापत्तिर्दूषणं भवद्भिरासञ्जनीयमित्या-शङ्काशङ्कून्मूलनायाऽऽह—

**इदं त्ववधेयम्**-

---

'ननु विकल्पसिद्धो धर्मी नास्ति' इत्यादिवचनस्य उपपत्त्यसंभवप्रतिपादनेन विकल्प-सिद्धधर्म्यनङ्गीकारवतो **नैयायिकान्** प्रति यद् मौनापत्तिरूपं दूषणं दत्तं तद् **जैनमते**ऽपि समानम्, तत्रापि हि 'असतो नत्थि निसेहो' इति भाष्यानुरोधेन असत्ख्यात्यनभ्युपगमात् अभावांशे असतः प्रतियोगिनो विशेषणतया भानाऽसंभवात् 'शशशृङ्गं नाऽस्ति' इत्यादितः विशिष्टविषयक-शाब्दबोधानुपपत्त्या तादृशवचनव्यवहारस्य असम्भवात् इत्याशङ्कां निराकर्तुं तादृशस्थले शाब्द-बोधोपपादनाय अनुमित्युपपादनाय च ग्रन्थकारः स्वाभिप्रेतां प्रक्रियामादर्शयति '**इदं त्ववधेयम्**' इत्यादिना ।

अयं भावः-विकल्पसिद्धधर्मिस्थलीये शाब्दबोधे अनुमितौ वा विकल्पसिद्धस्य धर्मिणो भाने त्रय एव पक्षाः सम्भवन्ति, तथाहि—तस्य अखण्डस्यैव वा भानम्, विशिष्टरूपतया वा, खण्डशः प्रसिद्धतया वा । तत्र स्वसिद्धान्तविरोधितया प्रथमपक्षो नाऽङ्गीकर्तुं शक्यते । जैनसिद्धान्ते हि सर्वत्रापि ज्ञाने सत एव भानाभ्युपगमेन असतो भानस्य सर्वथा अनभिमतत्वात् । विकल्पसिद्ध-धर्मिणः प्रमाणासिद्धत्वेन अखण्डस्याऽसत्त्वात् अखण्डतद्भानाभ्युपगमे असद्भानस्याऽवर्जनीयत्व-मेव । द्वितीयपक्षस्तु कथञ्चिदभ्युपगमार्हः । यत्र स्थले 'शशशृङ्गं नाऽस्ति' इत्यादौ 'शृङ्गं शशीयं न वा' इत्यादिर्न संशयः, न वा 'शृङ्गं शशीयं न' इति बाधनिश्चयस्तत्र अभावांशे शशीयत्वविशेषण-विशिष्टस्य शृङ्गस्य भाने बाधकाभावात् । यत्र च स्थले तादृशः विशेषणसंशयः तादृशो विशेषणबाधनिश्चयो वा तत्र विशिष्टभानासम्भवेऽपि 'शृङ्गे शशीयत्वज्ञानं जायताम्' इतीच्छाजनितं बाधनिश्चयकालीनमाहार्यज्ञानं सम्भवत्येव । तथा च 'शशशृङ्गं नाऽस्ति' इत्यादिशाब्दबोधे 'एतत् स्थानं शशशृङ्गाभाववत्' इत्याद्यनुमितौ वा अभावांशे प्रतियोगितया भासमाने शृङ्गांशे शशीयत्व-विशेषणस्य आहार्यभानोपपत्त्या प्रतिवादिपरिकल्पितविपरीतारोपनिराकरणाय तादृशस्य शब्दस्य तादृश्या वा अनुमितेः सुसम्भवत्वमेव । इत्थं च द्वितीयपक्षस्य उपपाद्यत्वेऽपि तत्र अनु-मितेराहार्यात्मकत्वमेकदेशीयाभिमतमेव कल्पनीयमिति तत्पक्षपरित्यागेन सर्वथा निर्दोषस्तृतीयपक्ष एव आश्रयितुमुचित इति मत्वा ग्रन्थकारेण '**वस्तुतः**' [पृ० १५. पं. ४.] इत्यादिना अन्ते खण्डशः प्रसिद्धपदार्थभानगोचरस्तृतीयपक्ष एव समाश्रितः । तथा च 'शशशृङ्गं नाऽस्ति' इत्यादौ अभावांशे

विकल्पसिद्धधर्मिणो भानं त्रिधा सम्भाव्येत । तद्यथा—१. 'शशशृङ्गं नाऽस्ती'ति वाक्याद् जायमाने, 'शशशृङ्गं नाऽस्ति-अनुपलम्भा'दित्यनुमानसमुद्भवे वा बोधेऽखण्डस्य शशशृङ्गस्य भानम् । अर्थात् प्रतियोगित्वसम्बन्धेनाऽखण्डशशशृङ्गप्रकारकोऽभावविशेष्यकः शाब्दबोधः, अखण्डशशशृङ्गविशेष्यिका नास्तित्वप्रकारिकाऽनुमितिर्वा । २. विशिष्टरूपतया वा शशशृङ्गस्य भानम् । अर्थादुक्तवाक्यजन्यबोधे शशीयत्वविशिष्टशृङ्गं प्रतियोगित्वसम्बन्धेनाऽभावे प्रकारतया भासते, अनुमितौ तु शशीयत्वविशिष्टशृङ्गे नास्तित्वं प्रकारतया भासते । ३. खण्डशः प्रसिद्धतया वा शशशृङ्गस्य भानम् । अर्थात् शाब्दबोधे—अभावे प्रतियोगितया शृङ्गस्य, शृङ्गे च शशपदलक्षणोपस्थितस्य शशसम्बन्धिनः तादात्म्येन भानम्; अनुमितौ पुनः शशीयत्वं नास्तित्वरूपाभावे प्रतियोगितया, अभावस्य पुनः शृङ्गे प्रकारतया, शृङ्गे शशीयत्वं नाऽस्तीत्येवं भानम्, अथवा शशस्याऽभावविशेष्यतया, शृङ्गस्य चाऽभावविशेषणतया, शशे शृङ्गं नाऽस्ती-त्येवं भानम् ।

तत्राऽखण्डस्य खरविषाणादेर्भानमिति प्रथमपक्षो न सम्भवतीत्याह-

**विकल्पसिद्धस्य धर्मिणो नाऽखण्डस्यैव भानम्-असत्ख्यातिप्रसङ्गादिति ।**

**भानमिति** । एवमभ्युपगमेऽसत्ख्यातिवाद आहृतः स्यात्, स च **जैना**नामनिष्ट इत्याह— **असदिति** । असतः=खरविषाणादेः, ख्यातिः=ज्ञानं, तस्य प्रसङ्गादित्यर्थः ।

विकल्पप्रसिद्धस्य शाब्दबोधादौ विशिष्टरूपतया भानमिति द्वितीयपक्षमधिकृत्याऽऽह—

**शब्दादेर्विशिष्टस्य तस्य भानाभ्युपगमे, विशेषणस्य संशयेऽभावनिश्चये वा वैशिष्ट्यभानानुपपत्तेः, विशेषणाद्यंशे आहार्यारोपरूपा विकल्पात्मिकैवाऽनुमितिः स्वीकर्त्तव्या-देशकालसत्तालक्षणास्तित्वस्य सकलदेशकालसत्ताऽभावलक्षणस्य च**

---

नाऽखण्डस्याऽसतः शशशृङ्गस्य भानम्, न वा शशीयत्ववैशिष्ट्यस्य आहार्यभानम्, किन्तु प्रसिद्ध एव शृङ्गांशे प्रसिद्धस्यैव शशीयत्वस्य अभावो भासते । तथा च 'ऐकान्तनित्यमर्थक्रियासमर्थं न भवति, क्रमयौगपद्याभावात्' इत्यादिरूपायां **जैन**स्थापनायामेकान्तनित्यस्य **जैनमते** सर्वथाऽसम्भवेऽपि तादृशस्थले अनित्यत्वासमानाधिकरणरूपनित्यत्वस्य खण्डशः प्रसिद्धतया खण्डशः प्रसिद्ध-तादृशपक्षविषयातायाः अर्थक्रियासामर्थ्याभावसाध्यिकायाः क्रमयौगपद्यनिरूपकत्वाभावहेतुकायाः 'एकान्तनित्यत्वमर्थक्रियासामर्थ्यानियामकं क्रमयौगपद्यनिरूपकत्वाभावात्' इत्याकारिकायाः अनुमितेर्निर्बाधसम्भवेन न तादृशी **जैन**स्थापना विरुध्यते ।

**'शब्दादेः'**-शब्दात्, 'आदि'पदेन व्याप्तिज्ञानादेः परिग्रहात् व्याप्तिज्ञानादेः सकाशादित्यर्थः ।

**'विकल्पात्मिकैव'**—अनुमितेः शब्दज्ञानानुपातित्वानियमेन शब्दज्ञानानुपाति विकल्प-

**नास्तित्वस्य साधनेन परपरिकल्पितविपरीतारोपव्यवच्छेदमात्रस्य फलत्वात् ।**

**आदिपदादनुमानस्योपग्रहः**, तथा च शब्दादनुमानाद् वेति तदर्थः । **विशिष्टस्य**=खरीयत्वविशिष्टविषाणादेः, **तस्य**=विकल्पसिद्धस्य । **विशेषणस्य संशये**='विषाणं खरीयं न वे'त्येवं विषाणरूपविशेष्ये खरीयत्वरूपविशेषणस्य संशये सति, **अभावनिश्चये वा**='विषाणं खरीयं ने'त्याकारकविषाणविशेष्यकखरीयत्वाभावप्रकारकबाधनिश्चये सति वा, **वैशिष्ट्यभानानुपपत्तेः**=खरीयत्वविशिष्टविषाणस्य प्रतियोगितया वैशिष्ट्यस्य यद् अभावे[१] भानं शाब्दबोधे, यच्च खरीयत्वविशिष्टविषाणे नास्तित्वस्य वैशिष्ट्यभानमनुमितौ, तस्याऽनुपपत्तेः ।

विशिष्टवैशिष्ट्यावगाहिबोधे विशेषणतावच्छेदकप्रकारकनिश्चयस्य कारणत्वेन, प्रकृतेऽभावे विशेषणं विषाणम्, तत्र विशेषणं खरीयत्वमिति तद् विशेषणतावच्छेदकम्, तत्प्रकारको निश्चयो विषाणं खरीयमित्याकारकः, स च 'विषाणं खरीयं न वे'ति संशयकाले 'विषाणं खरीयं ने'ति बाधनिश्चयदशायां वा नाऽस्तीति तदानीं 'खरविषाणं नाऽस्ती'ति वाक्यतः प्रतियोगित्वसम्बन्धेन खरीयत्वविशिष्टविषाणप्रकारकाभावविशेष्यकबोधलक्षणविशिष्टवैशिष्ट्यबोधस्याऽनुपपत्तिः ।

विशिष्टस्य वैशिष्ट्यं विशिष्टवैशिष्ट्यम्, तदवगाहिबोधे विशेषणतावच्छेदकप्रकारकनिश्चयस्य कारणत्वमित्याश्रित्य विशिष्टवैशिष्ट्यावगाहिशाब्दबोधानुपपत्तिरुक्तदिशा भाविता । खरीयत्वविशिष्टविषाणविशेष्यकनास्तित्वप्रकारकानुमितौ गतिः तु—विशिष्टे वैशिष्ट्यं विशिष्टवैशिष्ट्यम्, तदवगाहिबोधे विशेषणतावच्छेदकप्रकारकनिश्चयस्य कारणत्वमिति खरीयत्वविशिष्टविषाणे नास्तित्वस्य वैशिष्ट्यावगाह्यनुमितिर्भवति विशिष्टवैशिष्ट्यावगाहिर्बोधः । तस्य 'विषाणं खरीयं न वे'ति संशयकाले 'विषाणं खरीयं ने'ति बाधनिश्चयकाले वा 'विषाणं खरीय'मित्याकारकखरीयत्वलक्षणविशेषणतावच्छेदकप्रकारकनिश्चयरूपकारणाभावाद् भवत्यनुपपत्तिरिति ।

तथा चाऽनाहार्यभ्रमरूपायाः प्रमारूपाया वोक्तानुमितेरसम्भवेऽपि, आहार्यारोपरूपा सोक्तसंशयबाधनिश्चयकालयोः स्यादेव । बाधनिश्चयकाले इच्छाजन्यज्ञानस्यैवाऽऽहार्यतया, तस्य बाधनिश्चयाप्रतिबध्यत्येन, तत्काले सम्भवो न विरुध्यते । प्रकृते खरविषाणविशेष्यकनास्तित्वप्रकारकानुमितिर्यद्यपि नास्तित्वरूपप्रकारांशे नाऽऽहार्यरूपा—नास्तित्वाभावस्याऽस्तित्वस्य

---

रूपत्वाभावेऽपि वस्तुशून्यविकल्पसदृशतया विकल्पात्मिकेत्युक्तम् । तथा च विकल्पाकारवृत्तिसदृशी इत्यर्थः ।

---

१. खरीयत्वविशिष्टविषाणप्रतियोगिकोऽभावः ।

खरविषाणे निश्चयाभावात्, तथापि सा विषाणे खरीयत्वप्रकारकतया, तत्र खरीयत्वाभावनिश्चयरूपबाधनिश्चयसद्भावेन, तदानीं 'विषाणे खरीयत्वज्ञानं मे जायता'मितीच्छातः सद्भूता खरीयत्वरूपविशेषणांशे आहार्यारोपरूपैव ।

यद्यपि आहार्यरूपं मानसप्रत्यक्षमेव भवति, न तु परोक्षज्ञानं-तस्याऽनाहार्यस्यैव व्यवस्थितेरिति परोक्षज्ञानरूपाऽनुमितिर्नाऽऽहार्यतया स्वीकर्तुमुचिता, तथापि **प्राचीननैयायिकैः** 'प्रत्यक्षस्यैव संशयत्वम्, न तु परोक्षज्ञानस्य-परोक्षप्रमाणानां निश्चयमात्रजनकत्वस्वभावा'-दित्येवमुरीकृतेऽपि, **सौन्दडोपाध्यायैः** यथा सत्प्रतिपक्षस्थले संशयकारानुमितिरुररीक्रियते, तथैकदेशिभिराहार्यारोपाऽप्यनुमितिः कक्षीकृतैव ।

तादृश्यप्यनुमितिर्न निष्फला—सर्वज्ञे परपरिकल्पितस्य देशकालसत्तालक्षणास्तित्व-विपरीत-सकलदेशकालसत्त्वाभावात्मकनास्तित्वारोपस्य देशकालसत्तालक्षणास्तित्वसाधनेन, खरविषाणे परपरिकल्पितनिरुक्तनास्तित्वविपरीतदेशकालसत्तालक्षणास्तित्वारोपस्य तद्विपरीत-सकलदेशकालसत्त्वाभावलक्षणनास्तित्वसाधनेन च व्यवच्छेदस्यैव तत्फलत्वादित्याह—**विशेषणाद्यंशे**=विषाणे खरीयत्वादिरूपविशेषणांशे । **विकल्पात्मिकैवे**ति । अनिश्चित-प्रामाण्याप्रामाण्यकप्रत्ययरूपत्वमेवाऽत्र विकल्पात्मकत्वं बोध्यम्-अनुमितेः शब्दज्ञानानुपाति-त्वाभावेन परलक्षितस्य 'शब्दज्ञानानुपातित्वे सति वस्तुशून्यप्रत्ययत्व'रूपस्य विकल्प-त्वस्याऽभावात् । **देशकालेति** । यत्किञ्चिद्देशे यत्किञ्चित्काले च सत्त्वेऽप्यस्तित्वं निर्वहतीति सामान्यतो देशकालेत्युक्तम् । **सकलदेशकाले**ति । यत्किञ्चिद्देशकालसत्त्वं सत्त्वावच्छेदक-देशकालभिन्नदेशकालासत्त्वं च न विरुद्धमिति सतोऽपि देशान्तरकालान्तरसत्त्वाभावमादाय नास्तित्वं प्रसज्येतेत्यतः सकलदेशकालेत्युक्तम् । अन्यत् सुगमम् ।

विकल्पप्रसिद्धस्य धर्मिणः खण्डशः प्रसिद्धतया भानमिति तृतीयकल्पमेव स्व-सिद्धान्तीकुर्वन् आह—

**वस्तुतस्तु खण्डशः प्रसिद्धपदार्थास्तित्वनास्तित्वसाधनमेवोचितम् ।**

एतत्पक्षे एव **भाष्यसम्मति**मुपदर्शयति—

**अत एव 'असतो नत्थि निसेहो' इत्यादिभाष्यग्रन्थे 'खरविषाणं नाऽस्ती'त्यत्र 'खरे विषाणं नाऽस्ती'त्येवाऽर्थ उपपादितः ।**

**अत एव**=खण्डशः प्रसिद्धपदार्थास्तित्वनास्तित्वसाधनस्यैवोचितत्वादेव । **भाष्यग्रन्थे** इत्यस्य **उपपादित** इत्यनेनाऽन्वयः । एतत्पक्षेऽनुमितेराहार्यारोपरूपत्वाभावेऽपि न क्षतिः ।

नन्वत्र कल्पेऽसतो निषेधासम्भवं कक्षीकृत्योररीकृते, 'खरविषाणं नाऽस्ती'त्यनुमानस्य

'खरे विषाणं नाऽस्ती'त्येवंरूपतयोपपादनेऽपि, 'एकान्तनित्यमर्थक्रियासमर्थं न भवती'त्यनुमानस्य का गतिः ? तत्र खण्डशः प्रसिद्धिकरणप्रकारानुपलक्षणाद्, एकान्तनित्ये चाऽसति अर्थक्रियासामर्थ्यस्याऽप्यसत्तया तन्निषेधासम्भवादित्यत आह–

**'एकान्तनित्यमर्थक्रियासमर्थं न भवति–क्रमयौगपद्याभावा'दित्यत्राऽपि विशेषावमर्शदशायां क्रमयौगपद्यनिरूपकत्वाभावेनाऽर्थक्रियानियामकत्वाभावो नित्यत्वादौ सुसाध इति सम्यग् निभालनीयं स्वपरसमयदत्तदृष्टिभिः ।**

**विशेषावमर्शदशायामिति** । विशेषः=साध्यव्याप्यत्वेन गृहीतो हेतुः, तस्याऽवमर्शः= साध्यधर्माधारे ग्रहणम्, तद्दशायां=तस्मिन् सति । एतेनाऽनुमितिकारणयोरविनाभावलक्षणसम्बन्धस्मरण-हेतुग्रहणयोः सम्पत्तिरावेदिता । यद्यपि विशेषावमर्शो=विशेषदर्शनम्, तच्च परमते 'साध्यव्याप्यहेतुमान् पक्ष' इति परामर्शात्मकं ज्ञानम्, तथापि **जैन**सिद्धान्ते परामर्शस्याऽनुमितिकारणत्वानङ्गीकारेणाऽकारणस्य तस्य सत्त्वाभिधानं न प्रकृतोपयोगीत्युक्त एवाऽर्थ आदर्त्तव्यः ।

तत्राऽपि इदानीं क्रमयौगपद्यनिरूपकत्वाभावस्य हेतुतया, अर्थक्रियानियामकत्वाभावस्य साध्यतया, नित्यत्वस्य च साध्याधारधर्मितयाऽनुमतत्वात् तदनुसारेणैव व्याप्तिस्मरणहेतुग्रहणे वाच्ये । अनुमानाकारश्च-नित्यत्वमर्थक्रियानियामकं न भवति–क्रमयौगपद्यनिरूपकत्वाभावादिति । तर्कोऽप्यत्र-नित्यत्वं यद्यर्थक्रियाया नियामकं भवेद्, अर्थक्रियाया अनुपरम एव भवेत्, कार्यमात्रस्य सदातनत्वं प्रसज्येतेति यावत् ।

**नित्यत्वादाविति** । इदं च नित्यत्वं न कूटस्थनित्यत्वं-तस्यैकान्तनित्यत्वपर्यवसितत्वेन **जैनो**पगमाविषयतया तत्पक्षत्वेऽसत्ख्यात्यापत्तेः, किन्तु अनित्यत्वसहचरितनित्यत्वरूपं कथञ्चिन्नित्यत्वमेव । तव अनित्यत्वसाहचर्यावच्छेदेन क्रमयौगपद्यनिरूपकत्वेऽपि अर्थक्रियानियामकत्वेऽपि च तदभावावच्छेदेन तयोरभावादिति बोध्यम् ।[१]

---

**'विशेषावमर्शदशायाम्'**–अर्थक्रियासामर्थ्याभावरूपसाध्यव्याप्यीभूतक्रमयौगपद्याभावरूपविशेषधर्मनिर्णयरूपपरामर्शदशायामित्यर्थः ।

**'नित्यत्वादौ'**–कूटस्थनित्यत्वस्य **जैनमते**ऽप्रसिद्धत्वेऽपि अनित्यत्वसमानाधिकरणनित्यत्वरूपस्य कथञ्चिन्नित्यत्वस्य प्रसिद्धतया तादृशे नित्यत्वे अनित्यत्वसामानाधिकरण्याभावाऽवच्छेदेन उक्ताभावः सुखेन साधयितुं शक्य इत्यर्थः ।

---

१. एकान्तनित्यम्–अर्थक्रियानिरूपकत्वाभाववत्–क्रमयौगपद्याभावादित्यस्य पूर्वतनमनुमानम्–एकान्तनित्यम्–असद्-अर्थक्रियानिरूपकत्वाभाववत्त्वादिति । वस्तुतोऽर्थक्रियासामर्थ्याभाव एवाऽसत्त्वम्, तथा च प्रकृतानुमानमपि एकान्तनित्येऽसत्त्वसाधने एव पर्यवसितम् । किञ्च, एवं पर्यवसानमेवोचितम्–एकान्त-

नित्यत्वादावित्यत्र **आदिपदा**दनित्यत्वपरिग्रहः । अत्रापि साध्यहेतू निरुक्तावेव । तर्कस्तु-अनित्यत्वं यदि अर्थक्रियानियामकं भवेत्, कारणं कार्यानुयायि न भवेद्, उपादानोपादेयभावादिश्च प्रतिनियतो न भवेदित्यादिर्बोध्यः । 'सर्वज्ञोऽस्ती'त्यादावपि 'वस्तुत्वं यत्किञ्चित्पुरुषवृत्तिप्रत्यक्षात्मकैकज्ञानविषयत्वव्याप्यं धर्मत्वात् तद्घटत्ववदि'ति सम्भवत्येवाऽनुमानम् ।

अयं तत्त्वविचारो गूढरहस्यत्वाद् नाऽल्पज्ञैरवधारयितुं शक्य इति बहुविधशास्त्रज्ञैरेवाऽयं युक्तायुक्तविवेकायाऽऽलोचनीय इत्युपदर्शयति-**इति सम्यग् निभालनीय**मिति ।

स्वार्थानुमानं निरूप्य परार्थानुमानं निरूपयति—

**परार्थं पक्षहेतुवचनात्मकमनुमानमुपचारात्, तेन श्रोतुरनुमानेनाऽर्थबोधनात् ।**

अत्र **परार्थ**मिति लक्ष्यनिर्देशः, तच्च **अनुमान**मित्यनेन सम्बध्यते, तथा च **परार्था-नुमान**मिति लक्ष्यम्, **पक्षहेतुवचनात्मक**मिति लक्षणम् । **पक्षवचनं**=साध्यवत्तया पक्षस्य प्रतिपादकं वचनं प्रतिज्ञेति यावत्, **हेतुवचनं**=तृतीयान्तं पञ्चम्यन्तं वा लिङ्गस्य प्रतिपादकं वचनम्, तच्च हेतुरित्यभिधीयते, तदुभयात्मकं न्यायापरनामकं महावाक्यं परार्थानुमानमित्यर्थः ।

प्रतिज्ञाहेतू च न्यायैकदेशत्वादवयवशब्देनाऽपि व्यपदिश्येते । यत्राऽनयोर्द्वयोरपि परानुमित्यर्थमवश्यप्रयोजकत्वम्, तत्र तदुभयात्मकस्य न्यायस्य परार्थानुमानत्वम् । यत्र तु विशिष्टमतेः परस्याऽनयोरेकतरेणाऽप्यनुमानप्रतिपत्तिसम्भवः, तत्रैकस्याऽपि परार्थानुमानत्वं सम्भवतीत्येतदवयवद्वयात्मकन्यायवाक्यस्य परार्थानुमानत्वं नैतद्द्वयात्मकमहावाक्यत्वेनैव, किन्त्वेतदन्यतरवाक्यत्वेनेति बोध्यम् ।

प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्च न्यायावयवाः परार्थानुमानमिति **नैयायिकाः** । तत्र प्रतिज्ञाहेतुलक्षणमुपदर्शितमेव । साध्यहेत्वोरविनाभावप्रतिपादकं दृष्टान्तवचनमुदाहरणम् । हेतुमत्तया पक्षस्य वचनमुपनय इति **प्राचीनमते, नव्यमते** तु साध्यव्याप्तिविशिष्टहेतुमत्तया पक्षवचनमुपनयः । अबाधितत्वप्रतिपत्तये पक्षे साध्यस्य पुनर्वचनं निगमनम् ।

पर्वतो वह्निमानिति प्रतिज्ञा । धूमादिति हेतुः । यो यो धूमवान् स वह्निमान् यथा

---

नित्यस्येदानीं प्रमाणासिद्धत्वेन विकल्पसिद्धत्वात् तत्र सत्त्वासत्त्वातिरिक्तधर्मसाधने 'विकल्पसिद्धे धर्मिणि सत्तासत्तयोरेव साध्यत्व'मिति नियमस्य भङ्गः स्यात् । अथ चेदमत्र विचारणीयं—यथा 'शशशृङ्गं नाऽस्ती'त्यनुमाने न शशशृङ्गेऽसत्त्वं साध्यते, किन्तु शशसम्बन्धित्वावच्छेदेन शृङ्गेऽसत्त्वसाधनम्, शृङ्गे शशीयत्वस्यैवाऽभावसाधनं वा । तद्वदत्राऽपि एकान्तनित्ये (=अनित्यत्वासमानाधिकरणनित्यत्ववति) नाऽर्थक्रियासामर्थ्याभावः साध्यते, परमनित्यत्वासमानाधिकरणत्वावच्छेदेन नित्येऽर्थक्रियासामर्थ्याभावस्य, नित्येऽनित्यत्वासामानाधिकरण्याभावस्य वा साधनमिति ।

महानसमिति, यत्र यत्र धूमः तत्र वह्निर्यथा महानसमिति वोदाहरणम्, इदं चाऽन्वयव्याप्ति-प्रतिपादकत्वात् साधर्म्योदाहरणमिति व्यपदिश्यते। यत्र वह्निर्नाऽस्ति तत्र धूमोऽपि नाऽस्ति यथा ह्रदे इति, यो न वह्निमान् स धूमवानपि न भवति यथा ह्रदे इति वोदाहरणं व्यतिरेकव्याप्त्युपदर्शकत्वाद् वैधर्म्योदाहरणमिति व्यपदिश्यते। धूमवान् च पर्वत इत्यर्थकं **प्राचीनमते, नव्यमते** तु वह्निव्याप्यधूमवान् च पर्वत इत्यर्थकं तथा चाऽयमिति वचनमुपनयः। वह्निव्याप्यधूमवत्त्वात् पर्वतो वह्निमानित्यर्थकं तस्मात् तथेति वचनं निगमनम्। अत्र [1]साध्यस्याऽबाधितत्वप्रतिपत्तये पञ्चम्यन्तस्य घटकता—साध्यव्याप्यहेतुमत्त्वे साध्यवत्त्वं स्यादेवेति न तद्बाध इत्यस्य ततोऽवगतेः।

प्रतिज्ञाहेतूदाहरणानि उदाहरणोपनयनिगमनानि वा त्रीणि तत्र प्रयोक्तव्यानि इति **मीमांसकादयः**। उदाहरणोपनयौ द्वावेवाऽवयवौ तत्र प्रयोक्तव्याविति **बौद्धाः**।

अनुमानं प्रमाणं ज्ञानस्वरूपम्, वचनं च पौद्गलिकत्वाद् जडस्वरूपमिति तयोरत्यन्तविरोधे जाग्रति पक्षहेतुवचनस्याऽनुमानत्वोपदर्शनं न युक्तमित्याशङ्काव्यवच्छित्तये आह—**उपचारा**दिति। परस्य साध्यानुमितिरुक्तवचनाद् हेतुज्ञानादिद्वारा जायते इति परानुमितिकारणे उक्तवचने कार्यधर्ममनुमानत्वमुपचर्योक्तवचनं परार्थानुमानमिति व्यवह्रियते इत्यर्थः। एतदेव स्पष्टीकरोति—**तेने**ति। **तेन**=पक्षहेतुवचनेन, **श्रोतुः**=एतद्वचनं शृण्वतः परस्य, **अनुमानेन**=अनुमानद्वारा व्याप्तिस्मरणलिङ्गावगमद्वारेति यावत्, **अर्थबोधनात्**=परेष्टस्य साध्यस्याऽनुमितिलक्षणज्ञानोत्पादनात्।

परमतनिराकरणपूर्वकस्वमतव्यवस्थापनरूपपरीक्षां परार्थानुमाने चिकीर्षन् ग्रन्थकारः परमतखण्डने यतमानः प्रथमं **बौद्ध**मतं खण्डयितुं तन्मतमुपदर्शयति—

**पक्षस्य विवादादेव गम्यमानत्वादप्रयोग इति सौगतः,**

**पक्षस्य**=साध्यवत्त्वेन पक्षप्रतिपादकप्रतिज्ञारूपपक्षवचनस्य 'शब्दादिः क्षणिक' इति **सौगत**प्रतिज्ञायाः, 'शब्दादिः क्षणिको ने'ति **नैयायिका**दिप्रतिज्ञायाः, तत्प्रतिपाद्यार्थस्य वा। **विवादाद्**=निर्वर्त्तनीयतया कथाङ्गस्य संशयस्य जनकत्वेना[2]ऽऽदौ मध्यस्थेनाऽवश्यकर्त्तव्याद् विप्रतिपत्तिलक्षणविवादात्, 'शब्दादिः क्षणिको न वे'त्याकारकाद्। **एवकारो** विवादातिरिक्तस्वतन्त्रतत्प्रयोगं व्यवच्छिनत्ति। **गम्यमानत्वा**दित्यत्र **अप्रयोग** इत्यत्र च **पक्षस्ये**त्यस्य

---

१. 'तस्मात् तथे'ति वचने 'तस्मा'दिति किमर्थं तद् दर्शयति—अत्रेति।

२. कथया संशयो निवर्त्तनीयः। अतः स निवर्त्तनीयतया कथाङ्गं भवति। तज्जनिका विप्रतिपत्तिः। अतः सा पूर्वमवश्यप्रदर्शनीया भवति।

सम्बन्धः। **अप्रयोगः**=परस्याऽनुमित्यर्थं प्रयोक्तव्ये न्यायवाक्ये तद्घटकतया पक्षस्य न प्रयोगः।

**तन्न, यत्किञ्चिद्वचनव्यवहितात् ततो व्युत्पन्नमतेः पक्षप्रतीतावप्यन्यान् प्रत्यवश्यनिर्देश्यत्वात्।**

**तन्ने**ति। एकान्तेन पक्षस्याऽप्रयोग इति **बौद्ध**मतं न समीचीनमित्यर्थः। निषेधे हेतुमाह-**यत्किञ्चि**दिति। विप्रतिपत्त्यनन्तरं 'पूर्वं भवता वक्तव्यम्, तदनन्तरमनेने'त्यादिवचनव्यवहितात् पूर्वं विप्रतिपत्तिलक्षणो विवादः, ततः कथाबहिर्भूतमेवोक्तवचनम्, ततो वादिना स्वपक्षस्थापनालक्षणकथारम्भः, तत्र निरुक्तवचनेन मध्यस्थितेन निरुक्तविवादो व्यवहितो भवत्येव[१]। तथाभूतात् **ततो**=विवादाद्, **व्युत्पन्नमतेः**='यत् सत् तत् क्षणिकं यथा घट' इत्युदाहरणवाक्यप्रयोगात्, 'सँश्च शब्द' इत्युपनयवाक्यप्रयोगादनेन वादिना 'शब्दादिः क्षणिक' इति पक्ष एव नूनं परिगृहीत इत्यूहापोहकुशलबुद्धिशालिनः प्रतिवादिनः। **पक्षप्रतीतावपि**=पक्षवचनप्रयोगमन्तरेणाऽपि पक्षज्ञानेऽपि। तथा च व्युत्पन्नमतिप्रतिवादिनं प्रति न प्रयोक्तव्यं पक्षवचनमित्याशयः।

**अन्यान्**=व्युत्पन्नमतिभिन्नान् मन्दमतीन् प्रतिवादिनः **प्रति**। तेषामूहापोहविकलानां 'पूर्वमीदृशी विप्रतिपत्तिः, तत एतादृशोदाहरणादिवाक्यविन्यासः, तेनाऽनेनैव पक्षेण भवितव्य'-मित्याद्यनुसन्धानासम्भवात्, उदाहरणप्रयोगे सत्यपि 'किमिदं क्षणिकत्वे साध्ये साधर्म्योदाहरणं? किं वाऽसत्त्वे साध्ये वैधर्म्योदाहरणमेत'दित्यादिसंशयसम्भवाच्च, **अवश्यनिर्देश्यत्वात्**=पक्षवचनस्याऽवश्यं प्रयोक्तव्यात्, तदन्तरेण मन्दमतीनां पक्षप्रतीतेरसम्भवात्।

यत्र च विप्रतिपत्त्यनन्तरमेव स्वपक्षसाधनाय परमुद्दिश्य परार्थानुमानं वचनलक्षणमारचयति वादी, तत्र मन्दमतेरपि कस्यचित् प्रतिवादिनः वादिप्रयुक्तोदाहरणादिलक्षणेनाऽनुमानवाक्यावयवेनैकवाक्यतया गृह्यमाणाद् विप्रतिप्रतिलक्षणविवादादपि पक्षस्य प्रतिपत्तिसम्भवेन, तत्र तं प्रति पक्षस्याऽप्रयोगोऽपि स्याद्वादिन इष्ट एवेति पक्षस्य प्रयोगाप्रयोगयोरनेकान्त एव विजयते इत्याह–

**प्रकृतानुमानवाक्यावयवान्तरैकवाक्यतापन्नात् ततोऽवगम्यमानस्य पक्षस्याऽप्रयोगस्य चेष्टत्वात्।**

**ततः**=विवादात्।

साध्यस्य प्रतिनियतधर्मिधर्मताप्रतिपत्त्यर्थं **बौद्धे**नाऽवश्यमेव पक्षवचनस्य प्रयोक्तव्य-

---

१. पूर्वं मध्यस्थेन विप्रतिपत्तिः प्रदर्शिता, ततः केन प्रथमं वक्तव्यम्, केन पश्चादिति व्यवस्था प्रदर्शिता। पश्चाद् वादारम्भो जातः। तत्र व्यवस्थावचनेन वादाद् विप्रतिपत्तिर्व्यवहिता भवत्येव।

त्वमभ्युपगन्तव्यम्, अन्यथा हेतोः प्रतिनियतधर्मिधर्मताप्रतिपत्यर्थमुपनयरूपस्योपसंहारवचनस्य प्रयोक्तव्यत्वमपि तत्कक्षीकृतं त्यक्तं स्याद्-उभयोः समानत्वादित्याह—

**अवश्यं चाऽभ्युपगन्तव्यं हेतोः प्रतिनियतधर्मिधर्मताप्रतिपत्त्यर्थमुपसंहारवचनवत् साध्यस्याऽपि तदर्थं पक्षवचनं ताथागतेनाऽपि, अन्यथा समर्थनोपन्यासादेव गम्यमानस्य हेतोरप्यनुपन्यासप्रसङ्गाद्-मन्दमतिप्रतिपत्त्यर्थस्य चोभयत्राऽविशेषात् ।**

**ताथागतेनाऽपि पक्षवचनमवश्यं चाऽभ्युपगन्तव्य**मित्यन्वयः । तथागतो बुद्धः, तच्छिष्यः ताथागतः, तेन **बौद्धे**नेत्यर्थः । **हेतोः**=साधनस्य, **प्रतिनियतधर्मी**=यत्र धर्मिणि साध्यं साधनीयं सः, **तद्धर्मिता**=तत्सम्बन्धिता, तस्याः **प्रतिपत्त्यर्थं**=पक्षे हेतुज्ञानार्थमिति यावत्; **उपसंहारः**=पक्षसमीपे हेतोर्नयनं=हेतोः पक्षसम्बन्धित्वम्, तस्य **वचनं**=तत्प्रतिपादकवचनम्, उपनय इति यावत् । **तद्वदि**ति । हेतोः पक्षसम्बन्धित्वप्रतिपत्तये **बौद्धे**नोपनयो यथाऽभ्युपगम्यते तथेत्यर्थः । **साध्यस्याऽपि तदर्थं**=साध्यस्य प्रतिनियतधर्मिधर्मताप्रतिपत्त्यर्थम् । **पक्षवचनं**= प्रतिज्ञावाक्यम् ।

**अन्यथा**=विवादादेव पक्षस्य गम्यमानत्वादप्रयोगे, **समर्थनोपन्यासादेव**= 'हेतुभावेऽवश्यं साध्यस्य भाव' इत्यस्य समर्थकं यद् दृष्टान्ते हेतुसाध्ययोरविनाभावप्रतिपादकं वचनं तत् **समर्थनम्**=उदाहरणमिति यावत्, तस्योप**न्यासाद्**=उद्भावनादेव, **गम्यमानस्य हेतोः**= 'यद् व्याप्यं तद् हेतुः, यद् व्यापकं तत् साध्य'मिति नियमाद् 'व्याप्यत्वेनाऽयमेव हेतु'रित्येवं ज्ञायमानस्य हेतोरपि, **अनुपन्यासप्रसङ्गात्**=उपसंहारवचनेन यद् उपन्यसनं तदभावापत्तेः ।

मन्दमतिः प्रतिवादी उदाहरणवाक्यतो हेतुस्वरूपमवधारयितुं न शक्नोतीति तत्प्रतिपत्त्यर्थमुपसंहारवचनस्याऽऽवश्यकत्वं यदि भवता मन्यते, तदा कश्चिद् मन्दमतिर्विवादतोऽपि पक्षमवधारयितुं न शक्नोतीति तत्प्रतिपत्त्यर्थं पक्षवचनस्याऽप्यावश्यकत्वमभ्युपगम्यतामित्याह- **मन्दमती**ति ।

प्रतिज्ञायाः प्रयोगो **बौद्धशास्त्रे**ऽपि दृश्यते । तत् शास्त्रमपि परप्रतिपत्त्यर्थं प्रवृत्तत्वात् परार्थमेव । तथा च यदि प्रतिज्ञाया न प्रयोगार्हत्वम्, तदा **शाक्यशास्त्रे**ऽपि तत्प्रयोगो न स्याद् ।

---

**'समर्थन'**—"त्रिविधमेव हि लिङ्गमप्रत्यक्षस्य सिद्धेरङ्गम्—स्वभावः कार्यमनुपलम्भश्च । तस्य समर्थनं साध्येन व्याप्तिं प्रसाध्य धर्मिणि भावसाधनम् । यथा यत् सत् कृतकं वा तत् सर्वमनित्यं यथा घटादिः सन्कृतको वा शब्द इति । अत्रापि न कश्चित् क्रमनियमः इष्टार्थसिद्धेरुभयत्राऽविशेषात् । धर्मिणि प्राक् सत्त्वं प्रसाध्य पश्चादपि व्याप्तिः प्रसाध्यत एव यथा सन् शब्दः कृतको वा, यश्चैवं स सर्वोऽनित्यः यथा घटादिरिति ।"—वादन्याय पृ० ३-६ ।

अस्ति च **शाक्यशास्त्रे** तत्प्रयोगः, अतोऽन्यत्राऽपि तत्प्रयोगोऽवर्जनीय एव । अन्यथा कल्पनाया दृश्यानुसारित्वं भज्येत, अदृश्यानुसारित्वं च प्रसज्येतेत्याह—

**किञ्च, प्रतिज्ञायाः प्रयोगानर्हत्वे शास्त्रादावप्यसौ न प्रयुज्येत, दृश्यते च प्रयुज्यमानेयं शाक्यशास्त्रेऽपि । परानुग्रहार्थं तत्प्रयोगश्च वादेऽपि तुल्यः-विजिगीषूणामपि मन्दमतीनामर्थप्रतिपत्तेः तत एवोपपत्तेरिति ।**

भवतामेव शास्त्रे प्रतिज्ञायाः प्रयोगः, तद्बलाद् नाऽस्माभिः तत्प्रयोगः कक्षीकरणीय इति यदि ब्रूयात्, तदा यत् शास्त्रं तेन प्रमाणीकृतम्, तत्राऽप्यस्याः प्रयोगो दृश्यते, तद्दर्शनापलापः तदप्रमाणता च वक्तुमशक्येत्याशयेनाऽऽह-**दृश्यते चेति** । **इयं**=प्रतिज्ञा **शाक्यशास्त्रेऽपि**= **बौद्धदर्शनेऽपि** ।

मन्दमतीनां प्रतिनियतधर्मिधर्मतया तत्तदभिमतार्थप्रतिपत्तितोऽज्ञानादिकं निवर्त्तता-मित्युपकृतीच्छया यदि शास्त्रे प्रतिज्ञावचनोपन्यासः, तर्हि तादृशोपकृतीच्छा वादिनो वादेऽपि प्रतिवादिमन्दमतीनधिकृत्य भवत्येव । मन्दमतयोऽपि स्वाभिमतशास्त्रार्थसत्यत्वाभिमाना-ग्रहग्रहिलाः स्वेष्टशास्त्रप्रतिपक्षशास्त्रपरायणवादिजिगीषया कथायामुपसर्पन्त्येवेति तान् प्रति प्रतिनियतधर्मिधर्मतया साध्यस्य प्रतिपत्त्यर्थं वादेऽपि प्रतिज्ञोपन्यासो युक्त एवेत्याह—**परानु-ग्रहार्थमिति** । **तत्प्रयोगः**=पक्षप्रयोगः । **तत एव**=प्रतिज्ञावाक्यादेव ।

परार्थानुमानस्याऽन्यवाद्यभिमतं लक्षणं प्रतिक्षेप्तुमुपन्यस्यति—

**आगमात् परेणैव ज्ञातस्य वचनं परार्थानुमानम् । यथा 'बुद्धिरचेतना-उत्पत्ति-मत्त्वाद्—घटव'दिति साङ्ख्यानुमानम् । अत्र हि बुद्धावुत्पत्तिमत्त्वं साङ्ख्येन नैवा-ऽभ्युपगम्यते इति ।**

---

यद्यपि वादिप्रतिवाद्युभयसम्प्रतिपन्नमेव साधनं वादभूमिकायामुपयुज्यते इति सर्वसम्मता वादमर्यादा, तथापि कश्चित् **साङ्ख्यप्रख्यः** स्वसिद्धान्तं स्थापयितुं स्वानभिमतमपि किञ्चित् साधनं प्रतिवादीष्टत्वमात्रेण वादकाल एव प्रयोक्तुमिच्छन्नेव तां सर्वसम्मतवादमर्यादामतिक्रम्य स्वाभि-प्रायानुकूलमेव परार्थानुमानीयं यत् लक्षणान्तरं प्रणीतवान् तदेवाऽत्र ग्रन्थकारः **स्याद्वादरत्नाकर-**[पृ० ५५१] दिशा निरसितुं निर्दिशति '**आगमात् परेणैव**' इत्यादिना । '**आगमात्**'—आगमा-नुसारेण, '**परेणैव**'—प्रतिवादिनैव, '**ज्ञातस्य**'—सम्मतस्य, '**वचनम्**'—साधनतया वादकाले वादिना प्रयोग इत्यर्थः । तथा च वादिना प्रतिवादिनि स्वसिद्धान्तप्रत्यायनं साधनसिद्ध्या सम्पादनीयम् । सा च साध्यसिद्धिर्यदि केवलप्रतिवादिन्यपि स्यात् तावतैव वादी कृतार्थो भवेदिति किम् उभय-सिद्धसाधनगवेषणप्रयासेन ? इति परार्थानुमानीयलक्षणान्तरकारिणः पूर्वपक्षिण आशयः ।

**परेणैव**=प्रतिवादिनैव, **आगमात्**=स्वाभ्युपगतशास्त्रात्, **ज्ञातस्य**=प्रसिद्धस्य, हेतोरिति दृश्यम्, **वचनं**=वादिनोपन्यस्तं वचनम् । तथा च प्रतिवाद्यभ्युपगतागमप्रसिद्धस्य हेतोः साध्यप्रतिपत्त्यर्थं वचनं परार्थानुमानमित्यर्थः ।

उदाहरति–**यथेति** । **बुद्धिः**=प्रकृतेः प्रथमः परिणामो महत्तत्त्वापराभिधानमन्तःकरणम् । साऽचेतना, तस्याः कर्तृत्वेऽपि न चैतन्यम्, कूटस्थनित्यस्य पुरुषस्यैव चैतन्यम्, तत्सम्बन्धादचेतनाऽपि बुद्धिः चेतनेव भवति–इत्युपपादनाय साध्यते । कतुरेव चैतन्यमित्यभ्युपगन्तारं **नैयायिकं** प्रति **साङ्ख्यानुमानं**=**साङ्ख्येन** वादिना कृतमनुमानम् ।

तत्र निरुक्तलक्षणस्य सङ्गमनायाऽऽह–**अत्रेति** । **हि**=यतः । **बुद्धाविति** प्रकृतत्वादुक्तम् । सत्कार्यवादिना **साङ्ख्येन**–पूर्वमसतः सत्त्वलक्षणाऽऽद्यक्षणसम्बन्धापराभिधानोत्पत्तिः कुत्रापि नेष्यते, किन्त्वसत्कार्यवादिना **नैयायिका**दिनैवोक्तोत्पत्तिमत्त्वं स्वीक्रियते, **साङ्ख्यस्य** तु तत्स्थाने आविर्भावाद् ध्वंसस्थाने च तिरोभावाद् व्यवहृतिः । तथा च **नैयायिका**द्यभ्युपगतशास्त्रप्रसिद्धोत्पत्तिमत्त्वलक्षणहेतुवचनमिदं परार्थानुमानमित्यर्थः ।

प्रतिवाद्यागमो न वादिना, वाद्यागमश्च न प्रतिवादिना प्रमाणतयाऽभ्युपगम्यते इति तत्तदागममात्रप्रसिद्धो हेतुर्नोभयवादिप्रसिद्धः । उभयवादिप्रसिद्धस्यैव च हेतुता युक्तेति न पराभिमतमुक्तलक्षणं सम्यग्, न वा तल्लक्ष्यतया उपढौकितं तथेत्याह–

**तदेतदपेशलम्,**

निरुक्तपरमतमसुन्दरमित्यर्थः ।

---

प्राग्निर्दिष्टं लक्षणान्तरं निराकरोति '**तदेतदपेशलम्**' इत्यादिना । अत्रायं भावः-वादिप्रतिवाद्युभयसिद्धस्यैव साधनस्य परार्थानुमानोपयोगितया न वादिप्रतिवाद्येकतरसिद्धसाधनेन अनुमानप्रवृत्तिरुचिता । तथा च साधनसिद्धये समाश्रीयमाणः आगमोऽपि वादिप्रतिवाद्युभयसम्प्रतिपन्नप्रामाण्यक एव परार्थानुमानोपजीव्यः, न तु तदन्यतरमात्रसम्मतप्रामाण्यकः । एवं च न प्रतिवादिमात्राभ्युपगतप्रामाण्यकेन आगमेन साधनमुपन्यस्य अनुमानप्रवर्तनं वादिनो न्याय्यम् । वादी हि प्रतिवाद्यागमं तेन परीक्ष्य स्वीकृतं अपरीक्ष्य वा स्वीकृतं मत्वा तमागममाश्रयन्ननुमानावसरे साधनमुपन्यस्येत् ? न प्रथमः पक्षः, वादिनाऽपि तदागमप्रामाण्यस्य स्वीकरणीयत्वापत्तेः । न हि परीक्षितं केनापि प्रामाणिकेन उपेक्षितुं शक्यम् । तथा च प्रतिवाद्यागमानुसारेणैव साधनवत् साध्यकोटेरपि वादिना अवश्याङ्गीकार्यत्वेन तद्विरुद्धसाधनाय अनुमानोपन्यासस्य वैयर्थ्यात् आगमबाधितत्वाच्च । न द्वितीयः, अपरीक्ष्याभ्युपगतस्य प्रामाण्यस्य प्रतिवादिनोऽपि शिथिलमूलतया सन्दिग्धतया च सन्दिग्धप्रामाण्यकतादृशप्रतिवाद्यागमानुसारेण असन्दिग्धसाधनोपन्यासस्य वादिना कर्तुमशक्यत्वात् ।

अथवा नैरात्म्यवादिनं **बौद्धं** प्रत्येवैतदनुमानं **साङ्ख्यस्य** । यतो नैरात्म्यवादिना **बौद्धे**नाऽऽत्मस्थाने आलयविज्ञानसन्ततिरेवाऽभिषिक्ता । तन्मते ज्ञानस्वरूपा बुद्धिरेव चेतना–स्वप्रकाशत्वात् । अतः तन्मताया बुद्धेरेवाऽचैतन्यं **साङ्ख्येन** साध्यते । **बौद्ध**मते सर्वस्य क्षणिकत्वात् सर्वान्तःपातिन्या बुद्धेरपि क्षणिकत्वम्, क्षणिकत्वाच्चोत्पत्तिमत्त्वमपि तन्मत-सिद्धम् । ततः तदागमसिद्धोत्पत्तिमत्त्वेन बुद्धेरचैतन्यसाधनमुक्तदिशा परार्थानुमानम् । अन्यत् सर्वं दर्शितदिशाऽवसेयम् ।

उक्त**साङ्ख्य**लक्षितपरार्थानुमानलक्षणस्याऽसुन्दरत्वे हेतुमाह–

**वादिप्रतिवादिनोरागमप्रामाण्यविप्रतिपत्तेः, अन्यथा तत एव साध्यसिद्धिप्रसङ्गात् । परीक्षापूर्वमागमाभ्युपगमेऽपि परीक्षाकाले तद्बाधात् ।**

**वादिप्रतिवादिनो**रिति । **साङ्ख्यनैयायिकयो**रिति **साङ्ख्यबौद्धयो**रिति वाऽर्थः । **आगमे**ति । **साङ्ख्या**गमप्रमाण्ये **बौद्ध**स्य विप्रतिपत्ते**बौद्धा**गमप्रामाण्ये **साङ्ख्य**स्य च विप्रतिपत्तेरित्यर्थः । तथा च **बौद्धा**गमसिद्धमुत्पत्तिमत्त्वं वस्तुतोऽसिद्धमेव **साङ्ख्य**स्येति, परप्रतिपत्त्यर्थं तद्वचनं न घटते एवेति, कथं तस्य परार्थानुमानत्वमिति भावः ।

**अन्यथा**=वादिप्रतिवादिनोः परस्परागमप्रामाण्यविप्रतिपत्त्यभावे, **तत एव**=आगमादेव । **साङ्ख्या**गमे कूटस्थपुरुषभिन्नसर्वस्यैवाऽचैतन्यं प्रतिपादितमस्तीति **साङ्ख्या**गमत एव प्रति-वादिनो **नैयायिक**स्य-कर्तुरचैतन्यस्य, प्रतिवादिनो **बौद्ध**स्य-बुद्धेरचैतन्यस्य सिद्धिप्रसङ्गतः, तं प्रति तत्साधनायाऽनुमानप्रणयनं **साङ्ख्य**स्य विफलमेव प्रसज्येतेति भावः ।

यद्यपि परागमप्रतिपादितार्थस्य युक्तत्वमयुक्तत्वं वा यावद् न परीक्षितं तावत् सामान्यतः

---

**'अन्यथा'**–विप्रतिपन्नप्रामाण्यकागमाश्रयेण साधनोपन्यासे इत्यर्थः । **'तत एव'**–प्रति-वादिमात्रसम्मतादेव, तदीयादागमात् साध्यसिद्धिप्रसङ्गात्–प्रतिवादिनि स्वकोटेः स्वागमेनैव निश्चितत्वात् वादिकोटेश्च तेनैव आगमेन बाधितत्वात् संशयरूपपक्षतायाः अभावेन तत्र नाऽनुमिति-सम्भव इत्यर्थः ।

ननु अनुमानोत्तरकालं तु प्रतिवादिना परीक्ष्य आगमः स्वीकरिष्यते, अनुमानकाले पुनः परम्परायातेन अभिनिवेशमात्रेण तेन स्वीकृत इति तदाश्रयेण साधनमुपन्यस्यन् वादी कथमुपाल-म्भास्पदं भवेत् ? इत्याशङ्कायामाह **'परीक्षाकाले तद्बाधात्'** इति । तथा च अनुमानावसरे वादिविरोधं सहमानस्य प्रतिवादिनः स्वागमप्रामाण्यं न निश्चितं नाम । एवं च यथा प्रतिवाद्यागमः वादिनोऽनिश्चितप्रामाण्यकस्तथा प्रतिवादिनोऽप्यनिश्चितप्रामाण्यक इति न तदाश्रयेण साधनोपन्यासः कामपि इष्टसिद्धिं पुष्णातीति भावः ।

शास्त्रत्वेन प्रामाण्यं परकीयागमस्याऽपि पराभ्युपगमविषयः, तथापि परीक्षादशायां तत्प्रतिपादितार्थस्याऽयुक्तत्वव्यवस्थितौ बाधितार्थकत्वेनाऽप्रामाण्यस्यैव व्यवस्थित्या प्रामाण्याभ्युपगमस्य बाधादिति कथाकाले परस्परशास्त्रार्थपरीक्षायां प्रस्तुतायां न परकीयागमप्रसिद्धं स्वतोऽसिद्धं हेतुतयोद्भावनीयमिति तादृशहेतुवचनं न परार्थानुमानमित्याह-**परीक्षापूर्व**मिति । **तद्बाधात्**= परकीयागमप्रामाण्याभ्युपगमाभावात् ।

ननु यदि परागमसिद्धहेतुना साध्यसाधनं न न्याय्यम्, तर्हि **नैयायिका**गमसिद्धसर्वथैकत्वहेतुना, सामान्यस्याऽनेकधर्मिसम्बद्धत्वाभावसाधनं **स्याद्वादि**नोऽप्ययुक्तमिति शङ्कते–

**नन्वेवं भवद्भिरपि कथमापाद्यते परं प्रति 'यत् सर्वथैकं तद् नाऽनेकत्र सम्बध्यते, तथा च सामान्यम्' इति ? सत्यम्,**

**एवं**=परागममात्रसिद्धहेतुवचनस्याऽयुक्तत्वे, **भवद्भिरपि**=जैनैरपि, **परं प्रति**=नैयायिकं प्रति । आपादनाकारो **यत्सर्वथैक**मित्यादिना दर्शितः । **यत् सर्वथैकं तद् नाऽनेकत्र सम्बद्ध्यते** इति व्याप्तिप्रदर्शनम् । **तथा च सामान्य**मित्युपसंहारवचनम्, सर्वथैकं च सामान्यमिति तदर्थः । ततश्च सामान्यं नाऽनेकत्र सम्बद्ध्यते इत्यापादनम् ।

यदि स्वतन्त्रानुमानरूपमिदं स्यात् तदाऽयुक्तत्वमस्याऽपि स्यादेवेत्यर्द्धस्वीकारपरं **सत्य**मिति ।

तर्हि किमिदमित्यपेक्षायामाह–

**एकधर्मोपगमे धर्मान्तरसन्दर्शनमात्रपरत्वेनैतदापादनस्य वस्तुनिश्चायकत्वाभावात्, प्रसङ्गविपर्ययरूपस्य मौलहेतोरेव तन्निश्चायकत्वात् ।**

**एकधर्मोपगमे**=**नैयायिके**न सामान्ये सर्वथैकत्वरूपधर्मोपगमे, तं प्रति, **धर्मान्तरस्य**= सर्वथैकत्वव्यापकानेकधर्मिसम्बन्धित्वाभावस्य, **सन्दर्शनमात्रपरत्वेन**=प्रदर्शनमात्राभिप्रायकत्वेन, **एतदापादनस्य**='यत् सर्वथैकं तद् नाऽनेकत्र सम्बद्ध्यते, तथा च सामान्य'-मित्यापादनस्य **वस्तुनिश्चायकत्वाभावात्**=तद्विषयीभूत-सामान्यगतानेकसम्बन्धित्वाभावस्य वस्तुतोऽभावेन वस्तुनिश्चायकत्वासम्भवात् ।

व्याप्याभ्युपगमनान्तरीयको व्यापकाभ्युपगमो यत्र प्रसज्यते तत् प्रसङ्गसाधनमिति लक्षणसद्भावेन प्रसङ्गसाधनमेवैतद् **नैयायिकं** प्रति **जैनेन** क्रियते । तदाकारश्च यदि सामान्यं

---

**'प्रसङ्गविपर्यय'**—अत्र रत्नप्रभायामुद्धृतः 'प्रसङ्गः खल्वत्रे'त्यादिरत्नाकरपाठः समस्ति ।

सर्वथैकं स्यात्, अनेकधर्मिणि न सम्बध्नीयादिति[१]। तत् किमत्र वस्तुनिश्चयो न भवत्येव ? एवञ्चैतदुद्भावनमनर्थकमेव भवतां प्रसज्येतेत्याह—**प्रसङ्गे**ति ।

एतत् प्रसञ्जनं **नैयायिकस्येष्टा**(स्याऽनिष्टा ?)पादनरूपम्, यतः सामान्यस्याऽनेकधर्मिसम्बन्धित्वाभावे सामान्यरूपतैव न स्यात्-नित्यत्वे सत्यनेकसमवेतत्वस्य सामान्यलक्षणत्वेन तेनाऽभ्युपगमात् । ततोऽस्य प्रसङ्गस्य विपर्ययपर्यवसानम्, विपर्ययश्च प्रकृते-अस्ति चाऽनेकसम्बन्धि सामान्यं ततो न सर्वथैकमिति । **मौलहेतोरेवे**ति । अत्र च यद् अनेकसम्बन्धि तद् न सर्वथैकमिति, तत्र चाऽनेकसम्बन्धित्वलक्षणहेतुर्न [केवलं] **न्यायागमसिद्धः**, किन्तु **जैनागमसिद्धो**ऽपि । स विपर्ययहेतुः स्वतन्त्रसाधनरूपत्वाद् मौलहेतुरभिधीयते, तस्यैवेत्यर्थः । **एवकारे**ण प्रसङ्गहेतोर्व्यवच्छेदः । **तन्निश्चायकत्वाद्**=वस्तुनिश्चायकत्वात्, सामान्यगतसर्वथैकत्वाभावश्च विपर्यये साध्यः, स च वस्त्वेवेति ।

ननु स्वतन्त्रसाधनत्वाद् विपर्ययहेतुरेव प्रथमतः प्रयोक्तव्यः, अलं प्रसङ्गहेतूपन्यासेनेत्यत आह—

**अनेकवृत्तित्वव्यापकानेकत्वनिवृत्त्यैव तन्निवृत्तेर्मौलहेतुपरिकरत्वेन प्रसङ्गोपन्यासस्याऽपि न्याय्यत्वात् ।**

**अनेके**ति । यत्राऽनेकवृत्तित्वं तत्राऽनेकत्वमिति नियमादनेकवृत्तित्वस्य व्यापकमनेकत्वम् । **नैयायिके**न सामान्ये सर्वथैकत्वमभ्युपगच्छताऽनेकवृत्तित्वव्यापकस्याऽनेकत्वस्य निवृत्तिरभ्युपगतैव, तयैवेत्यर्थः । तथा च यत्र व्यापकाभावः तत्र व्याप्याभाव इति व्याप्तेः,

---

**'अनेकवृत्तित्व'**—अनेकवृत्तित्वस्य व्यापकं यद् अनेकत्वम्, तस्य या सर्वथैक्यस्वीकारे सति निवृत्तिः, तयैव व्यापकनिवृत्त्या व्याप्यीभूतानेकवृत्तित्वनिवृत्तेः प्रसङ्गः 'यदि सामान्यं सर्वथैकं स्यात् तदा अनेकवृत्ति न स्यात्' इत्यादिरूपो यः क्रियते, स एव सामान्येऽनेकत्वसाधके अनेकवृत्तित्वरूपे मौलहेतौ 'सामान्यमनेकवृत्ति भवतु मा भूदनेकम्' इत्येवंरूपायाः व्यभिचारशङ्कायाः निवर्तकत्वेन तर्कापरपर्यायः परिकरो अभिधीयते । एतादृशस्य प्रसङ्गाख्यपरिकरस्य व्यभिचारशङ्काविधूननद्वारा मौलहेतुगतव्याप्तिसिद्धिपर्यवसायिनः उपन्यासस्य सर्वसम्मततया न्याय्यत्वमेव इति भावः ।

---

१. अत्र मूलानुमानम्—सामान्यं-न सर्वथैकम्-अनेकसम्बन्धित्वात् । तस्य व्यतिरेकव्याप्तिः—यत् सर्वथैकं तद् नाऽनेकत्र सम्बद्ध्यते इति । एतदनुसारमत्राऽऽपत्तिर्दीयते—सामान्यम्-अनेकसम्बन्धित्वाभाववत्-सर्वथैकत्वादिति । एष एव प्रसङ्गः । नैयायिकस्य सामान्येऽनेकसम्बन्धित्वाभावस्याऽनिष्टत्वाच्च सर्वथैकत्वाभावः सिद्ध्यति । अनुमानं च—सामान्यं-न सर्वथैकम्-अनेकसम्बन्धित्वात् । एष एव प्रसङ्गविपर्ययः ।

तद्=अनेकत्वव्याप्यस्याऽनेकवृत्तित्वस्य **निवृत्तेः**=सामान्येऽभावस्य । **मौलहेतुपरिकरत्वेने**ति । 'यद् अनेकवृत्ति तद् अनेकम्, अनेकवृत्ति च सामान्यम्, तस्मादनेक'मिति स्वतन्त्रस्य विपर्ययानुमानस्य हेतुत्वेन मौलहेतुरनेकवृत्तित्वम्, तस्य **परिकरत्वेन**=व्यतिरेकव्याप्तिरूपतया-ऽङ्गत्वेन—अन्वयव्याप्तिवद् व्यतिरेकव्याप्तेरपि साधनाङ्गत्वात्, यथा 'पर्वतो-वह्निमान्-धूमा'दित्यत्र 'यो यो धूमवान् स स वह्निमा'नित्यन्वयव्याप्तिवद् 'यो वह्न्यभाववान् स धूमाभाववा'निति व्यतिरेकव्याप्तिरपि साधनाङ्गम् । एवं च—**प्रसङ्गोपन्यासस्याऽपि**=**नैयायिकं** प्रति यो **जैनेन** क्रियते 'यत् सर्वथैकं तद् नाऽनेकत्र सम्बध्यते, तथा च सामान्य'मिति प्रसङ्गोपन्यासः, तस्याऽपि, **न्याय्यत्वाद्**=न्यायादनपेतत्वाद्, युक्तत्वादिति यावत् ।

नन्वेवं **बौद्धं** प्रति 'बुद्धिरचेतना-उत्पत्तिमत्वा'दिति **साङ्ख्यानु**मानमपि प्रसङ्ग-विपर्ययपर्यवसाय्येवाऽस्तु । यतः तत्राऽपि 'बुद्धिर्यदि चेतना स्याद्, उत्पत्तिमती न स्या'दि-त्यापादनाङ्गस्य 'यत् चेतनं न तद् उत्पत्तिमत्, चेतना च बुद्धि'रित्यवयवद्वयात्मक प्रसङ्ग-साधनस्याऽस्त्येव सम्भवः । बुद्धेरुत्पत्तिमत्त्वाभावश्च न परस्येष्टः, ततो विपर्ययः-'बुद्धि-रचेतना-उत्पत्तिमत्वा'दिति सम्भवतीत्यत आह-

**बुद्धिरचेतनेत्यादौ च [1]प्रसङ्गविपर्ययहेतोर्व्याप्तिसिद्धिनिबन्धनस्य विरुद्ध-धर्माध्यासस्य[2] विपक्षबाधकप्रमाणस्याऽनुपस्थापनात् प्रसङ्गस्याऽप्यन्याय्यत्वादिति वदन्ति ।**

उक्तावतरणदिशा मौलहेतुरुत्पत्तिमत्त्वमेवाऽऽयातम्, तच्च न **साङ्ख्य**स्य स्वमतसिद्धम्, अन्यागमप्रसिद्धं त्वप्रसिद्धकल्पमेवेति न तथोपन्यासो युक्त इति दोषो न व्यावर्त्तते ।

'बुद्धिर्यद्युत्पत्तिमती स्यात् चेतना न स्या'दित्यापादनाङ्गस्य 'यद् उत्पत्तिमत् तद् न

---

'**बुद्धिरचेतनेत्यादौ च**'—अत्र रत्नप्रभायामुद्धृतो 'नन्वेवं प्रसङ्गे'...इति रत्नाकरपाठः समस्ति ।

---

१. बुद्धिरचेतना—उत्पत्तिमत्त्वादित्यत्र प्रसङ्गसाधनमिति कथने द्वयी गतिः । १) इदं मूलानुमानमस्तु, 'बुद्धि-र्नोत्पत्तिमती—चेतनत्वा'दिति प्रसङ्गोऽस्तु, उत्पत्तिमत्त्वाभावस्य बुद्धावनिष्टत्वात् प्रसङ्गस्य विपर्यये पर्यवसानमिति बुद्धावचेतनत्वसिद्धिः । प्रकारोऽयमवतरणिकायां दर्शितः । २) बुद्धिरचेतना—उत्पत्ति-मत्त्वादित्यस्य 'यद् उत्पत्तिमत् तन्न चेतनम्, उत्पत्तिमती च बुद्धि'रिति प्रसङ्गे तात्पर्यम् । तथा च बुद्धा-वचैतन्यस्य बौद्धैरनिष्टत्वात् प्रसङ्गविपर्ययाद् 'बुद्धिर्नोत्पत्तिमती-चेतनत्वा'दिति मूलानुमाने पर्यवसानम् । ततश्च बुद्धावुत्पत्तिमत्त्वाभावस्य सिद्धिः । गतिरियं व्याख्यानावसरे प्रदर्शिता । अत्र प्रथमप्रकारे पूर्वोक्त एव दोषः । द्वितीये च दोषद्वयम्—१. बुद्धौ चैतन्यस्य साङ्ख्यैरनभ्युपगमः २. 'चैतन्यमस्तु उत्पत्तिमत्त्वाभावो माऽस्तु'इति प्रतिकूलशङ्कानिवारकतर्काभावाद् तद्विपर्ययरूप-प्रसङ्गहेतुसाध्ययोरपि व्याप्त्यभावः ।

२. विरुद्धधर्माध्यासो (धूमो वह्निजन्यो न स्यादित्यादिः) विपक्षबाधकप्रमाणं व्याप्तिसिद्धिनिबन्धनम् ।

चेतनम्, यथा घटादि, उत्पत्तिमती च बुद्धि'रित्यवयवद्वयात्मकप्रसङ्गसाधनस्य प्रथममुपन्यासः । तत्र बुद्धेरचैतन्यं न **बौद्धस्ये**ष्टमिति विपर्ययः-बुद्धिर्नोत्पत्तिमती-चेतनत्वादिति । अत्र 'यत्र चैतन्यं तत्रोत्पत्तिमत्त्वाभाव' इति व्याप्तिः **साङ्ख्यस्य** सिद्धा, चेतनत्वमपि पुरुषे **साङ्ख्यस्य** प्रसिद्धम्, परं **साङ्ख्यम**ते उत्पत्तिमत्त्वाभावः सर्वत्रैव चेतनेऽचेतने चेति चेतनत्वे उत्पत्तिमत्त्वाभावस्य नाऽन्तर्व्याप्तिः[१] । अतः तत्राऽप्रयोजके हेतौ परेणेत्थं वक्तुं शक्यते—उत्पत्तिमत्यप्यस्तु बुद्धिः चेतनाऽप्यस्तु, नहि चेतनत्वस्योत्पत्तिमत्त्वविरोधे किञ्चिद् मानं विद्यते **साङ्ख्यस्ये**ति । विरुद्धधर्माध्यासलक्षणविपक्षबाधकप्रमाणस्याऽनुपस्थापनादुपस्थापयितुमशक्यत्वाद् विपर्ययानुमानहेतुसाध्ययोर्व्याप्तिसिद्ध्यभावे तयोर्व्याप्यव्यापकभावनिबन्धनस्य [२]प्रसङ्गे विपर्ययसाध्याभावरूपव्यापकाभावहेतुक—विपर्ययहेत्वभावरूपव्याप्याभावलक्षणसाध्यसाधनकारणव्याप्तिग्रहस्याऽसिद्ध्या प्रसङ्गस्याऽप्यन्याय्यत्वम् । दर्शितप्रसङ्गविपर्ययसाधनपरताऽपि 'बुद्धिरचेतना-उत्पत्तिमत्त्वाद्-घटव'दिति **साङ्ख्या**नुमानस्योदक्षरत्वाद्[३] न युक्तमित्यर्थः ।

**वदन्ति=स्याद्वादरत्नाकरे** श्रीमन्तो **देवसूरयो** वदन्ति । तथा चैतत्तत्त्वबुभुत्सुभिः **स्याद्वादरत्नाकरो**ऽवलोकनीयः । तत्र 'प्रसङ्गविपर्ययरूपमौलहेतोरेव तन्निश्चायकत्वा'दित्याद्येतद्ग्रन्थस्थसन्दर्भाभिप्रायसमानाभिप्रायकः पाठश्चेत्थं—

"प्रसङ्गः खल्वत्र व्यापकविरुद्धोपलब्धिरूपः । अनेकव्यक्तिवर्तित्वस्य हि व्यापकमनेकत्वम्-ऐकान्तिकैकरूपस्याऽनेकव्यक्तिवर्त्तित्वविरोधाद् । अनेकत्रवृत्तेरनेकत्वं व्यापकम्, तद्विरुद्धं च सर्वथैक्यं सामान्ये त्वयाऽभ्युपगम्यते ततो नाऽनेकवृत्तित्वं स्याद्—विरोध्यैक्यसद्भावेन व्याप्येन व्यापकस्याऽनेकत्वस्य निवृत्त्या व्याप्यस्याऽनेकवृत्तित्वस्याऽवश्यंनिवृत्तेः । न च तन्निवृत्तिरभ्युपगतेति लब्धावसरः प्रसङ्गविपर्ययाख्यो विरुद्धव्याप्तोपलब्धिरूपोऽत्र मौलो हेतुः, यथा-यद् अनेकवृत्ति तद् अनेकम्, अनेकवृत्ति च सामान्यमिति । एकत्वस्य हि विरुद्धमनेकत्वम्, तेन व्याप्तमनेकवृत्तित्वम्, तस्योपलब्धिरिह । मौलत्वं चाऽस्य-एतदपेक्षयैव प्रसङ्गोपन्यासात् । न चाऽयमुभयोरपि न सिद्धः-सामान्ये **जैनयोगाभ्यां** तदभ्युपगमात् । ततोऽयमेव मौलो हेतुरयमेव वस्तुनिश्चायकः" इति ।

'बुद्धिरचेतनेत्यादौ चे'त्याद्येतद्ग्रन्थफक्किकाऽपि **रत्नाकर**स्थशङ्काग्रन्थमवतरणरूपतया मनसि संस्थाप्य तत्समाधानरूपैव ग्रन्थकृतोद्भाविता । तथा च तद्ग्रन्थः-

---

१. अव्यभिचारव्याप्तिः ।

२. विपर्ययानुमानहेतुसाध्ययोर्व्याप्यव्यापकभावः प्रसङ्गानुमानसाध्य (विपर्ययहेत्वभाव)-हेतु (विपर्ययसाध्याभाव) व्याप्तिग्रहे निबन्धनम् ।

३. विपक्षबाधकप्रमाणानुपस्थापनारूपन्यूनतावत्त्वाद् ।

"नन्वेवं प्रसङ्गेऽङ्गीक्रियमाणे 'बुद्धिरचेतना उत्पत्तिमत्त्वा'दित्ययमपि **साङ्ख्येन** स्थापितः प्रसङ्गहेतुर्भविष्यति । तथा हि—यदि बुद्धिरुत्पत्तिमती भवद्भिरभ्युपगम्यते, तदानीं तद्व्यापकमचैतन्यमपि तस्याः स्याद्, न चैवमतो नोत्पत्तिमतीयम्" इति ।

'प्रसङ्गविपर्यहेतो'रित्याद्येतद्ग्रन्थसमाधानग्रन्थसमानाभिप्रायकश्च **रत्नाकर**ग्रन्थो यथा—

"प्रसङ्गविपर्ययहेतोर्मौलस्य चैतन्याख्यस्य **साङ्ख्यानां** बुद्धावपि प्रतिषिद्धत्वात् । चैतन्यस्वीकारेऽपि नाऽनयोः प्रसङ्गविपर्ययोर्गमकत्वम्—अनेन प्रसङ्गविपर्ययहेतोर्व्याप्तिसिद्धि-निबन्धनस्य विरुद्धधर्माध्यासस्य विपक्षे बाधकप्रमाणस्याऽनुपस्थापनात्-चैतन्योत्पत्ति-मत्त्वयोर्विरोधाभावाद् । एवं हि अचेतनत्वेनोत्पत्तिमत्त्वं व्याप्तं भवेद्, यदि चैतन्येन तस्य विरोधः स्याद्, नाऽन्यथा, न चैवमिति नैतौ प्रसङ्ग-तद्विपर्ययौ गमकौ भवतः" इति ।

परार्थानुमाने हेतुप्रयोगप्रकारमुपदर्शयति—

**हेतुः साध्योपपत्त्यन्यथानुपपत्तिभ्यां द्विधा प्रयोक्तव्यः । यथा—पर्वतो-वह्निमान्-सत्येव वह्नौ धूमोत्पत्तेः, असत्यनुपपत्तेर्वा । अनयोरन्यतरप्रयोगेणैव साध्यप्रतिपत्तौ द्वितीयप्रयोगस्यैकत्राऽनुपयोगः ।**

**हेतु**रित्यस्य **प्रयोक्तव्य** इत्यनेनाऽन्वयः । **साध्योपपत्त्यन्यथानुपपत्तिभ्यां**=साध्ये सत्येव हेतोरुपपत्तिः साध्योपपत्तिः, साध्यं विना हेतोरनुपपत्तिरन्यथानुपपत्तिः, ताभ्याम् । **द्विधा**= द्विप्रकारः । एतत् प्रकारद्वयं क्रमेणोदाहरति-**यथेति । असत्यनुपपत्तेः**=वह्नावसति धूमस्या-ऽनुपपत्तेः । यत्र परेण 'धूमा'दिति प्रयुज्यते, तत्र **स्याद्वादिना** 'वह्नौ सत्येव धूमस्योपपत्ते'रिति 'वह्नावसति धूमस्याऽनुपपत्ते'रिति वा प्रयुज्यते । **वाकारेणै**तत् कथयति यद् एकप्रयोगतोऽपि प्रकृतार्थसिद्धिनिर्वाहाद् द्वयोर्मध्यात् कामचारमेकस्य प्रयोगो विधेय इति । तदेव स्पष्टयति—**अनयोरिति** । साध्योपपत्त्यन्यथानुपपत्त्योरित्यर्थः । अन्यत् स्पष्टम् ।

पक्षहेतुवचनात्मकमनुमानमिति यत् प्रागुक्तं तदेव व्यवस्थापयति—

**पक्षहेतुवचनलक्षणमवयवद्वयमेव च परप्रतिपत्त्यङ्गम्, न दृष्टान्तादिवचनं-पक्षहेतुवचनादेव परप्रतिपत्तेः । प्रतिबन्धस्य तर्कत एव निर्णयात्, तत्स्मरणस्याऽपि पक्षहेतुदर्शनेनैव सिद्धेः ।**

**एवकारो**द्भावनप्रयोजनमाह-**न दृष्टान्तेति** । दृष्टान्तादिवचनं न परप्रतिपत्त्यङ्गमतो—**नैयायिकस्य** प्रतिज्ञाहेतूदाहरणोपनयनिगमनात्मकपञ्चावयवस्य, **मीमांसकस्य** प्रतिज्ञाहेतू-दाहरणात्मकावयवत्रिकस्य उदाहरणोपनयनिगमनलक्षणावयवत्रयस्य वा, **बौद्धस्योदाहरणो**-पनयात्मकावयवद्वयस्य च परप्रतिपत्त्यङ्गतया परार्थानुमानत्वकथनम्—अयुक्तमित्यावेदितम् ।

यत: स्वाभीष्टसाध्यप्रतिपत्तिर्भवति तदेवाऽभिधातव्यम्, पक्षहेत्वभिधानतः सा भवति, ततः तस्यैव परप्रतिपत्त्यङ्गत्वादभिधानं युक्तमित्याह-**पक्षहेतुवचनादेवेति** ।

ननु व्याप्तिग्रहार्थं तत्स्मरणार्थं वा दृष्टान्तवचनस्याऽप्यावश्यकता-व्याप्तिरूपसाध्यहेतु-सम्बन्धस्मरणमन्तरेणाऽनुमानात्मकपरप्रतिपत्तेरनुदयादित्यत आह-**प्रतिबन्धस्येति** । **तत्स्मरण-स्याऽपि**=प्रतिबन्धस्मरणस्याऽपि ।

पक्षवचनरूपप्रतिज्ञया साध्यस्य, हेतुवचनतो हेतोश्च ज्ञाने सति, पूर्वं गृहीततदुभय-व्याप्तिरूपसम्बन्धस्य प्रतिवादिनः सम्बन्धिद्वयज्ञानत एव तत्सम्बन्धस्मरणस्य सम्भवेन तदर्थं दृष्टान्तवचनोपन्यासस्याऽनावश्यकत्वम् । पूर्वमगृहीतव्याप्तिकस्य तु प्रतिवादिनो, दृष्टान्तेऽपि पूर्वं व्याप्तेरग्रहणेन, तदुपन्यासेऽपि-'कथमत्राऽपि हेतुसत्त्वेऽवश्यसाध्यसत्त्वम्, येनाऽहमत्र निरुक्त-साध्यसाधनयोर्व्याप्तिमवधारयामी'ति प्रतिवादिजिज्ञासाया अनुपशान्तेः, तदुपशमनार्थं प्रकृतस्य हेतोः प्रकृतेन साध्येन सहाऽविनाभावस्य साधनरूपसमर्थनं तयोः कार्यकारणभावतादात्म्यादि-प्रतिबन्धग्राहकप्रमाणतः प्रतिवादिनं प्रति वादिनाऽवश्यमेव कर्त्तव्यमिति दृष्टान्तानुपन्यासेऽपि उक्तसमर्थनत एव व्याप्तिग्रहणतः साध्यप्रतिपत्तिसम्भवे तदनङ्गस्य दृष्टान्तवचनस्योपन्यासोऽना-वश्यक इत्याह—

**असमर्थितस्य[१] दृष्टान्तादेः प्रतिपत्त्यनङ्गत्वात् तत्समर्थनेनैवाऽन्यथासिद्धेश्च । समर्थनं हि हेतोरसिद्धत्वादिदोषान् निराकृत्य स्वसाध्येनाऽविनाभावसाधनम् । तत एव च परप्रतीत्युपपत्तौ किमपरप्रयासेनेति ?**

**असमर्थितस्य**=साध्यहेत्वोरविनाभावावच्छेदकतयाऽसाधितस्य । **तत्समर्थनेनैव**=हेतोः स्वसाध्येन सहाऽविनाभावसाधनेनैव । **अन्यथासिद्धेश्च**=दृष्टान्तोपनयनिगमनवचनोपन्यासस्या-ऽन्यथासिद्धेश्च । किं समर्थनमित्याकाङ्क्षायामाह-**समर्थनं हीति** । **तत एव**=निरुक्तसमर्थनत एव ।

तत् किं दृष्टान्तादिवचनं कमपि प्रतिवादिनं प्रति न प्रयोक्तव्यमेव ? तथा सत्येवमभ्युप-गच्छतः स्याद्वादिन एकान्तवादाभ्युपगमादनेकान्तवादव्याकोप इत्याह—

**मन्दमतीन् तु व्युत्पादयितुं दृष्टान्तादिप्रयोगोऽप्युपयुज्यते । तथाहि—यः खलु क्षयोपशमविशेषादेव निर्णीतपक्षो दृष्टान्तस्मार्यप्रतिबन्धग्राहकप्रमाणस्मरणनिपुणो-ऽपरावयवाभ्यूहनसमर्थश्च भवति, तं प्रति हेतुरेव प्रयोज्यः । यस्य तु नाऽद्याऽपि पक्षनिर्णयः, तं प्रति पक्षोऽपि । यस्तु प्रतिबन्धग्राहिणः प्रमाणस्य न स्मरति, तं प्रति**

---

१. हेतोरिति शेषः । अत्र 'असमर्थितस्य' इत्यस्य व्याख्यानं 'हेतो'रित्यन्तर्भाव्यैव कृतम् ।

**दृष्टान्तोऽपि । यस्तु दार्ष्टान्तिके हेतुं योजयितुं न जानीते, तं प्रत्युपनयोऽपि । एवमपि साकाङ्क्षं प्रति च निगमनम् । पक्षादिस्वरूपविप्रतिपत्तिमन्तं प्रति च पक्षशुद्ध्यादिकमपीति सोऽयं दशावयवो हेतुः पर्यवस्यति ।**

अतिव्युत्पन्नं प्रति हेतुप्रयोगमात्रस्य, तदन्यव्युत्पन्नं प्रति पक्षहेतूभयप्रयोगस्य, मन्दमतिप्रतिवादिव्युत्पादनार्थं दृष्टान्तादिप्रयोगस्योपयोगं भावयति–**तथाहीति** । **निर्णीतपक्षः**=निर्णीतः पक्षः=साध्यविशिष्टो धर्मी येन सः । **दृष्टान्तस्मार्येति** । दृष्टान्तवचनेन स्मृतिविषयः कर्त्तव्यो यः प्रतिबन्धः, तस्य ग्राहकं यत् तर्कात्मकं प्रमाणम्, तस्य स्मरणे यो निपुणः=दृष्टान्तवचनमन्तरेणाऽपि प्रतिबन्धग्राहकतर्कप्रमाणं स्मर्तुं समर्थ इत्यर्थः । **अपरेति** । उपनयनिगमनलक्षणावयवयोः अभ्यूहने=स्वयं तत्स्वरूपकल्पने यः समर्थः, 'भवितव्यमत्र ईदृशेनोपनयेन ईदृशेन च निगमनेने'त्येवंस्वरूपाभ्यूहने समर्थ इत्यर्थः । तथा च–साध्यविशिष्टधर्मिविशेषप्रतिपत्तिलक्षणप्रयोजनस्य क्षयोपशमविशेषादेव भावात् प्रतिज्ञोपन्यासस्य, व्याप्तिग्राहकतर्कस्मरणलक्षणप्रयोजनस्य कारणान्तरादेव सम्पन्नत्वाद् दृष्टान्तोपन्यासस्य, उपनयनिगमनयोः स्वयमभ्यूहनात् तदुभयोपन्यासस्य चाऽनुपयोगे व्यवस्थिते, **तं प्रति**=निरुक्तप्रतिवादिनं प्रति, **हेतुरेव प्रयोज्यः**=हेतुवचनमात्रं प्रयोक्तव्यम् ।

उक्तप्रतिवाद्यपेक्षया किञ्चिन्न्यूनव्युत्पत्तिमन्तं प्रतिवादिनं प्रति पक्षहेतुवचनद्वयस्य प्रयोक्तव्यत्वमनुशास्ति-**यस्य त्विति । नाऽद्याऽपि पक्षनिर्णय** इति । प्रारब्धकथातः प्रागव्यवहितपूर्वकाले साधनीयसाध्यविशिष्टधर्मिविशेषनिर्णयो नाऽस्तीत्यर्थः ।[1] तेनैतत्कथानुपयुक्तसमये यत्किञ्चिद्धर्मविशिष्टधर्मिसाधनावसरे च तद्धर्मविशिष्टधर्मिनिर्णयेऽपि न क्षतिः । **तं प्रति**=तं प्रतिवादिनमुद्दिश्य । **पक्षोऽपीति** । **प्रयोज्य** इति सम्बद्ध्यते । अपिना हेतोः सङ्ग्रहः, पक्षहेतू प्रयोज्यावित्यर्थः ।

मन्दमतिरपि मन्दातिमन्दातिमन्दतममतिभेदेन त्रिविधः । तत्र प्रथममधिकृत्याऽऽह-

---

**'पक्षशुद्ध्यादिकमपि'**–"तत्र वक्ष्यमाणप्रतीतसाध्यधर्मविशेषणत्वादिपक्षदोषपरिहारादिः पक्षशुद्धिः । अभिधास्यमानाऽसिद्धादिहेत्वाभासोद्धरणं हेतुशुद्धिः । प्रतिपादयिष्यमाणसाध्यविकलत्वादिदृष्टान्तदूषणपरिहरणं दृष्टान्तशुद्धिः । उपनयनिगमनयोस्तु शुद्धी प्रमादादन्यथाकृतयोः तयोर्वक्ष्यमाणतत्स्वरूपेण व्यवस्थापके वाक्ये विज्ञेये ।"–स्या० र० पृ० ५६५ ।

---

१. यदा यद्धर्मविशिष्टयद्धर्मिविषयकवाद आरब्धस्तदा तद्धर्मविशिष्टतद्धर्मिविषयकनिर्णयाभावो ग्रहीतव्यः । तेन–तदा तद्भिन्नधर्मविशिष्टतद्धर्मिविषयकनिर्णये, तद्भिन्नकाले तद्धर्मविशिष्टतद्धर्मिविषयकनिर्णये च सत्यपि न क्षतिः ।

**यस्तु प्रतिबन्धेति** । **प्रमाणस्येति** । स्मृत्यर्थकधातुयोगे कर्मणि षष्ठी[१], षष्ठ्यन्तविशेष्यवाचकपदसमभिव्याहृतस्य विशेषणवाचक'प्रतिबन्धग्राहिण'इत्यस्याऽपि षष्ठ्यन्तत्वम् । तथा च यो मन्दमतिः प्रतिवादी दृष्टान्तवचनातिरिक्तेन न केनचित् प्रतिबन्धग्राहि[२]तर्कप्रमाणविषयकस्मरणवानित्यर्थः । **तं प्रति**=तं प्रतिवादिनमुद्दिश्य । **दृष्टान्तोऽपीति** । प्रयोज्य इत्यनुवर्त्तते, अपिना पक्षहेत्वोर्ग्रहणम्, तथा च तं प्रतिवादिनं प्रति पक्षहेतुदृष्टान्तवचनानि प्रयोक्तव्यानीत्यर्थः ।

अतिमन्दमतिप्रतिवादिनमधिकृत्याऽऽह-**यस्त्विति** । **दार्ष्टान्तिके**=पक्षे । **उपनयोऽपीति** । अत्राऽपि प्रयोज्य इत्यस्य सम्बन्धः, अपिना पक्षहेतुदृष्टान्तवचनानामुपग्रहः, तथा च तं प्रति पक्षहेतुदृष्टान्तोपनयाः प्रयोक्तव्या इत्यर्थः ।

अतिमन्दतममतिमधिकरोति—**एवमपीति** । पक्षादिवचनचतुष्टयप्रयोगेऽपीत्यर्थः । **साकाङ्क्षं प्रति**=एतावता किं जातमित्याकाङ्क्षाशालिनं प्रतिवादिनं प्रति । **चः** समुच्चये, स च **निगमन**मित्यनन्तरं योज्यः । समुच्चयश्च प्रतिज्ञाहेतूदाहरणोपनयानाम् । तथा च तं प्रति प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चाऽप्यवयवाः प्रयोक्तव्याः ।

नैतावता **नैयायिके**नाऽस्मदभिमतपञ्चावयवात्मकपरार्थानुमानसिद्धिरिति सन्तोष्टव्यं—ततोऽधिकानामप्यवयवानां प्रतिवादिविशेषमधिकृत्याऽवश्यं प्रयोक्तव्यत्वादित्याह—**पक्षादी**ति । आदिपदाद् हेतुदृष्टान्तोपनयनिगमनानां ग्रहणम् । तथा च यः पक्षस्वरूपे विप्रतिपन्नः, तं प्रति पक्षशुद्धिरपि । यस्तु हेतुस्वरूपे विप्रतिपद्यते, तं प्रति पक्षशुद्धिहेतुशुद्धी द्वे अपि । यस्तु दृष्टान्तस्वरूपेऽपि विवादग्रहिलः, तं प्रति पक्षहेतुदृष्टान्तशुद्धयः तिस्रोऽपि । यस्तु उपनयस्वरूपेऽपि विवादमाविष्करोति, तं प्रति पक्षहेतुदृष्टान्तोपनयशुद्धयः चतस्रोऽपि । यस्तु निगमनस्वरूपेऽपि विवादाचान्तमतिः, तं प्रति पक्षहेतुदृष्टान्तोपनयनिगमनशुद्धयः पञ्चाऽपि प्रयोक्तव्याः । अपिना पक्षादीनां पञ्चानामुपग्रहः । तथा च यद् निष्पन्नं तद् निगमयति—**सोऽयमिति** । **दशावयव** इति । पञ्च प्रतिज्ञादयः, पञ्च पक्षशुद्ध्यादयः, तेषां मेलनेन दशावयव इत्यर्थः ।

पक्षशुद्ध्यादिकं च **स्याद्वादरत्नाकरे** व्यावर्णितम् । तथा च तद्ग्रन्थः-"तत्र वक्ष्यमाणप्रतीतसाध्यधर्मविशेषणत्वादिपक्षदोषपरिहारादिः पक्षशुद्धिः । अभिधास्यमानासिद्ध्यादिहेत्वाभासोद्धरणं हेतुशुद्धिः । प्रतिपादयिष्यमाणसाध्यविकलत्वादिदृष्टान्तदूषणपरिहरणं दृष्टान्तशुद्धिः । उपनयनिगमनयोस्तु शुद्धी प्रमादान्यथाकृतयोः तयोर्वक्ष्यमाणतत्स्वरूपेण व्यवस्थापके

---

१. स्मृत्यर्थदयेशः ॥ (सिद्ध० २-२-११)

२. व्याप्तिग्राहकतर्केत्यर्थः ।

वाक्ये विज्ञेये'' इति ।

हेतुप्रकारानुपदर्शयति—

**स चाऽयं द्विविधः—विधिरूपः प्रतिषेधरूपश्च । तत्र विधिरूपो द्विविधः-विधिसाधकः प्रतिषेधसाधकश्च ।**

**स चाऽयमिति** । अनन्तरनिरूपितस्वरूपो हेतुः पुनरित्यर्थः । हेतोर्यथा साध्योपपत्त्यन्यथानुपपत्तिभ्यां प्रयोगे द्वैविध्यं तथा प्रकारेऽपि द्वैविध्यमित्यभिधानाय पुनरर्थकः चकारः । **विधिरूपः**=भावरूपः, **प्रतिषेधरूपः**=अभावरूपः । प्रथमोद्दिष्टत्वाद् विधिरूपहेतुं विभजते-**तत्रेति** । विधिरूपनिषेधरूपहेत्वोर्मध्ये इत्यर्थः । **विधिसाधकः**=भावरूपसाध्यसाधकः, **प्रतिषेधसाधकः**=अभावरूपसाध्यसाधकः ।

विधिरूपसाध्यसाधकस्य विधिरूपहेतोः प्रकारानुपदर्शयति—

**तत्राऽऽद्यः षोढा । तद् यथा—कश्चिद् व्याप्य एव—यथा शब्दोऽनित्यः-प्रयत्ननान्तरीयकत्वादिति । यद्यपि व्याप्यो हेतुः सर्व एव, तथापि कार्याद्यनात्मव्याप्यस्याऽत्र ग्रहणाद् भेदः । वृक्षः शिंशपाया इत्यादेरप्यत्रैवाऽन्तर्भावः ।**

**तत्र**=विधिसाधकप्रतिषेधसाधकविधिरूपहेत्वोर्मध्ये, **आद्यः**=विधिसाधको विधिरूपो हेतुः, **षोढा**=षट्प्रकारः । षड्विधत्वं च व्याप्य-कार्य-कारण-पूर्वचरो-त्तरचर-सहचरभेदाद् ज्ञेयम् । तान् प्रकारान् क्रमेण निदर्शनोपदर्शनद्वारा भावयति-**तद्यथेति** ।

विधिसाधकं विधेयव्याप्यं भावरूपहेतुमुदाहरति-**यथेति** । शब्देऽनित्यत्वलक्षणभावधर्मो भावात्मकेन प्रयत्ननान्तरीयकत्वेन हेतुना साध्यते । प्रयत्ननान्तरीयकत्वं च नाऽनित्यत्वस्य कार्यकारणादिरूपम्, किन्तु यत्र यत्र प्रयत्ननान्तरीयकत्वं वर्त्तते तत्राऽनित्यत्वमपि वर्त्तते इत्यतः प्रयत्ननान्तरीयकत्वमनित्यत्वस्य व्याप्यमिति ।

ननु साध्यहेत्वोर्व्याप्यव्यापकभावे सत्येव व्याप्तिग्रहणतः सर्वस्याऽनुमानस्योद्भव इति हेतुमात्रस्यैव साध्यव्याप्यरूपतेति प्रथमभेदे एव सर्वेऽपि भेदा सन्निविष्टा इति कार्यकारणादिहेतूनां प्रकारान्तरत्वं न स्यादित्यत आह-**यद्यपीति** । कार्याद्यनात्मकव्याप्यस्यैव व्याप्यत्वेन व्याप्यात्मकहेतुतया विवक्षितत्वमिति कार्यादिहेतूनां न व्याप्यहेतावन्तर्भाव इत्यर्थः ।

एवं सति कार्यादिवत् स्वभावहेतुरप्यधिको वक्तव्यो भवति । तथा च विधिसाधकविधिहेतोः सप्तविधत्वं स्यादित्यत आह—**वृक्ष** इति । वृक्षस्वभावा शिंशपा यदि वृक्षस्वरूप-

---

'**तथापि कार्याद्यनात्म०**'—स्या० र० पृ० ५९४. पं० २३. पृ० ५९५. पं० ६

मतिपतेत् वृक्षसामग्रीं वाऽतिपत्य जायेत तर्हि स्वस्वरूपमेवाऽतिपतेत् स्वसामग्रीं वाऽतिपत्य जायेतेति विपक्षबाधकानिष्टप्रसङ्गतः तादात्म्येन वृक्षव्याप्यतया निर्णीतस्य शिंशपालक्षण-स्वभावहेतोः कार्यादिभिन्नत्वाद् व्याप्यहेतावेवाऽन्तर्भाव इति न तमुपादाय विधिसाधकविधि-हेतोः सप्तविधत्वप्रसङ्ग इत्यर्थः ।

विधिसाधकं द्वितीयं कार्यरूपविधिहेतुं दर्शयति—

**कश्चित् कार्यरूपः, यथा-पर्वतोऽयमग्निमान् धूमवत्त्वान्यथानुपपत्तेरित्यत्र धूमः । धूमो ह्यग्नेः कार्यभूतः तदभावेऽनुपपद्यमानोऽग्निं गमयति ।**

**धूम** इति । कार्यरूपो विधिस्वरूपो धूमहेतुरित्यर्थः । गमकत्वे सत्येव हेतुत्वमिति तद् भावयति—**धूमो हीति** । **हि**=यतः । **तदभावे**=अग्न्यात्मकस्वकारणाभावे ।

विधिसाधकं कारणात्मकविधिरूपं तृतीयं हेतुं निरूपयति—

**कश्चित् कारणरूपः, यथा-वृष्टिर्भविष्यति-विशिष्टमेघान्यथानुपपत्तेरित्यत्र मेघविशेषः । स हि वर्षस्य कारणं स्वकार्यभूतं वर्षं गमयति । ननु कार्याभावेऽपि सम्भवत् कारणं न कार्यानुमापकम्, अत एव न वह्निर्धूमं गमयतीति चेत्, सत्यम्, यस्मिन् सामर्थ्याप्रतिबन्धः कारणान्तरसाकल्यं च निश्चेतुं शक्यते, तस्यैव कारणस्य कार्यानुमापकत्वात् ।**

**विशिष्टेति** । अत्यन्तनैल्योन्नतत्वादिविशिष्टेत्यर्थः । **मेघविशेष** इति । अत्यन्त-नैल्योन्नतत्वादिविशिष्टमेघः कारणात्मकविधिरूपो हेतुरित्यर्थः । भावयति—**स हीति** । तादृश-मेघविशेषो यत इत्यर्थः ।

अत्र कारणस्य कार्यसाधकत्वमसहमानः परः शङ्कते-**नन्विति** । **कार्याभावेऽपि सम्भवत् कारण**मित्यनेन कार्यरूपसाध्याभाववद्वृत्तित्वादनैकान्तिकत्वं कारणहेतोर्दर्शितम् । **अत एव**=कारणस्य कार्याभाववद्वृत्तित्वेनाऽनैकान्तिकत्वाद् कार्याननुमापकत्वादेव । सर्वस्य कारणस्य कार्यानुमापकत्वाभ्युपगमे भवतः शङ्का सत्यैव । परं नैवमभ्युपगम्यते, किन्तु निश्चितकारणान्तर-साकल्याप्रतिबद्धसामर्थ्यस्य[१] कारणविशेषस्यैव हेतुत्वमभ्युपेयते । तस्य कार्याव्यभिचारित्वेन कार्यनुमापकत्वाभ्युपगमे न कश्चिद् दोष इति समाधत्ते—**सत्यमिति** । **यस्मिन्**=घनोन्नतत्वादि-विशिष्टे मेघविशेषलक्षणवृष्टिकारणे, **सामर्थ्याप्रतिबन्धः**= वृष्टिलक्षणकार्यजननसामर्थ्यस्य न केनचित् प्रतिकूलप्रबलवाय्वभिघातादिलक्षणप्रतिबन्धकेन प्रतिबन्धः, **कारणान्तरसाकल्यं**

१. यस्मिन् कारणेऽप्रतिबद्धं सामर्थ्यं सकलकारणान्तरसमवधानं च भवति तत् कारणमवश्यं फलोपधायकं भवति। अत एवमुच्यते-निश्चिते अप्रतिबद्धसामर्थ्य-कारणान्तरसाकल्ये यत्र तद् निश्चित० ।

च=वृष्टिकारणानुकूलवाय्वादिसमवधानं च, **निश्चेतुं शक्यते**='वृष्टिप्रतिबन्धकः कोऽपि इदानीं नाऽस्ति, वृष्ट्यनुकूलवाय्वादिसमवधानं चाऽस्मिन् मेघविशेषे वर्त्तते' इत्येवं निश्चयो लिङ्ग-विशेषादिना कर्तुं शक्यते, **तस्यैव**=तादृशमेघविशेषादेरेव, **कारणस्य**=वृष्ट्यादिकारणस्य, **कार्यानुमापकत्वात्**=वृष्ट्यादिकार्यानुमापकत्वात् ।

विधिसाधकं तुरीयं पूर्वचरात्मकविधिरूपहेतुं निरूपयति—

**कश्चित् पूर्वचरः, यथा-उदेष्यति शकटं-कृत्तिकोदयान्यथानुपपत्तेरित्यत्र कृत्तिकोदयानन्तरं मुहूर्त्तान्ते नियमेन शकटोदयो जायते इति कृत्तिकोदयः पूर्वचरो हेतुः शकटोदयं गमयति ।**

उदाहरति-**यथेति** । **शकटं**=रोहिणीनक्षत्रम् । **उदेष्यति**=मुहूर्त्तान्ते उदयं प्राप्स्यति । अन्यत् स्पष्टम् ।

विधिसाधकं पञ्चममुत्तरचरात्मकविधिरूपहेतुं प्ररूपयति—

**कश्चिदुत्तरचरः, यथोदगाद्भरणिः प्राक्, कृतिकोदयादित्यत्र कृत्तिकोदयः । कृत्तिकोदयो हि भरण्युदयोत्तरचरः तं गमयतीति कालव्यवधानेनाऽनयोः कार्यकारणाभ्यां भेदः ।**

**तं**=भरण्युदयम् । कार्यकारणयोरव्यवधाने सत्येव कार्यकारणभावः । पूर्वचरोत्तरचरयोस्तु मुहूर्त्तात्मककालव्यवधानाद् न कार्यकारणभाव इति पूर्वचरस्य न कारणहेतावन्तर्भावः, उत्तरचरस्य च कार्यहेतावन्तर्भाव इत्यनयोः प्रत्येकं पृथगेव हेतुत्वमित्याह-**कालेति** । **अनयोः**=पूर्वचरोत्तरचरयोः । **कार्यकारणाभ्यां भेद** इति । समासेऽल्पस्वरस्य पूर्वनिपात इति नियम-बलादत्र कार्यपदस्य पूर्वमुपादानम् । अन्वयस्तु पूर्वचरस्य कारणाद् भेदः, उत्तरचरस्य कार्याद् भेद इति ।

विधिसाधकं षष्ठं सहचरात्मकविधिस्वरूपहेतुं निरूपयति-

**कश्चित् सहचरः, यथा—मातुलिङ्गं-रूपवद् भवितुमर्हति—रसवत्तान्यथानुप-पत्तेरित्यत्र रसः । रसो हि नियमेन रूपसहचरितः, तदभावेऽनुपपद्यमानः तद् गमयति । परस्परस्वरूपपरित्यागोपलम्भ—पौर्वापर्याभावाभ्यां स्वभावकार्यकारणेभ्योऽस्य भेदः ।**

**मातुलिङ्गं**='बिजोरा' इति लोके प्रसिद्धं फलम् । तत् फलमन्धकारावृतेऽन्तर्गृहकोणे उपभुञ्जानः पुमान् '**मातुलिङ्गं—रूपवद् भवितुमर्हति—रसवत्तान्यथानुपपत्ते**'रित्यनुमिनोति । तदानीमास्वाद्यमानाद् रसविशेषाद् योग्यमपि तत्रस्थं रूपविशेषमालोकसंयोगाद्यात्मकचाक्षुष-प्रत्यक्षकारणाभावादप्रत्यक्षमित्यतोऽनुमिनोति । तत्र रसो विधिरूपो हेतू रूपस्य सहचरः । तस्य

गमकत्वमुपपादयति-**रसो हीति** । **जैनमते** पौद्गलिकानां यावतामेव नियमेन रूपरसस्पर्श-गन्धवत्त्वमिति **नियमेनेति** । **तदभावे**=रूपाभावे, **अनुपपद्यमानः**=असम्भवत्स्थितिकः, **तद् गमयति**=रूपमनुमापयति ।

रूपरसयोः परस्परस्वरूपपरित्यागेनोपलम्भाद् नैक्यमिति न रूपस्वभावत्वं रसस्य, समानकालीनत्वेनाऽनयोः पौर्वापर्याभावात् पौर्वापर्यनियतकार्यकारणभावोऽपि नेति स्वभाव-कार्यकारणेषु सहचरस्य नाऽन्तर्भाव इति पृथगेवाऽयं हेतुरित्याह—**परस्परेति** । **अस्य**=सहचरस्य ।

उदाहृतानां हेतूनां भावरूपत्वाद् भावसाधकत्वाच्च विधिसाधकविधिरूपत्वम्, विधेयेनाऽविरुद्धतयोपलभ्यमानत्वादेव चाऽविरुद्धोपलब्धिरूपत्वमन्यत्र गीयते इत्युपसंहरति-

**एतेषूदाहरणेषु भावरूपानेवाऽग्न्यादीन् साधयन्ति धूमादयो हेतवो भावरूपा एवेति विधिसाधकविधिरूपाः ते एवाऽविरुद्धोपलब्धय इत्युच्यन्ते ।**

**ते एव**=पूर्वमुदाहृता धूमादिहेतव एव ।

इति विधिसाधकविधिहेतुषट्प्रकारोपवर्णनम् ।

अथ प्रतिषेधसाधकविधिस्वरूपहेतून् निरूपयति—

**द्वितीयस्तु निषेधसाधको विरुद्धोपलब्धिनामा । स च स्वभावविरुद्धतद्व्याप्याद्युपलब्धिभेदात् सप्तधा । यथा—नाऽस्त्येव सर्वथा एकान्तः-अनेकान्तस्योपलम्भात् । नाऽस्त्यस्य तत्त्वनिश्चयः-तत्र सन्देहात् । नाऽस्त्यस्य क्रोधोपशान्तिः-वदनविकारादेः । नाऽस्त्यस्याऽसत्यं वचः-रागाद्यकलङ्कितज्ञानकलितत्वात् । नोद्गमिष्यन्ति मुहूर्त्तान्ते पुष्यतारा-रोहिण्युद्गमात् । नोदगाद् मुहूर्त्तात् पूर्वं मृगशिरः-पूर्वफल्गुन्युदयात् । नाऽस्त्यस्य मिथ्याज्ञानं—सम्यग्दर्शनादिति ।**

**द्वितीयः**=प्रतिषेधसाधकविधिस्वरूपहेतुः । प्रथमस्याऽविरुद्धोपलब्धिसंज्ञकत्वे निगमिते द्वितीयस्य विरुद्धोपलब्धिसंज्ञकत्वमागतमेव, तथापि स्पष्टप्रतिपत्तये उक्तं—**विरुद्धोपलब्धीति** ।

प्रतिषेधसाधकविधिस्वरूपहेतुप्रकारानुपदर्शयति—**स चेति** । विरुद्धोपलब्धिनामको निषेधसाधको विधिस्वरूपहेतुश्चेत्यर्थः । **स्वभावेति** । १. निषेध्यस्वभावविरुद्धोपलब्धिः २. निषेध्यविरुद्धव्याप्योपलब्धिः ३. निषेध्यविरुद्धकार्योपलब्धिः ४. निषेध्यविरुद्धकारणोपलब्धिः ५. निषेध्यविरुद्धपूर्वचरोपलब्धिः ६. निषेध्यविरुद्धोत्तरचरोपलब्धिः ७. निषेध्यविरुद्ध-सहचरोपलब्धिः—इत्येवं सप्तप्रकारो निषेधसाधको विरुद्धोपलब्धिनामको विधिस्वरूपो हेतुरित्यर्थः ।

क्रमेण तानुदाहरणतो भावयति—**यथेति** । **नाऽस्त्येव सर्वथा एकान्तः-अनेकान्तस्योपलम्भादित्यत्र** अनेकान्तलक्षणो हेतुः प्रथमः । **नाऽस्त्यस्य तत्त्वनिश्चयः—तत्र सन्देहादित्यत्र** तत्त्वविषयकसन्देहलक्षणो हेतुर्द्वितीयः । **नाऽस्त्यस्य क्रोधोपशान्तिः—वदनविकारादेरित्यत्र** वदनविकारलक्षणो हेतुः तृतीयः । **नाऽस्त्यस्याऽसत्यं वचः-रागाद्यकलङ्कितज्ञानकलितत्वादित्यत्र** रागाद्यकलङ्कितज्ञानकलितत्वरूपो हेतुः चतुर्थः । **नोद्गमिष्यन्ति मुहूर्त्तान्ते पुष्यतारा—रोहिण्युद्गमादित्यत्र** रोहिण्युद्गमात्मको हेतुः पञ्चमः । **नोदगात् मुहूर्त्तात् पूर्वं मृगशिरः-पूर्वफल्गुन्युदयादित्यत्र** पूर्वफल्गुन्युदयात्मा हेतुः षष्ठः । **नाऽस्त्यस्य मिथ्याज्ञानं—सम्यग्दर्शनादित्यत्र** सम्यग्ज्ञानस्वरूपो हेतुः सप्तमः । अन्ते **इति** शब्दः विरुद्धोपलब्धिहेतुप्रकारोपदर्शनपरिसमाप्तौ ।

क्रमेणोपदर्शितानां विरुद्धोपलब्धिहेतुप्रभेदानां सप्तानामपि हेतूनां क्रमेण प्रतिषेधस्वभावविरुद्धादिरूपतां भावयति—

**अत्राऽनेकान्तः प्रतिषेध्यस्यैकान्तस्य स्वभावतो विरुद्धः । तत्त्वसन्देहश्च प्रतिषेध्यतत्त्वनिश्चयविरुद्धतदनिश्चयव्याप्यः । वदनविकारादिश्च क्रोधोपशमविरुद्धतदनुपशमकार्यम् । रागाद्यकलङ्कितज्ञानकलितत्वं चाऽसत्यविरुद्धसत्यकारणम् । रोहिण्युद्गमश्च पुष्यतारोद्गमविरुद्धमृगशीर्षोदयपूर्वचरः । पूर्वफल्गुन्युदयश्च मृगशीर्षोदयविरुद्धमघोदयोत्तरचरः । सम्यग्दर्शनं च मिथ्याज्ञानविरुद्धसम्यग्ज्ञानसहचरमिति ।**

**तदनिश्चय**=तत्त्वानिश्चय । **तदनुपशमः**=क्रोधानुपशमः । अन्यत् सर्वं स्पष्टम् ।

इति प्रतिषेधसाधकविरुद्धोपलब्धिविधिस्वरूपहेतुनिरूपणम् ।

प्रतिषेधस्वरूपहेतुप्रकारमुपदर्शयति—

**प्रतिषेधरूपोऽपि हेतुर्द्विविधः-विधिसाधकः प्रतिषेधसाधकश्चेति ।**

विधिसाधकस्य प्रतिषेधस्वरूपहेतोः प्रकारानुपदर्शयति—

**आद्यो विरुद्धानुपलब्धिनामा विधेयविरुद्धकार्यकारणस्वभावव्यापकसहचरानुपलम्भभेदात् पञ्चधा ।**

प्रतिषेधरूपहेतोः प्रथमो भेदो विधिसाधकप्रतिषेधरूपहेतुः । यथा विधिस्वरूपहेतोः प्रथमभेदो विधिसाधकोऽविरुद्धोपलब्धिनामा, तस्यैव द्वितीयभेदः प्रतिषेधसाधको विरुद्धोपलब्धिनामा; तथा प्रतिषेधरूपहेतोरपि प्रथमभेदो विधिसाधको विरुद्धानुपलब्धिनामा, तस्यैव द्वितीयभेदः प्रतिषेधसाधकोऽविरुद्धानुपलब्धिनामेत्यभिसन्धानेनोक्तम्—**विरुद्धानुपलब्धिनामेति** ।

**विधेयविरुद्धेति** । १. विधेयविरुद्धकार्यानुपलम्भः २. विधेयविरुद्धकारणानुपलम्भः ३. विधेयविरुद्धस्वभावानुपलम्भः ४. विधेयविरुद्धव्यापकानुपलम्भः ५. विधेयविरुद्ध-सहचरानुपलम्भः—इत्येवंभेदाद् विधिसाधकः प्रतिषेधलक्षणो विरुद्धानुपलब्धिसंज्ञको हेतुः पञ्चप्रकार इत्यर्थः ।

क्रमेणैषामुदाहरणान्युपदर्शयति—

**यथा—अस्त्यत्र रोगातिशयः—नीरोगव्यापारानुपलब्धेः । विद्यतेऽत्र कष्टम्—इष्टसंयोगाभावात् । वस्तुजातमनेकान्तात्मकम्-एकान्तस्वभावानुपलम्भात् । अस्त्यत्र-च्छाया—औष्ण्यानुपलब्धेः । अस्त्यस्य मिथ्याज्ञानं—सम्यग्दर्शनानुपलब्धेरिति ।**

**अस्त्यत्र रोगातिशयो-नीरोगव्यापारानुपलब्धे**रित्यत्र विधेयः=साध्यो रोगातिशयः, तस्य विरुद्धं नैरुज्यम्, तस्य कार्यं नीरोगपुरुषकर्तृकसोत्साहगमनागमनादिक्रियालक्षणव्यापारः, तस्याऽनुपलब्धिः=तदभावो हेतुरत्र भवति विधेयविरुद्धकार्यानुपलम्भात्मा प्रथमः । **विद्यतेऽत्र कष्टम्—इष्टसंयोगाभावा**दित्यत्र विधेयं कष्टं=दुःखम्, तद्विरुद्धं सुखम्, तस्य कारणमिष्टस्य प्रियमित्रादेः संयोगः, तस्याऽनुपलब्धिः=अभावो हेतुर्भवति विधेयविरुद्धकारणानुपलम्भात्मा द्वितीयः । **वस्तुजातमनेकान्तात्मकम्—एकान्तस्वभावानुपलम्भा**दित्यत्र विधेयम् अनेकान्तात्मकत्वम्, तद्विरुद्धस्वभावः=एकान्तस्वभावः, तस्याऽनुपलम्भोऽभावो भवति विधेयविरुद्ध-स्वभावानुपलम्भात्मा तृतीयः । **अस्त्यत्रच्छाया-औष्ण्यानुपलब्धे**रित्यत्र विधेयीभूता छाया, तद्विरुद्ध आतपः, तद्व्यापकमौष्ण्यम्, तस्याऽनुपलम्भोऽभावो भवति विधेयविरुद्धव्यापका-नुपलम्भात्मा चतुर्थः । **अस्त्यस्य मिथ्याज्ञानं—सम्यग्दर्शनानुपलब्धे**रित्यत्र विधेयं मिथ्याज्ञानम्, तस्य विरुद्धं सम्यगज्ञानम्, तत्सहचरं सम्यग्दर्शनम्, तस्याऽनुपलम्भोऽभावो भवति विधेय-विरुद्धसहचरानुपलम्भात्मा पञ्चमः ।

इति विधिसाधकविरुद्धानुपलब्धिसंज्ञकप्रतिषेधरूपहेतुनिरूपणम् ।

प्रतिषेधसाधकाविरुद्धानुपलब्धिसंज्ञकप्रतिषेधरूपहेतुप्रकारानुपदर्शयति—

**द्वितीयोऽविरुद्धानुपलब्धिनामा प्रतिषेध्याविरुद्धस्वभावव्यापककार्यकारण-पूर्वचरोत्तरचरसहचरानुपलब्धिभेदात् सप्तधा ।**

१. प्रतिषेध्याविरुद्धस्वभावानुपलब्धिः २. प्रतिषेध्याविरुद्धव्यापकानुपलब्धिः ३. प्रतिषेध्याविरुद्धकार्यानुपलब्धिः ४. प्रतिषेध्याविरुद्धकारणानुपलब्धिः ५. प्रतिषेध्याविरुद्ध-पूर्वचरानुपलब्धिः ६. प्रतिषेध्याविरुद्धोत्तरचरानुपलब्धिः ७. प्रतिषेध्याविरुद्धसहचरानुपलब्धिः-इत्येवंभेदात् सप्तप्रकारकोऽविरुद्धानुपलब्धिसंज्ञकः प्रतिषेधसाधकः प्रतिषेधरूपो हेतुरित्यर्थः ।

उक्तान् प्रकारान् क्रमेणोदाहरति—

**यथा—नाऽस्त्यत्र भूतले कुम्भः-उपलब्धिलक्षणप्राप्तस्य तत्स्वभावस्याऽनुपलम्भात्। नाऽस्त्यत्र पनसः-पादपानुपलब्धेः। नाऽस्त्यत्राऽप्रतिहतशक्तिकं बीजम्—अङ्कुरानवलोकनात्। न सन्त्यस्य प्रशमप्रभृतयो भावाः-तत्त्वार्थश्रद्धानाभावात्। नोद्गमिष्यति मुहूर्त्तान्ते स्वातिः-चित्रोदयादर्शनात्। नोदगमत् पूर्वभद्रपदा मुहूर्त्तात् पूर्वम्-उत्तरभद्रपदोद्गमानवगमात्। नाऽस्त्यत्र सम्यग्ज्ञानं-सम्यग्दर्शनानुपलब्धेरिति।**

**नाऽस्त्यत्र कुम्भः-उपलब्धिलक्षणप्राप्तस्य तत्स्वभावस्याऽनुपलब्धे**रित्यत्र भूतलादिपुरोवर्त्तिदेशे घटो निषिध्यते अर्थाद् घटाभावः साध्यते इति प्रतिषेध्यो घटः, तस्याऽविरुद्धः उपलब्धिलक्षणप्राप्तोऽर्थात् तच्चाक्षुषप्रत्यक्षजनकघटतद्व्याप्येतरा(?)लोकादिसमवधाने सति-प्रत्यक्षयोग्यतापन्नः तत्स्वभावः=पृथुबुध्नाद्याकारविशिष्टघटस्वरूपम्, तस्याऽनुपलम्भो=विषयतया तदुपलब्ध्यभावो भवति प्रतिषेध्याविरुद्धस्वभावानुपलब्धिलक्षणः प्रथमः। **नाऽस्त्यत्र पनसः-पादपानुपलब्धे**रित्यत्र पनसाभावस्य साध्यत्वेन, प्रतिषेध्यः पनसो वृक्षविशेषः, तस्याऽविरुद्धो व्यापको वृक्षः, सामान्यस्य विशेषव्यापकता सुप्रतीतैव, तस्याऽनुपलम्भादुपलब्ध्यभावो भवत्येव प्रतिषेध्याविरुद्धव्यापकानुपलम्भात्मा द्वितीयः। **नाऽस्त्यत्राऽप्रतिहतशक्तिकं बीजम्—अङ्कुरानुपलब्धे**रित्यत्र अप्रतिहतसामर्थ्ये कारणे सति कार्यमवश्यमेव भवतीति प्रतिसन्धाय, अङ्कुरलक्षणकार्यानुपलब्ध्या क्षेत्रविशेषेऽप्रतिहतसामर्थ्यकं बीजं निषिध्यते, तस्याऽविरुद्धं कार्यमङ्कुरम्, तदनुपलब्धिर्भवति प्रतिषेध्याविरुद्धकार्यानुपलब्धिरूपतृतीयः। **न सन्त्यस्य प्रशमप्रभृतयो भावाः-तत्त्वार्थश्रद्धानाभावा**दित्यत्र रथ्यापुरुषसमकक्षे पुरुषविशेषे सम्यग्दर्शनकार्याणां प्रशमप्रभृतीनामभावः साध्यते इति प्रशमप्रभृतयो भावाः प्रतिषेध्याः, तेषामविरुद्धं कारणं तत्त्वार्थश्रद्धानलक्षणसम्यग्दर्शनम्, तदनुपलम्भः=तदभावो भवति प्रतिषेध्याविरुद्धकारणानुपलब्ध्यात्मा तुरीयः। **नोद्गमिष्यति मुहूर्त्तान्ते स्वातिः—चित्रोदयादर्शना**दित्यत्र चित्रोदयादर्शनहेतुना मुहूर्त्तानन्तरं भविष्यत्स्वातिनक्षत्रोदयाभावः साध्यते इति प्रतिषेध्यः तादृशस्वातिनक्षत्रोदयः, तस्याऽविरुद्धः पूर्वचरः चित्रानक्षत्रोदयः, तददर्शनं=तदभावो भवति प्रतिषेध्याविरुद्धपूर्वचरानुपलब्ध्यात्मा पञ्चमः। **नोदगमत् पूर्वभद्रपदा मुहूर्त्तात् पूर्वम्—उत्तरभद्रपदोद्गमानवगमा**दित्यत्र उत्तरभद्रपदोद्गमानवगमेन मुहूर्त्तात् पूर्वभूतपूर्वचरोद्गमस्याऽभावः साध्यते इति प्रतिषेध्यः तादृशपूर्वभद्रपदोद्गमः, तस्याऽविरुद्ध उत्तरचरः उत्तरभद्रपदोद्गमः, तदनवगमः=तदभावो भवति प्रतिषेध्याविरुद्धोत्तरचरानुपलब्ध्यात्मा षष्ठः। **नाऽस्त्यत्र सम्यग्ज्ञानं—सम्यग्दर्शनानुपलब्धे**रित्यत्र सम्यग्दर्शनाभावेन हेतुना पुरुषविशेषे सम्यग्ज्ञानाभावः साध्यते, तत्प्रतियोगित्वात् प्रतिषेध्यं सम्यग्ज्ञानम्, तस्याऽविरुद्धं सहचरं

सम्यग्दर्शनम्, तदनुपलब्धिः=तदभावो भवति प्रतिषेध्याविरुद्धसहचरानुपलब्ध्यात्मा सप्तमः ।

इति प्रतिषेधसाधकाविरुद्धानुपलब्धिसंज्ञकप्रतिषेधहेतुनिरूपणे वृत्तं हेतुनिरूपणम् ।

हेतुनिरूपणमुपसंहरन् तद्भिन्नत्वाद् हेत्वाभासनिरूपणमपि विधेयमित्याह-

**सोऽयमनेकविधोऽन्यथानुपपत्त्येकलक्षणो हेतुरुक्तोऽतोऽन्यो हेत्वाभासः ।**

**अतः**=हेतुतः, **अन्यः**=भिन्नः । हेतुवदाभासते इति हेत्वाभासो, दुष्टहेतुरिति यावत् । तल्लक्षणं तु अनुमितितत्कारणान्यतरप्रतिबन्धकज्ञानविषयत्वम् । अत्रोक्तज्ञानविषयत्वं हेतुदोषस्य लक्षणमिति **नैयायिका** वदन्ति । स्वमते सद्धेतुभिन्नहेतुत्वमेव दुष्टहेतोर्लक्षणम् । परोक्तलक्षणस्य दुष्टपक्ष-दुष्टसाध्येऽपि सत्त्वेनाऽतिव्याप्तिग्रस्तत्वाद् **अतोऽन्यो हेत्वाभास** इत्युक्तम् ।

हेत्वाभासं विभजते-

**स त्रेधा–असिद्धविरुद्धानैकान्तिकभेदात् । तत्राऽप्रतीयमानस्वरूपो हेतुरसिद्धः । स्वरूपाप्रतीतिश्चाऽज्ञानात् सन्देहाद् विपर्ययाद् वा । स द्विविधः-उभयासिद्धोऽन्यतरासिद्धश्च । आद्यो यथा–शब्दः-परिणामी-चाक्षुषत्वादिति । द्वितीयो यथा–अचेतनाः तरवः-विज्ञानेन्द्रियायुर्निरोधलक्षणमरणरहितत्वाद्, अचेतनाः सुखादय-उत्पत्तिमत्त्वाद् ।**

असिद्धविरुद्धानैकान्तिकभेदाद् हेत्वाभासः त्रिप्रकार इत्यर्थः । प्रथमोद्दिष्टमसिद्धहेत्वाभासं निरूपयति-**तत्रे**ति । असिद्धविरुद्धानैकान्तिकहेत्वाभासेषु मध्ये इत्यर्थः । **अप्रतीयमानस्वरूपो हेतु**रिति लक्षणम्, **असिद्ध** इति लक्ष्यम् । असिद्धत्वेनाऽभिमतस्य हेतोः स्वरूपाप्रतीतौ कारणान्युपदर्शयति-**स्वरूपाप्रतीतिश्चे**ति । **वा**कारः कस्यचित् प्रमातुः हेतुस्वरूपाप्रतीतिः तदज्ञानाद् भवति, कस्यचित्तु हेतुस्वरूपे सन्देहात्, कस्यचित् पुनः विपर्ययादिति पुरुषभेदेन कारणभेदज्ञापनार्थम् ।

**स** इति । उभयासिद्धान्यतरासिद्धभेदेनाऽसिद्धलक्षणो हेत्वाभासो द्विप्रकार इत्यर्थः । यो हेतुः वादिप्रतिवादिभ्यामुभाभ्यामपि पक्षे धर्मिणि नैव सिद्धः, अपि तु तदभाव एव पक्षे वादिप्रतिवादिभ्यामनुमतः, स उभयासिद्धोऽसिद्धस्य प्रथमो भेदः । तमुदाहरति–**आद्यो यथे**ति । यदि **शब्दः-परिणामी-चाक्षुषत्वा**दित्यनुमानं **जैनो नैयायिकं** प्रति विदधीत, तदा वादिनो जैनस्य प्रतिवादिनो **नैयायिकस्य** च शब्दे चक्षुरिन्द्रियजन्यप्रत्यक्षविषयत्वलक्षणं चाक्षुषत्वं न सिद्धम्, द्वाभ्यामपि ताभ्यां शब्दे श्रवणेन्द्रियजन्यप्रत्यक्षविषयत्वलक्षणश्रावणत्वाभ्युपगत्या चाक्षुषत्वाभावस्यैवोपेतत्वादित्यर्थः ।

वादिनः प्रतिवादिनो वा यो हेतुः पक्षे न सिद्धः, अपि तु तदभाव एव वादिप्रतिवाद्यन्यतराभीष्टः, स हेतुरन्यतरासिद्धः । तमुदाहरति-**द्वितीयो यथे**ति । यदि **जैनं** प्रति

**बौद्धः** तरुषु चैतन्याभावसाधनाय विज्ञानेन्द्रियायुर्निरोधलक्षणमरणरहितत्वं हेतुं प्रयुञ्जीत, सोऽस्य हेतुः तरूणां विज्ञानेन्द्रियायुर्निरोधलक्षणमरणमभ्युपगच्छतः प्रतिवादिनो **जैनस्य** न सिद्ध इति प्रतिवाद्यसिद्धोऽय**मचेतनाः तरवः-विज्ञानेन्द्रियायुर्निरोधलक्षणमरणरहितत्वा**दित्यत्रोपात्तो हेतुरित्यर्थः । **अचेतनाः-सुखादय-उत्पत्तिमत्त्वा**दित्येवं **जैनं** प्रति **साङ्ख्यो** यद्यनुमानप्रयोगं रचयेत्, तदा **साङ्ख्य**स्यैकान्तसत्कार्यवादिनः उत्पत्तिमत्त्वं क्वचिदपि न सिद्धमिति सुखादिषु धर्मिष्वपि तत् तस्याऽसिद्धमेवेति वाद्यसिद्धत्वादन्यतरासिद्धोऽयं हेतुरित्यर्थः ।

अन्यतरासिद्धस्य हेत्वाभासत्वमसहमानः कश्चित् प्रश्नयति—

**नन्वन्यतरासिद्धो हेत्वाभास एव नाऽस्ति । तथाहि—परेणाऽसिद्ध इत्युद्भाविते यदि वादी न तत्साधकं प्रमाणमाचक्षीत, तदा प्रमाणाभावादुभयोरप्यसिद्धः । अथाऽऽचक्षीत तदा प्रमाणस्याऽपक्षपातित्वादुभयोरपि सिद्धः ।**

अन्यतरासिद्धस्य हेत्वाभासत्वाभावं भावयति—**तथाही**ति । **परेण**=प्रतिवादिना, **असिद्ध इत्युद्भाविते**=त्वया प्रयुक्तोऽयं हेतुर्न प्रमाणेन प्रकृतधर्मिणि सिद्ध-इत्येवमभिहिते सति, **यदि वादी न तत्साधकं प्रमाणमाचक्षीत**=अनुमानप्रयोक्ता प्रकृतधर्मिणि स्वप्रयुक्तहेतुसाधकं किमपि प्रमाणं न ब्रूयात्, **तदा प्रमाणाभावादुभयोरप्यसिद्धः**=प्रतिवादी तत्र प्रमाणमपश्यन् एवाऽसिद्ध इत्यभिहितवानिति प्रतिवादिनः प्रमाणाभावादेवाऽसिद्धः, कथायां प्रयुक्तमेव प्रमाणं प्रमाणतां भजते, न त्वप्रयुक्तमिति सदपि प्रमाणमप्रयुक्तत्वाद् न तत्र प्रमाणमिति वादिनोऽपि प्रमाणाभाव इति प्रमाणाभावाद् वादिप्रतिवादिनोरुभयोरप्यसिद्धो, न त्वेकस्यैवेति ।

**अथाऽऽचक्षीत**=प्रतिवादिना 'तवाऽयमसिद्धो हेतु'रित्युद्भाविते यदि वादी स्वोपन्यस्तहेतौ प्रमाणं ब्रूयात् । एवं सति-यत् प्रमाणं तत् सर्वस्याऽपि प्रमाणं भवत्येव, न त्वेकस्य तत् प्रमाणमन्यस्य तु न प्रमाणम्, न हि प्रमाणस्य प्रामाण्याप्रामाण्ये आपेक्षिके सम्भवतः-इति यद् वादिनोक्तं प्रमाणम्, तत् प्रतिवादिनोऽपि प्रमाणमेवेति तत्सिद्धमुभयसिद्धमेवेति नैवमप्यत्राऽन्यतरासिद्धत्वस्याऽवकाश इत्याह—**तदे**ति ।

प्रमाणोपदर्शनानन्तरं भवतूभयसिद्धम्, ततः प्राक् प्रमाणेनाऽप्रसाधितं तद् न प्रतिवादिनोऽभ्युपगमविषय इत्येतावता तं प्रत्यसिद्धत्वाद् अन्यतरासिद्धः तदात्मको हेतुरुच्यते

---

**'नन्वन्यतरासिद्धः'—प्रमेयकमलमार्त्तण्डे** [पृ० १९१] **स्याद्वादरत्नाकरे** [पृ० १०१८] च अन्यतरासिद्धाख्यहेत्वाभासस्य नास्तित्वाशङ्कायाः—"नन्वेवमपि अस्य असिद्धत्वं गौणमेव स्यादिति चेद्, एवमेतत्, प्रमाणतो हि सिद्धेरभावात् असिद्धोऽसौ न तु स्वरूपतः" इत्यादिना यत् समाधानं कृतं तदपि अत्र पूर्वपक्षतया उपन्यस्य समाधानान्तरं दीयते ग्रन्थकृता ।

इत्याशङ्कते–

**अथ यावद् न परं प्रति प्रमाणेन प्रसाध्यते, तावत् तं प्रत्यसिद्ध इति चेत्;**

**परं**=प्रतिवादिनम्, **तं प्रति**=प्रतिवादिनं प्रति ।

समाधत्ते–

**गौणं तर्ह्यसिद्धत्वम्, न हि रत्नादिपदार्थः तत्त्वतोऽप्रतीयमानः तावन्तमपि कालं मुख्यतया तदाभासः । किञ्च, अन्यतरासिद्धो यदा हेत्वाभासः तदा वादी निगृहीतः स्यात्, न च निगृहीतस्य पश्चादनिग्रह इति युक्तम् । नाऽपि हेतुसमर्थनं पश्चाद् युक्तम्–निग्रहान्तत्वाद् वादस्येति ।**

**तर्हि गौणमसिद्धत्व**मित्यन्वयः । गौणत्वमेव निदर्शनोपन्यासेन द्रढयति–**न हीति** । अस्य **तदाभास** इत्यनेनाऽन्वयः । यथा तत्त्वतो यदा रत्नादिर्न प्रतीयते–तत्परीक्षकाभावात्, तदानीमपि परमार्थतो रत्नाभासः स न भवति, किन्तु तदानीं परीक्षाऽविदग्धैः वस्तुतो रत्न-रूपोऽपि सन् रत्नाभास इति व्यवह्रियते, एवं गौणमेव तस्य रत्नाभासत्वम्; तथा वस्तुतः प्रमाणविषयस्य प्रमाणोपन्यासात् पूर्वं प्रतिवादिनः प्रमाणविषयत्वेनाऽप्रतिभासमानस्याऽपि हेतोः, असिद्धोऽयं हेतुरित्येवं व्यवहारेण गौणमेवाऽसिद्धत्वम्, तद्बलाद् न मुख्यो हेत्वाभासोऽयं भवितुमर्हतीत्यर्थः ।

किञ्च प्रतिज्ञाविरोध-प्रतिज्ञासंन्यास-प्रतिज्ञान्तरादिनिग्रहस्थानानां मध्ये हेत्वाभास-स्याऽपि परिगणनादन्यतरासिद्धरूपहेत्वाभासलक्षणनिग्रहस्थानावासितो वादी निगृहीतः [सन्] न तत्परिहारार्थं तत्र प्रमाणोपन्यासं कर्तुमर्हति–निग्रहान्तत्वाद् वादस्य, अन्यथा परापरविचार-धाराप्रवृत्तितोऽनवस्थानात् कथान्तं न कोऽपि गच्छेदिति जयपराजयव्यवस्थैवोच्छिद्येतेत्याह–**किञ्चेति** । **न चे**त्यस्य **युक्त**मित्यनेनाऽन्वयः । **नाऽपि** इत्यस्य **युक्त**मित्यनेनाऽन्वयः । अन्यत् स्पष्टम् ।

**अत्रोच्यते–यदा वादी सम्यग्घेतुत्वं प्रतिपद्यमानोऽपि तत्समर्थनन्यायविस्मरणादि-निमित्तेन प्रतिवादिनं प्राश्निकान् वा प्रतिबोधयितुं न शक्नोति, असिद्धतामपि नाऽनुमन्यते, तदाऽन्यतरासिद्धत्वेनैव निगृह्यते ।**

**अत्रोच्यते** इति । उक्तान्यतरासिद्धहेत्वाभासानुपपत्तिशङ्कायां प्रतिविधानमभिधीयते इत्यर्थः । **सम्यग्घेतुत्वं**=स्वोपन्यस्तहेतोः सद्धेतुत्वं, **प्रतिपद्यमानोऽपि**=जानन्नपि । एतावता न तस्य वाद्यसिद्धत्वमिति आविष्कृतम् । तर्हि येन प्रमाणेन स्वयं तं स्वीकरोति, तत्प्रमाणो-पदर्शनेन परमपि तं स्वीकारयिष्यतीति प्रतिवादिसिद्धोऽप्ययमत आह–**तत्समर्थने**ति ।

तत्साधकन्यायः पूर्वमनुभवपथमासीदेव, परमिदानीं सभाक्षोभादिना न स्मृतिपथमुपैति, सन्नपि संस्कारो नोद्बोधमुपयातीत्यतः तत्समर्थनन्यायविस्मरणादिलक्षणकारणेनेत्यर्थः । **प्रतिवादिनं**=स्वपक्षविरुद्धपक्षस्थापकतया स्वप्रतिमल्लम् । **प्राश्निकान्**=वादिप्रतिवादिसिद्धान्तरहस्यज्ञान् मध्यस्थान् वा । **प्रतिबोधयितुम्**=इदं मद्धेतुसिद्धिसमर्थं प्रमाणमिति ज्ञापयितुम् । **न शक्नोति**=न शक्तिमाबिभर्त्ति । एवं सति स्वहेतोरसिद्धतामेव स्वीकरोति, कथमेवं स्यात् ? स्वहेतोः सद्धेतुतां जानन् अयमप्रतिभामात्रेण प्रतिपन्नस्य तस्याऽसिद्धतां कथं नाम स्वीकरोत्विति- **असिद्धतामपि नाऽनुमन्यते** । एवञ्च वादिसिद्धत्वाद् न वाद्यसिद्धोऽयम्, प्रतिवादी तु स्वयं स्वपक्षप्रतिपक्षसाधकं तं न स्वीकरोत्येव, वादिनाऽपि तत्साधकप्रमाणानुपन्यासाद् न तथा प्रतिबोधित इति वादी स्वोपन्यस्तहेतोः तदानीमन्यतरासिद्धत्वेनैव, **निगृह्यते**=निग्रहस्थान-मापन्नत्वाद् निगृहीतो भवति ।

प्रकारान्तरेणाऽपि अन्यतरासिद्धत्वमुपपादयति-

**तथा, स्वयमनभ्युपगतोऽपि परस्य सिद्ध इत्येतावतैवोपन्यस्तो हेतुरन्यतरासिद्धो निग्रहाधिकरणम् । यथा-साङ्ख्यस्य जैनं प्रति अचेतनाः सुखादय-उत्पत्तिमत्त्वाद् घटवदिति ।**

**स्वयमनभ्युपगतोऽपि**=स्वाभ्युपगमाविषयोऽपि । एतावता वाद्यसिद्धता प्रकटीकृता । तर्हि कथमित्थं जानन् अप्यसिद्धेनैव हेतुना परं प्रति साध्यं साधयितुं प्रवृत्त इत्याकाङ्क्षायामाह- **परस्येति** । भवतु ममाऽसिद्धोऽयम्, परस्तु यदि स्वसिद्धत्वतोऽस्मत्सिद्धत्वमेवाऽज्ञानाद् धारयेत्, ततश्चाऽसिद्धिं नोद्भावयेत् तर्हि सिद्धं नः समीहितमिति परस्य सिद्धोऽयमित्येतावन्मात्रेण वादिनोपन्यस्तो **हेतुरन्यतरासिद्धो निग्रहाधिकरणं**=निग्रहस्थानम्, भवतीति शेषः ।

एतदुदाहरति-**यथेति** । **सुखादयोऽचेतना-उत्पत्तिमत्त्वादि**त्यत्र उत्पत्तिमत्त्वलक्षणो हेतुः प्रतिवादिनो **जैनस्य** सिद्ध एव-सुखादीनामुत्पत्तिमत्त्वस्य **जैने**नाऽभ्युपगमात्, किन्तु सत्कार्यमभ्युपगच्छतो वादिनः कुत्राप्युत्पत्तिमत्त्वं न सिद्धम्, दृष्टान्तेऽपि घटे तदसिद्धमेवेति भवति तद् अन्यतरासिद्धमिति ।

विरुद्धं लक्षयति-

**साध्यविपरीतव्याप्तो विरुद्धः । यथा-अपरिणामी शब्दः-कृतकत्वादिति । कृतकत्वं ह्यपरिणामित्वविरुद्धेन परिणामित्वेन व्याप्तमिति ।**

अत्र **विरुद्ध** इति लक्ष्यम्, **साध्यविपरीतव्याप्त** इति लक्षणम् । साध्याभावव्याप्यो हेतुर्विरुद्ध इत्यर्थः । उदाहरति-**यथेति** । शब्दो धर्मी, अपरिणामित्वं साध्यम्, कृतकत्वं हेतुः ।

तत्र विरुद्धलक्षणं सङ्गमयति-**कृतकत्वमिति** । **अपरिणामित्वं**=परिणामित्वाभावः, तस्य स्वप्रतियोगिना परिणामित्वेन समं परस्पराभावरूपत्वलक्षणप्रतिषेध्यप्रतिषेधकभावो विरोधः, [१]अभावाभावस्य प्रतियोगिरूपत्वेनाऽपरिणामित्वाभावस्य परिणामित्वस्य व्याप्तत्वात् कृतकत्वं विरुद्धमित्यर्थः ।

अनैकान्तिकहेत्वाभासं निरूपयति-

**यस्याऽन्यथानुपपत्तिः [२]सन्दिह्यते सोऽनैकान्तिकः ।**

**अनैकान्तिक** इति लक्ष्यम्, **यस्यादि** लक्षणम् । अनिर्णीतसाध्यान्यथानुपपत्तिको हेतुरनैकान्तिक इत्यर्थः । अस्यैव सव्यभिचार इति नामान्तरम् । यस्मिन् हेतौ साध्याभाववद्वृत्तित्वं सन्दिह्यते, तदानीं तत्र साध्यं विनाऽनुपपत्तिनिर्णयो न विद्यते-साध्यान्यथानुपपत्तेर्हेतौ निर्णये साध्याभाववद्वृत्तित्वाभावरूपाव्यभिचारनिर्णयरूपप्रतिबन्धकसत्त्वात् साध्याभाववद्वृत्तित्व-सन्देहासम्भवात् । यत्र च हेतौ साध्याभाववद्वृत्तित्वस्य निर्णयो यदा विद्यते, तदानीं तद्रूपप्रतिबन्धकसत्त्वात् साध्याभाववदवृत्तित्वात्मकाव्यभिचारलक्षणान्यथानुपपत्तेर्निर्णयासम्भ-वादुभयत्रेदं लक्षणं समनुगतमिति ।

**स द्वेधा-निर्णीतविपक्षवृत्तिकः सन्दिग्धविपक्षवृत्तिकश्च ।**

अनैकान्तिकहेत्वाभासो निर्णीतविपक्षवृत्तिक-सन्दिग्धविपक्षवृत्तिकभेदाभ्यां द्विप्रकार इत्यर्थः । यस्य हेतोः विपक्षे=साध्याभाववति धर्मिणि वृत्तिर्निर्णीता स **निर्णीतविपक्षवृत्तिकः** । यस्य तु साध्याभाववति विपक्षे वृत्तिः सन्दिग्धा स **सन्दिग्धविपक्षवृत्तिकः** ।

तत्र प्रथममुदाहरति-

**आद्यो यथा-नित्यः शब्दः-प्रमेयत्वात् । अत्र हि प्रमेयत्वस्य वृत्तिर्नित्ये व्योमादौ सपक्षे इव विपक्षेऽनित्ये घटादावपि निश्चिता ।**

शब्दे धर्मिणि प्रमेयत्वेन हेतुना नित्यत्वसाध्यस्य साधने प्रमेयत्वहेतुर्निर्णीतविपक्षवृत्तिक इत्यर्थः । लक्षणं सङ्गमयति-**अत्रेति** । नित्यः शब्दः-प्रमेयत्वादिति स्थले इत्यर्थः । निश्चित-साध्यवान् धर्मी सपक्ष इति व्योम्नि नित्यत्वलक्षणसाध्यस्य निश्चयात्, सपक्षे प्रमेयस्य वृत्तिर्यथा

१. हेतोः परिणामिव्याप्यत्वेऽपरिणामित्वाभावव्याप्यत्वं कथं ? तद् दर्शयति-अभावाभावस्येति ।

२. यदि हेतौ साध्याभाववद्वृत्तित्वरूपव्यभिचारस्य संशयो निर्णयो वा भवेत् तर्हि तत्र साध्यान्यथानुपपत्तिनिर्णयो नाऽस्त्येव, यतः 'अयं स्थाणुः' इति निश्चये 'अयं पुरुषो न वे'ति संशयो यथा न भवति, तथैवाऽव्यभिचारनिर्णये सति 'अयं व्यभिचारी न वे'ति संशय एव न स्यात्, व्यभिचारनिर्णयकाले तु साध्यान्यथानुपपत्तिनिर्णयस्यैवाऽसम्भवः । 'सन्दिह्यते' इत्यस्य 'निर्णयो नाऽस्ती'त्येवाऽर्थः करणीयः ।

निश्चिता, तथा निश्चितसाध्याभाववान् धर्मी विपक्ष इति घटादौ धर्मिणि नित्यत्वात्मकसाध्याभावरूपानित्यत्वनिर्णयाद् विपक्षे प्रमेयत्वस्य वृत्तिर्निर्णीतेति भवति प्रमेयत्वहेतुर्निर्णीतविपक्षवृत्तिकानैकान्तिक इत्यर्थः ।

सन्दिग्धविपक्षवृत्तिकानैकान्तिकमुदाहरति-

**द्वितीयो यथा—अभिमतः-सर्वज्ञो न भवति-वक्तृत्वादिति । अत्र हि वक्तृत्वं विपक्षे सर्वज्ञे सन्दिग्धवृत्तिकम्-सर्वज्ञः किं वक्ताऽऽहोस्विन्नेति सन्देहात् । एवं स श्यामो-मित्रापुत्रत्वादित्याद्यप्युदाहार्यम् ।**

**जैनेन** सर्वज्ञत्वेन रूपेणाऽभिमते पुरुषधौरेये **महावीरे** वक्तृत्वेन हेतुना सर्वज्ञत्वाभावलक्षणसाध्यस्य **मीमांसकेन** साधने वक्तृत्वहेतुः सन्दिग्धविपक्षवृत्तिकानैकान्तिक इत्यर्थः । तत्र लक्षणं सङ्गमयति-**अत्रेति** । अभिमतः-सर्वज्ञो न भवति-वक्तृत्वादित्यनुमाने इत्यर्थः । यश्च नैयायिकस्य सोपाधिकत्वेन व्याप्यत्वासिद्धतयाऽभिमतो हेतुः, सोऽपि सन्दिग्धविपक्षवृत्तिकानैकान्तिक एवाऽन्तर्भवतीत्याशयेनाऽऽह-**एवमिति** ।

**धर्मभूषणेन** अप्रयोजकापरनामाऽकिञ्चित्करो हेतुः सिद्धसाधन-बाधितविषयाभ्यां द्विप्रकारो हेत्वाभासोऽधिक उररीकृतः । तन्मतं प्रतिक्षिपति-

**अकिञ्चित्कराख्यः चतुर्थोऽपि हेत्वाभासभेदो धर्मभूषणेनोदाहृतो न श्रद्धेयः-सिद्धसाधनो बाधितविषयश्चेति द्विविधस्याऽप्यप्रयोजकाह्वस्य तस्य प्रतीत-निराकृताख्य-पक्षाभासभेदानतिरिक्तत्वात् । न च यत्र पक्षदोषः, तत्राऽवश्यं हेतुदोषोऽपि वाच्यः-दृष्टान्तादिदोषस्याऽप्यवश्यंवाच्यत्वापत्तेः ।**

**तस्य**=अकिञ्चित्करस्य । **प्रतीतेति** । सिद्धसाधनरूपाकिञ्चित्करस्य प्रतीताख्यपक्षाभासाभिन्नत्वाद्, बाधितविषयरूपाकिञ्चित्करस्य च निराकृताख्यपक्षाभासाभिन्नत्वाद् हेतुदोष एवाऽयं न भवति, कुतः तमादाय हेत्वाभासस्य चतुर्विधत्वमित्यर्थः ।

पक्षदोषस्याऽप्यस्य 'यत्र पक्षदोषः तत्राऽवश्यं हेतुदोष' इति नियममुररीकृत्य हेत्वाभासत्वाभ्युपगमे साध्यविकल-हेतुविकल-साध्यसाधनोभयविकल-दृष्टान्तलक्षणसाधर्म्यदृष्टान्तदोषाणां साध्याभावविकल-साधनाभावविकल-साध्याभावसाधनाभावोभयविकलदृष्टान्तलक्षणवैधर्म्यदृष्टान्तदोषाणां चाऽपि सद्भावेन 'यत्र दृष्टान्तदोषः, तत्राऽवश्यं हेतुदोष' इति नियममुररीकृत्य तादृशदोषाणामपि हेत्वाभासतयाऽभिधानं कर्त्तव्यं स्यादित्याह-**न चेति** । अस्य

---

**'धर्मभूषणेन'**-"अप्रयोजको हेतुरकिञ्चित्करः । स द्विविधः सिद्धसाधनो बाधितविषयश्च ।" न्यायदी० पृ० ३५ ।

**वाच्य** इत्यनन्तरं सम्बन्धः ।

अकिञ्चित्कराख्यदोषस्य हेत्वाभासत्वखण्डनेन **नैयायिका**भिमतस्य कालात्यया-पदिष्टाख्यहेत्वाभासस्य हेत्वाभासत्वमपहस्तितं भवतीत्याह-

**एतेन कालात्ययापदिष्टोऽपि प्रत्युक्तो वेदितव्यः ।**

**एतेने**त्यस्य **प्रत्युक्त** इत्यनेनाऽन्वयः । **प्रत्युक्तः**=निरस्तः । पक्षे साध्यसन्देहकाल एव साध्यसाधनकालः, तदत्ययः=तदतिक्रमः=पक्षे साध्याभावप्रमाकाले साध्यसाधनम्, तस्मिन् काले बाधितसाध्यसाधनायाऽपदिष्टः=प्रयुक्तो हेतुः कालात्ययापदिष्ट इत्यनेन बाधितविषय एव उक्तो भवति, तस्य निराकृतपक्षाभासाभिन्नत्वेन हेत्वाभासत्वासम्भवादित्यर्थः ।

प्रकरणसमापरनामकसप्रतिपक्षस्याऽपि असिद्धानैकान्तिकविरुद्धबाधितभिन्नतया हेत्वाभासपञ्चमभेदत्वं **नैयायिका** अभ्युपगच्छन्ति । तदपि न सम्यक्-तत्रापि साध्यसाधन-योरन्यथानुपपत्तिलक्षणाविनाभावानिश्चयेनाऽसिद्धत्वस्यैव सम्भवादित्याह-

**प्रकरणसमोऽपि नाऽतिरिच्यते-तुल्यबल-साध्यतद्विपर्यय-साधकहेतुद्वयरूपे सत्यस्मिन् प्रकृतसाध्यसाधनयोरन्यथानुपपत्त्यनिश्चयेऽसिद्धे एवाऽन्तर्भावादिति सङ्क्षेपः ।**

**नाऽतिरिच्यते**=उक्तत्रिविधहेत्वाभासाद् न भिद्यते । अत्रैव हेतुमाह-**तुल्यबले**ति । यद्यपि परस्परविरुद्धसाधकयोः स्थापना-प्रतिस्थापनाहेत्वोरेकस्याऽवश्यमेव पराभिमतव्याप्ति-पक्षधर्मतावत्त्वलक्षणस्याऽभावः, तथापि तत्काले वादिप्रतिवादिभ्यां-'स्वपक्षप्रतिपक्षहेतौ तद् न जानाति, तज्ज्ञाने तमेव नोद्भावये'दिति-वस्तुतः तुल्यबलत्वाभावेऽपि तुल्यबलतया ज्ञातेत्यर्थः । **तद्विपर्यये**ति । स्वसाध्यविरुद्धसाध्याभावलक्षणसाध्येत्यर्थः । **अस्मिन्**=प्रकरणसमे ।

## आगमप्रमाणनिरूपणम्

आगमप्रमाणं निरूपयति-

**आप्तवचनादाविर्भूतमर्थसंवेदनमागमः ।**

अत्र **आगम** इति लक्ष्यनिर्देशः, **आप्ते**त्यादि लक्षणनिर्देशः । **नैयायिकैः** शब्दलक्षणा-गमस्य प्रामाण्यं परिकल्पितम्, तच्चाऽयुक्तं-जडस्य तस्य ज्ञानत्वाभावेन ज्ञानविशेषत्वात्मक-प्रमाणत्वस्याऽप्ययोगादिति लक्षणेऽर्थसंवेदनमित्युक्तम् ।

''अग्न्यादिशब्दोच्चारणे मुखदाहप्रसङ्गाद् न शब्दार्थयोः तादात्म्यलक्षणसम्बन्धः । सुवर्णद्रव्यादिशब्दोच्चारणमात्रत एव सुवर्णादिधनलाभसिद्धेः, न कोऽपि जगति दरिद्रः स्याद् न

वा तत्प्राप्तये राजसेवावाणिज्याद्यायासेनाऽऽत्मानमायासयेदिति न तदुत्पत्तिलक्षणोऽपि तयोः सम्बन्धः । तदुभयभिन्नस्तु सम्बन्धो नाऽर्थप्रतिबन्धनिबन्धनम् । तत एव न सङ्केतात्मा सम्बन्धो **नैयायिक**परिकल्पितो युक्तः । तस्य सम्बन्धत्वे-यथाऽयं शब्दोऽमुमर्थं बोधयत्विति सङ्केत-करणात् शब्दोऽर्थस्य वाचकः, शब्दवाच्यस्त्वर्थः, तथाऽयमर्थोऽमुं शब्दं बोधयत्विति सङ्केत-करणस्याऽपि सम्भवेनाऽर्थः शब्दस्य वाचकः, शब्दोऽर्थस्य वाच्य इति-वाच्यवाचकपरिवर्त्तन-मपि भवेत् । एवं शब्दार्थक्षणयोः क्षणभङ्गुरत्वात् तत्सन्तानयोऽश्चाऽवास्तविकत्वाद् यः शब्दो यदोत्पन्नः तदनन्तरमेव विनश्यति, नाऽर्थकालमनुधावति, अर्थोऽपि स्वोत्पत्त्यनन्तरमेव विनश्यति, न शब्दोत्पत्तिकालं यावत् तिष्ठतीति विभिन्नकालीनयोः तयोः न सङ्केतः कर्त्तुं शक्यः । समानकालीनयोरपि 'न तत्स्वरूपमविज्ञायैव तत्र सङ्केतकरण'मिति तत्स्वरूपज्ञाना-वश्यकत्वे, ज्ञानकाले तदुभयोरपि विनाशाद्, निराधारसङ्केतकरणासम्भवाद् न सङ्केतः कर्त्तुं शक्यः । सर्वस्याऽर्थक्रियाकारित्वलक्षणसत्त्वतः क्षणिकतयैव व्यवस्थितेः, नित्यानुगतैक-स्वरूपसामान्यस्याऽभावादेव तत्र सङ्केतकरणासम्भव इति शब्दार्थयोः सम्बन्धाभावाद् न शब्दोऽर्थबोधं जनयति, किन्तु विकल्पात् स्वयं जायते विकल्पं चोत्पादयति । यदुक्तं-

विकल्पयोनयः शब्दा, विकल्पाः शब्दयोनयः ।

कार्यकारणता तेषां, नाऽर्थं शब्दाः स्पृशन्त्यपि ॥'' इति **बौद्ध**मतापकरणायोक्त**मर्थ-संवेदन (वचनादाविर्भूत)**मिति ।

अर्थक्रियाकारित्वलक्षणसत्त्वस्यैकान्तक्षणिके तथैकान्तनित्ये चाऽसम्भवात् कथञ्चित् क्षणिकाक्षणिकरूप एव शब्दोऽर्थश्च । तयोरुक्तयुक्त्या तादात्म्यतदुत्पत्त्योरसम्भवेऽपि, वाच्य-वाचकभावलक्षणः, ताभ्यां कथञ्चिदभिन्नः, प्रथमं वाच्योत्पत्तौ वाच्यकालेंऽशेनोत्पद्य वाचको-त्पत्तिकालेंऽशेनोत्पद्यमानस्वभावः, प्रथमं वाचकोत्पत्तौ तत्कालेंऽशेनोत्पद्य वाच्यकालेंऽशे-नोत्पद्यमानस्वभावः, सकलशब्दार्थसाधारणोऽपि प्रतिनियतशब्दार्थसङ्केताभिव्यज्यमान-सम्बन्धोऽस्त्येव । तद्बलेन शब्दादर्थसंवेदनं सम्भवत्येवेति न विकल्पयोनित्वं शब्दानां, विकल्पानां वा न शब्दयोनित्वमित्याशयः ।

ननु शब्दस्यैव लोके आगमतया प्रसिद्धेः कथमस्याऽऽगमत्वमित्यत उक्तम् **आप्त-वचनादाविर्भूत**मिति । आप्तवचनस्याऽऽगमत्वात् तत उत्पन्नेऽर्थसंवेदने कार्ये कारणोपचार-माश्रित्याऽऽगमोक्तिरविरुद्धा । अत एवाऽर्थसंवेदनस्य प्रमाणत्वात् तत्कारणे शब्दे कार्योपचार-माश्रित्याऽत्राऽप्तवचनं प्रमाणमिति व्यवहार उपपद्यते इति बोध्यम् ।

विप्रतारकाद्यनाप्तवचनसम्भूतार्थसंवेदनस्याऽऽगमप्रामाण्यं मा प्रसाङ्क्षीदित्येतदर्थ-

**माप्ते**ति विशेषणम् । अनेन च विशेषणेन 'पुरुषाणां भ्रमप्रमादविप्रलिप्साकरणापाटवादि-दोषस्याऽवश्यम्भावाद् वेदस्य पुरुषप्रणीतत्वे कारणदोषनिबन्धनदोषसम्भवतः प्रामाण्यं न स्यादित्यपौरुषेयो वेदः प्रमाण'मिति **मीमांसक**मतस्य निरासः कृतः-अपगताशेषरागादिदोषस्य तीर्थकरादेः पुरुषविशेषस्याऽऽप्तस्य सम्भवेन, तद्वचनस्य निर्दुष्टस्य यथार्थसंवेदनकारणस्य सम्भवात् । प्रतिनियतताल्वादिस्थानकस्य पौद्गलिकस्याऽकारादिवर्णस्यैवाऽनित्यत्वेन तदानुपूर्वीविशेषवतां पदानां तत्समुदायात्मकवाक्यसन्दर्भविशेषरूपस्य वेदस्याऽनित्यत्वस्यैव प्राप्तेरपौरुषेयत्वासम्भवः । 'उत्पन्नो वर्णो विनष्टो वर्ण' इत्यादिप्रतीतिबाधात् 'सोऽय'मित्यादि प्रत्यभिज्ञा नैकान्ताभेदलम्बना, किन्तु साजात्यावलम्बनैवेति ।

ननु "एते पदार्था-मिथः संसर्गवन्तः-आकाङ्क्षादिमत्पदस्मारितत्वाद्-'दण्डेन गाम-भ्याजेते'तिवाक्योपस्थापितपदार्थकदम्बकव''दिति "एतानि पदानि-तात्पर्यविषयपदार्थ-संसर्गज्ञानपूर्वकानि आकाङ्क्षादिमत्पदकदम्बकत्वाद्-'गामानये'त्यादिपदकदम्बव''दिति वाऽनुमानस्याऽत्र सम्भव इत्यनुमानप्रमाणे एवाऽन्तर्भाव आगमप्रमाणस्येति **वैशेषिक**मतमा-शङ्क्य प्रतिक्षिपति-

**न च व्याप्तिग्रहणबलेनाऽर्थप्रतिपादकत्वाद् धूमवदस्याऽनुमानेऽन्तर्भावः-कूटाकूटकार्षापणनिरूपणप्रवणप्रत्यक्षवदभ्यासदशायां व्याप्तिग्रहनैरपेक्ष्येणैवा-ऽस्याऽर्थबोधकत्वात् ।**

**अस्य**=आगमस्य । अनभ्यासदशायां निरुक्तसाध्यसाधनादिकल्पनातः तदविनाभाव-ग्राहितर्कप्रमाणतोऽत्राऽनुमानावतारसम्भवेऽप्यभ्यासदशायां निरुक्तसाध्यसाधनाविनाभाव-प्रतिसन्धानं विनाऽपि शब्दाद् विशिष्टार्थबोधनस्य वाच्यवाचकभावलक्षणसम्बन्धग्रहण-बलादर्थोपस्थितिद्वारा जायमानत्वेनाऽनुमानादस्य पार्थक्यादिति प्रतिक्षेपहेतुमुपन्यस्यति-**कूटे**ति । कूटं मिथ्या, तद्भिन्नमकूटं सत्यम् । कार्षापणं=षोडशपणमूल्यकराजतमुद्राविशेषः । पूर्वं'मिदं सत्यं कार्षापणमिदं मिथ्याकार्षापण'मिति तद्दर्शनमात्राद् न प्रत्यक्षतोऽवधारयति पुरुषः, तदानीं तज्ज्ञानं लिङ्गविशेषेण कार्षापणाविनाभूतेन यद्यपि तस्य भवति, परमभ्यासदशाया'मिदं सत्य-मिदं मिथ्याकार्षापण'मिति प्रत्यक्षात्मकज्ञानमविनाभूतलिङ्गविशेषग्रहणमन्तरेणैव जायते, तद्वत् शब्दादप्यर्थबोधोऽभ्यासदशायां जायते इति व्याप्तिग्रहनैरपेक्ष्येणैवाऽर्थबोधकत्वादागमस्या-ऽनुमानात् पार्थक्यमित्यर्थः ।

आप्तः कः, तद्वचनं किमित्यपेक्षायामाह-

**यथास्थितार्थपरिज्ञानपूर्वकहितोपदेशप्रवीण आप्तः । वर्णपदवाक्यात्मकं**

**तद्वचनम्। वर्णोऽकारादिः पौद्गलिकः। पदं सङ्केतवत्। अन्योन्यापेक्षाणां पदानां समुदायो वाक्यम्।**

योऽर्थो यद्रूपेण व्यवस्थितः, तमर्थं तद्रूपेणैव ज्ञात्वा य उपदिशति, तथोपदेशे प्रवीणः=समर्थः स **आप्त** इत्यर्थः। **तद्वचनम्**=आप्तवचनम्।

वर्णस्याऽऽकाशगुणत्वं **नैयायिक** आह। नित्यव्यापकद्रव्यरूपत्वं **मीमांसकः** स्वीकरोति। आहङ्कारिकत्वं **साङ्ख्यो** वक्ति। तदेतद्विभिन्नवादिमतनिरासायाऽऽह-**वर्णोऽकारादिः पौद्लिकः**। प्रतिहन्यमानत्व-वायुनीयमानत्वद्वारतोऽनुमानादिना पौद्गलिकत्वं वर्णानां सुव्यवस्थितम्।

एकस्याऽप्यकारोकारमकारादेर्विष्णुशङ्करब्रह्मादौ सङ्केतितत्वेन, तत्तदर्थवाचकत्वेन यद् अस्य सम्बन्धाद्, एकस्मिन् आनुपूर्वीविशेषाभावाद्, आनुपूर्वीविशेषमद्वर्णत्वस्य पदलक्षणत्वं परित्यज्य सङ्केतवत्त्वं पदत्वमित्येव स्वीकर्त्तव्यमित्याशयेनाऽऽह-**पदं सङ्केतवदि**ति। 'अस्मात् पदादयमर्थो बोद्धव्य' इति 'इदं पदममुमर्थं बोधयत्वि'ति वेच्छा सङ्केतः। नत्वीश्वरीयत्वमपि तत्र निवेशनीयं-गौरवात्, ईश्वरानङ्गीकर्तृमतेऽपि पदस्य सङ्केतसम्भवात्, आधुनिकसङ्केतितत्वेऽपि पदत्वव्यवहाराच्चेति बोध्यम्।

साकाङ्क्षपदसमुदायस्यैव वाक्यत्वम्, न तु निराकाङ्क्षपदसमूहस्य विशिष्टार्थानव-बोधकस्य वाक्यत्वं युक्तमित्याशयेन वाक्यलक्षणमुपदर्शयति-**अन्योन्ये**ति। क्रियापदं कर्मबोधकपदमाकाङ्क्षति-आनयेत्युक्ते किमित्याकाङ्क्षणात्। तथा कर्मपदं क्रियाविशेषबोध-माकाङ्क्षति-गामित्युक्ते 'किमानय किं वा नये'ति क्रियाविशेषकाङ्क्षादर्शनादित्येवं सर्वत्र ज्ञेयम्। तथा च विशिष्टार्थबोधे जनयितव्ये पदानां परस्परमपेक्षाऽस्त्येव, अन्यथैकस्मादपि पदाद् विशिष्टार्थबोध उत्पद्येतेति बोध्यम्।

आगमस्य सप्तभङ्ग्यनुगमे सत्येव प्रामाण्यं-तथा सत्येव परिपूर्णार्थज्ञापकत्वात्, अन्यथा परिपूर्णार्थप्रापकत्वाभावे तात्त्विकप्रामाण्यासम्भवादित्याह-

**तदिदमागमप्रमाणं सर्वत्र विधिप्रतिषेधाभ्यां स्वार्थमभिदधानं सप्तभङ्गीमनु-गच्छति-तथैव परिपूर्णार्थप्रापकत्वलक्षणतात्त्विकप्रामाण्यनिर्वाहात्।**

**सर्वत्र**=सत्त्वादिधर्ममात्रोपदर्शने। **विधिप्रतिषेधाभ्यामि**ति। भावो विधिः, अभावः प्रतिषेधः, यस्य यत्र विधानं तस्यैव तत्राऽभावः प्रतिषेधः, यथा 'अयं सन्' इति पुरोवर्त्तिनि सत्त्वस्य विधानम्, तत्र पुरोवर्त्तिनि 'नाऽयं सन्' इति सत्त्वस्यैवाऽभावः, एवं नित्यत्वादेरपि, ताभ्यामित्यर्थः। **स्वार्थं**=स्वप्रतिपाद्यम्, **अभिदधानम्**=प्रतिपादयत् सत्, **आगमप्रमाणमि**ति

सम्बध्यते । **सप्तभङ्गीं**=सप्तानां भङ्गानां समाहारः=सप्तभङ्गी, ताम् । भङ्गाश्च सप्त अग्रे प्रदर्शयिष्यन्ते । **अनुगच्छति**=अनुसरति, सप्तभङ्गीरूपतामात्मसात्कुर्वत् सद् आगमप्रमाणं स्वार्थं प्रतिपादयतीत्यर्थः ।

पुरुषविशेषं प्रतिपाद्यमाश्रित्य यत्र 'स्यादस्त्येव घट' इत्याद्येकभङ्गोपन्यासः, तत्र प्रतिपाद्यव्युत्पन्नमतिः स्याद्वादसंस्कारमाहात्म्यात् स्वयमेव भङ्गान्तराण्यनुस्मृत्योक्तेनैकभङ्गेन सहानुस्मृतानां भङ्गान्तराणामेकवाक्यतामभिनीय सप्तभङ्गीस्वरूपतापन्नमहावाक्यत एव परिपूर्णमर्थमवगच्छतीत्याह-

**क्वचिदेकभङ्गदर्शनेऽपि व्युत्पन्नमतीनामितरभङ्गाक्षेपध्रौव्यात् ।**

तदुक्तं **महावादिना सम्मतौ**-

"पुरिसजातं तु पडुच्च, जाणओ पन्नवेज्ज अन्नयरं ।
परिकम्मणानिमित्तं, ठाएहि सो विसेसं पि ॥" (१.५४)

अस्या गाथाया अयमर्थः-पुरुषजातं=प्रतिपन्नद्रव्यपर्यायान्यतरस्वरूपं श्रोतारं प्रतीत्य= आश्रित्य, ज्ञकः(प्रज्ञापकः)=स्याद्वादविद्, प्रज्ञापयेद् अन्यतरदज्ञातम्, परिकर्मनिमित्तम्= अज्ञातांशसंस्कारपाटवार्थम्, ततः परिकर्मितमतये स्थापयिष्यत्यसौ स्याद्वादविशेषमपि परस्पराविनिर्भागरूपमिति ।

यद्यपि नयानधिकृत्येयं गाथा दर्शिता, तथाप्यर्थेष्वपि तद्विषयेषु योजयितुं शक्यैव । यस्य प्रतिपाद्यस्य स्याद्वादसंस्कारो नाऽस्ति, तस्यैकभङ्गोपदर्शनेन परिकर्मितमत्याधानतः स्याद्वाद-संस्कारो भवति, तं प्रत्युत्तरकालं ज्ञकेन भङ्गान्तरोपदर्शनेऽपि, यस्य प्रथमत एव परिकर्मित-मतिता, तस्य तत उद्बुद्धस्याद्वादसंस्कारबलात् स्वयमेव भङ्गान्तराणामूहनमिति विशेष इति बोध्यम् ।

यत्र वाक्ये सप्तभङ्गीसंस्पर्शोऽपि नाऽस्ति, तत्र लौकिकवाक्ये लोकापेक्षयैव प्रामाण्यम्, न तु वस्तुत इत्याह-

**यत्र तु 'घटोऽस्ती'त्यादि लौकिकवाक्ये सप्तभङ्गीसंस्पर्शशून्यता, तत्राऽर्थप्राप-कत्वमात्रेण लोकापेक्षया प्रामाण्येऽपि तत्त्वतो न प्रामाण्यमिति द्रष्टव्यम् ।**

अर्थप्रापकत्वं वाक्ये परम्परया तज्जन्यतद्विषयकज्ञानात् तद्विषयकप्रवृत्तौ तदर्थावाप्तिः । 'अत्र गृहे घटोऽस्ती'ति लौकिकवाक्यादपि गृहवृत्तितया घटविषयकज्ञाने जाते घटगोचरप्रवृत्तौ सत्यां घटरूपार्थप्राप्तिर्भवतीत्यर्थप्रापकत्वम्, तावता लोकापेक्षया प्रामाण्यमस्य, लोकैः तत्र 'इदं प्रमाण'मिति व्यवहारस्य प्रवर्त्तनात् । न च तत्रापि परिपूर्णार्थप्राप्तिरेव भवतीति तद्वाक्यस्याऽपि

परिपूर्णार्थप्रापकत्वमेवेति वास्तविकप्रामाण्यमेवेति साम्प्रतम्-काकतालीयन्यायेन परिपूर्णार्थ-प्राप्तावपि तस्य परिपूर्णार्थप्रापकत्वाभावात्। नहि वाक्यं पुरुषं हस्ते गृहीत्वाऽर्थं प्रापयति, किन्तु ज्ञानजननाद् अर्थं तूपदर्शयत् प्रवर्त्तकत्वतोऽर्थप्रापकं भवति। लौकिकवाक्यं तु अपरिपूर्ण-मेवाऽर्थं ज्ञापयतीत्यपरिपूर्णार्थप्रापकत्वमेव तस्य। अर्थस्त्वनन्तधर्मात्मको नैकधर्मवानेव लभ्य इत्यतोऽर्थबलात् परिपूर्णार्थलाभो, न तु लौकिकवाक्यप्रभवज्ञानादिति हृदयम्।

ननु वयं सप्तभङ्गीमेव नाऽवगच्छामः, कथमागमप्रमाणस्य तदनुसारित्वं जानीम इत्याशयेन पृच्छति-

**केयं सप्तभङ्गीति चेदुच्यते-एकत्र वस्तुनि एकैकधर्मपर्यनुयोगवशाद् अविरोधेन व्यस्तयोः समस्तयोश्च विधिनिषेधयोः कल्पनया स्यात्काराङ्कितः सप्तधा वाक्प्रयोगः सप्तभङ्गी।**

**इयम्**=आगमप्रमाणानुगम्यतयाऽनन्तरम्। **एकत्रे**त्यादि लक्षणम्, **सप्तभङ्गी**ति लक्ष्यम्।

लक्षणगमनं त्वेवं-घटरूपे एकस्मिन् धर्मिण्यनन्तधर्मात्मके **एकैकधर्मस्य**=अस्ति-त्वादिप्रत्येकधर्मस्य, यः **पर्यनुयोगः**=प्रश्नः 'घटः किमस्ती'त्यादिस्वरूपः, **तद्वशाद्**=उत्तरार्हे प्रश्ने सति तदुत्तरमवश्यमेव देयमिति प्रश्नोत्तरयोः पूर्वापरभावनियमविशेषलक्षणाङ्गाङ्गिभाव-बलात्। **अविरोधेन**=स्वद्रव्यक्षेत्रकालभावापेक्षयाऽस्तित्वम्, परद्रव्यक्षेत्रकालभावापेक्षया नास्तित्वमित्येवं विरोधपरिहारेण, अवच्छेदकभेदेनेति यावत्। **व्यस्तयोः**=अन्योन्यासङ्घटितयोः, पृथग्भूतयोरिति यावत्, **समस्तयोश्च**=अन्योन्यसङ्घटितमूर्त्तिकयोश्च, विशेषणविशेष्यभावे-नैकविशिष्टधर्मरूपतां प्राप्तयोरिति यावत्। **विधिनिषेधयोः**=भावाभावयोरस्तित्वनास्तित्वयोः, **कल्पनया**=अवमर्शेन, **स्यात्काराङ्कितः**=स्यादित्येवंस्वरूपपदघटितः, **सप्तधा**=सप्तप्रकारः, **वाक्यप्रयोगः**=वाक्याभिलापः, **सप्तभङ्गी**=सप्तभङ्गसमाहारः। एवकाराङ्कितत्वमपि ज्ञेयम्।

तथा च १. स्यादस्त्येव घटः २. स्यान्नास्त्येव घटः ३. स्यादस्त्येव स्यान्नास्त्येव च घटः ४. स्यादवक्तव्य एव घटः ५. स्यादस्त्येव स्यादवक्तव्य एव च घटः ६. स्यान्नास्त्येव स्यादवक्तव्य एव च घटः ७. स्यादस्त्येव स्यान्नास्त्येव स्यादवक्तव्य एव च घटः-इति सप्त-भङ्गसमुदायात्मकमहावाक्यस्वरूपा सप्तभङ्गीत्यर्थः।

कथं सप्तभङ्ग्येव भवति, नाऽष्टभङ्गीनवभङ्ग्यादिकमित्यपेक्षायामाह-

**इयं च सप्तभङ्गी वस्तुनि प्रतिपर्यायं सप्तविधधर्माणां सम्भवात् सप्तविधसंशयो-त्थापितसप्तविधजिज्ञासामूलसप्तविधप्रश्नानुरोधादुपपद्यते।**

**वस्तुनि**=अनन्तधर्मात्मके घटादिस्वरूपैकैकवस्तुनि, **प्रतिपर्यायम्**=अस्तित्वाद्येकैक-

धर्ममाश्रित्य, **सप्तविधधर्माणां**=सप्तसङ्ख्यकधर्माणाम् । यथा घटेऽस्तित्वरूपधर्ममाश्रित्य कथञ्चिदस्तित्व-कथञ्चिन्नास्तित्व-क्रमार्पितकथञ्चिदस्तित्वकथञ्चिन्नास्तित्व-युगपदर्पित-कथञ्चिदस्तित्वकथञ्चिन्नास्तित्वात्मकावक्तव्यत्व-कथञ्चिदस्तित्वे सति कथञ्चिदवक्तव्यत्व-कथञ्चिन्नास्तित्वे सति कथञ्चिदवक्तव्यत्व-कथञ्चिदस्तित्वे सति कथञ्चिन्नास्तित्वे सति कथञ्चिदवक्तव्यत्वेत्येवंरूपाणां सप्तविधधर्माणां **सम्भवात्** । एतावतैकधर्ममाश्रित्य निरुक्त-सप्तविधधर्मव्यतिरिक्तधर्मासम्भवाद् अष्टविधसंशयजिज्ञासाप्रश्नाद्यसम्भवेन नाऽष्टभङ्ग्यादि-सम्भव इत्यावेदितम् ।

**सप्तविधसंशयोत्थापिते**ति । प्रदर्शितधर्मरूपविषयाणां सप्तविधत्वात् तद्विषयकाणां संशयानामपि सप्तविधत्वम्, तेषां सप्तविधत्वात् तत्कारणिकानां जिज्ञासानां सप्तविधत्वम्, तासां सप्तविधत्वात् तन्मूलकानां सप्तविषयकप्रश्नानां सप्तविधत्वम्, तेषां सप्तविधत्वे तदुत्तररूपाणां भङ्गानामपि सप्तविधत्वमित्युपपद्यतेतरां सप्तभङ्गीत्यर्थः ।

तत्र प्रथमभङ्गमुपदर्शयति-

**तत्र स्यादस्त्येव सर्वमिति प्राधान्येन विधिकल्पनया प्रथमो भङ्गः । स्यात्=कथञ्चित् स्वद्रव्यक्षेत्रकालभावापेक्षयेत्यर्थः । अस्ति हि घटादिकं-द्रव्यतः पार्थिवादित्वेन, न जलादित्वेन, क्षेत्रतः पाटलिपुत्रकादित्वेन, न कान्यकुब्जादित्वेन, कालतः शैशिरादित्वेन, न वासन्तिकादित्वेन, भावतः श्यामादित्वेन, न रक्तादित्वेनेति ।**

**तत्र**=तेषु सप्तधा वाक्प्रयोगेषु । सर्वत्वेन सर्वं धर्मीकृत्याऽस्तित्वरूपमेकं धर्ममाश्रित्य भङ्गप्रदर्शने कृते, प्रत्येकं घटत्वादिधर्मेण घटादौ धर्मिण्यस्तित्वादिप्रतिपादकभङ्गप्रयोगावगमोऽनायासेनैव प्रतिपाद्यानां सम्भवतीत्यभिप्रायेण सर्वं धर्मीकृत्याऽऽद्यभङ्गाकारमुल्लिखति-**स्यादस्त्येवे**ति । तद्घटक 'स्यात्'पदार्थं दर्शयति-**स्यादि**ति । आख्यातप्रतिरूपकमनेकान्त-प्रतिपादकमव्ययम्[१], तेन तदर्थः-**कथञ्चिदि**ति । एतदपि सामान्योक्तं नाऽविरोध (न विरोध ?) भङ्गकावच्छेदकभेद[२]प्रतिपत्तिमाधातुमलमित्यभिसन्धायाऽऽह-**स्वद्रव्ये**ति ।

सर्वात्मकधर्म्यन्तरगते घटादिधर्मिण्यस्तित्वं स्वद्रव्याद्यपेक्षया सङ्गमयति-**अस्ती**ति । **हि**=यतः । घटादिकं द्रव्यतो यद् अस्ति, तत् पार्थिवादिद्रव्यमाश्रित्य । घटस्य मृद्विकारतया पार्थिवत्वेनैवाऽस्तित्वम्, करकादेर्जलविकारतया जलत्वेनैवाऽस्तित्वम्, एवमन्येषामपि स्वोपादानभूतद्रव्यरूपेणैवाऽस्तित्वम्, न तु घटस्य जलात्मना, करकादेर्मृदात्मना परद्रव्य-

---

१. 'स्याद्'इति नाऽऽख्यातम्, किन्तु तत्प्रतिरूपकमव्ययम्, कथनस्याऽऽपेक्षिकत्वं तेन सूच्यते ।

२. एकस्मिन्नेव वस्तुनि सत्त्वासत्त्वयोर्विरोध एकावच्छेदेनैव, न त्ववच्छेदकभेदेन ।

रूपेणाऽस्तित्वं-तथा सति घटस्याऽपि जलीयत्वम्, करकादेरपि पार्थिवत्वमिति सर्वस्य सर्वात्मकत्वं प्रसज्येतेत्याशयः ।

पाटलिपुत्रकादिग्रामस्थितस्य घटादेः तत्तत्क्षेत्रेण सहाऽऽधाराधेयभावानुरोधात् कथञ्चित् तत्तत्क्षेत्रेण सह तादात्म्यमभ्युपेयं-कथञ्चित्तादात्म्यस्य कथञ्चित्सर्वसम्बन्धव्यापकत्वात् । यतो विशिष्टबुद्धिनियामकत्वं सम्बन्धत्वम् । येन च विशिष्टबुद्धिर्न भवति स सम्बन्ध एव न भवति । विशिष्टबुद्धिश्च विशिष्टात्मकविषये सत्येव भवितुमर्हति । विशिष्टश्च विषयो विशेषणविशेष्याभ्यां कथञ्चिदभिन्न एव—अतिरिक्तत्वे दण्डविशिष्टपुरुष-क्षेत्रविशिष्टपुरुषादीनां विशिष्टरूपाणां विशेषणविशेष्याभ्यां भिन्नत्वाविशेषाद्, अन्यस्य विशेषकस्याऽभावात् परस्परवैलक्षण्यं न भवेदिति । तदभिन्नाभिन्नस्य तदभिन्नत्वमिति नियमेन विशेषणाभिन्नविशिष्टस्वरूपाभिन्नस्य विशेष्यस्य विशेषणाभिन्नत्वमिति भवति सम्बन्धमात्रव्यापकं कथञ्चित्तादात्म्यम् । तथा च पाटलिपुत्रग्रामस्थितस्य घटादेराधाराधेयभावलक्षणसम्बन्धबलात् कथञ्चिदभेदे व्यवस्थिते, क्षेत्रतः पाटलिपुत्रकादित्वेन घटादेरस्तित्वम् । एवं तत्तद्ग्रामदेशादिस्थितस्य तत्तद्ग्राम-देशादित्वेनाऽस्तित्वम् । स्वानाधारक्षेत्रकान्यकुब्जादित्वेन तु अस्तित्वं न सम्भवति-तेन रूपेणा-ऽप्यस्तित्वे घटादीनां सर्वेषां सर्वदेशव्यापित्वं प्रसज्येतेति प्रतिनियतक्षेत्राधारता भज्येतेति ।

यस्मिन् काले यद् भवति तस्य तत्कालेन सह [१]जन्यजनकभावलक्षणसम्बन्धविशेष-लाभाद् विशिष्टबुद्ध्याधानक्षमात् कथञ्चित्तादात्म्यमिति शैशिरादिकालसमुद्भूतस्य घटादेः शैशिरादित्वेनाऽस्तित्वम्, न तु वासन्तिकादित्वेन-तेन रूपेणाऽप्यस्तित्वे सर्वस्य घटादेः सर्व-कालात्मना भावात् सदातनत्वं प्रसज्येतेति प्रतिनियतकालनिबन्धनकादाचित्कत्वं भज्येतेति ।

पदार्थो घटादिः श्यामादिभावमापन्नः, तदानीं तस्य श्यामादिभावेन सह सम्बन्ध-विशेषबलात् कथञ्चित्तादात्म्यमिति श्यामादित्वेन घटादेरस्तित्वम्, न तु रक्तादित्वेन—तद्रूपेणाऽप्यस्तित्वे सर्वस्य घटादेः सर्वस्वभावतापत्तिरिति प्रतिनियतस्वभावभङ्गात् प्रतिनियत-स्वभावनिमित्तकविविधप्रतिनियतस्वभावव्यवहारस्य भङ्गः स्यादिति ।

द्वितीयभङ्गं निरूपयति-

**एवं 'स्यान्नास्त्येव सर्व'मिति प्राधान्येन निषेधकल्पनया द्वितीयः ।**

प्रथमभङ्गेऽस्तित्वादिविधिरूपधर्मस्य प्राधान्यविवक्षा, तेन नास्तित्वादिरूपनिषेध-धर्मस्य गौणतयैव तत्र प्रतिभासनम् । न तु प्रथमभङ्गजन्यबोधे निषेधस्य सर्वथाऽप्रतिभासन-मेव—तथा सत्येकधर्मैकान्तावबोधकत्वेन दुर्नयवाक्यत्वं प्रसज्येतेत्येवं सति तत्समुदायस्वभाव-

---

१. वस्तुतोऽत्र क्षेत्रवदाधाराधेयभावलक्षणसम्बन्ध एव ग्राह्यः ।

महावाक्यलक्षणसप्तभङ्ग्या अपि प्रमाणवाक्यत्वं न स्याद् अन्धसमूहस्याऽन्धत्ववत् ।

इयांस्तु विशेषः-प्रत्येकं भङ्गेषु प्रतिनियतैकैकधर्मप्राधान्यावबोधकत्वेन द्वितीय-धर्माद्याकाङ्क्षासद्भावाद् न निराकाङ्क्षार्थावबोधकत्वम् । सप्तभङ्ग्यास्तु सत्त्वाद्येकधर्म-माश्रित्य सप्तविधधर्माणामेव सम्भवेन सप्तविधधर्माणामपि प्राधान्यतोऽवबोधकत्वेन निरा-काङ्क्षार्थावबोधकत्वम्, इत्येतावता महावाक्यत्वं तस्या इति । परिपूर्णार्थावबोधकत्वं तस्या यथा सकलादेशमहिम्ना, तथा प्रत्येकभङ्गानामपि-अन्यार्थसम्बन्धिपर्यायाणामपि परपर्याय-विधया एकैकार्थपर्यायत्वेन, स्वगताशेषस्वपर्यायात्मकधर्माणां च स्वपर्यायविधया तथात्वेन, सर्वाशेषधर्मप्रतिभासनमन्तरेण परिपूर्णार्थावबोधासम्भवात् । तद् आश्रित्यैवोच्यते-

'य एकं जानाति स सर्वं जानाति, यः सर्वं जानाति स एकं जानाति ।' इति,

'एको भावः सर्वथा येन दृष्टः, सर्वे भावाः सर्वथा तेन दृष्टाः ।
सर्वे भावाः सर्वथा येन दृष्टा, एको भावस्तत्त्वतस्तेन दृष्टः ॥' इत्यपि,

तथा-'स्याद्वाद-केवलज्ञाने सकलार्थविभासने' इति च ।

एवं च द्वितीयभङ्गेऽपि गौणतयाऽस्तित्वादिप्रतिभासकत्वमस्ति । परं प्राधान्येन निषेधविवक्षयैव 'स्यान्नास्त्येव सर्व'मिति द्वितीयभङ्गः । अस्य प्राधान्येन घटादिविशेष्यक-नास्तित्वाद्यात्मकनिषेधधर्ममात्रप्रकारकबोधजनकवाक्यत्वं लक्षणम् । प्रथमस्य तु प्राधान्येन घटादिविशेष्यकास्तित्वाद्यात्मकविधिधर्ममात्रप्रकारकबोधजनकवाक्यत्वम् । विधिनिषेधौ च स्यादर्थकथञ्चिदालिङ्गितावेव तत्र प्रविष्टौ । अत्र कथञ्चिदर्थः परद्रव्यक्षेत्रकालभावापेक्षयेति, भावना तु पूर्ववदेव ।

अत्राऽसत्त्वं काल्पनिकमिति विषयाभावाद् न द्वितीयभङ्गसम्भव इति **बौद्ध**मतमा-शङ्क्य प्रतिक्षिपति-

**न चाऽसत्त्वं काल्पनिकं-सत्त्ववत् तस्य स्वातन्त्र्येणाऽनुभवात् । अन्यथा विपक्षा-सत्त्वस्य तात्त्विकस्याऽभावेन हेतोः त्रैरूप्यव्याघातप्रसङ्गात् ।**

यथा सत्त्वं स्वातन्त्र्येणाऽनुभूयते तथाऽसत्त्वमपीति नाऽसत्त्वस्याऽपि काल्पनिकत्वम् । तस्य काल्पनिकत्वे वा विपक्षासत्त्वस्य कल्पनात्, पक्षसत्त्वसपक्षसत्त्वैतद्रूपमेव हेतुरूपं भवेदिति विपक्षासत्त्वरूपमादाय हेतोः [१]त्रैरूप्याभिधानं **बौद्ध**स्य व्याहतं स्यादिति प्रतिक्षेपहेतु-मुपन्यस्यति-**सत्त्ववदिति** । **तस्य**=असत्त्वस्य, **अन्यथा**=असत्त्वस्य काल्पनिकत्वाभ्युपगमे ।

---

१. हेतोः पक्षवृत्तित्व-सपक्षसत्त्व-विपक्षासत्त्वलक्षणत्रैरूप्याभिधानम् ।

तृतीयभङ्गं निरूपयति-

**स्यादस्त्येव स्यान्नास्त्येवेति प्राधान्येन क्रमिकविधिनिषेधकल्पनया तृतीयः ।**

क्रमिकप्रधानभावेन विधिनिषेधोभयविवक्षया 'स्यादस्त्येव स्यान्नास्त्येव सर्व'मिति तृतीयो भङ्ग इत्यर्थः । अयमस्य निष्कर्षः-यदा घटस्य स्वद्रव्यक्षेत्रकालभावापेक्षयाऽस्तित्वं परद्रव्यक्षेत्रकालभावापेक्षया नास्तित्वं च क्रमिकप्रधानभावकल्पनास्पदं भवति, तदा क्रमिकप्रधानभावापन्नकथञ्चिदस्तित्वकथञ्चिन्नास्तित्वोभयप्रकारकघटविशेष्यकबोधजनकवाक्यात्मा तृतीयो भङ्गः । तस्य निरुक्तबोधजनकवाक्यत्वं लक्षणम् ।

प्रथमभङ्गद्वितीयभङ्गाभ्यां केवलकथञ्चिदस्तित्वप्रकारकबोधस्य केवलकथञ्चिन्नास्तित्वप्रकारकबोधस्य च जननम्, तृतीयेन 'एकत्र द्वय'मिति न्यायेन । यथा 'चैत्रो दण्डी कुण्डली चे'त्यत्र दण्डकुण्डलोभयप्रकारक-चैत्रविशेष्यकबोध एक उपजायते तथा प्रकृतेऽपि । परस्परविशेषणविशेष्यभावापन्नतया तु विधिनिषेधयोरत्र विवक्षैव नाऽस्ति, येन—प्रथमद्वितीयभङ्गाभ्यामविशिष्टयोर्विधिनिषेधयोर्बोधः, अनेन तु परस्परविशेषणविशेष्यभावापन्नविधिनिषेधबोध—इति वैलक्षण्यमभिधातुं शक्येत । तथाविवक्षायां तु विशेषणस्य गौणत्वं विशेष्यस्य च प्राधान्यं विशिष्टनियतं भवेद्, न तूभयप्राधान्यम् । अभिमतं तु क्रमिकोभयप्राधान्यम् ।

इदं तु स्याद्- एवं कल्पनायां वस्तुनः प्रतिपर्यायं विधिनिषेधौ द्वावेव धर्मौ, बोधस्तु प्रकारताभेदनिबन्धनः सप्तविध इति तज्जनका भङ्गाः सप्तेति । न चैतद् न्याय्यम्, प्रतिपर्यायं धर्माणां सप्तविधत्वेन सप्तविधसंशयजिज्ञासामूलकसप्तविधोत्तरवाक्यरूपभङ्गानामिष्टेः, उक्ताभ्युपगमे तु तद्विरोधः । किन्तु-

> 'भागे सिंहो नरो भागे, योंऽशो भागद्वयात्मकः ।
> तमभागं विभागेन, नरसिंहं प्रचक्षते ॥'

इति वचनाद् नरसिंहात्मिकाऽखण्डव्यक्तिर्नरसिंहाभ्यां भिन्नाऽपि, ताभ्यामेव विभिन्नभागरूपतया कल्पिताभ्यां निरूप्यमाणा नरसिंहबोधे भासते, तथाऽस्तित्वनास्तित्वविलक्षणधर्मविशेषोऽस्तित्वपर्यायमाश्रित्य घटादिधर्मिणि समस्ति । स एव धर्मः क्रमिकप्रधानभावविवक्षितकथञ्चिदस्तित्वनास्तित्वाभ्यां निरूप्यमाणः तात्पर्यवशात् तृतीयभङ्गजबोधे भासते । तादृशधर्मलक्षणविषयभेदत[1] एवाऽऽद्यद्वितीयभङ्गाभ्यां तज्जन्यबोधाभ्यां च भेदः तृतीयभङ्गस्य तज्जन्यबोधस्य च । इयमेव नीतिः तुर्यादिभङ्गेष्वपीति ।

---

१. सप्तभिर्भङ्गैः प्रतिपाद्यमाना धर्माः सप्त । अतो विषयभेदनिबन्धन एव तेषां परस्परं भेदः । न तु—द्वौ एव धर्मौ, तेषां निरूपणं सप्तधा सम्भवतीति-प्रकारभेदनिबन्धना तेषां परस्परं भिन्नता ।

चतुर्थभङ्गं निरूपयति-

**स्यादवक्तव्यमेवेति युगपत्प्राधान्येन विधिनिषेधकल्पनया चतुर्थः ।**

आद्याः त्रयः सकला, अन्त्याः चत्वारो विकलादेशा इत्युपगच्छद्भिः सूरिभिरयं भङ्गः तृतीयतया, एतत्स्थाने च 'स्यादस्त्येव स्यान्नास्त्येवे'ति भङ्गः प्रथ्यते । पूर्वत्र विधिनिषेधयोः क्रमिकप्राधान्यकल्पना, अत्र तु तयोर्युगपत्प्राधान्यकल्पना बीजम् । कथञ्चिदवक्तव्यत्वाख्य-धर्ममात्रप्रकारकघटादिविशेष्यकबोधोऽनेन भङ्गेन जन्यते, तत एव चोक्तभङ्गत्रयादस्य भेदः । निरुक्तबोधजनकवाक्यत्वं चतुर्थभङ्गस्य लक्षणम् ।

विधिनिषेधयोर्युगपत्प्राधान्यविवक्षाया युगपत्प्रधानीभूतविधिनिषेधोभयप्रतिपादकस्यैकस्य कस्यचिद् वचनस्याऽवक्तव्यशब्दभिन्नस्याऽभावात् कथञ्चिदवक्तव्यत्वमुपपादयति-

**एकेन पदेन युगपदुभयोर्वक्तुमशक्यत्वात् । 'शतृशानचौ स'दित्यादौ साङ्केतिक-पदेनाऽपि क्रमेणाऽर्थद्वयबोधनात् । अन्यतरत्वादिना कथञ्चिदुभयबोधनेऽपि प्रातिस्विक-रूपेणैकपदादुभयबोधस्य ब्रह्मणाऽपि दुरुपपादत्वात् ।**

**उभयोः**=विधिनेषधयोः । शतृशानच्-सङ्केतित-'सत्'पदाद् यथा शतृशानचोः प्रतीतिः, तथैकेन विधिनिषेधोभयसङ्केतितेन तदुभयप्रतीतिर्भविष्यतीति कश्चिद् ब्रूयात्, तत्राऽऽह-**शतृशानचाविति** । यद्यपि तदुभयसङ्केतितं 'सत्' पदम्, तथापि तेन तद्द्वयबोधस्तु क्रमेणैव, न तु युगपदेव । विधिनिषेधोभयसङ्केतितैकपदविशेषादपि क्रमिकतदुभयबोध एव भवेदित्यर्थः । विधिनेषधान्यतरत्वेन रूपेण तदुभयसङ्केतितपदाद् युगपत् तदुभयबोधस्तु न प्रत्येकासाधारणा-स्तित्वनास्तित्वादिरूपेण । तादृशरूपेणैव तु युगपत्प्रधानतया विवक्षितौ विधिनिषेधावित्याह-**अन्यतरत्वादिनेति** । आदिपदाद् उभयत्वप्रमेयत्वज्ञेयत्ववाच्यत्वादेरुपग्रहः । अन्यत् सुगमम् ।

अत्र समासवचनं तत्प्रतिपादकं न सम्भवति-समासेषु बहुव्रीहेरन्यपदार्थप्रधानत्वाद्, अत्र तूभयप्राधान्यविवक्षणात्, अव्ययीभावस्तु नैतादृशेऽर्थे प्रवर्तते, द्वन्द्वस्तु द्रव्यवृत्ति-र्नाऽत्रोपयुज्यते, गुणवृत्तिरपि द्रव्याश्रितगुणप्रतिपादको न प्राधान्येन गुणप्रतिपादनप्रगल्भः । उत्तरपदार्थप्रधानतत्पुरुषस्याऽपि नाऽत्राऽवकाशः । सङ्ख्यावाचिपूर्वपदकस्य द्विगोस्तु नेदृशो-ऽर्थो विषयः । कर्मधारयोऽपि गुणाधारद्रव्यविषयो नाऽत्र क्रमते । समासान्तरं तु नाऽस्त्येव ।

वृत्त्यसम्भिन्नार्थकस्य वाक्यस्याऽपि कस्यचिद् न तथाभूतधर्मद्वयप्रतिपादकत्वमित्या-

---

**'शतृशानचौ'**-"तौ सदिति शतृशानयोः सङ्केतितसच्छब्दवत् द्वन्द्ववृत्तिपदं तयोः सकृदभिधायकम् इत्यनेनापास्तम्, सदसत्त्वे इत्यादिपदस्य क्रमेण धर्मद्वयप्रत्यायनसमर्थत्वात् ।" तत्त्वार्थश्लोकवा० पृ० १४० ।

दिकमवक्तव्यत्वोपोद्वलकं बोध्यम् ।

पञ्चमभङ्गं निरूपयति-

**स्यादस्त्येव स्यादवक्तव्यमेवेति विधिकल्पनया युगपद्विधिनिषेधकल्पनया च पञ्चमः ।**

चतुर्थभङ्गप्रतिपाद्यस्याऽवक्तव्यत्वस्य प्रथमभङ्गप्रतिपाद्यास्तित्वेन सहैकधर्मिणि बोधनेच्छया, स्वद्रव्यादिनाऽस्तित्वलक्षणविधेः पृथक् कल्पनया, स्वद्रव्यादिनाऽस्तित्व-लक्षणविधेः परद्रव्यादिना नास्तित्वलक्षणनिषेधस्य च प्राधान्यतो युगपत्कल्पनया चाऽयं भङ्गः प्रवर्त्तते । अस्य कथञ्चिदस्तित्वादिप्रकारक-कथञ्चिदवक्तव्यत्वप्रकारक-घटाद्येकधर्मिवि-शेष्यकबोधजनकवाक्यत्वं लक्षणम् । सप्तमभङ्गेऽतिव्याप्तिवारणाय कथञ्चिदस्तित्वादि-प्रकारकेत्यस्य पृथक्कथञ्चिदस्तित्वादिविधिमात्रप्रकारकेत्येवंपरता विवक्षणीया । सप्तमभङ्ग-जन्यबोधे च पृथक्कथञ्चिन्नास्तित्वादिनिषेधः प्रकारो भवतीति तद्वारणम् । एतावतैव सप्त-भङ्ग्यात्मकमहावाक्येऽपि नाऽतिव्याप्तिः-तज्जन्यमहावाक्यार्थबोधे पृथक्कथञ्चिन्नास्तित्वादि-निषेधस्याऽपि प्रकारत्वात् ।

सूक्ष्मविचारणायां च कथञ्चिदस्तित्वसंवलितकथञ्चिदवक्तव्यत्वोक्त्या पञ्चमं धर्मा-न्तरमेव बोध्यते । तच्चेत्थमेवोल्लिखितुं शक्यते, नाऽन्यथेति तत्प्रतिपादकः 'स्यादस्त्येव स्याद-वक्तव्यमेवे'ति भङ्गः । तथा च तथाविधविलक्षणधर्ममात्रप्रकारकबोधजनकवाक्यत्वं लक्षणं पर्यवस्यतीति ।

षष्ठं भङ्गं निरूपयति-

**स्यान्नास्त्येव स्यादवक्तव्यमेवेति निषेधकल्पनया युगपद्विधिनिषेधकल्पनया च षष्ठः ।**

चतुर्थद्वितीयधर्मसम्मेलनोपस्थापितषष्ठधर्मप्रतिपादकतयाऽयं भङ्गः प्रवर्त्तते । अस्य पृथक्कथञ्चिन्नास्तित्वादिनिषेधमात्रप्रकारक-कथञ्चिदवक्तव्यत्वप्रकारक-घटादिधर्मिविशेष्यक-बोधजनकवाक्यत्वं तथाविधविलक्षणधर्ममात्रप्रकारक-घटादिविशेष्यकबोधजनकवाक्यत्वं वा लक्षणम् । अन्यत् सर्वं पञ्चमभङ्गवत्, केवलं विधिकल्पनास्थाने निषेधकल्पना पृथग्भावे प्रविशतीति ।

सप्तमभङ्गं निरूपयति-

**स्यादस्त्येव स्यान्नास्त्येव स्यादवक्तव्यमेवेति विधिनिषेधकल्पनया युगपद्विधि-निषेधकल्पनया च सप्तम इति ।**

तृतीयचतुर्थभङ्गसंयोजनया प्रथमद्वितीयचतुर्थभङ्गसंयोजनया वाऽयं भङ्गः । सप्तमो धर्मोऽतिरिक्तोऽत्राऽपि विषयः, तादृशधर्मप्रकारकघटादिविशेष्यकबोधजनकवाक्यमस्य निष्कृष्ट-लक्षणम् । अन्यत् सर्वं पूर्वदर्शितदिशाऽवसेयम् ।

[१]ननु स्याद्वादकेवलज्ञानयोः सर्वार्थावभासकत्वं स्याद्वादिनामनुमतम्, तन्न युज्यते । स्याद्वादे सर्वत्र सप्तभङ्गीवाक्यमेव महावाक्यतया सम्पूर्णार्थविबोधकमनुमतम् । परमुक्तदिशा प्रतिपर्यायं सप्तविधधर्मपर्याप्तप्रकारकघटादिविशेष्यकबोधजनकत्वं=प्रत्येकं तत्तद्धर्मनिष्ठ-प्रकारतासप्तकनिरूपितघटादिनिष्ठविशेष्यतानिरूपकबोधजनकत्वमेवाऽस्याः प्रसिद्धिपद्धति-मञ्चति, न त्वेतज्जन्यबोधेऽनन्तधर्मावभासः, तदन्तरेणाऽनन्तधर्मात्मकवस्त्ववभासनमपि नैव, तथा च प्रमाणवाक्यत्वमप्यस्य न युज्यते । श्रुतप्रमाणेन यद्यनन्तधर्मात्मकं वस्तु परिच्छिद्येत, भवेत् तदा तदेकदेशावबोधकनयात्मकज्ञानजनकत्वेन नयवाक्यत्वमपि-प्रमाणापेक्षया नयत्वव्यवस्थितेः । यदा चाऽनन्तधर्मात्मकवस्तुपरिच्छेदः श्रुतप्रमाणाद् न भवति, तदा परिमितानामेकद्व्यादिधर्माणामेकदेशत्वमपि न व्यवस्थापयितुं शक्यमिति नयवाक्यत्वमपि कथमस्य युक्तियुक्तं स्यादिति चेत् ?

एकधर्मबोधनद्वारा तदात्मना सकलधर्मावबोधकत्वलक्षणसकलादेशस्वभावबलात् सप्तभङ्ग्या अनन्तधर्मात्मकवस्त्ववभासिप्रमाणात्मकज्ञानजनकत्वेन प्रमाणवाक्यत्वम्, तज्जन्यबोधविषयानन्तधर्मात्मकवस्त्वेकदेश-एकद्व्यादिकतिपयधर्मतदात्मकधर्म्यवगाहिनो ज्ञानस्य नयात्मकस्य विषयीभूतधर्मक्रमप्रतिपादकत्वलक्षणविकलादेशस्वभावबलादेकद्व्यादि-धर्मतदात्मकधर्म्यवभासिनयात्मकज्ञानजनकत्वेन नयवाक्यत्वं चोपपद्यते इत्याशयेन सकला-देशविकलादेशस्वभावाभ्यां सप्तभङ्गीं विभजते-

**सेयं सप्तभङ्गी प्रतिभङ्गं सकलादेशस्वभावा विकलादेशस्वभावा च । तत्र प्रमाणप्रतिपन्नानन्तधर्मात्मकवस्तुनः कालादिभिरभेदवृत्तिप्राधान्यादभेदोपचाराद् वा यौगपद्येन प्रतिपादकं वचः सकलादेशः । नयविषयीकृतस्य वस्तुधर्मस्य भेदवृत्ति-प्राधान्याद् भेदोपचाराद् वा क्रमेणाऽभिधायकं वाक्यं विकलादेशः ।**

**सेयमिति** । अनन्तरोपदर्शिता मानसप्रत्यक्षस्थेत्यर्थः । तृतीयस्थाने 'स्यादवक्तव्यमेवे'ति भङ्गमुररीकृत्य, आद्याः त्रयः सकलादेशस्वभावा अन्त्याः चत्वारो विकलादेशस्वभावा इति **श्रीसिद्धसेनादयो** मन्यन्ते । **देवसूरयस्तु** सप्तानामपि भङ्गानां प्रत्येकं सकलादेशस्वभावत्वं विकलादेशस्वभावत्वं च प्रतिपन्नाः, तन्मतं प्रतिगृह्यैव **प्रतिभङ्ग**मित्युक्तम् ।

१. सप्तभङ्ग्याः प्रमाणवाक्यत्वं नयवाक्यत्वं वा न सम्भवतीति शङ्काकर्तुरभिप्रायः ।

तत्र सकलादेशं लक्षयति-**तत्रेति** । सकलादेशस्वभावविकलादेशस्वभावयोर्मध्ये इत्यर्थः । **प्रमाणप्रतिपन्नेति** । श्रुतप्रमाणपरिच्छिन्नेत्यर्थः । वस्तुन इत्यस्य प्रतिपादकमित्येतद्घटकप्रतिपत्तावन्वयः । तत्रैकैकधर्मेण धर्मिप्रतिपादके एकैकस्मिन् भङ्गे यौगपद्येनाऽनन्तधर्मात्मकवस्तुविषयकप्रतीतिजनकत्वं कथं नाम स्यादित्याकाङ्क्षानिवृत्तये **कालादिभिरि**त्यादिहेतुवचनम् । कालादिभिरित्यस्याऽभेदोपचारादित्यत्राऽप्यन्वयः । कालादयोऽष्टावग्रे निरूपयिष्यन्ते । एवमभेदवृत्तिप्राधान्याभेदोपचारावपि । अनन्तधर्मात्मकघटरूपवस्तुगतोल्लिख्यमानैकास्तित्वादिधर्मेण सह, कालादिभिरष्टभिर्द्रव्यार्थिकनयादेशात् सर्वेषामेव घटगतानां नास्तित्वादिधर्माणामभेदवृत्तिप्राधान्यतः, पर्यायार्थिकनयादेशाद् वस्तुतोऽन्योन्यभिन्नानां तेषामभेदवृत्तेरसम्भवेऽभेदोपचारतो वा, यौगपद्येनैकास्तित्वादिप्रतिपादनद्वारा तदभिन्नाशेषधर्मप्रतिपादकत्वेनाऽनन्तधर्मात्मकवस्तुनः प्रतिपादकं यद् वचनं तत् सकलादेश इत्यर्थः ।

विकलादेशं प्ररूपयति-**नयेति** । नयेन=सङ्ग्रहादिनयेन विषयीकृतस्य=विषयताकक्षीकृतस्य, नयविषयस्येति यावत् । वस्तुधर्मस्य=अनन्तधर्मात्मकघटादिगतैकास्तित्वादिधर्मस्य, कालादिभिरष्टभिः पर्यायार्थिकनयादेशाद् घटादिगतानामन्येषां नास्तित्वादिधर्माणां भेदवृत्तिप्राधान्यम्, द्रव्यार्थिकनयादेशाद् भेदोपचारं वाऽऽश्रित्य क्रमेण प्रतिपादकं=यस्य धर्मस्योल्लिख्यमानत्वं तस्य धर्मस्य प्रतिपादनमात्रेण तदात्मना घटादिप्रतिपादकं यद् वचनं तद् विकलादेश इत्यर्थः ।

क्रमयौगपद्ये स्वरूपतोऽजानन् परः पृच्छति-

**ननु कः क्रमः ? किं वा यौगपद्यम् ?**

विविच्य क्रमयौगपद्यस्वरूपोपदर्शनेनोत्तरयति-

**उच्यते-यदाऽस्तित्वादिधर्माणां कालादिभिर्भेदविवक्षा तदैकशब्दस्याऽनेकार्थप्रत्यायने शक्त्यभावात् क्रमः । यदा तु तेषामेव धर्माणां कालादिभिरभेदेन वृत्तमात्मरूपमुच्यते, तदैकेनाऽपि शब्देनैकधर्मप्रत्यायनमुखेन तदात्मकतामापन्नस्याऽनेकाशेषरूपस्य वस्तुनः प्रतिपादनसम्भवाद् यौगपद्यम् ।**

प्रथमं क्रमस्वरूपं निर्वक्ति-**यदेति** । **एकशब्दस्य**='अस्ती'त्यादि-अस्तित्वाद्येकधर्मप्रतिपादकशब्दस्य । यौगपद्यं निरूपयति-**यदा त्विति** । **तदात्मकताम्**=उल्लिख्यमानप्रतिनियतास्तित्वाद्येकधर्माभिन्नताम्, **आपन्नस्य**=प्राप्तस्य । अन्यत् स्पष्टम् ।

कालादीनां स्वरूपमुपदर्शयितुं तत्र परजिज्ञासामुत्थापयति-

**के पुनः कालादयः ?**

उत्तरयति-

**उच्यते-काल आत्मरूपमर्थः सम्बन्ध उपकारः गुणिदेशः संसर्गः शब्द इत्यष्टौ ।**

काल एकः, द्वितीयमात्मरूपम्, अर्थः तृतीयः, सम्बन्धः चतुर्थः, उपकारः पञ्चमः, गुणिदेशः षष्ठः, संसर्गः सप्तमः, शब्दोऽष्टमः-इत्येवमष्टसङ्ख्यकाः कालादय इत्यर्थः । तदुक्तं-

'कालात्मरूपसम्बन्धाः, संसर्गोपक्रिये तथा ।
गुणिदेशार्थशब्दाश्चेत्यष्टौ कालादयः स्मृताः ॥' इति ।

तत्रास्तित्वाद्येकधर्मस्य नास्तित्वादिभिरन्यैर्धर्मैः समं कालादिनाऽभेदवृत्तिमुपपादयति-

**तत्र-स्याद् जीवादिवस्त्वस्त्येवेत्यत्र यत्कालमस्तित्वं तत्कालाः शेषानन्तधर्मा वस्तुन्येकत्रेति तेषां कालेनाऽभेदवृत्तिः, यदेव चाऽस्तित्वस्य तद्गुणत्वमात्मरूपं तदेवाऽन्यानन्तगुणानामपीत्यात्मरूपेणाऽभेदवृत्तिः, य एव चाऽधारोऽर्थो द्रव्याख्योऽस्तित्वस्य स एवाऽन्यपर्यायाणामित्यर्थेनाऽभेदवृत्तिः, य एव चाऽविष्वग्भावः सम्बन्धोऽस्तित्वस्य स एवाऽन्येषामिति सम्बन्धेनाऽभेदवृत्तिः, य एव चोपकारोऽस्तित्वेन स्वानुरक्तत्वकरणं स एवाऽन्यैरपीत्युपकारेणाऽभेदवृत्तिः, य एव गुणिनः सम्बन्धी देशः क्षेत्रलक्षणोऽस्तित्वस्य स एवाऽन्येषामिति गुणिदेशेनाऽभेदवृत्तिः, य एव चैकवस्त्वात्मनाऽस्तित्वस्य संसर्गः स एवाऽन्येषामिति संसर्गेणाऽभेदवृत्तिः, गुणीभूतभेदादभेदप्रधानात् सम्बन्धाद् विपर्ययेण संसर्गस्य भेदः, य एव चाऽस्तीति शब्दोऽस्तित्वधर्मात्मकस्य वस्तुनो वाचकः स एवाऽशेषानन्तधर्मात्मकस्याऽपीति शब्देनाऽभेदवृत्तिः, पर्यायार्थिकनयगुणभावेन द्रव्यार्थिकनयप्राधान्यादुपपद्यते ।**

**तत्र**=कालादिषु मध्ये । **तेषां**=धर्माणाम् । **कालेनाऽभेदवृत्तिरिति** । [१]कालावच्छेदेन वस्तुनि घटादावस्तित्वादिधर्मस्य प्रतीतेः वस्तुनिरूपित-अस्तित्वनिष्ठवृत्तितायां कालस्याऽवच्छेदकत्वम् । तत्सम्बन्धिन एव तन्निष्ठधर्मावच्छेदकत्वमिति नियमेन कालस्याऽस्तित्वादिधर्मसम्बन्धित्वमावश्यकम् । कालेन सह धर्मस्याऽस्तित्वादेः सम्बन्धः कालिकः । सोऽपि सर्वसम्बन्धव्यापककथञ्चित्तादात्म्यव्याप्य इति कथञ्चित्तादात्म्यमपि कालेऽस्तित्वादेः सम्बन्धः । एवञ्च तदभिन्नाभिन्नस्य तदभिन्नत्वमिति नियमेन कथञ्चिदस्तित्वाभिन्नकालाभिन्नकथञ्चिन्नास्तित्वादिधर्माणां कथञ्चिदस्तित्वाभिन्नत्वमित्येवं कालेनाऽभेदवृत्तिः । अनयैव दिशाऽऽत्मरूपादिनाऽभेदवृत्तिरपि बोध्येत्याशयः ।

आत्मरूपेणाऽभेदवृत्तिं दर्शयति-**तद्गुणत्वं**=घटादिधर्मिगुणत्वम् । **तदेव**=घटादि-

---

१. 'इदानीं घटः' इत्यादौ वर्त्तमानादिकालावच्छेदेन घटाद्यस्तित्वप्रतीतिः ।

गुणत्वमेव, **आत्मरूपमिति** सम्बध्यते । अर्थेनाऽभेदवृत्तिं दर्शयति-**य एव चाऽधार** इति । **स एव**=द्रव्याख्य एव आधारः । सम्बन्धेनाऽभेदवृत्तिमुपदर्शयति-**य एव चाऽविष्वग्भाव** इति । **अविष्वग्भावः**=कथञ्चित्तादात्म्यम् । **स एव**=अविष्वग्भाव एव सम्बन्धः । उपकारात्मनाऽभेदवृत्तिं निरूपयति-**य एव चोपकार** इति । **स एव**=स्वानुरक्तत्वकरणलक्षण एवोपकारः । गुणिदेशरूपेणाऽभेदवृत्तिं दर्शयति-**य एव गुणिन** इति । **स एव**=क्षेत्रलक्षण एव गुणिनः सम्बन्धी देशः । संसर्गेणाऽभेदवृत्तिं निरूपयति-**य एव चैकवस्त्वात्मनेति** । **स एव**=तादृग्रूप एव संसर्गः । सम्बन्धसंसर्गयोः कः प्रतिविशेष इति जिज्ञासायामाह-**गुणीभूतेति** । यद्यप्यविष्वग्भाव एव सम्बन्धः, स एव च संसर्गः, तथापि तत्र भेदस्य गौणत्वेऽभेदस्य प्राधान्ये आस्थिते सति सम्बन्धत्वम्, तत्राऽभेदस्य गौणत्वे भेदस्य प्राधान्ये विवक्षिते सति संसर्गत्वमित्यनयोर्भेद इत्याशयः । शब्देनाऽभेदवृत्तिं भावयति-**य एव चैकेति** । **स एव**=अस्तीति शब्द एव । सर्वे सर्वार्थवाचका इति नियमादेकस्याऽपि शब्दस्य सर्वैरर्थैः सह वाच्यवाचकभावसम्बन्धोऽस्ति, तस्य व्यापकः कथञ्चित्तादात्म्यलक्षणसम्बन्ध इत्येवंदिशाऽपि शब्देनाऽभेदवृत्तिरुपपद्यते एवेति बोध्यम् ।

सम्बन्धसंसर्गयोः प्रतियोग्यनुयोगिभ्यामसम्बद्धयोर्न सम्बन्धत्वसंसर्गत्वे इति तयोः प्रतियोग्यनुयोगिभ्यां कस्यचित् सम्बन्धस्याऽऽवश्यकत्वे तद्व्यापकस्याऽपि कथञ्चित्तादात्म्यसम्बन्धस्य तत्राऽऽवश्यकत्वम्, निरुक्तसम्बन्धसंसर्गौ चाऽविशेषितौ सकलधर्मधर्मिगतौ—इत्येषा दिगपि तद्द्वारकाभेदवृत्तौ भावनीया[१] ।

अस्यां प्रक्रियायां पर्यायनयस्य गुणभावे द्रव्यार्थिकनयस्य सर्वत्राऽभेदमादिशतः प्राधान्यमिति तदवलम्बनेन कालादिभिरभेदवृत्तिप्राधान्यादित्युपदिश्यते इत्याह-**पर्यायार्थिकेति** ।

यदा च पर्यायार्थिकनयस्यैव प्राधान्यं द्रव्यार्थिकनयस्य च गुणभावमवलम्ब्य कालादिभिरेकधर्मेण सह तदन्याशेषधर्माणां भेदद्वारा सकलादेशत्वं विवक्ष्यते तदा पर्यायार्थिकनये नाऽस्त्यभेदप्राधान्यमिति तदुपचारत एव यौगपद्येनाऽनन्तधर्मात्मकवस्तुप्रतिपादकत्वतः सकलादेशत्वसम्भव इत्युपवर्णयितुम्, कथं न तत्र कालादिभिरभेदसम्भव इत्याकाङ्क्षानिवर्त्तनायाऽऽह-

**द्रव्यार्थिकगुणभावेन पर्यायार्थिकप्राधान्ये तु न गुणानामभेदवृत्तिः सम्भवति—समकालमेकत्र नानागुणानामसम्भवात्, सम्भवे वा तदाश्रयस्य भेदप्रसङ्गात्; नानागुणानां**

---

१. उपरि सम्बन्धसंसर्गयोः कथञ्चित्तादात्म्यरूपतां स्वीकृत्याऽभेदवृत्तिर्दर्शिता । अत्र तु तयोर्यत्किञ्चिद्रूपत्वेऽप्यभेदः प्रदर्शितः ।

**सम्बन्धिन आत्मरूपस्य च भिन्नत्वात्, अन्यथा तेषां भेदविरोधात्; स्वाश्रयस्याऽर्थस्याऽपि नानात्वात्, अन्यथा नानागुणश्रयत्वविरोधात्; सम्बन्धस्य च सम्बन्धिभेदेन भेददर्शनाद्, नानासम्बन्धिभिरेकत्रैकसम्बन्धाघटनात्; तैः क्रियमाणस्योपकारस्य च प्रतिनियतरूपस्याऽनेकत्वात्, अनेकैरुपकारिभिः क्रियमाणस्योपकारस्यैकस्य विरोधात्; गुणिदेशस्य च प्रतिगुणं भेदात्, तदभेदे भिन्नार्थगुणानामपि गुणिदेशाभेदप्रसङ्गात्; संसर्गस्य च प्रतिसंसर्गि भेदात्, तदभेदे संसर्गिभेदविरोधात्; शब्दस्य प्रतिविषयं नानात्वात्, सर्वगुणानामेकशब्दवाच्यतायां सर्वार्थानामेकशब्दवाच्यतापत्तेरिति कालादिभिर्भिन्नात्मनामभेदोपचारः क्रियते ।**

तत्र कालेनाऽभेदवृत्तेर्न सम्भव इत्याह-**समेति** । **सम्भवे**=समकालमेकत्र नानागुणानां सम्भवे, **तदाश्रयस्य**=नानागुणाधारस्य धर्मिणः । पर्यायनये गुणानां भिन्नत्वे विभिन्नगुणाश्रयस्य भिन्नत्वमेव । विरुद्धधर्माध्यासस्य भेदकत्वकल्पनापेक्षया विभिन्नधर्माध्यासस्य भेदकत्वमिति कल्पनैव लाघवाद् युक्तेति गुणानां भेदे तदाधारस्य तत्समानकालीनस्य भेदप्रसङ्गादित्यर्थः ।

पर्यायनये आत्मरूपेणाऽभेदवृत्त्यसम्भवमुपपादयति-**नानागुणानामिति** । **अन्यथा**= नानागुणानां सम्बन्धिन आत्मरूपस्य तद्गुणत्वलक्षणस्याऽभिन्नत्वे, **तेषां**=गुणानाम् । तद्गुणत्वस्य सर्वत्राऽविशिष्टत्वाद् भिन्नत्वं न स्यादित्यनन्तधर्माणामभावेऽनन्तधर्मात्मकत्वमपि वस्तुनो वक्तुं न शक्य तेत्यर्थः ।

गुणानां भिन्नानामाधारोऽपि विभिन्न एवेत्याधारलक्षणार्थेनाऽभेदवृत्तिरपि नाऽत्र घटते इत्याह-**स्वाश्रयस्येति** । **स्वाश्रयस्य**=गुणाश्रयस्य । **अन्यथा**=गुणाश्रयस्य भिन्नत्वाभावे । एकस्मिन् आश्रये एक एव गुण इति तत्र नियमेन नानागुणाश्रयत्वं भेदमन्तरेण न स्यादित्यर्थः ।

सम्बन्धेनाऽभेदवृत्त्यसम्भवं पर्यायनये दर्शयति-**सम्बन्धस्य चेति** । प्रतियोग्यनुयोगि-भेदेन सम्बन्धभेदोऽन्यत्र दृश्यते । नहि भूतलघटयोर्यः संयोगः स एव पर्वतवह्न्योरपि । तथाऽभ्युपगमे घटभूतलसंयोगोत्पत्तौ वह्निपर्वतसंयोगोऽप्युत्पद्येत, तद्विनाशे सोऽपि नश्येदिति प्रसङ्गो दुर्निवारः स्यात् । एवं नानाधर्मैः समं घटादिधर्मिणोऽपि नैकः सम्बन्धः, किन्तु तत्तद्धर्मप्रतियोगिको घटाद्यनुयोगिको भिन्न एव सम्बन्ध इति तथादर्शनतः कल्प्यते इत्यर्थः । **नानासम्बन्धिभिः**=अस्तित्वनास्तित्वादिनानाधर्मैः समम्, **एकत्र**=घटाद्यात्मकैकधर्मिणि, **एकसम्बन्धाघटनात्**=भेदविशिष्टाभेदात्मकाविष्वग्भावरूपसम्बन्धासम्भवात् ।

पर्यायनये उपकारेणाऽभेदवृत्त्यसम्भवं कथयति-**तैः क्रियमाणस्येति** । **तैः**=अस्तित्वादिगुणैः, **प्रतिनियतरूपस्य**=स्वस्वानुरूपानुरक्तत्वकरणात्मकस्य, अस्तित्वप्रभव उपकार

'अस्ति घट' इत्येवंरूपेण घटस्याऽनुरञ्जनं=तदात्मतयाऽभिव्यापनमित्येवं प्रतिनियतस्येति यावत्, **अनेकत्वात्**=विभिन्नत्वात् । **अनेकै**रिति । नानारूपैरस्तित्वादिगुणलक्षणोपकारकैर्जायमानस्य स्वानुरक्तत्वकरणोपकारस्याऽभिन्नत्वविरोधाद् । नहि भवति दण्डस्य विशेषणत्वे[जायमाना] दण्डीतिविशिष्टस्वरूपतानिष्पत्तिरेव कुण्डलादेरपि विशेषणत्वे, तदानीं कुण्डलीत्येवमेव विशिष्टस्वरूपनिष्पत्तेरित्यर्थः ।

तत्र गुणिदेशेनाऽभेदवृत्त्यसम्भवमुपपादयति-**गुणिदेशस्य चे**ति । **प्रतिगुणम्**=अस्तित्वादिप्रत्येकधर्ममाश्रित्य । **तदभेदे**=गुणानां भेदेऽपि गुणिदेशस्यैकस्यैव भावे । **भिन्नार्थे**ति । यथा घटास्तित्वादिगुणानां भिन्नानामपि घटात्मकगुणिनो देशोऽभिन्न एव, तथा स एव पटादिगतास्तित्वादिगुणानामपि स्यादित्यर्थः ।

संसर्गेणाऽभेदवृत्तिं तत्राऽपाकरोति-**संसर्गस्य चे**ति । **संसर्गस्य**=अभेदसहिष्णुभेद-लक्षणाविष्वग्भावस्य । **प्रतिसंसर्गिभेदा**दिति । अन्यत्र संसर्गिभेदेन संसर्गभेददर्शनादत्राऽपि तथैव युक्तत्वादिति भावः । **तदभेदे**=संसर्गाभेदे । भावना सम्बन्धदर्शिताऽवसेया ।

तत्र शब्देनाऽभेदवृत्तिं निराकरोति-**शब्दस्ये**ति । **शब्दस्य**=अस्तित्वादिगुणवाचका-स्तित्वादिशब्दस्य, **प्रतिविषयम्**=अस्तित्वादिगुणलक्षणवाच्यमाश्रित्य । वाच्यभेदेऽपि वाचकशब्दाभेदाभ्युपगमेऽनिष्टमापादयति-**सर्वगुणाना**मिति ।

उक्तदिशा पर्यायार्थनयादेशात् कालादिभिरभेदवृत्त्यसम्भवे एकगुणेन सह तदन्यगुणा-नामभेदोपचारः क्रियते । उपचारश्च गर्दभादितो भिन्नेऽपि विशिष्टज्ञानविकलमनुष्यादौ गर्दभाद्य-भेदस्य दृश्यते एवेत्युपसंहरति-**कालादिभि**रिति ।

विकलादेशनिर्वचने उक्तं भेदवृत्तिप्राधान्याद् भेदोपचाराद्वेति । तत्रापि कालादिभिरष्ट-भिर्गुणानां भेदवृत्तिः पर्यायनयप्राधान्यात् । तैः पुनः द्रव्यार्थनयादेशाद् भेदवृत्त्यसम्भावाद् भेदोपचारः क्रियते । तत्र पर्यायनयादेशे गुणादिभिरभेदवृत्त्यसम्भवे उपदर्शिता युक्तय एव भेदवृत्तिप्राधान्ये योजनीयाः । द्रव्यार्थिकनयादेशे गुणादिभिरभेदवृत्त्युपपादिका नीतिरेव भेदवृत्त्यसम्भवतो भेदोपचारे सङ्घटनीयेत्यतिदिशति-

**एवं भेदवृत्तितदुपचारावपि वाच्याविति ।**

ये च स्यादस्त्येव १ स्यान्नास्त्येव २ स्यादवक्तव्यमेवेति ३ त्रयाणां सकलादेशत्वम्, स्यादस्त्येव स्यान्नास्त्येव चेत्यादिचतुर्णां विकलादेशत्वमामनन्ति, तेषां मते निरवयवार्थ-प्रतिपादकमखण्डार्थप्रतिपादकलक्षणं सकलादेशत्वम्, सावयवार्थप्रतिपादकं सखण्डार्थप्रति-पादकलक्षणं विकलादेशत्वमिति ।

प्रतिभङ्गं सप्तभङ्ग्याः सकलादेशत्वे प्रतिभङ्गं प्रमाणवाक्यरूपा सप्तभङ्गी, तस्याः प्रतिभङ्गं विकलादेशत्वे प्रतिभङ्गं नयवाक्यरूपा । मतान्तरे आद्याः त्रयो भङ्गाः सकलादेशत्वात् प्रमाणवाक्यानि, तदवच्छेदेन सप्तभङ्ग्या अपि सकलादेशत्वात् प्रमाणवाक्यत्वम्, अन्त्याः चत्वारो भङ्गा विकलादेशत्वाद् नयवाक्यानि, तदवच्छेदेन सप्तभङ्ग्या अपि तथा ।

तत्र प्रथमभङ्गः संग्रहनयात् प्रवर्त्तते । द्वितीयभङ्गो व्यवहारात् । तृतीयभङ्गः ताभ्याम् । चतुर्थभङ्ग ऋजुसूत्राद्-युगपत्सत्त्वासत्त्वयोरादेशे सङ्ग्रहव्यवहारयोः तदविषयकत्वादसामर्थ्याद्, ऋजुसूत्रस्य तु तदविषयकत्वेऽपि संवृत्यैव तथाप्रतिपत्तिसामर्थ्यसम्भवात् । पञ्चमभङ्गस्य सङ्ग्रहर्जुसूत्राभ्यां प्रवृत्तिः । षष्ठभङ्गस्य व्यवहारर्जुसूत्राभ्यां प्रवृत्तिः । सप्तमभङ्गस्य तु सङ्ग्रह-व्यवहारर्जुसूत्रैरित्येवं सप्तभङ्ग्या नययोजना ज्ञेया ।

इति सप्तभङ्गीनिरूपणे आगमप्रमाणनिरूपणं परिपूर्णम् ।

परोक्षप्रमाणनिरूपणमुपसंहरति-

**पर्यवसितं परोक्षम् ।**

**पर्यवसितं**=सम्पन्नम्, परिपूर्णमिति यावत् ।

प्रमाणनिरूपणमुपसंहरति-

**ततश्च निरूपितः प्रमाणपदार्थः ।**

प्रत्यक्षपरोक्षाभ्यां द्विविधं प्रमाणमिति प्रतिज्ञातम्, प्रत्यक्षपरोक्षयोश्च सप्रभेदयोः क्रमेण निरूपणे वृत्ते प्रमाणपदार्थोऽपि निरूपित एवेति ।

• • •

# नयपरिच्छेदः

प्रमाणनयनिक्षेपैरित्यनेन प्रमाणनयनिक्षेपाणां त्रयाणामुद्दिष्टत्वेऽपि प्रथमं प्रमाणस्योद्देशात्, तज्जिज्ञासाया एव प्रथममुत्थितत्वात्, ततः प्रथमं प्रमाणे निरूपिते तज्जिज्ञासारूपप्रतिबन्धकोपशान्तेः, तदनन्तरमुद्दिष्टत्वेन निक्षेपनिरूपणतः प्राक् नयजिज्ञासाया एवोल्लासः । ततः प्रमाणनिरूपणानन्तरमवश्यवक्तव्यत्वलक्षणावसरसङ्गत्या नयनिरूपणमित्याशयमाविष्कुर्वन् श्रीमान् **यशोविजयोपाध्यायो** नयनिरूपणं प्रतिजानीते-

**प्रमाणान्युक्तानि । अथ नया उच्यन्ते ।**

**प्रमाणान्युक्तानी**त्यनेन प्रमाणनिरूपणस्य वृत्तत्वकथनेन स्वविषयसिद्धिनिवर्त्यायाः प्रमाणजिज्ञासाया नयनिरूपणप्रतिबन्धिकाया निवृत्तिरावेदिता । **अथ**=प्रमाणनिरूपणानन्तरम्, अनेन चाऽवसरसङ्गत्या निरूपणम् । **नया** इत्यनेन निरूपणविषयस्याऽऽविष्कारः । **उच्यन्ते** इत्यनेन तद्विषयकप्रतिपत्त्यनुकूलव्यापारलक्षणप्रतिज्ञाऽप्यावेदिता ।

नयान् लक्षयति-

**प्रमाणपरिच्छिन्नस्याऽनन्तधर्मात्मकस्य वस्तुन एकदेशग्राहिणः तदितरांशाप्रतिक्षेपिणोऽध्यवसायविशेषा [१]नयाः ।**

**नया** इति लक्ष्यवचनम्, **प्रमाणे**त्यादि लक्षणवचनम् । नया इति बहुवचनतो '[२]यावन्तो वचनवादाः, तावन्तो नया' इति वचनाद् विशेषतो नयानामानन्त्यमिति संसूचनम् ।

**प्रमाणपरिच्छिन्नस्ये**ति । अन्यत्र [३]श्रुतप्रमाणपरिच्छिन्नस्येति निर्दिष्टत्वेऽपि, अत्र प्रमाणसामान्याभिधानं स्याद्वादसंस्कारवतः पुंसः तद्बलात् प्रत्यक्षादिप्रमाणेऽपि स्याद्वादार्थगतिरस्त्येवेति तथाविधप्रत्यक्षादिप्रमाणपरिच्छिन्नत्वमप्यनन्तधर्मात्मकवस्तुन इत्यावेदनाय । अत एव सप्रपञ्चप्रत्यक्षपरोक्षस्वरूपतया प्रमाणनिरूपणमपि सङ्गच्छते, अन्यथा केवलज्ञानसकलादेशात्मकवचनयोरेव प्रमाणतयाऽभिधानं न्याय्यं भवेदिति बोध्यम् ।

**एकदेशग्राहिण** इति । प्रधानतयाऽनन्तधर्मात्मकवस्तुनः शरीरसन्निविष्टत्वेनैकदेशस्याऽवयवरूपस्याऽस्तित्वादितत्तद्धर्मस्य ग्राहकाः । प्रधानतयेति पूरणाद् गौणतया तदन्यदेशग्राहिण इत्यपि लभ्यते । अत एव च यावतामेव वस्तुधर्माणां प्रधानतयाऽवगाहकात् प्रमाणादस्य भेदः ।

---

१. सर्वं वस्त्वनन्तधर्मात्मकतया सङ्कीर्णस्वभावमिति तत्परिच्छेदकेन प्रमाणेनाऽपि तथैव भवितव्यमिति असङ्कीर्णप्रतिनियतधर्मप्रकारकव्यवहारसिद्धये नयानां सामर्थ्यम् ।

२. "जावइया वयणपहा, तावइया चेव हुंति नयवाया ॥"- सम्मतितर्क (३.४७) । अयमत्राऽभिप्रायः- वस्त्वेकधर्मप्रतिपादनपराणां प्रमात्रभिप्रायाणां नयत्वाभिधानाद्, वस्तुनश्चाऽनन्तधर्मवत्त्वादनन्ता नयाः सम्भवन्ति । तथापि प्राक्तनाचार्यैः सर्वाभिप्रायसङ्ग्राहकसप्ताभिप्रायकल्पनया सप्तनयाः प्रतिपादिताः ।

३. नीयते येन श्रुताख्यप्रमाणविषयीकृतस्य० ॥ प्रमाणनयतत्त्वालोकः ७.१ ।

अन्यथा समग्रग्राहिणः प्रमाणस्य तदन्तःसन्निविष्टैकदेशग्राहित्वमस्त्येवेति प्रमाणेऽप्येतल्लक्षणमतिव्याप्तं स्यात् । यद्यपि एकदेशमात्रग्राहिण इत्युक्त्याऽपि प्रमाणेऽतिव्याप्तेर्वारणसम्भवः, तथापि यथाश्रुतस्य न कुत्राऽपि सन्नये सत्त्वं-सन्नयस्य गौणतयाऽभिमतग्राह्यैकदेशभिन्नदेशग्राहित्वस्याऽपि भावादित्यसम्भवः स्यादिति तद्वारणार्थं प्रधानतयेत्यस्याऽवश्यमुपादेयत्वम् ।

दुर्नया अप्येकदेशग्राहिण इति तेष्वतिव्याप्तिवारणाय-**इतरांशाप्रतिक्षेपिण** इति । दुर्नयाश्चाऽन्योन्यप्रतिपक्षाः इतरांशान् प्रतिक्षिपन्त्येवेति न तेष्वतिव्याप्तिः । नयास्तु स्वविषयातिरिक्तविषये गजनिमीलिकामेवाऽवलम्बन्ते इति भवन्ति इतरांशाप्रतिक्षेपिणः ।

**अध्यवसायविशेषाः**=प्रमातुरभिप्रायभेदाः । एतेन—ये एकदेशं गृह्णन्ति इतरांशं च न प्रतिक्षिपन्ति, ते स्वरूपानुपलम्भाद् न सन्त्येवेत्याशङ्का व्युदस्ता-ईदृशानां सङ्ग्रहादिस्वरूपाणामभिप्रायभेदानां स्वसंवेदनसिद्धत्वेनाऽनुपलम्भाभावादित्याशयः ।

नया एव च मतशब्देनोच्यन्ते, यतः क्वचिद् मते इति वक्तव्ये नये इति व्यपदिश्यते, यथा-एवं न्यायनयज्ञैरिति । 'प्रामाण्यं **गौतमे** मते' इत्यत्र '**गौतमे** नये' इत्यपि वक्तुं शक्यते । एकैकस्मिन् अपि दर्शने यानि विभिन्नानि मतानि- इदं प्राचां मतम्, इदं नव्यानां मतम्, स्वतन्त्राणां चेदं मतम्, **जगदीश**मतम्, **गदाधर**मतमिति-दृश्यन्ते, तानि सर्वाणि नयस्वरूपाण्येवोपलभ्यन्ते, परमितरांशप्रतिक्षेपित्वात् सुनया न भवन्ति । प्राचां मतमिति वक्तव्ये प्राचामिष्टमित्येवमप्युपलम्भत एव अभिप्रायश्चेच्छाविशेष एवेति नयस्याऽभिप्रायरूपताऽपि नाऽनुपलब्धिबाधिता । इच्छा च **जैन**मते ज्ञानविशेष एव, न तु **नैयायिक**मत इव ज्ञानाभिन्नो गुण इत्यभिप्रायविशेषरूपाणां नयानामध्यवसायविशेषत्वं सुसङ्गतमेवेति निरुपद्रवमिदं लक्षणमिति बोध्यम् ।

ननु यद्येवं नया उक्तदिशा ज्ञानविशेषा एव, तदा स्वपरसंवेदनरूपत्वात् प्रमाणत्वमप्येषां सम्भवेदेवेति प्रमाणभिन्नतयैषां मननमसङ्गतमित्याशङ्काशङ्कुसमुद्धरणायाऽऽह-

**प्रमाणैकदेशत्वात् तेषां ततो भेदः । यथा हि समुद्रैकदेशो न समुद्रो नाऽप्यसमुद्रः, तथा नया अपि न प्रमाणं न वाऽप्रमाणमिति**[१] ।

**प्रमाणैकदेशत्वादि**ति । यतः प्रत्येकमस्तित्वादयो धर्मा नयविषया अनन्तधर्मात्मकवस्त्वेकदेशा एव ततः, प्रमाणैकदेशत्वाच्च, **तेषां**=नयानाम्, **ततः**=प्रमाणाद्, **भेदः**=पृथग्भावः ।

समुदितस्वरूपादेकदेशस्य पृथग्भावमनुगुणदृष्टान्तेन द्रढयति-**यथे**ति । अनेन दृष्टान्तोपदर्शनेन—'परस्परविरोधे हि न प्रकारान्तरस्थिति'रिति न्यायाद् नयानां प्रमाणत्वे पृथगुपन्यासो व्यर्थः, प्रमाणभिन्नत्वेऽप्रमाणत्वाद् न ततो वस्त्वंशसिद्धिरिति न वस्तुसाधनाङ्गत्वमिति—

---

१. दर्शनान्तरेऽपि कस्यचिद् ज्ञानस्य प्रमाणाप्रमाणोभयकोटिबहिर्भावोऽभ्युपेयते, यथा-"न प्रमा नाऽपि भ्रमः स्यान्निर्विकल्पकम्"-कारिकावली १३५ ।

शङ्काऽपि व्युदस्ता । समुद्रैकदेशस्य न समुद्रत्वमिति समुद्रभिन्नत्वेऽपि नाऽसमुद्रत्वम्, किन्तु समुद्रांशत्वमेव । तथा नयानां प्रमाणभिन्नत्वेऽपि नाऽप्रमाणत्वम्, किन्तु प्रमाणैकदेशत्वमेव[१] । तदुक्तं-

'नाऽप्रमाणं प्रमाणं वा, नयो ज्ञानात्मको मतः ।
स्यात् प्रमाणैकदेशस्तु, सर्वथाऽप्यविरोधतः ॥१॥
नाऽयं वस्तु न चाऽवस्तु, वस्त्वंशः कथ्यते बुधैः ।
नाऽसमुद्रः समुद्रो वा, समुद्रांशो यथैव हि ॥२॥' इति ।

अथ नयान् विभजते-

**ते च द्विधा-द्रव्यार्थिकपर्यायार्थिकभेदात् । तत्र [२]प्राधान्येन द्रव्यमात्रग्राही द्रव्यार्थिकः । प्राधान्येन पर्यायमात्रग्राही पर्यायार्थिकः ।**

**ते च**=नयाश्च । द्रव्यार्थिको नयः, पर्यायार्थिको नयः-इत्येवं नया द्विविधा इत्यर्थः ।

द्रव्यार्थिकनयं लक्षयति-**तत्रे**ति । **तत्र**=द्रव्यार्थिकपर्यायार्थिकयोर्मध्ये । **प्राधान्येन द्रव्यमात्रग्राही**ति लक्षणम्, **द्रव्यार्थिक** इति लक्ष्यम् । **प्राधान्ये**नेत्युपादानाद् गौणतया पर्यायग्राहित्वमपि लभ्यते, तेन पर्यायाप्रतिक्षेपित्वावगतितो द्रव्यार्थिकभासातिव्याप्तिव्युदासः । मात्रपदोपादानाच्च प्रमाणातिव्याप्तिनिरासः । गौणतया पर्यायग्राहिणि सामान्यतो द्रव्यमात्र-ग्राहित्वं न स्यादेवेत्यसम्भवः, तद्वारणाय **प्राधान्ये**नेति ।

पर्यायार्थिकनयं लक्षयति-**प्राधान्ये**नेति । **प्राधान्येन पर्यायमात्रग्राही**ति लक्षणनिर्देशः, **पर्यायार्थिक** इति लक्ष्यनिर्देशः । अत्राऽप्यसम्भववारकं **प्राधान्ये**नेति, प्रमाणेऽतिव्याप्तिवारकं **मात्रे**ति । प्राधान्येनेति विशेषणमहिम्ना [३]नयसामान्यलक्षणानुगमनमहिम्ना वा लब्धादितरांशा-प्रतिक्षेपित्वात् पर्यायभासातिव्याप्तिवारणम् ।

द्रव्यार्थिकनयं विभजते-

**तत्र द्रव्यार्थिकः त्रिधा-नैगमसङ्ग्रहव्यवहारभेदात् ।**

**तत्र**=द्रव्यार्थिकपर्यायार्थिकयोर्मध्ये । नैगमः, सङ्ग्रहः, व्यवहारश्चेत्येवं भेदात् त्रिप्रकारो द्रव्यार्थिक इत्यर्थः ।

पर्यायार्थिकनयं विभजते-

---

१. नयानां वस्त्वेकांशग्राहित्वात् प्रमाणैकदेशत्वम् ।

२. वस्तुनि द्रव्यपर्याययोः समानरूपेणैवाऽवस्थानम् । केवलं ज्ञप्तिकाले प्रतिपादनकाले वाऽऽपेक्षिकः प्राधान्यगौणभावः ।

३. प्रकृतवस्त्वंशग्राहि-तदितरांशाप्रतिक्षेपित्वादि ।

**पर्यायार्थिकः चतुर्धा-ऋजुसूत्रशब्दसमभिरूढैवम्भूतभेदात् ।**

ऋजुसूत्रः, शब्दः, समभिरूढः, एवम्भूतः-इत्येवं भेदात् चतुःप्रकारः पर्यायार्थिक इत्यर्थः । उभयसङ्कलने नयाः सप्तेति फलितम् ।

ऋजुसूत्रस्य पर्यायार्थविशेषतयाऽभिधानं **सिद्धसेना**दिमतमाश्रित्य[१] । पूज्यश्री**जिनभद्रगणिक्षमाश्रमण**मते तस्य द्रव्यार्थिकत्वमेव । तन्मते द्रव्यार्थिका नैगमसङ्ग्रहव्यवहार्जुसूत्राः चत्वारो नयाः, पर्यायार्थिकाः शब्दसमभिरूढैवम्भूताः त्रयो नयाः । नैगमस्य **सिद्धसेन**मते सामान्यग्राहिणः सङ्ग्रहे, विशेषग्राहिणः व्यवहारेऽन्तर्भावः-इत्येवं विशेषा बहवः सन्ति, तथापि अन्यान् विशेषान् ग्रन्थगौरवभयादुपेक्ष्य ऋजुसूत्रस्य द्रव्यार्थिकत्वमननं यत् **पूज्यपादानां** तदेवोपदर्शयति-

**ऋजुसूत्रो द्रव्यार्थिकस्यैव भेद इति तु जिनभद्रगणिक्षमाश्रमणाः ।**

## नयविशेषनिरूपणम्

द्रव्यार्थिकस्य प्रथमोद्दिष्टत्वात् प्रथमं विभजनाच्च तस्याऽऽद्यं प्रकारं नैगमं लक्षयति-

**तत्र सामान्यविशेषाद्यनेकधर्मोपनयनपरोऽध्यवसायो नैगमः, यथा पर्याययोर्द्रव्ययोः पर्यायद्रव्ययोश्च मुख्यामुख्यरूपतया विवक्षणपरः ।**

**तत्र**=नैगमसङ्ग्रहव्यवहारेषु द्रव्यार्थिकभेदेषु मध्ये । **सामान्ये**त्यादि लक्षणम्, **नैगम** इति लक्ष्यम् । द्रव्यत्वमनुगतत्वात् सामान्यम्, सहभावी पर्यायो गुणः क्रमभावी पर्यायश्च-तावुभौ व्यावृत्तत्वाद् विशेषः । आदिपदाद् नित्यत्वानित्यत्वभेदाभेदादेर्ग्रहणम् । तथाविधानेकधर्माणां धर्मिण्युपनयने **परः**=प्रवणः **अध्यवसायः**=अभिप्रायो नैगमनय इत्यर्थः ।

अमुमेवाऽर्थं स्पष्टयति-**यथे**ति । पर्याययोरेकपर्यायस्य मुख्यरूपतयाऽपरपर्यायस्याऽमुख्यरूपतया=गौणतया विवक्षणपरः=प्रतिपादनसमर्थ एको नैगमः । द्रव्ययोरेकद्रव्यस्य मुख्यरूपतया, परद्रव्यस्याऽमुख्यरूपतया प्रतिपादनप्रवणो द्वितीयो नैगमः । पर्यायद्रव्ययोरेकतरस्य पर्यायस्य द्रव्यस्य वा मुख्यतयाऽपरस्य द्रव्यस्य पर्यायस्य वाऽमुख्यरूपतया ज्ञापनप्रवीणः तृतीयो नैगम इत्यर्थः ।

तत्र पर्याययोर्मुख्यामुख्यतया विवक्षणपरं नैगममुदाहरति-

**अत्र सच्चैतन्यमात्मनीति पर्याययोर्मुख्यामुख्यतया विवक्षणम् । अत्र चैतन्याख्यस्य व्यञ्जनपर्यायस्य विशेष्यत्वेन मुख्यत्वात्, सत्त्वाख्यस्य तु विशेषणत्वेनाऽमुख्यत्वात् ।**

---

**'जिनभद्र०'**- विशेषा० बृ० गा० ७५ विशेषा० गा० ७७, २२६२ ।

---

१. दृश्यताम् पृष्ठ २४३ टि. २।

**अत्र**=उपदर्शितप्रकारत्रयमध्ये । अत्र आत्मधर्मिणि द्रव्ये सत्त्वचैतन्ययोः तद्धर्मत्वात् तत्पर्यायभूतयोः 'सच्चैतन्य'मित्येवं विवक्षणे, सत्त्वस्य विशेषणत्वेन गौणत्वम्, चैतन्यस्य तद्विशेष्यत्वेन मुख्यत्वमित्येवं पर्याययोर्मुख्यामुख्यतया विवक्षणमित्येव स्पष्टयति-**अत्रे**ति । **अत्र**=सच्चैतन्यमात्मनीत्यस्मिन् । **व्यञ्जनपर्यायस्य**=चैतन्यमुपयोगस्वरूपमात्मनः प्रतिक्षणं विभिन्नसुखदुःखहर्षविस्मयाद्यर्थपर्यायभावेऽप्यनुगामित्वाद् व्यञ्जनपर्यायः, तस्य । **विशेष्य-त्वेने**ति । सच्चैतन्यमित्यत्र चैतन्यं विशेष्यं सत्त्वं च विशेषणमित्यतो विशेष्यत्वेन । **सत्त्वाख्यस्य त्वि**त्यत्राऽपि व्यञ्जनपर्यायस्येति सम्बद्ध्यते-यथा कालत्रयानुगामि चैतन्यं तथा प्रतिविशिष्ट-सत्त्वमपीति ।

व्यञ्जनपर्यायः क इत्यपेक्षायामाह-

**प्रवृत्तिनिवृत्तिनिबन्धनार्थक्रियाकारित्वोपलक्षितो व्यञ्जनपर्यायः ।**

यद्धर्मसम्बन्धात् चेतनादिशब्दस्याऽर्थविशेषे **प्रवृत्तिः**, यद्धर्मासम्बन्धाच्च तस्याऽर्थ-विशेषे **निवृत्तिः, तन्निबन्धना याऽर्थक्रिया** 'अयं चेतनोऽयमचेतन' इत्यादिव्यवहृतिलक्षणा, **तत्कारित्वोपलक्षितः**=तत्स्वरूपयोग्यत्ववान् । न हि चैतन्यादिसत्त्वे उक्ताऽर्थक्रिया सर्वदा भवत्येव-व्यवहारकर्त्तुरभावे वा व्यवहृतीच्छाद्यभावे वा व्यवहृतेरभावाद् । अतो निरुक्तार्थक्रिया-कारित्वं चेतनादेर्व्यञ्जनपर्यायतासम्पादकं विशेषणं न भवति, तथा सति तथाव्यवहृतिजनना-भावदशायां चैतन्यादेर्व्यञ्जनपर्यायत्वाभावप्रसङ्गात् । अर्थक्रियास्वरूपयोग्यता तु सहकार्यन्तर-विरहात् कार्याजननेऽपि न व्यावर्त्तते इत्यभिसन्धानेनाऽर्थक्रियाकारित्वविशिष्ट इत्यनुक्त्वा अर्थक्रियाकारित्वोपलक्षित इत्युक्तम् । एवम्भूतो यः पर्यायः स व्यञ्जनपर्याय इत्यर्थः ।

तत् किमन्योऽपि पर्यायोऽस्ति येन व्यञ्जनपर्याय इति विशिष्योच्यते इति चेदस्त्येवा-ऽर्थपर्यायः । तर्हि स कीदृग्रूप इत्यपेक्षायामाह-

**भूतभविष्यत्वसंस्पर्शरहितं वर्त्तमानकालावच्छिन्नं वस्तुस्वरूपं चाऽर्थपर्यायः ।**

यः पर्यायोऽतीतकालेऽनागतकाले च धर्मिणि न सत्तामनुभवति, किन्तु वर्त्तमानकाला-वच्छेदेनैव तत्र वर्त्तते, एवम्भूतो यो वस्तुस्वरूपपर्यायो प्रतिक्षणमन्योन्यस्वरूपभवनलक्षणः सोऽर्थपर्याय इत्यर्थः ।

द्रव्ययोर्मुख्यामुख्यतया विवक्षणपरं नैगममुदाहरति-

**वस्तु पर्यायवद्द्रव्यमिति द्रव्ययोर्मुख्यामुख्यतया विवक्षणम्, पर्यायवद्द्रव्या-ख्यस्य धर्मिणो विशेष्यत्वेन प्राधान्याद्, वस्त्वाख्यस्य विशेषणत्वेन गौणत्वात् ।**

अत्र विशेषणीभूतं **वस्तु** अपि द्रव्यम्, विशेष्यीभूतं **पर्यायवद्द्रव्य**मित्यपि द्रव्यम् । तत्र विशेषणत्वादेकस्याऽप्राधान्यं द्वितीयस्य तु प्राधान्यमिति तथैव विवक्षणमिति स्पष्टयति- **पर्यायवद्द्रव्याख्यस्ये**ति ।

पर्यायद्रव्ययोर्मुख्यामुख्यरूपतया विवक्षणपरं नैगममुदाहरति-

**क्षणमेकं सुखी विषयासक्तजीव इति पर्यायद्रव्ययोर्मुख्यामुख्यतया विवक्षणम्, अत्र विषयासक्तजीवाख्यस्य धर्मिणो विशेष्यत्वेन मुख्यत्वात्, सुखलक्षणस्य तु धर्मस्य तद्विशेषणत्वेनाऽमुख्यत्वात् ।**

विषयासक्तजीवलक्षणद्रव्यस्य विशेष्यतया प्राधान्यम्, सुखस्य तु पर्यायस्य विशेषणत्वादप्राधान्यम् । तथैव च विवक्षेति सङ्गमयति-**अत्रे**ति । **अत्र**=निरुक्तोदाहरणस्थले ।

ननु वस्त्वंशग्राह्येव नयोऽभिमतः, उदाहतनैगमस्तु द्रव्यपर्यायोभयविषयकत्वेन वस्तुविषयकत्वात् प्रमाणं स्यादित्याशङ्क्य प्रतिक्षिपति-

**न चैवं द्रव्यपर्यायोभयावगाहित्वेन नैगमस्य प्रामाण्यप्रसङ्गः-प्राधान्येन तदुभयावगाहिन एव ज्ञानस्य प्रमाणत्वात् ।**

**एवम्**=उदाहृतनैगमस्य द्रव्यपर्यायोभयविषयकत्वाभ्युपगमे । वस्तुनि द्रव्यपर्याययोः प्राधान्येनैव स्वरूपता-तथासत्येव तदात्मकत्वमेकस्य वस्तुनः । न ह्येकमेवं प्रधानमप्रधानं च सम्भवति । यस्याऽप्राधान्यं तद् उपचरितमेव, न ह्युपचरितं वस्तुरूपम्, न हि सिंहत्वेनोपचरितो माणवकः सिंहो भवति । इत्थं चोदाहृतस्य नैगमस्य प्रधानतया द्रव्यविषयकत्वाद् गौणतया पर्यायविषयकत्वात् प्राधान्येनोभयावगाहित्वाभावादुभयात्मकवस्त्वगाहित्वाभावेन न प्रामाण्यमित्याह-**प्राधान्येने**ति । **तदुभयावगाहिन एव**=तदुभयविषयकस्यैव ।

सङ्ग्रहं निरूपयति-

**सामान्यमात्रग्राही परामर्शः सङ्ग्रहः ।**

**सामान्यमात्रग्राही परामर्श** इति लक्षणम्, **सङ्ग्रह** इति लक्ष्यम् । **परामर्शः**=निश्चयः, अध्यवसायविशेष इति यावत् । सामान्यात्मनाऽवान्तराशेषविशेषविषयकमेव, न तु विशेषात्मना विशेषविषयकम्, एतादृशं यद् ज्ञानं तत् सङ्ग्रहनय इत्यर्थः ।

तं विभजते-

**स द्वेधा-परोऽपरश्च ।**

परसङ्ग्रहोऽपरसङ्ग्रहश्चेत्येवं द्विप्रकारः सङ्ग्रह इत्यर्थः ।

परसङ्ग्रहं लक्षयति-

**तत्राऽशेषविशेषेष्वौदासीन्यं भजमानः शुद्धद्रव्यं सन्मात्रमभिमन्यमानः परः सङ्ग्रहः, यथा-विश्वमेकं सदविशेषादिति ।**

**तत्र**=परापरसङ्ग्रहयोर्मध्ये । **अशेषादि** लक्षणम्, **परः सङ्ग्रह** इति लक्ष्यम् । अशेषेषु द्रव्यत्वाद्यवान्तरसामान्य-तदाधारव्यक्तिविशेषेषु गजनिमीलिकामवलम्बमानः सत्तालक्षणमहा-सामान्यस्वरूपं पर्यायामिश्रितद्रव्यमेव यो विषयीकरोति, एवम्भूतो बोधविशेषः परसङ्ग्रह इत्यर्थः । उदाहरति-**यथेति** । सर्वं हि वस्तु 'सत्, सद्' इत्येवं भाति, ततो वस्तुमात्रं सदेव भवति । 'घटः, पट' इत्यादिकं तु व्यावृत्तत्वाद् न वस्तुरूपम्-'आदावन्ते च यद् नाऽस्ति, वर्त्तमानेऽपि तत् तथे'ति[1] सत्त्वमेव वस्तुनः पारमार्थिकं रूपम्, तच्चैकमिति तदात्मकं विश्वमप्येकं-**सदविशेषात्**=सद्रूपस्य सर्वत्र साधारणत्वात् । रूपान्तरस्य त्वननुगामितया कल्पितत्वेन ततो विश्वस्य भेदाऽसम्भवादित्यर्थः ।

अपरसङ्ग्रहं लक्षयति-

**द्रव्यत्वादीन्यवान्तरसामान्यानि मन्वानः, तद्भेदेषु गजनिमीलिकामवलम्बमानः पुनरपरसङ्ग्रहः ।**

**अपरसङ्ग्रह** इति लक्ष्यनिर्देशः, **द्रव्यत्वादीनी**त्यादिर्लक्षणनिर्देशः । **अवान्तर-सामान्यानि**=महासामान्यसत्ताव्याप्यजातीः । **द्रव्यत्वादीनी**त्यत्रादिपदाद् गुणत्वपर्यायत्वादे-रुपग्रहः । **मन्वानः**=स्वीकुर्वाणः । **तद्भेदेषु**=द्रव्यभेदेषु जीवपुद्गलधर्माधर्मास्तिकायादिषु द्रव्यत्वावान्तरसामान्यलिङ्गितेषु, **गजनिमीलिकाम्**=औदासीन्यम् । अन्यत् स्पष्टम् । अस्योदा-हरणं 'जीवादिकमेकमेव द्रव्यविशेषा'दित्याद्यूहनीयम् ।

व्यवहारनयं लक्षयति-

**सङ्ग्रहेण गोचरीकृतानामर्थानां विधिपूर्वकमवहरणं येनाऽभिसन्धिना क्रियते स व्यवहारः[2] । यथा-यत् सत् तद् द्रव्यं पर्यायो वा, यद् द्रव्यं तद् जीवादि षड्विधम्, यः पर्यायः स द्विविधः-क्रमभावी सहभावी चेत्यादि ।**

**सङ्ग्रहेणे**त्यादि **से**त्यन्तं लक्षणम्, **व्यवहार** इति लक्ष्यम् । सामान्यग्राहिणा सङ्ग्रह-नयेन सामान्यात्मना विषयीकृतानां विशेषात्मनामर्थानां **विधिपूर्वकं**=स्वसाधारणरूपाभिधान-

---

१. मृत्तिकाकाले खण्डघटकाले च घटस्याऽभावाद् वर्त्तमानेऽपि घटस्याऽभावः-यद् नाऽनुगामि, न तद् वास्तविकमितीहाऽऽशयः ।

२. व्यवहारनयो मुख्यवृत्त्या लोकव्यवहारनिबन्धनः, तदुभयोरपि प्रायो विशेषविश्रान्तत्वात् ।

पूर्वकम्, महासामान्यस्य यद् व्याप्यं तद्रूपेण प्रथममभिधाय तस्य यद् व्याप्यं तद्रूपेण तदालिङ्गितस्य धर्मिणोऽभिधानमित्येवंक्रमेण, न तु प्रथमत एव यस्याऽवान्तरविशेषो नाऽस्ति तद्रूपेणैवाऽभिधानमिति विभजनक्रमनियमलक्षणविधिपुरस्सरमिति यावत् । **अवहरणं**=विभजनम्, **येनाऽभिसन्धिना**=येनाऽध्यवसायविशेषेण क्रियते सोऽभिप्रायविशेषो व्यवहारनय इत्यर्थः । उदाहरति-**यथेति** । **जीवादीति** । जीवास्तिकायः पुद्गलास्तिकायो धर्मास्तिकायोऽधर्मास्तिकाय आकाशास्तिकायः कालश्चेत्येवं षट्प्रकारकं द्रव्यमित्यर्थः । **क्रमभावी**=द्रव्योत्पत्त्यनन्तरं यो यदाकदाचिद् भवति संयोगादिरुत्क्षेपणादिः रक्ततरत्वादिर्वा स पर्यायः । **सहभावी**=यो द्रव्येणाऽऽधारेण सहैवोत्पद्यते रूपरसगन्धस्पर्शादिर्गुणः स सहभावी पर्यायो बोध्यः ।

ऋजुसूत्रनयं लक्षयति-

**ऋजु=वर्तमानक्षणस्थायिपर्यायमात्रं प्राधान्यतः सूचयन् अभिप्राय ऋजुसूत्रः ।**

**अभिप्राय** इत्यन्तं लक्षणम्, **ऋजुसूत्र** इति लक्ष्यम् । [१]अन्वयार्थोपदर्शनेन लक्षणेऽस्मिन् ऋज्वित्यस्य **वर्त्तमानक्षणस्थायिपर्यायमात्र**मित्यर्थकथनम्, एवञ्च भूतकालवृत्तित्वे [भविष्यत्कालवृत्तित्वे च] कौटिल्यमित्यभिसन्धानम्, कुटिलतारूपत्वं च तयोरर्थेऽसम्भवादिति । सूत्रयति=सूचयतीति सूत्रमिति व्युत्पत्तिमवलम्ब्य, [२]आभासताव्यवच्छेदाय प्राधान्यत इत्युपादाय च सूत्रमित्यस्य प्राधान्यतः सूचयन् इत्यर्थकथनम् । नयत्वादेवाऽभिप्रायत्वं प्राप्तमित्याशयेनाऽभिप्राय इति ।

उदाहरति–

**यथा सुखविवर्तः सम्प्रत्यस्ति । अत्र हि क्षणस्थायि सुखाख्यं पर्यायमात्रं प्राधान्येन प्रदर्श्यते, तदधिकरणभूतं पुनरात्मद्रव्यं गौणतया नाऽर्प्यते इति ।**

**सुखविवर्तः**=सुखाख्यपर्यायः, **सम्प्रति**=वर्त्तमानकाले, **अस्ति**=वर्त्तते । उदाहृतस्य ऋजुसूत्रलक्षणयोगं भावयति-**अत्रेति** । **अत्र**=सुखविवर्त्तः सम्प्रत्यस्तीत्यस्मिन्, **हि**=यतः । वर्त्तमानकालः क्षणमात्ररूप एवाऽस्मिन् नये इष्ट इत्यतः **क्षणस्थायीत्युक्तम्** । सुखस्य तदाधारस्याऽऽत्मनश्च[३] सत्त्वेऽपि सुखसत्त्वसम्भवात् तदवगाहने न निरुक्तलक्षणसमन्वय इत्यत

---

१. 'ऋजुसूत्र' इत्यस्माद् नामत एव कथं तल्लक्षणं प्रकटीभवति तत् प्रदर्श्यते ।

२. ऋजुसूत्राभासेऽतिव्याप्तिवारणाय ।

३. 'सम्प्रत्यात्मनि सुखविवर्त्तोऽस्ती'त्यत्र सुखस्याऽऽत्मनश्च सत्त्वात्, सुखाख्यपर्यायावगाहनादिदमपि ऋजुसूत्रदृष्टान्तं भवेदिति, दृष्टान्ते लक्षणसमन्वयाभावाद् विरोधः स्यादित्यतो 'मात्र'पदम् ।

उक्तं **पर्यायमात्र**मिति । पर्यायमात्रप्रदर्शनं तदाभासेऽपि समस्तीत्यतः **प्राधान्ये**नेति । प्रधानतया पर्यायमात्रस्य प्रदर्शनं तदैव भवेत्, तदाधारस्याऽऽत्मद्रव्यस्य गौणतयाऽवगाहनलक्षणमनर्पितत्वं भवेदतः तदुपदर्शयति-**तदधिकरणभूत**मिति ।

पर्यायार्थिकस्य प्रथमभेदमृजुसूत्रं लक्षयित्वा द्वितीयभेदं शब्दनयं लक्षयति-

**कालादिभेदेन ध्वनेरर्थभेदं प्रतिपद्यमानः शब्दः ।**

क्षणमात्रस्थायित्वमर्थस्य पर्यायार्थिकनयभेदचतुष्टयेऽपि साधारणम्, ऋजुसूत्रात् परं शब्दनये कालादिभेदेन शब्दस्य भिन्नार्थत्वं विशेषः, ऋजुसूत्रनयो हि कालादिभेदेऽपि शब्दस्य वाच्यभेदं नेच्छतीति । **ध्वनेः**=शब्दस्य, **अर्थभेदं**=वाच्यभेदम्, **प्रतिपद्यमानः**=स्वीकुर्वाणः, अभिप्राय इति दृश्यम्-एतावद् लक्षणम्, **शब्दः**=शब्दनय इति लक्ष्यम् ।

कालादिभेदेनेत्युक्तम्, तत्र के कालादय इति जिज्ञासायामाह-

**कालकारकलिङ्गसङ्ख्यापुरुषोपसर्गाः कालादयः । तत्र बभूव भवति भविष्यति सुमेरुरित्यत्राऽतीतादिकालभेदेन सुमेरोर्भेदप्रतिपत्तिः, करोति क्रियते कुम्भ[१] इत्यादौ कारकभेदेन, तटः तटी तटमित्यादौ लिङ्गभेदेन, दाराः कलत्रमित्यादौ सङ्ख्याभेदेन, यास्यसि त्वं यास्यति भवानित्यादौ पुरुषभेदेन, सन्तिष्ठते अवतिष्ठते इत्यादावुपसर्गभेदेन ।**

**तत्र**=कालादिभेदेषु मध्ये । कालभेदेनाऽर्थभेदमुदाहरति-**बभूवे**ति । कारकभेदेना-ऽर्थभेदमुदाहरति-**करोती**ति । **कारकभेदे**नेत्यनन्तरं कुम्भस्य भेदप्रतिपत्तिरिति दृश्यम् । लिङ्ग-भेदेन ध्वनेरर्थभेदमुदाहरति-**तट** इति । **लिङ्गभेदे**नेत्यनन्तरं तटस्य भेदप्रतिपत्तिरिति दृश्यम् । सङ्ख्याभेदेन ध्वनेरर्थभेदमुदाहरति-**दारा** इति । **सङ्ख्याभेदे**नेत्यनन्तरं स्त्रीरूपार्थस्य भेदप्रति-पत्तिरिति दृश्यम् । पुरुषभेदेनाऽर्थभेदमुदाहरति-**यास्यसी**ति । यास्यसीति सम्बोध्ये मध्यमपुरुषे प्रयुज्यते, यास्यतीति अन्यपुरुषे स्वसम्बोध्यभिन्ने उत्तममध्यमभिन्ने तृतीयपुरुषे प्रयुज्यते इति पुरुषभेदः । **पुरुषभेदे**नेत्यनन्तरमेकस्याऽपि भविष्यत्कालीनप्रयाणकर्तुरर्थस्य भेदप्रतिपत्तिरिति दृश्यम् । उपसर्गभेदमुदाहरति-**सन्तिष्ठते** इति । **उपसर्गभेदे**नेत्यनन्तरमेकधात्वर्थस्याऽपि भेद-प्रतिपत्तिरिति दृश्यम् ।

ऋजुसूत्राभिमतस्य क्षणिकस्यैकस्याऽर्थस्य कालकारकलिङ्गाद्यवाप्तभेदकशब्दभेदेना-ऽर्थभेदमुररीकुर्वाणं शब्दनयं लक्षयित्वा पर्यायार्थिकस्य तृतीयभेदं समभिरूढनयं लक्षयति-

**पर्यायशब्देषु निरुक्तिभेदेन भिन्नमर्थं समभिरोहन् समभिरूढः ।**

---

१. करोति कुम्भः (जलधारणादि), क्रियते कुम्भः (कुम्भकारेण) इत्येवमत्र वाक्यद्वयम् ।

**समभिरोहन्** इत्यन्तं लक्षणम्, **समभिरूढ** इति लक्ष्यम् । [१]एकप्रवृत्तिका विभिन्नानुपूर्वीसङ्घटितवर्णसमुदायलक्षणाः शब्दाः पर्यायशब्दाः यथा घटकुटकुम्भकलसादयः । तेषु **निरुक्तिभेदेन**= घटते=चेष्टते इति घटः, कुटति=कौटिल्यमनुभवतीति कुटः, कुः=पृथिवी, तां भासयतीति कुम्भ; कं=जलं लसति यत्र स कलस इत्येवं व्युत्पत्तिभेदेन । **भिन्नं**=पृथग्, **अर्थं**=वाच्यम्, **समभिरोहन्**=प्रतिपादयन् अध्यवसायविशेषः समभिरूढनय इत्यर्थः ।

शब्दनयात् पूर्वमभिहितात् सम्प्रत्येत्य (? साम्प्रतेत्य)पराभिधानात् समभिरूढस्य भेदं स्पष्टयति-

**शब्दनयो हि पर्यायभेदेऽप्यर्थाभेदमभिप्रैति, समभिरूढस्तु पर्यायभेदे भिन्नानर्थानभिमन्यते, अभेदं त्वर्थगतं पर्यायशब्दानामुपेक्षते इति ।**

**हि**=यतः, **शब्दनयः**=साम्प्रतनयः, **पर्यायभेदेऽपि**=एकस्य घटरूपार्थस्य घटकुटकुम्भादिनामभेदेऽपि, **अर्थाभेदं**=घटरूपार्थस्यैक्यम्, **अभिप्रैति**=इच्छति । **समभिरूढस्तु**=समभिरूढाख्यनयः पुनः, **पर्यायभेदे**=नाम्नां भेदे, **अर्थान्**=संज्ञिनः, **भिन्नान्**=घटवाच्यात् कुटवाच्यो भिन्नः, कुटवाच्यात् कुम्भवाच्यो भिन्न-इत्येवं नानाभूतान्, **अभिमन्यते**=स्वीकुरुते । समभिरूढाभासाद् व्यवच्छित्तये आह-**अभेद**मिति । पर्यायशब्दानामर्थगताभेदं तूपेक्षते । न प्रतिक्षिपति, किन्तु तत्र गजनिमीलिकामवलम्बते इत्यु**पेक्षते** इत्यस्यार्थः ।

उदाहरति-

**यथा इन्दनादिन्द्रः, शकनात् शक्रः, पूर्दारणात् पुरन्दर इत्यादि ।**

**इन्दनात्**=देवाधिपत्यादिलक्षणैश्वर्यात्, **शकनात्**=वृत्रादिशत्रूणां मारणे सामर्थ्यात्, **पूर्दारणात्**=शत्रुपुरादिविध्वंसनात् ।

पर्यायनयस्य तुरीयभेदमेवम्भूतनयं लक्षयति-

**शब्दानां स्वप्रवृत्तिनिमित्तभूतक्रियाविष्टमर्थं वाच्यत्वेनाऽभ्युपगच्छन् एवम्भूतः । यथेन्दनमनुभवन् इन्द्रः ।**

एतन्मते सर्वेषां शब्दानां क्रियाशब्दत्वाद् व्युत्पत्तिनिमित्तक्रियैव प्रवृत्तिनिमित्तमित्यभिसन्धाय स्वप्रवृत्तिनिमित्तभूतेत्युक्तम् । अत्र **स्वप्रवृत्तिनिमित्तभूते**त्यादि लक्षणम्,

---

१. समानं प्रवृत्तिनिमित्तं येषां ते एकप्रवृत्तिकाः । घटशब्दस्य पृथुबुध्नोदरादिमत्पदार्थे प्रवृत्तेर्निमित्तं घटत्वम्, कुटस्य कुटत्वम्, कलसस्य कलसत्वम् । एवं सति तेषां प्रवृत्तिनिमित्तानामैक्यं कथम् ? इदमत्र विचारणीयम्-वस्तुतस्तु तत्र प्रवृत्तिनिमित्तं पृथुबुध्नोदरकम्बुग्रीवादिमत्त्वरूपस्वरूपमेव । तच्च कथं निर्देश्यम् ? शब्दान्तराभावाद् घटत्वादिशब्दैरेव तद् निर्देश्यं भवति । तच्चैकमेवेति ।

**एवम्भूत** इति लक्ष्यम् । **अभ्युपगच्छन्नि**त्यनन्तरम् अभिप्रायविशेष इति दृश्यम् । उदाहरति- **यथेति** । **इन्दनम्**=ऐश्वर्यम् ।

समभिरूढनयोऽपि व्युत्पत्तिभेदनिमित्तकसंज्ञाभेदतोऽर्थभेदमभ्युपगच्छति, एवम्भूतोऽपि तथेति किंकृतोऽनयोर्भेद इत्यपेक्षायामाह-

**समभिरूढनयो हीन्दनादिक्रियायां सत्यामसत्यां च वासवादेरर्थस्येन्द्रादिव्यपदेशमभिप्रैति—क्रियोपलक्षितसामान्यस्यैव प्रवृत्तिनिमित्तत्वात्-पशुविशेषस्य गमनक्रियायां सत्यामसत्यां च गोव्यपदेशवत्, तथारूढेः सद्भावात् । एवम्भूतः पुनरिन्दनादिक्रियापरिणतमर्थं तत्क्रियाकाले इन्द्रादिव्यपदेशभाजमभिमन्यते ।**

**समभिरूढनयो ही**ति । यदैश्वर्याद्यनुभवति वासवादिर्यदा च नाऽनुभवति, उभयकालेऽपि तत्रेन्दादिशब्दव्यपदेश्यत्वं समभिरूढनयो यतः स्वीकरोतीत्यर्थः । इन्दनादिक्रियाऽभावकाले व्युत्पत्तिनिमित्तभूताया इन्दनादिक्रियाया अभावात् कथं तत्रेन्द्रादिशब्दप्रवृत्तिरित्यपेक्षायामाह-**क्रियोपलक्षिते**ति । यदा कदाचिदिन्दनादिक्रियाया अधिकरणे वर्त्तमानं यद् वासवत्वादिलक्षणं सामान्यम्, तस्यैव इन्द्रादिशब्दप्रवृत्तौ निमित्तत्वेन, तस्येन्दनादिक्रियाशून्यकालेऽपि वासवादौ सत्त्वेन, तद्बलादिन्द्रादिव्यपदेशस्य सम्भवादित्यर्थः । दृश्यते च व्युत्पत्तिनिमित्तक्रियाया अभावदशायामपि तत्समानाधिकरणसामान्यविशेषलक्षणप्रवृत्तिनिमित्तबलात्[१] शब्दव्यपदेश्यत्वमिति नाऽदृष्टचरीयं कल्पनेत्याह-**पश्विति** । **पशुविशेषस्य**=गवात्मकपशोः । कथं तत्रापि गमनक्रियाविरहकाले गोशब्दव्यपदेश इत्याकाङ्क्षायामाह-**तथारूढे**रिति । गोशब्दस्य गोत्वावच्छिन्ने शक्तिरेव रूढिः, अवयवशक्तिर्योगः, समुदायशक्ती रूढिः, तस्याः सद्भावादित्यर्थः ।

इत्थं समभिरूढाभिमतमुपदर्श्य तत्त्वार्थे एवम्भूताभिमन्तव्यमुपदर्शयति-**एवम्भूत** इति । **तत्क्रियाकाले**=ऐश्वर्याद्यनुभवकाले एव । **अभिमन्यते**=स्वीकरोति । यदैव यन्नामव्युत्पत्तिनिमित्तक्रिया यत्र वर्तते तदैव तत्र तन्नाम्ना व्यपदेशो, नाऽन्यदाऽपीत्येवमेवम्भूतनयः स्वीकरोतीत्यर्थः ।

नन्वेवं व्युत्पत्तिनिमित्तक्रियाया एव प्रवृत्तिनिमित्तत्वाभ्युपगमे जातिशब्द-गुणशब्द-क्रियाशब्द-यादृच्छिकशब्द-द्रव्यशब्द इत्येवं पञ्चप्रकारत्वं नाम्नां भज्येत-सर्वेषां क्रियाशब्दत्वस्यैव प्राप्तेरिति चेद्; अत्रेष्टापत्तिरेवाऽस्माकमित्याह-

**न हि कश्चिदक्रियाशब्दोऽस्याऽस्ति । गौरश्व इत्यादिजातिशब्दाभिमतानामपि**

---

१. गच्छतीति गौरितिव्युत्पत्तिनिमित्तसमानाधिकरणकं प्रवृत्तिनिमित्तं सामान्यविशेषात्मकं गोत्वम् ।

**क्रियाशब्दत्वात्-गच्छतीति गौः, आशुगामित्वादश्व इति । शुक्लो नील इति गुण-शब्दाभिमता अपि क्रियाशब्दा एव-शुचीभवनात् शुक्लो, नीलनाद् नील इति । देवदत्तो, यज्ञदत्त इति यदृच्छाशब्दाभिमता अपि क्रियाशब्दा एव-देव एनं देयात्, यज्ञ एनं देयादिति । संयोगिद्रव्यशब्दाः समवायिद्रव्यशब्दाश्चाऽभिमताः क्रियाशब्दा एव-दण्डोऽस्याऽस्तीति दण्डी, विषाणमस्याऽस्तीति विषाणीत्यस्तिक्रियाप्रधानत्वात् । पञ्चतयी तु शब्दानां व्यवहारमात्रात्, न तु निश्चयादित्ययं नयः स्वीकुरुते ।**

**अक्रियाशब्दः**=क्रियाभिन्नशब्दः । **अस्य**=एवम्भूतनयस्य, मते इति शेषः । तत्र गोत्वाश्वत्वादिजातिप्रवृत्तिनिमित्तकत्वेन जातिशब्दतयाऽभिमतानां गवादिशब्दानां क्रिया-प्रवृत्तिनिमित्तकत्वेन क्रियाशब्दत्वं व्यवस्थापयति-**गौरश्व** इत्यादि ।

गुणप्रवृत्तिनिमित्तकत्वेन गुणशब्दत्वेनाऽभिमतानां शुक्लादिशब्दानां क्रियाप्रवृत्ति-निमित्तकत्वोपदर्शनेन क्रियाशब्दत्वमुपदर्शयति-**शुक्लो नील** इति ।

प्रतिनियततत्तच्छब्दवाच्यतालक्षणोपाधिविशिष्टवाच्यकत्वेन पुरुषविशेषसङ्केतितत्वेन वाच्यताशब्देन (सम्बन्धेन) देवदत्तादिशब्दविशिष्टे देवदत्तादिशब्दानां शक्तिरिति तत्तच्छब्द-[वाच्यता]लक्षणोपाधिप्रवृत्तिनिमित्तकतया यदृच्छाशब्दतयाऽभिमतानां देवदत्तादिशब्दानां व्युत्पत्तिनिमित्तक्रियाप्रवृत्तिनिमित्तकत्वोपदर्शनेन क्रियाशब्दत्वं सङ्गमयति-**देवदत्तो यज्ञदत्त** इति ।

संयोगसम्बन्धेन द्रव्यविशेषविशिष्टवाचकतयाऽभिमतः संयोगिद्रव्यशब्दः । समवाय-सम्बन्धेन द्रव्यविशेषविशिष्टवाचकतयाऽभिमतः समवायिद्रव्यशब्दः-इत्येवमुभयविधस्याऽपि द्रव्यशब्दस्य क्रियाविशेषप्रवृत्तिनिमित्तकत्वेन क्रियाशब्दत्वमुपपादयति-**संयोगीति** । 'दण्डिन्'-शब्दः-संयोगिद्रव्यशब्दः-दण्डपुरुषयोर्द्रव्ययोः संयोगसम्बन्धस्य भावात् । 'विषाणिन्' शब्दः-समवायिद्रव्यशब्दः-विषाणस्याऽवयवत्वेन गवादेश्चाऽवयवित्वेनाऽवयवावयविनोः समवाय-सम्बन्धस्य भावात् । यद्यप्यवयवी अवयवे वर्त्तते, न त्ववयवोऽवयविनि, एवं च विषाणे समवायेन गवादेः सत्त्वम्, न तु गवादौ विषाणस्य, तथापि [१]समवायेनाऽऽधेयत्वमपि समवाय एवेत्यभिप्रायः ।

जातिशब्दादिभेदेन शब्दे पञ्चविधत्वमननं च व्यवहारनयमाश्रित्य, ततश्च तत् कल्पितमेव, न तु वास्तविकमतेनाऽऽदरणीयमित्याह-**पञ्चतयी त्विति** । प्रवृत्तिरिति दृश्यम् ।

---

१. समवायसम्बन्धावच्छिन्न-आधेयतासम्बन्धोऽपि समवाय इत्युच्यते । अतो विषाणस्य समवायसम्बन्धा-वच्छिन्नाधेयतासम्बन्धेन गवि सत्त्वे, समवायेन विषाणी गौरित्यपि वक्तुं शक्यते एव ।

**पञ्चतयी**=पञ्चप्रकारा जात्यादिप्रवृत्तिनिमित्तमाश्रित्य शब्दानां प्रवृत्तिः व्यवहारमात्रमाश्रित्य, यथा-पन्था गच्छति, कुण्डिका स्रवति, अयो दहतीत्युपचारत [1]एव, न तु वस्तुस्थितिमनुरुध्य, तथेयमपीति । यदि यथावस्थितवस्तुस्वरूपग्राहिनिश्चयनयादियं स्यात्, तदाऽभ्युपगमपथं गच्छेदपि, न चैवमित्याह-**न तु निश्चयादितीति** । **अयं नयः**=एवम्भूतनयः ।

अर्थनय-शब्दनयभेदेन नयविभागमुपदिशति-

**एतेष्वाद्याः चत्वारः प्राधान्येनाऽर्थगोचरत्वादर्थनयाः, अन्त्यास्तु त्रयः प्राधान्येन शब्दगोचरत्वात् शब्दनयाः ।**

**आद्याः चत्वारः**=नैगमसङ्ग्रहव्यवहारर्जुसूत्राः । **प्राधान्येनेति** । प्राधान्येन=सामान्येन सामान्यं विशेषं वाऽर्थमाश्रित्यैव वस्तुस्वरूपं परिच्छिन्दन्तो नयविशेषस्वरूपतां प्रतिपद्यन्ते । सामान्यमात्रविषयकत्वात् सङ्ग्रहः, विभिन्नसामान्यविशेषोभयविषयकत्वाद् नैगमः, उत्तरोत्तर-विशेषविषयकत्वाद् व्यवहारः, क्षणिकविशेषरूपार्थविषयकत्वाद् ऋजुसूत्र इति सामान्यविशेषो-भयात्मकस्याऽर्थस्यैव सामान्यांशं विशेषांशं वा प्राधान्येन गोचरयन्त्येते नया इत्यर्थनया उच्यन्ते इत्यर्थः ।

**अन्त्यास्तु त्रयः**=शब्दसमभिरूढैवम्भूताख्याः त्रयो नयाः । **प्राधान्येनेति** । एते नयाः शब्दस्य वैलक्षण्येनाऽर्थवैलक्षण्यमुशन्ति=अर्थान् शब्दवशे स्थापयन्ति, यतः कालकार-कलिङ्गादिभेदः शब्दगत एव, व्युत्पत्तिभेदोऽपि शब्दस्यैव, ततोऽर्थभेदमुररीकुर्वन्तः शब्दाद्याः त्रयो नयाः प्रधानभावेन शब्दविषयकत्वात् शब्दनया इत्यर्थः ।

अर्पितनयानर्पितनयाभ्यां नयस्य द्वैविध्यमुपदर्शयति-

**तथा विशेषग्राहिणोऽर्पितनयाः, सामान्यग्राहिणः चाऽनर्पितनयाः ।**

**विशेषग्राहिण** इति । अर्प्यते=विशेष्यते इत्यर्पितो विशेषः, तद्ग्राहिणः । सामान्य-विशेषात्मकवस्तुनि उक्तेषु नयेषु ये **विशेषग्राहिण** तेऽर्पितनयाः कथ्यन्ते इत्यर्थः । **सामान्य-**

---

**'तथा विशेषग्राहिणः'**—"अर्प्यते विशेष्यते इत्यर्पितो विशेषः तद्वादी नयः अर्पितनयः समयप्रसिद्धो ज्ञेयः । तन्मतं विशेष एवास्ति न सामान्यम् । अनर्पितमविशेषितं सामान्यमुच्यते तद्वादी नयः अनर्पितनयः । सोऽपि समयप्रसिद्ध एव बोद्धव्यः । तन्मतं तु सामान्यमेवास्ति न विशेषः ।"—विशेषा० बृ० गा० ३५८८ ।

---

१. अशेषाणां सांव्यवहारिकप्रत्यक्षाणां मनःसाहाय्योत्पन्नत्वेऽपि यथा व्यवहारतः किञ्चिच्चाक्षुषम्, किञ्चित्स्पार्शनमित्यादि पृथग्व्यपदेशमश्नुते, तथैवाऽशेषाणां शब्दानां क्रियाप्रवृत्तिनिमित्तकत्वेऽपि व्यवहारतो जातिप्रवृत्तिनिमितकत्वादिव्यपदेशः ।

**ग्राहिण** इति । अनर्पितविशेषितं सामान्यम्, तद्ग्राहिणः । ये पुनः सामान्यमेव प्राधान्येन गृह्णन्ति, ते नया **अनर्पितनया** इति व्यपदिश्यन्ते । एतेन सामान्यमात्रग्राही सङ्ग्रहोऽनर्पितनयः । नैगमश्च सामान्यांशं गृह्णन् अनर्पितनयः, विशेषमवगाहमानः चाऽर्पितनयः, व्यवहाराद्यास्तु विशेषमात्रग्राहिणोऽर्पितनया एवेति । अथवाऽर्पितानर्पितनयौ समयप्रसिद्धावेवाऽवगन्तव्याविति विवेकः ।

तद्विभजनफलमुपदर्शयति-

**तत्राऽनर्पितनयमते तुल्यमेव रूपं सर्वेषां सिद्धानां भगवताम् । अर्पितनयमते त्वेकद्वित्र्यादिसमयसिद्धाः स्वसमानसमयसिद्धैरेव तुल्या इति ।**

**तत्र**=अर्पितानर्पितनययोर्मध्ये । **तुल्यमेवेति** । विशेषो यतो न गृह्णाति नयोऽनर्पितः, ततः तन्मते सिद्धत्वं साधारणो धर्मः सर्वेषामविशिष्टमिति तुल्यरूपत्वमित्यर्थः । विशेषग्राह्यर्पितनयमते तु यावन्त एकसमयसिद्धा भगवन्तः, तेषामेकसमयसिद्धत्वं यद्यपि सामान्यम्, तथापि तद् द्विसमयादिसिद्धेषु न वर्तते इति भवति विशेषः । तेन तुल्यतैकसमयसिद्धानामेव भगवताम्, तदभावादेव द्विसमयादिसिद्धैः सह न तुल्यता । यावन्तश्च द्विसमयसिद्धा भगवन्तः, तेषां द्विसमयसिद्धत्वलक्षणेनैकसमयादिसिद्धव्यावृत्तेन धर्मेण तुल्यता, न तु स्वासमानसमयसिद्धैः समं तुल्यत्वम् । एवं त्रिसमयादिसिद्धेष्वपि बोध्यम् ।

व्यवहारनय-निश्चयनयाभ्यामपि नयस्य द्वैविध्यम् । तत्र व्यवहारनयमुपदर्शयति-

**तथा, लोकप्रसिद्धार्थानुवादपरो व्यवहारनयः, यथा-पञ्चस्वपि वर्णेषु भ्रमरे सत्सु श्यामो भ्रमर इति व्यपदेशः ।**

व्यवहारनयमुदाहरति-**यथेति** । भ्रमरे पञ्चाऽपि वर्णाः शास्त्रे प्रतिपादिताः, तथापि लोका भ्रमरं श्याममेव व्यपदिशन्ति, तदनुसरणपरेण व्यवहारनयेनाऽपि 'श्यामो भ्रमर' इत्येव व्यपदिश्यते इत्यर्थः ।

निश्चयनयं प्ररूपयति-

**तात्त्विकार्थाभ्युपगमपरस्तु निश्चयः । स पुनर्मन्यते 'पञ्चवर्णो भ्रमरः'-बादरस्कन्धत्वेन[1] तच्छरीरस्य पञ्चवर्णपुद्गलैर्निष्पन्नत्वात्, शुक्लादीनां च न्यग्भूतत्वेना-**

---

**'तथा लोकप्रसिद्धार्था०'**—विशेषा० गा० ३५८९ ।

---

१. चाक्षुषादिप्रत्यक्षयोग्यः स्थूलः पुद्गलसमूहो 'बादरस्कन्ध' इत्युच्यते । बादरस्कन्धेऽवश्यं पञ्च वर्णा भवन्ति-इति जैनसिद्धान्तः ।

ऽनुपलक्षणात् ।

**तात्त्विकार्थे**ति । शास्त्रे सिद्धान्तित एवाऽर्थः तात्त्विको भवति । तात्त्विकमर्थमेव यः स्वीकरोति स नयो निश्चयनय इत्यर्थः । **स पुनः**=निश्चयः पुनः । पुनः शब्दोऽयं त्वर्थे, तेन व्यवहारनयादस्य वैशिष्ट्यं प्रतिपाद्यते । तदेव वैशिष्ट्यमाह-**मन्यते** इत्यादिना । पञ्चवर्णो भ्रमर इत्यभ्युपगच्छति निश्चयनय इत्यर्थः । कथमस्य पञ्चवर्णत्वं येन श्रद्दधीमहि तद्व्यपदेशकस्य निश्चयनयस्य तात्त्विकार्थाभ्युपगमपरत्वमित्याकाङ्क्षायामाह-**बादरे**ति । **तच्छरीरस्य**=भ्रमर-शरीरस्य । यदि पञ्चवर्णो भ्रमरः, तर्हि शुक्लरूपादिकमपि श्यामरूपवदेतच्छरीरे उपलभ्येत, नोपलभ्यते चैतावता श्यामवर्णत्वमेव किमिति न कल्प्यते इत्यत आह-**शुक्लादीनां चे**ति । सन्त्येव तत्र शुक्लादीनि, परं श्यामरूपेण न्यग्भूतानि=तिरोभूतानि तानि, एतावताऽ**नुप-लक्षणात्**=प्रत्यक्षेऽभासनात् । न त्वनुपलम्भमात्रेणाऽसत्त्वमेव तेषां-बादरस्कन्धत्वेन तत्र तेषां सद्भावस्य प्रमितत्वात् । तिरोभवनप्रभावितानुपलम्भतोऽप्यसत्त्वे दिवा सूर्यकरावमर्शाभिभूत-त्वाद् नक्षत्राणामप्यसत्त्वं स्यादित्यर्थः ।

व्यवहारनिश्चयनययोः स्वरूपनिरूपणे प्रकारान्तरमाविष्करोति-

**अथवा एकनयमतार्थग्राही व्यवहारः, सर्वनयमतार्थग्राही च निश्चयः**[1] **।**

अथवेत्यादिनैव चाऽयं प्रकारो **विशेषावश्यके** उपदर्शितः । तत्पाठो यथा-"अथवा यत्किमप्येकैकस्य नयस्य मतम्, तद् व्यवहारः प्रतिपद्यते, नाऽन्यत् । कुतः ? यस्मात् सर्वथा सर्वैरपि प्रकारैर्विशिष्टं सर्वनयमतसमूहमयं वस्त्वसौ प्रतिपत्तुं न शक्नोति-स्थूलदर्शित्वादिति । विनिश्चयस्तु=निश्चयनयो यद् यथाभूतं परमार्थतो वस्तु तत् तथैव प्रतिपद्यते । (वि० बृ० गा० ३५९०) इति ।

निश्चयनयस्य सर्वमतार्थग्राहित्वे प्रमाणत्वं प्रसज्येतेत्याशङ्क्य प्रतिक्षिपति-

**न चैवं निश्चयस्य प्रमाणत्वेन नयत्वव्याघातः-सर्वनयमतस्याऽपि स्वार्थस्य तेन प्राधान्याभ्युपगमात् ।**

य एव [सर्वनयमतोऽपि] स्वाभिमतोऽपि यदि, तदा तं प्राधान्येनाऽयमुरीकरोति, यश्च

---

'अथवा एकनय'—अत्र रत्नप्रभायामुद्धृतः 'अथवा यत्०' इति भाष्यपाठः समस्ति ।

---

१. इत्थमप्यस्य सङ्गतिः कर्तुं शक्यते-भावनिक्षेपस्य सकलनयमान्यत्वाद्, निश्चयनयस्य च भावमात्रग्राहित्वात् सकलनयमतार्थग्राहित्वम् । व्यवहारस्य तु न तथा-तस्य नामादेरपि ग्राहकत्वात्, शब्दनयैर्नामादीनामन-भ्युपगमादिति ।

स्वार्थो नाऽस्य, स सर्वनयमतोऽपि नैतन्नयाभ्युपगमविषय इति न प्रमाणत्वमस्येत्याह-**सर्वेति**। **स्वार्थस्य**=स्वाभिमतार्थस्य, **तेन**=निश्चयनयेन ।

एवं ज्ञाननय-क्रियानयभेदेनाऽपि नयस्य द्वैविध्याद् ज्ञाननयस्वरूपमाह-

**तथा ज्ञानमात्रप्राधान्याभ्युपगमपरा ज्ञाननयाः ।**

मुक्तौ प्राधान्येन ज्ञानमेव कारणमित्यभ्युपगमपरा अभिप्रायविशेषा ज्ञाननया इत्यर्थः । ज्ञाननयत्वेनाऽभिमता नैगमसङ्ग्रहव्यवहाराः त्रय इति तेषां बहुत्वाद् बहुवचननिर्देशः ।

क्रियानयस्य स्वरूपमाह-

**क्रियामात्रप्राधान्याभ्युपगमपराश्च क्रियानयाः ।**

मुक्तिं प्रति प्राधान्येन क्रियाया एव कारणत्वमित्यभ्युपगमपरा अभिप्रायविशेषाः क्रियानया इत्यर्थः । अत्रापि क्रियानयत्वेनाऽभिमतानामृजुसूत्रशब्दसमभिरूढैवम्भूतानां चतुर्णां बहुत्वाद् बहुवचननिर्देशः ।

ये ज्ञाननयत्वेनाऽभिमताः तेषां मते क्रियाया अपि कारणत्वाभ्युपगमोऽस्त्येव, तथापि प्राधान्येन ज्ञानस्यैव-'ऋते ज्ञानाद् न मुक्ति'रित्यस्य प्राधान्येनाऽवलम्बनात् । 'न ह्येकचक्रो हि रथः प्रयाती'त्यतः सहकारितया विशुद्धक्रियाचरणतो मनसो विशुद्धिभावेन ततः सम्यग्ज्ञानोदयादिति पृथग्भावेन (पृथग्भावे न ?) कारणत्वम् । अज्ञानाद् बन्ध इत्यज्ञाननिवृत्तिरूपा मुक्तिः । ये च क्रियाप्रधानवादिनः तेषामपि मुक्तौ ज्ञानं कारणम्, परं प्रधानं कारणं क्रियैव । अमुकस्माद् भेषजादमुकव्याधेरुपशान्तिरिति जानतोऽपि रोगिणो विधित औषधस्याऽसेवने रोगनिवृत्तेरभावादिति क्रियाया एव प्रधानतेति बोध्यम् ।

**तत्रर्जुसूत्रादयः चत्वारो नयाः चारित्रलक्षणायाः क्रियाया एव प्राधान्यमभ्युपगच्छन्ति-तस्या एव मोक्षं प्रत्यव्यवहितकारणत्वात् ।**

**तत्र**=ज्ञाननयक्रियानययोर्मध्ये । **ऋजुसूत्रादय** इत्यत्राऽऽदिपदेन शब्दादिनयानां ग्रहणम्। क्रियायाः प्राधान्ये निमित्तमाह-**तस्या** इति । तस्याः=क्रियायाः ।

**नैगमसङ्ग्रहव्यवहारास्तु यद्यपि चारित्रश्रुतसम्यक्त्वानां त्रयाणामपि मोक्षकारणत्वमिच्छन्ति, तथापि व्यस्तानामेव, न तु समस्तानाम् । एतन्मते ज्ञानादित्रयादेव मोक्ष**

---

**'तथा, ज्ञानमात्र०'**—विशेषा० बृ० गा० ३५९२ । नयोपदेश का० १२९-१३८ ।

**'तत्रर्जुसूत्रा०'**—विशेषा० गा० २६२१-२६३२ ।

**'स्थितपक्षत्वात्'**—अत्रायं भावः-स्थितपक्षः सिद्धान्तपक्ष इति गीयते । तथा च सिद्धान्त-

**इत्यनियमात्, अन्यथा नयत्वहानिप्रसङ्गात्, समुदयवादस्य स्थितपक्षत्वादिति द्रष्टव्यम् ।**

**चारित्रेति** । चारित्रलक्षणक्रियायाः, श्रुतपदेन ज्ञानस्य, सम्यक्त्वपदेन सम्यग्दर्शनस्य प्रतिपादनम् । ननु 'सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्ग' इति **तत्त्वार्थसूत्र**तः सम्यग्ज्ञान-दर्शनचारित्राणां त्रयाणां मोक्षकारणत्वं **जैनराद्धान्तानुमतम्**, तच्च नैगमादयो नया अपि मन्यन्ते इति तेषां प्रमाणत्वं भवेत्, कुतो ज्ञाननयत्वमित्यपेक्षायामाह-**तथापीति** । **तथापि**=त्रयाणां मोक्षकारणत्वमभ्युपगच्छन्तोऽपि, **व्यस्तानामेव**=मोक्षत्वावच्छिन्नकार्यतानिरूपितकारणता-वच्छेदकविभिन्नधर्माकलितानामेव । एवं सत्येव ज्ञानस्य प्राधान्येन कारणत्वम्, तदन्ययोश्च गौणतयेत्युपगमः तेषां युज्यते, समुदितानां कारणत्वे तु सर्वेषां प्राधान्यमेव स्यादित्याह-**न तु [१]समस्तानामिति** ।

उक्तसूत्रे च मोक्षमार्ग इत्येकवचनस्यैकत्वमर्थं विवक्षितम्-अन्यथा विशेषणवाचक-पदस्य विशेष्यवाचकपदोत्तरविभक्ति-तात्पर्यविषयसङ्ख्या-विरुद्धसङ्ख्याविवक्षाविषय-त्वाभाववद्-विभक्तिकत्वतः[२] समानवचनत्वस्यैव नियमेन मोक्षमार्गा इति बहुवचनान्तत्वं प्रसज्येतेति मोक्षमार्गत्वं=मोक्षं प्रति कारणत्वम्, तत्र तद् एकत्वमन्वेति । एवञ्च त्रयाणां मोक्षं प्रत्येककारणत्वं सूत्रोपदिष्टं तदा स्याद्, यदि समुदितानामेव कारणत्वं भवेदिति समुदित-कारणत्वाभ्युपगमे सत्येव प्रमाणत्वम्, तच्च तेषां नाऽस्तीति ।

कुतो न नैगमादयः समस्तानां कारणत्वमिच्छन्तीत्यपेक्षायामाह-**एतन्मते** इति ।

---

पक्षे ज्ञानादित्रयादेव मोक्ष इति नियमात् ज्ञानदित्रयपर्याप्तैव मोक्षनिरूपितकारणता शिक्षाऽभ्यास-प्रतिभात्रयपर्याप्ता काव्यकारणतेव पर्यवस्यति, न तु तृणारणिमणिवत् प्रत्येकज्ञानादिविश्रान्ता ।

नैगमादिनयानां मते पुनः मोक्षनिरूपितकारणतायाः प्रत्येकं ज्ञानादिषु, वह्निकारणतायाः प्रत्येकं तृणारणिमणिष्विव विश्रान्ततया न तेषां स्थितपक्षत्वं सम्यग्दृष्टित्वं वा । अयमेव हि नयवादसिद्धान्तवादयोर्भेदो यन्नयाः त्रीनपि ज्ञानादीन् मोक्षकारणत्वेन मन्यमाना अपि प्रत्येकस्मिन् स्वातन्त्र्येणैव कारणत्वं कल्पयन्तस्त्रीनपि पृथक् पृथक् मोक्षकारणत्वेन स्थापयन्ति । तन्मते हि ज्ञानमात्रसेविनाम्, दर्शनमात्रसेविनाम्, चारित्रमात्रसेविनां च तुल्यतया मोक्षाधिकारात् । सिद्धान्तवादस्तु न कुतोऽपि ज्ञानादेरेकैकस्मात् मोक्षलाभमिच्छति किंतु परस्परसहकारिभावापन्नात् तत्त्रयादेव । अत एव व्यस्तकारणतावादी नयः समस्तकारणतावादी च सिद्धान्त इत्यप्यभिधातुं शक्यम् । अत्रार्थे विशेषा० २६३२ गाथाऽनुसन्धेया ।

---

१. मोक्षतावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकीभूतैकधर्माकलितानामित्यर्थः ।

२. यथा 'नीलो घटः' इत्यत्र विशेष्यवाचकपदं 'घटः', तदुत्तरविभक्तिः 'सि', तत्तात्पर्यविषयसङ्ख्या 'एकत्वम्', तद्विरुद्धसङ्ख्या 'द्व्यादि', तद्विवक्षाविषयत्वाभाववद्विभक्तिः 'सि', तत्कत्वं 'नीलः' इत्यस्मिन् ।

एतन्मते=नैगमादिमते । **एवकारेण** ज्ञानादेरेकैकस्य व्यवच्छेदः । **अन्यथा**='ज्ञानादित्रयादेव मोक्ष' इति नियमाभ्युपगमे । **समुदयवादस्य**=समुदितैर्ज्ञानादिभिः त्रिभिर्मुक्तिर्न तु व्यस्तैरिति वादस्य, **स्थितपक्षत्वात्**=प्रमाणवादत्वात् ।

सम्यग्ज्ञान-सम्यग्दर्शन-सम्यक्चारित्ररूपरत्नत्रयादेव मोक्ष इति सिद्धान्तपक्षे **जैनीये** । यथा-

'शक्तिर्निपुणता लोककाव्यशास्त्राद्यवेक्षणात् ।
काव्यज्ञशिक्षयाऽभ्यास, इति हेतुस्तदुद्भवे ॥' इति-

वचनाद् हेतुरित्यत्रैकवचनविवक्षितहेतुत्वगतैकत्वतः शक्तिनिपुणताभ्यासानां त्रयाणां समुदितानां काव्यं प्रत्येकमेव कारणत्वं पर्याप्तम्, तथोक्तरत्नत्रयाणां समुदितानामेकमेव मोक्षं प्रति हेतुत्वं पर्याप्तम् ।

नैगमादिनयप्रसूत**नैयायिका**दिमते तु वह्निगतवैजात्यत्रयं प्रकल्प्य, विजातीयवह्निं प्रति तृणं कारणम्, विजातीयवह्निं प्रत्यरणिः कारणम्, विजातीयवह्निं प्रति मणिः कारणमिति वह्निं प्रति तृणारणिमणीनां कारणतात्रयम्, तथा मोक्षगतवैजात्याभावेऽपि सम्यग्ज्ञानाव्यवहितोत्तर-जायमानमोक्षं प्रति सम्यग्ज्ञानं कारणमित्यादिरीत्या कारणत्रयम् । तत्र योऽभिप्रायविशेषो नैगमाद्यभिप्रायावान्तरवैलक्षण्यवान् ज्ञानस्य मोक्षं प्रति कारणत्वमङ्गीकरोति तदपेक्षया नैगमादि-नयानां ज्ञाननयत्वमित्येवं नयवादस्य स्थितपक्षात् सिद्धान्तवादात् प्रमाणमूर्द्धाभिषिक्ताद् भेद इति ।

## नयविषयाणामल्पबहुत्वम्

नयानां मध्ये यस्य नयस्य यन्नयापेक्षया बहुविषयत्वं यन्नयापेक्षया चाऽल्पविषयत्वं तदुपदर्शयितुं तत्र प्रतिपाद्यजिज्ञासामाह-

**कः पुनरत्र बहुविषयो नयः को वाऽल्पविषयः ? इति चेद्,**

**अत्र**=नयानां मध्ये ।

उत्तरयति-

**उच्यते-सन्मात्रगोचरात् सङ्ग्रहाद् नैगमो तावद् बहुविषयो भावाभावभूमिक-त्वात् ।**

**सन्मात्रगोचराद्**=महासामान्यसन्मात्रविषयकात् । **तावदिति** वाक्यालङ्कारे । **भावः**[१]=

१. यथा घटस्य भावो घटत्वम्, तथा सतो भावः सत्तेत्येवंरूपेण तस्य सत्तार्थवर्णनम् ।

सत्ता सामान्यसत्तापेक्षया, **अभावः**[१]=तद्भिन्नो विशेषः, यदपि द्रव्यत्वादिसामान्यं सत्तापेक्षया विशेषो भवत्येवेति । सङ्ग्रहस्य सन्मात्रविषयकत्वेनाऽल्पविषयकत्वम्, तदपेक्षया नैगमस्य सामान्यविशेषोभयविषयकत्वेन बहुविषयकत्वमित्यर्थः ।

व्यवहारापेक्षया सङ्ग्रहस्य बहुविषयकत्वम्, तदपेक्षया व्यवहारस्य चाऽल्पविषयकत्वमिति दर्शयति-

**सद्विशेषप्रकाशकाद् व्यवहारतः सङ्ग्रहः समस्तसत्समूहोपदर्शकत्वाद् बहुविषयः ।**

यद्यपि सङ्ग्रहः सन्मात्रमेव विषयीकरोति, तथापि सन्मात्रे जगदेव प्रविष्टमिति तस्य व्यवहारापेक्षया बहुविषयकत्वमित्यभिसन्धानेनोक्तम्-**समस्तेत्यादि** ।

ऋजुसूत्रापेक्षया व्यवहारस्य बहुविषयत्वम्, तदपेक्षया च ऋजुसूत्रस्याऽल्पविषयत्वमिति दर्शयति-

**वर्त्तमानविषयावलम्बिन ऋजुसूत्रात् कालत्रितयवर्त्त्यर्थजातावलम्बी व्यवहारो बहुविषयः ।**

साम्प्रतनयापेक्षया ऋजुसूत्रस्य बहुविषयत्वम्, तदपेक्षया साम्प्रतस्याऽल्पविषयत्वं च दर्शयति-

**कालादिभेदेन भिन्नार्थोपदेशकाद् शब्दाद् तद्विपरीतवेदक ऋजुसूत्रो बहुविषयः ।**

**तद्विपरीतवेदकः**=कालकारकादिभेदेऽप्यभिन्नार्थप्रदर्शकः ।

प्रकारान्तरेणाऽपि शब्दर्जुसूत्रयोरल्पबहुविषयत्वे दर्शयति-

**न केवलं कालादिभेदेनैवर्जुसूत्रादल्पार्थता शब्दस्य, किन्तु भावघटस्याऽपि सद्भावासद्भावादिनाऽर्पितस्य 'स्याद् घटः, स्यादघट' इत्यादिभङ्गपरिकरितस्य तेनाऽभ्युपगमात् तस्यर्जुसूत्राद् विशेषिततरत्वोपदेशात् ।**[२]

एतत्स्वरूपप्ररूपको **विशेषावश्यक**ग्रन्थो यथा-"अथवा प्रत्युत्पन्नऋजुसूत्रस्या-

---

'किंतु भावघटस्यापि०' अत्र रत्नप्रभायामुद्धृतः 'अथवा प्रत्युत्पन्न०'इति भाष्यपाठः समस्ति ।

---

१. यथा न शुक्लः=अशुक्लः=श्यामः, तथैवाऽत्र न सत्ता=न भावः=अभावः=विशेषः ।

२. शब्दो भावनिक्षेपमेवाऽभ्युपगच्छति, ऋजुसूत्रस्तु सर्वनिक्षेपानित्येवमपि शब्दाद् बहुविषयत्वं तस्य क्षमाश्रमणमते। तदुक्तं-भावं चिय सद्दणया, सेसा इच्छंति सव्वणिक्खेवे ॥

ऽविशेषित एव सामान्येन कुम्भोऽभिप्रेतः, शब्दनयस्य तु स एव सद्भावादिभिः विशेषिततरोऽभिमतः इत्येवमनयोर्भेदः । तथाहि-स्वपर्यायैः परपर्यायैरुभयपर्यायैश्च सद्भावेनाऽसद्भावेनोभयेन चाऽऽर्पितो विशेषतः कुम्भः कुम्भाकुम्भावक्तव्योभयरूपादिभेदो भवति, सप्तभङ्गं प्रतिपद्यते इत्यर्थः । तदेवं स्याद्वाददृष्टं सप्तभेदं घटादिकमर्थं यथाविवक्षमेकेन केनापि भङ्गेन विशेषिततरमसौ शब्दनयः प्रतिपद्यते-नयत्वाद् ऋजुसूत्राद् विशेषिततरवस्तुग्राहित्वाच्च । स्याद्वादिनस्तु सम्पूर्णसप्तभङ्ग्यात्मकमपि प्रतिपद्यन्ते ।'' (विशेषा० बृ० गा० २२३१-२) इति ।

**इत्यादिपदात्** 'स्याद्घटः स्यादघटश्च, स्यादवक्तव्य' इत्यादिभङ्गानां परिग्रहः । **तेन**=शब्दनयेन, **तस्य**=शब्दनयस्य । **उपदेशादिति** ।

''इच्छइ विसेसियतरं, पच्चुप्पन्ननओ सद्दो ।'' इति **निर्युक्तिवचनेन**,

''तं चिय रिजुसुत्तमयं, पच्चुप्पन्नं विसेसियतरं सो ।
इच्छइ भावघडं चिय जं न उ नामादिए तिन्नि ॥'' (वि० गा० २२२८) इति **भाष्यवचनेन**,

''विशेषिततरः शब्दो, भावमात्राभिमानतः ।
सप्तभङ्ग्येषणालिङ्गभेदादेरर्थभेदतः ॥'' इत्यादिवचनेन च शब्दनयस्य ऋजुसूत्राद् विशेषिततरत्वस्य प्रतिपादनात् । उपदर्शितवचने 'विशेषिततरः शब्द' इति स्थाने 'ऋजुसूत्राद् विशेषोऽस्य' इत्यपि पाठ उक्तार्थक एव ।

नन्वेवं सप्तभङ्ग्युपगमे साम्प्रतस्य स्याद्वादित्वमेव स्याद्, न तु नयत्वं-सम्पूर्णार्थोपदर्शकत्वेन तदेकदेशमात्रोपदर्शकत्वाभावादित्यत आह-

**यद्यपीदृशसम्पूर्णसप्तभङ्गपरिकरितं वस्तु स्याद्वादिन एव सङ्गिरन्ते, तथापि ऋजुसूत्रकृतैतदभ्युपगमापेक्षयाऽन्यतरभङ्गेन विशेषितप्रतिपत्तिरत्राऽदुष्टेत्यदोष[१] इति वदन्ति ।**

**एतदभ्युपगमेति** । घटाद्यभ्युपगम इत्यर्थः । **अत्र**=शब्दनये । **वदन्तीति विशेषावश्यककारादय** इति दृश्यम्, तद्ग्रन्थपाठस्तु दर्शित एवेति ।

समभिरूढापेक्षया शब्दस्य बहुविषयत्वम्, तदपेक्षया शब्दस्याऽल्पविषयत्वं च दर्शयति-

---

१. वृक्षसमुदायस्य वनस्वरूपत्वे प्रत्येकं वृक्षस्य वृक्षत्वं यथा न नश्यति, तथा सप्तभङ्गसमुदायस्य प्रमाणवाक्यत्वेऽपि प्रत्येकं भङ्गस्य नयवाक्यत्वं न विनश्यतीति भावः । प्रत्येकं भङ्गेऽपि ऋजुसूत्राभ्युपगतार्थापेक्षया विशेषिततरत्वमित्यदोषः ।

**प्रतिपर्यायशब्दमर्थभेदमभीप्सतः समभिरूढात् शब्दः तद्विपर्ययानुयायित्वाद् बहुविषयः ।**

**तद्विपर्ययानुयायित्वात्**=पर्यायभेदेऽप्यर्थाभेदविषयकाभिप्रायत्वात् । पर्यायशब्दभेदेनाऽर्थभेदमभ्युपगच्छतः समभिरूढनयात् पर्यायशब्दभेदेऽप्यर्थाभेदमभ्युपगच्छन् शब्दनयो बहुविषयक इत्यर्थः ।

एवम्भूतात् समभिरूढस्य बहुविषयत्वं तस्मादेवम्भूतस्याऽल्पविषयत्वं च दर्शयति-

**प्रतिक्रियं विभिन्नमर्थं प्रतिजानानादेवम्भूतात् समभिरूढः तदन्यथार्थस्थापकत्वाद् बहुविषयः ।**

यदा यच्छब्दव्युत्पत्तिनिमित्तक्रिया वर्तते तदैव तच्छब्दवाच्यः सोऽर्थः, अर्थात् तत्क्रियाविरहकाले तच्छब्दार्थः स न भवतीत्येवमुररीकुर्वाणादेवम्भूतनयाद्, यदा कदापि व्युत्पत्तिनिमित्तक्रियाभावे=तादृशक्रियाविरहकालेऽपि तादृशक्रियोपलक्षितसामान्यविशेष[1]-लक्षणप्रवृत्तिनिमित्तबलात् तच्छब्दवाच्यः सम्भवत्येवमभ्युपगच्छन् समभिरूढनयो बहुविषय इत्यर्थः ।

एतावता नैगमादिसप्तनयेषु पूर्वपूर्वनयापेक्षयोत्तरोत्तरनयस्याऽल्पविषयत्वमुत्तरोत्तरनयापेक्षया पूर्वपूर्वनयस्य बहुविषयत्वमावेदितम् ।

प्रमाणविचारावसरे दर्शितायाः सप्तभङ्ग्याः प्रतिभङ्गं सकलादेशत्वं विकलादेशत्वं च भावितमेव । तत्र सकलादेशस्वभावायाः तस्याः सम्पूर्णार्थप्ररूपकत्वात् प्रमाणवाक्यत्वमिति 'तदिदमागमप्रमाण'मित्यादिग्रन्थेन (पृ० १७९) प्रतिपादितमेव । परं विकलादेशस्वभावा सप्तभङ्गी न परिपूर्णार्थप्रापिकेति न प्रमाणवाक्यं भवितुमर्हति । तर्हि किं सेत्यपेक्षायामाह-

**नयवाक्यमपि स्वविषये प्रवर्त्तमानं विधिप्रतिषेधाभ्यां सप्तभङ्गीमनुगच्छति । विकलादेशत्वात् परमेतद्वाक्यस्य प्रमाणवाक्याद् विशेष इति द्रष्टव्यम् ।**

**अपिना**-यथा प्रमाणवाक्यं स्वार्थमभिदधानं सप्तभङ्गीमनुगच्छति तथेत्यर्थस्य सूचनम् । तर्हि नयवाक्यमपि सप्तभङ्ग्यनुगमनतः प्रमाणवाक्यमेव भवेदित्यत आह-**विकलेति** । **परं**=किन्तु, **एतद्वाक्यस्य**=नयवाक्यस्य, **विकलादेशत्वाद्**=सप्तभङ्गानुगमनेऽपि विकलादेशत्वस्यैव भावात्, **प्रमाणवाक्यात्**=सप्तभङ्ग्यनुगामिप्रमाणवाक्याद्, **विशेषः**=भेदः ।

---

**'नयवाक्यमपि'**—तत्त्वार्थश्लोक० १. ३३. ९१-९५. स्या० र० ७. ५३.

---

१. घटत्वादि ।

## नयाभासनिरूपणम्

नयाभासान् निरूपयति-

**अथ नयाभासाः । तत्र द्रव्यमात्रग्राही पर्यायप्रतिक्षेपी द्रव्यार्थिकाभासः । पर्यायमात्रग्राही द्रव्यप्रतिक्षेपी पर्यायार्थिकाभासः ।**

**अथे**ति । नयनिरूपणानन्तरं प्रसङ्गसङ्गत्या नयाभासा निरूप्यन्ते इत्यर्थः । **तत्र**= नयाभासेषु मध्ये । यथा सन्नयस्य सामान्यतो द्रव्यार्थिकपर्यायार्थिकाभ्यां द्वैविध्यं तथा नयाभासस्याऽपि द्रव्यार्थिकाभास-पर्यायार्थिकाभासाभ्यां द्वैविध्यम् । तत्र द्रव्यार्थिकाभासं लक्षयति-**द्रव्यमात्रे**ति । प्राधान्येन द्रव्यमात्रग्राहित्वं सद्द्रव्यार्थिकनयेऽपीति तत्राऽतिव्याप्ति-वारणाय-**पर्यायप्रतिक्षेपी**ति । पर्यायार्थिकाभासं लक्षयति-**पर्यायमात्रे**ति । सत्पर्यायार्थिकेऽति-व्याप्तिवारणाय-**द्रव्यप्रतिक्षेपी**ति ।

तत्र द्रव्यार्थिकाभासः त्रिविधः-नैगमाभास-सङ्ग्रहाभास-व्यवहाराभासभेदात् । तत्र नैगमाभासं प्ररूपयति-

**धर्मिधर्मादीनामैकान्तेन पार्थक्याभिसन्धिर्नैगमाभासः, यथा नैयायिकवैशेषिक-दर्शनम् ।**

धर्मिणोरेकान्तेन भेदावगाहनप्रवणोऽभिप्रायविशेषः, धर्मयोरेकान्तेन भेदावग्राह्यध्य-वसायविशेषः, धर्मधर्मिणोरेकान्तेन भेदसमर्थनपरोऽध्यवसायश्च नैगमाभास इत्यर्थः । कुण्डला-ङ्गदे अत्यन्तभिन्ने इति प्रथमः, सामान्यविशेषौ विभिन्नावेव धर्मौ इति द्वितीयः, अवयवा-वयविनौ, गुणगुणिनौ, क्रियाक्रियावन्तौ, जातिव्यक्ती, नित्यद्रव्यविशेषावत्यन्तभिन्नौ एवेत्याद्या अभिप्रायविशेषाः तृतीय इत्यर्थः ।

नैगमाभासमुदाहरति-**यथे**ति । तत्र **नैयायिक**दर्शने 'प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्त-सिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वाधिगमाद् निःश्रेयासाधिगम' इति**गौतमसूत्र**दर्शिताः षोडशपदार्थाः । **वैशेषिक**दर्शने द्रव्यगुणकर्म-सामान्यविशेषसमवायाः षड् भावा अभावश्चेति सप्तपदार्थाः । तत्र द्रव्याणि पृथिवीजलतेजो-वाय्वाकाशकालदिगात्ममनांसि नवैव । गुणा रूपरसगन्धस्पर्शसङ्ख्यापरिमाणपृथक्त्व-संयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मगुरुत्वद्रवत्वस्नेहसंस्कारशब्दाः चतुर्विंशतिरेव । कर्माणि उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्चैव । परमपरं चेति द्विविधं सामान्यम् । नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव । समवायस्त्वेक एव । अभावस्तु प्रागभाव-प्रध्वंसाभावान्योन्याभावात्यन्ताभावभेदेन चतुर्धा इति सर्वेऽप्येते परस्परमत्यन्तभिन्ना एवोपगता

इति **नैयायिकवैशेषिक**दर्शनं नैगमाभास इत्यर्थः ।

श्री**सिद्धसेनसूरि**मते नैगमः सङ्ग्रहव्यवहारयोरन्तर्भूत इति तदाभासोऽपि तदाभासयोरेवाऽन्तर्भूतः ।

नैके गमा इति नैगमा इति व्युत्पत्त्याश्रयणाद् नैगमनयस्य बहुविधत्वमिति तदाभासस्याऽपि बहुविधत्वमिति । तद्यथा-कश्चिद् वादी पुरुष एवेदं सर्वमित्युपगच्छति, कश्चित् पुरुषस्याऽपि एकत्वमनेकत्वं चाऽभ्युपगच्छति । एवं कर्तृत्वाकर्तृत्वा-ऽसर्वगतसर्वगतत्व-मूर्त्तत्वादिवादाः पुरुषमाश्रित्य विभिन्नो बहवो नैगमाभासाः । तथा जगदाश्रित्य सेश्वरत्वा-नीश्वरत्व-प्रधानकारणत्व-परमाणुप्रभवत्व-स्ववृत्तकर्मसापेक्षत्वतदभाव-स्वभावकृतत्व-कालकृतत्व-नियतिप्रभवत्वाः परस्परनिरपेक्षनिरूपणप्रवणा नैगमाभासा इति द्रष्टव्यम् ।

सङ्ग्रहाभासं निरूपयति-

**सत्ताऽद्वैतं स्वीकुर्वाणः सकलविशेषान् निराचक्षाणः सङ्ग्रहाभासः । यथा-ऽखिलान्यद्वैतवादिदर्शनानि साङ्ख्यदर्शनं च ।**

सकलं वस्तु सदात्मकमेव, विशेषाः केऽपि न सन्त्येव-इत्येवमभ्युपगच्छन् अभिप्राय-विशेषः सङ्ग्रहाभास इत्यर्थः । सत्ताऽद्वैतमुपलक्षणं ज्ञानाद्वैतशब्दाद्वैतानामपि । सङ्ग्रहाभासोऽपि परसङ्ग्रहाभासापरसङ्ग्रहाभासभेदेन द्विविधः । तयोः क्रमेणोदाहरणमाह-**यथे**ति ।

तत्र-सच्चिदानन्दस्वरूपं ब्रह्मैव परमार्थसत्, तद्भिन्नं जगद् मिथ्यैवेत्येकान्तब्रह्माद्वैत-वादि **वेदान्तदर्शनं** सङ्ग्रहाभासः । तन्मतेऽद्वितीयं सच्चिदानन्दस्वरूपं ब्रह्मैव वस्तु । आविद्यकं जगद् मिथ्यैव । अविद्या च अज्ञानमिति मायेति च गीयते । सत्त्वरजस्तमोगुणात्मिका च सा ज्ञानविरोधिनी भावात्मिका च । सा पुनः ब्रह्माश्रिता ब्रह्मविषयिणी चेत्येकं मतम् । यदुक्तं **संक्षेपशारीरके-**

"आश्रयत्वविषयत्वभागिनी, निर्विभागचितिरेव केवला ।
पूर्वसिद्धतमसो हि पश्चिमो, नाऽऽश्रयो भवति नाऽपि गोचरः ॥
बहु निगद्य किमत्र वदाम्यहं, शृणुत सङ्ग्रहमद्वयशासने ।
सकलवाङ्मनसाऽतिगता चितिः, सकलवाङ्मनसां व्यवहारभाक् ॥" इति ।

जीवाश्रिता ब्रह्मविषयिणी अविद्येत्यपरं मतम् ।

तस्याश्चाऽऽवरणशक्तिर्विक्षेपशक्तिश्चेति शक्तिद्वयम् । तत्राऽऽवरणशक्तिर्द्विधा-असत्त्वा-पादकाभानापादकभेदात् । तत्र सदपि ब्रह्माऽऽसत्त्वापादिकया शक्त्याऽविद्ययाऽऽवृतं सद्

'अस्ती'त्येवमपि यद् न ज्ञायते तद् आद्यकृतम्, सा च शक्तिः परोक्षज्ञानेन नश्यति-ब्रह्मणः परोक्षज्ञाने सति 'अस्ति ब्रह्मे'ति प्रतिभासात्। परोक्षज्ञानेन ज्ञायमानमपि ब्रह्म यत् स्पष्टं न भाति तद् अभानापादकशक्तिकृत्यम्, यद्वशादनुमानादिना ज्ञातं तु ब्रह्म, तत् कीदृगिति स्फुटं न प्रतिभातीति। विक्षेपशक्तिः सर्जनशक्तिः, यद्वशादसदपि जगद् ब्रह्मणि कल्पितं भवति।

तत्र ब्रह्मविवर्त्ताधिष्ठानमिति ब्रह्मविवर्त्तं जगद्। विवर्त्तो नाम विषमसत्ताककार्यापत्तिः। ब्रह्मणः सत्ता पारमार्थिकी-त्रिकालाबाध्यत्वाद् ब्रह्मणः। जगतस्तु सत्ता व्यावहारिकी-ब्रह्मसाक्षात्कारात् पूर्वमेव व्यवहारकाले तद् न बाध्यते इति। तत एवं ब्रह्मज्ञानातिरिक्तज्ञानाबाध्यत्वाद् व्यावहारिकस्य घटादेः प्रतिभासकालाबाध्यत्वेन प्रातिभासिकसतः शुक्तिरजतादेर्भेदः-तस्य व्यवहारकाले एव ब्रह्मज्ञानातिरिक्तेन 'नेदं रजत'मिति ज्ञानेन बाधात्। एतेन **वेदान्तदर्शने** त्रिविधा सत्ता व्याख्याता-पारमार्थिकी, व्यावहारिकी, प्रातिभासिकी चेति। यद् यथा न भवति, तत् तथाऽवभासते इति विवर्त्तः पर्यवसितः। तेन ब्रह्मैव जगद्रूपेणाऽवभासते, न तु तद्व्यतिरिक्तं किमपि वस्तु समस्तीति।

अविद्यायास्तु परिणामरूपं जगत्-परिणामो नाम कारणसमसत्ताककार्यापत्तिः, अविद्याजगतोर्द्वयोरपि व्यावहारिकत्वात्। अत एव ब्रह्मसाक्षात्कारानन्तरमविद्यालक्षणोपादानेन सहैव जगतो निवृत्तिरित्येवं दिशा **ब्रह्माद्वैतवादः** पल्लवितः।

तदेतन्मतं यथा न सम्भवति तथा **श्रीहेमचन्द्रसूरि**प्रभृतिभिर्दर्शितम्। उक्तं च **श्रीहेमचन्द्रसूरिभिः**-

"माया सती चेद् द्वयतत्त्वसिद्धिरथाऽसती हन्त ! कुतः प्रपञ्चः ?।
मायैव चेदर्थसहा च तत् किं, माता च वन्ध्या च भवत्परेषाम् ? ॥" इति।

एवमेकान्तशब्दाद्वैतज्ञानाद्वैतादिवादा अपि परसङ्ग्रहाभासतयाऽवसेयाः।

**साङ्ख्यदर्शने** पुनः महदादिविकृतिव्रातजनकाशेषशक्तिसमन्वितात् प्रधानादेव मूलप्रकृतेः कार्यभेदा जायन्ते। सर्वेषां च प्रकृतिलक्षणकारणात्मकत्वमिति प्रकृत्यात्मना सर्वेषां सङ्ग्रहात् सङ्ग्रहाभासत्वमस्य।

प्रकृतिः=सत्त्वरजस्तमसां साम्यावस्था। ततो महत्तत्त्वं बुद्ध्यपरनामकमाविर्भवति। सत्कार्यवादत्वादेतद्दर्शने पूर्वमसत आद्यक्षणसम्बन्धलक्षणोत्पत्तिर्न कस्याऽपि, किन्तु कारणात्मनाऽवस्थितस्य सामग्र्या आविर्भाव एव। ध्वंसोऽप्येतन्मते तिरोभाव एव, न तु सर्वथा विनाशः। महत्तत्त्वाच्चाऽहङ्कारः, तस्माच्च पञ्च शब्दस्पर्शरूपरसगन्धात्मकानि तन्मात्राणि, श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि पञ्च ज्ञानेन्द्रियाणि, वाक्पाणिपादपायूपस्थानि पञ्च कर्मेन्द्रियाणि,

उभयात्मकं मन इत्येवमेकादशेन्द्रियाणि च जायन्ते । पञ्चभ्यः तन्मात्रेभ्यश्च शब्दादाकाशः, स्पर्शाद् वायुः, रूपात् तेजः, रसादापः, गन्धात् पृथिवीत्येवं पञ्चभूतानि जायन्ते । तदुक्त-**मीश्वरकृष्णेन**-

"प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद् गणश्च षोडशकः ।
तस्मादपि षोडशकात्, पञ्चभ्यः पञ्च भूतानि ॥" इति ।

पुरुषश्च प्रकृतिविकृतिभिन्नः । तदुक्तम्-

"मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकस्तु विकारो, न प्रकृतिर्नाऽपि विकृतिः पुरुषः ॥" इति ।

उक्तपञ्चविंशतितत्त्वज्ञानाच्च मुक्तिरेतद्दर्शने । तदुक्तम्-

"पञ्चविंशतितत्त्वज्ञो, यत्र कुत्राऽऽश्रमे रतः ।
जटी मुण्डी शिखी वाऽपि, मुच्यते नाऽत्र संशयः ॥" इति ।

असत्कार्यवादो नाऽनेनाऽभ्युपगतः ।

"असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात् ।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम् ॥" इत्यनया कारिकयोपदर्शिताद् हेतुकदम्बकात् सत्कार्यव्यवस्थानमित्यादिदिशा **साङ्ख्य**मतस्य प्रक्रियाऽवसेया ।

प्रकृतिविकृतिभावेन तत्त्वानां विभजनाद् व्यवहारनयाभासेऽपि **साङ्ख्य**दर्शनस्य प्रवेशमभिमन्यन्ते सूरयः ।

एतद्मतमपि मिथ्यात्वादेवाऽऽभासो ज्ञेयः । मिथ्यात्वं च विचारासहत्वात् । महदादीनां प्रधानात्मकत्वे–प्रधानस्वरूपं यथा प्रधानादव्यतिरिक्तं न प्रधानकार्यं तथा–कार्यत्वं न स्यात्[1] कार्यकारणयोर्भिन्नलक्षणत्वात् । अत एव सर्वथा कार्यकारणयोरभेदमभ्युपगच्छन् **साङ्ख्यो**ऽन्येनोपहस्यते-

"यदेव दधि तत्क्षीरं, यत्क्षीरं तद् दधीति च ।
वदता विन्ध्यवासित्वं, ख्यापितं **विन्ध्यवासिना** ॥"
इत्येवंदिशा विचारासहत्वमस्य भावनीयम् ।

व्यवहाराभासं निरूपयति-

**अपारमार्थिकद्रव्यपर्यायविभागाभिप्रायो व्यवहाराभासः ।**

---

१. यद् यस्य स्वरूपं भवति, तत्तस्य कार्यं न भवति–यथा घटस्वरूपं न घटकार्यम् ।

उदाहरति-

**यथा चार्वाकदर्शनम् । चार्वाको हि प्रमाणप्रतिपन्नं जीवद्रव्यपर्यायादिविभागं कल्पनारोपितत्वेनाऽपह्नुते, अविचारितरमणीयं भूतचतुष्टयप्रविभागमात्रं तु स्थूललोकव्यवहारानुयायितया समर्थयते इति ।**

तत्राऽपारमार्थिकद्रव्यपर्यायविभागाभिप्रायत्वमुपपादयति-**चार्वाको** हीति । हि=यतः । **चार्वाकः**=प्रत्यक्षैकप्रमाणाभ्युपगन्ता भूतचैतन्यवादी **लोकायतिकः** । प्रमाणप्रतिपन्नं= प्रत्यक्षादिप्रमाणसिद्धम् । 'अहं सुखी, अहं दुःखी'त्यादि प्रत्यक्षमेव तावद् देहादिव्यतिरिक्तात्मद्रव्यलक्षणविषयमन्तरेण नोपपद्यते । अन्धकारादौ शरीरेण बाह्येन सहाऽऽलोकादिसापेक्षचक्षुरिन्द्रियस्य स्वविषयग्राहकस्य सन्निकर्षलक्षणव्यापाराभावेऽपि उपजायमानस्य 'अहं सुखी'त्यादि प्रत्यक्षस्य चाक्षुषत्वासम्भवाद्, मानसस्य तस्य बहिरिन्द्रियसहकारेण जायमानस्य बहिर्देहादिविषयकत्वासम्भवेऽन्तर्व्यवस्थितात्मविषयकत्वमेवाऽभ्युपगन्तव्यमित्येवंदिशा-प्रत्यक्षप्रमाणसिद्धत्वमस्त्येवाऽऽत्मनः ।

अथापि तत्र प्रत्यक्षप्रमाणविषयत्वे विप्रतिपद्यते सः, तथापि इन्द्रियं-सकर्तृकं-करणत्वाद्-वास्यादिवदित्याद्यनुमानप्रमाणसिद्धत्वं भवत्येवाऽऽत्मनः । चेतनं कर्ता भवति, शरीरं च न चेतनम्, तस्य चैतन्ये बाल्ये विलोकितस्य स्थाविरे स्मरणं न स्यात्-

"नाऽन्यदृष्टं स्मरत्यन्यो, नैकं भूतभवत्क्रमात् ।
वासनासङ्क्रमो नाऽस्ति, न च गत्यन्तरं स्थिरे ॥" इति वचनतः तथाव्यवस्थापितत्वात् । यतः उपचयापचयलक्षणविरुद्धधर्माध्यासेन न बालवृद्धाद्यवस्थशरीरयोरैक्यम् । भेदे चाऽन्यदृष्टस्याऽन्येन स्मरणं न भवतीति नियमेन बाल्यशरीरेणाऽन्येन दृष्टस्य स्थाविरशरीरेणाऽन्येन स्मरणासम्भवः । बाल्यशरीरगतसंस्कारलक्षणवासनागुणस्य स्थविरशरीरे गमनमपि वक्तुमनर्हं-द्रव्यमात्रवृत्तेः कर्मणो गुणेऽभावात् । पूर्वशरीरस्योत्तरशरीरं प्रति कारणत्वेन कारणगतवासनायाः कार्ये सङ्क्रमाभ्युपगमे वा मातृगतवासनाया अपि पुत्रे सङ्क्रमतो मात्रनुभूतस्याऽपि पुत्रेण स्मरणं स्यात् । क्षणभङ्गपक्षस्तु न सम्भवत्येव, येन शरीरसन्ताने पूर्वपूर्वशरीरेणाऽविरलक्रमेणोत्तरोत्तरविशिष्टशरीरोत्पत्तितो यत् स्मरणकुर्वद्रूपात्मकं शरीरं भवति तेन स्मरणं जायते इति कल्पनाऽपि स्यात् । उक्तदिशेन्द्रियाणामपि चैतन्यं न सम्भवति, तत्रापि चक्षुषा दृष्टस्य चक्षुर्विनाशे यत् स्मरणं भवति, तन्न भवेदिति बालाद्यवस्थानुगतस्याऽऽत्मन एव चैतन्यात् कर्तृत्वम् ।

एवं प्रवृत्तिं प्रति सामान्यत एवेष्टसाधनताज्ञानस्य कारणतया सद्योजातस्य बालस्य

स्तनपानप्रवृत्तिरपीष्टसाधनताज्ञानत एव । तदानीं च न तस्य तदनुभव इति तत्स्मरणं वाच्यम् । तच्च पूर्वानुभवजनितवासनाप्रभवमिति पूर्वजन्मनि तेनाऽनुभूतं दुग्धपानेष्टसाधनत्वमिदानीं स्मर्यते इत्येवं जन्मपरम्परानुगतानादिवासनाप्रवाहाकलितैकात्माऽनुमानप्रमाणसिद्धः ।

प्रत्यक्षेऽपि प्रामाण्यसिद्धिर्न स्वतः, किन्तु 'इदं-प्रमाणं-संवादिप्रवृत्तिजनकत्वा'दि-त्याद्यनुमानत एवेति प्रत्यक्षप्रमाणमभ्युपगच्छन् चार्वाकः कथमनुमानप्रमाणं नाऽभ्युपगच्छेदिति ।

एवं शब्दोऽपि प्रमाणं तेन कक्षीकरणीयमेव, अन्यथा-पृथिव्यादिचतुष्टयमेव तत्त्वम्, प्रत्यक्षमेव प्रमाणम्, स्वर्गजनको धर्मो नरकजनकोऽधर्म इत्यादिप्रवादो मिथ्यैव, न कोऽपि परलोकादागतो येन श्रद्दधीमहि तद्वचनादस्ति परलोक इति,

"यावज्जीवेत्, सुखं जीवेद्, ऋणं कृत्वा घृतं पिबेत् ।
भस्मीभूतस्य देहस्य, पुनरागमनं कुतः ॥
एतावानेव लोकोऽयं, यावानिन्द्रियगोचरः ।
भद्रे ! वृकपदं पश्य, यद् वदन्त्यबहुश्रुताः ॥"

इत्यादि स्वसिद्धान्तोद्गारोऽपि परप्रतिपत्त्यर्थं तस्य न भवेत् । आगमे चाऽऽत्मा प्रतिपादित एवेति शब्दप्रमाणसिद्धत्वमपि तस्येत्येवं जीवस्य प्रमाणप्रतिपन्नत्वे तद्रूपद्रव्य-पर्यायादिविभागोऽपि प्रमाणप्रतिपन्न इत्यर्थः ।

**जीवद्रव्येति** । उपयोगलक्षणो जीवो, गुणपर्यायवत्त्वाद् द्रव्यम्, तस्य देवमनुष्यादयः पर्यायाः, ज्ञानलक्षणस्य चोपयोगस्य मतिज्ञानादयः पर्यायाः । आदिपदाद् धर्मास्तिकायो गतिलक्षणो द्रव्यम्, तस्य गतिपरिणामतोन्मुखजीवादिगत्युपष्टम्भन[1]रूपतया परिणमनं पर्याय इत्यादेरुपग्रह इति वास्तविकम्, **प्रविभागं**=विभजनम्, **कल्पनारोपितत्वेन**=कल्पना=असद्वि-कल्पः, तत्राऽऽरोपितः=तत्रैव विषयतया व्यवस्थितः, न तु प्रमाणविषयोऽपीति कल्पनारोपितः, तत्त्वेन=कल्पनारोपितत्वेन काल्पनिकत्वाभ्युपगमेनेति यावत्, **अपह्नुते**=अपलपति ।

**अविचारितरमणीय**मिति । यावद् विचारारूढं न भवति, तावदेव सुन्दरम्, सम्यग्-विचार्यमाणे तु विशीर्यैतैवेतीदृशम्, **भूतचतुष्टयप्रविभागमात्रं**=पृथिवीजलतेजोवायुस्वरूपमेव तत्त्वम् । **स्थूलेति** । बाह्यप्रत्यक्षगोचरो यो लोकानां=पामरादिसाधारणलोकानाम्, न तु परीक्ष-काणां, व्यवहारः=मम शरीरे सुखं दुःखम्, अहं गौरः श्यामः काणः कुब्ज इत्यादिः, तदनु-यायितया=तदनुगामित्वेन, समर्थयते=व्यवस्थापयतीति ।

---

१. गतिसहायकेत्यर्थः ।

पर्यायार्थिकभासश्च ऋजुसूत्राभास-शब्दाभास-समभिरूढाभासै-वम्भूताभासभेदेन चतुर्धा। तत्र ऋजुसूत्राभासं निरूपयति–

**वर्त्तमानपर्यायाभ्युपगन्ता सर्वथा द्रव्यापलापी ऋजुसूत्राभासः।**

वर्तमानपर्यायाभ्युपगन्तृत्वं सतोऽपि ऋजुसूत्रनयस्येति तत्राऽतिव्याप्तिवारणाय **सर्वथा द्रव्यापलापीति**। सन्नयस्तु द्रव्यं नाऽपलपति, किन्तु तत्र गजनिमीलिकामवलम्बते। एवमपि प्राधान्येन द्रव्यानभ्युपगमात् तद्रूपेण द्रव्यापलापी सोऽपि भवत्येवेत्यत उक्तं-**सर्वथेति**। गौणतया द्रव्याभ्युपगन्तरि तत्र सर्वप्रकारेण द्रव्यानभ्युपगन्तृत्वलक्षणं सर्वथा द्रव्यापलापित्वं न।

कस्येति उदाहरति-

**यथा ताथागतं मतम्।**

**ताथागतं=बौद्धम्**। तन्नये हि सर्वं वस्तु क्षणिकम्। तत्र वर्त्तमानमात्रग्राहि प्रत्यक्षं प्रमाणम्। पूर्वापरक्षणसम्बन्धं स्वाविषयत्वादगृह्णता स्वविषयं मध्यमक्षणसत्त्वं गृह्णता च प्रत्यक्षेण क्षणमात्रस्थायित्वमेव वस्तूनां सिद्धिपद्धतिमेति। यद्यपि सदृशापरापरक्षणोत्पत्तिदोषाद् अन्त्य-क्षणादर्शिनाम् 'इदं क्षणिक'मितिनिश्चयात्मकसविकल्पप्रत्यक्षं न भवति, तथापि क्षणक्षयिस्व-लक्षणात्मकवस्तुविषयकं निर्विकल्पप्रत्यक्षं वस्तुबलसमुद्भूतं क्षणिकतायां प्रमाणं स्यादेव।

तेन च निर्विकल्पप्रत्यक्षेण-'क्षणिकोऽय'मिति व्यवहारः, 'नाऽयं क्षणिक' इति विपर्ययस्य निरासश्च-न भवतीत्युक्तव्यवहृतये उक्तविपर्ययनिरासाय च 'यत् सत्-तत् क्षणिकं-यथा जलधरः-सच्च शब्दादी'त्यनुमानं प्रवर्तते। सत्त्वं चाऽत्र लिङ्गमर्थक्रियाकारित्वम्, तच्च नित्यात् स्वव्यापकक्रमयौगपद्यव्यावृत्त्या व्यावृत्तं क्षणिकत्वेन नियतमिति भवति सत्त्वात् क्षणिकत्वानुमानम्।

अत एव नित्यस्य द्रव्यरूपस्याऽभावात् क्षणिकालयविज्ञानसन्तानमेवाऽऽत्मस्थाने **सौगते**नाऽभ्युपगम्यते। 'अह'मिति ज्ञानमालयविज्ञानम्। 'अयं घटोऽयं पट' इत्यादिज्ञानं प्रवृत्तिविज्ञानम्। सुषुप्तावप्यालयविज्ञानधाराऽनुवर्त्तते, तत एव च सुप्तोत्थितस्य प्रथमं प्रवृत्तिविज्ञानं जायते, ततश्चोत्तरप्रवृत्तिविज्ञानमित्येवं क्रमेण प्रवृत्तिविज्ञानधाराप्रवृत्तिः। स्वप्रकाशरूपत्वं च ज्ञाने चेतनत्वम्। स्थिरात्मदर्शनं च तन्मते बन्धकारणम्, नैरात्म्यदर्शनं च मुक्तिकारणम्। रागादिक्लेशविनिर्मुक्तं चित्तमेव मुक्तिः। तदुक्तम्-

"चित्तमेव हि संसारो, रागादिक्लेशवासितम्।
तदेव तैर्विनिर्मुक्तं, भवान्तमिति कथ्यते॥" इत्येवंदिशा पल्लवितं **तथागतमत**मेकान्त-पर्यायमात्रस्य द्रव्यं विनाकृतस्य मिथ्यात्वात्, तत्प्ररूपकत्वेन भवति ऋजुसूत्राभास इत्यर्थः।

यथा च नैगमाभासे **नैयायिका**दिदर्शने एकान्तनित्यतयाऽभ्युपगते वस्तुनि स्वव्यापकक्रमयौगपद्यनिवृत्त्याऽर्थक्रियाकारित्वलक्षणसत्त्वस्य निवृत्तिः[1], तथा ऋजुसूत्राभासे **बौद्ध**दर्शनेऽपि एकान्तक्षणिकतयाऽभिमते पदार्थे स्वव्यापकक्रमयौगपद्यनिवृत्त्या निवृत्तैवाऽर्थक्रियाकारितेति नैकान्तक्षणिकत्वेन सह सत्त्वस्याऽविनाभाव इति न तत एकान्तक्षणिकानुमानसम्भव इति नाऽनुमानं क्षणिकत्वे प्रमाणम् ।

'यत्रैव जनयेदेनां, तत्रैवाऽस्य प्रमाणते'ति वचनात् स्वानुरूपविकल्पजननद्वारैव निर्विकल्पप्रत्यक्षस्य प्रामाण्यं **बौद्धै**रेषितव्यम्, अन्यथा दानादिचित्तगतस्वर्गप्रापणशक्त्यादेरपि स्वसंवेदननिर्विकल्पप्रत्यक्षतः सिद्धिसम्भवात् तत्साधनार्थमनुमानप्रणयनं **बौद्ध**स्य विफलमेव प्रसज्येत । न च क्षणिकत्वे विकल्पात्मकप्रत्यक्षमिति तन्निर्विकल्पकं न तत्र प्रमाणमिति प्रत्यक्षादपि न क्षणिकतैकान्तसिद्धिः ।

प्रत्यभिज्ञा च सङ्कलनात्मकज्ञानलक्षणपरोक्षप्रमाणतया पूर्वमुपपादिता । पूर्वापरकालीनव्यक्त्यैक्यावगाहित्वेन स्थैर्यसाधकप्रत्यभिज्ञा बाधते चैकान्तक्षणिकत्वम् । लूनपुनर्जातकेशनखादिप्रत्यभिज्ञानस्य दीपकलिकैक्यावगाहिप्रत्यभिज्ञानस्य च बाधितविषयकत्वेनाऽप्रामाण्येऽपि, न तद्दृष्टान्तेन प्रत्यभिज्ञामात्रस्यैवाऽप्रामाण्यम्, तथा सति कस्यचिद् द्विचन्द्रादिप्रत्यक्षस्याऽप्रामाण्ये तज्जातीयतया प्रमाणत्वेनाऽभिमतप्रत्यक्षस्याऽप्यप्रामाण्यं प्रसज्येतेत्यतोऽपि न क्षणिकत्वम् ।

बन्धमोक्षसामानाधिकरण्यमपि तन्मते नोपपद्यते । न च सन्तानापेक्षया तदिति युक्तम्, सन्तानस्याऽपि क्षणिकत्वात् । अक्षणिकत्वे क्षणभङ्गैकान्तत्यागस्याऽऽवश्यकत्वेनाऽऽत्मैव बन्धमोक्षाधिकरणमस्तु, किं सन्तानकल्पनया ? आत्मन एव सन्तान इति नामकरणे पर्यवसितं विवादेन-स्थिरात्मद्रव्यस्य स्वहस्तितत्वात् । आत्मव्यतिरिक्तस्तु सन्तानः तन्मते न सम्भवत्यपि-निरन्वयविनष्टस्य पूर्वपूर्वविज्ञानक्षणादेरुत्तरोत्तरविज्ञानक्षणं प्रत्युपादानत्वासम्भवात् । अथैवमप्युपादानत्वे चैत्रविज्ञानक्षणं यथा पूर्ववर्त्ति तथा मैत्रादिसन्तानान्तर्वर्त्तिविज्ञानक्षणमपि पूर्ववर्त्तीति पूर्ववर्त्तित्वाविशेषादन्यस्य कस्यचिद् विशेषस्योपदर्शयितुमशक्यत्वात् चैत्रविज्ञानसन्तानान्तर्वर्तिपूर्वविज्ञानमिव मैत्रादिविज्ञानसन्तानान्तर्वर्तिविज्ञानमप्युत्तरक्षणे जायमानचैत्रविज्ञानं प्रत्युपादानं स्यादिति चैत्रमैत्रादिविज्ञानसन्तानानां सङ्कीर्णता स्यादित्यादिदिशा विचारपदवीमानीतस्य **बौद्ध**मतस्याऽप्यनुपपद्यमानत्वाद् **न्याया**दिदर्शनमिव तद्दर्शनमपि मिथ्यैवेति ।

साम्प्रताभासापरपर्यायं शब्दाभासं निरूपयति-

---

१. द्रष्टव्योऽयं वादः स्याद्वादमञ्जर्यामन्ययोगव्यवच्छेदद्वात्रिंशिकास्थपञ्चमश्लोकविवरणे ।

**कालादिभेदेनाऽर्थभेदमेवाऽभ्युपगच्छन् शब्दाभासः । यथा-बभूव भवति भविष्यति सुमेरुरित्यादयः शब्दा-भिन्नमेवाऽर्थमभिदधति-भिन्नकालशब्दत्वात्-तादृक्सिद्धान्यशब्दवदिति ।**

**अर्थभेदमेवे**त्येवकारेणाऽर्थाभेदं सर्वथाऽनभ्युपगच्छतीत्यर्थो लभ्यते, तेन गौणतयाऽर्थाभेदमभ्युपगच्छति सति शब्दनयेऽतिव्याप्तेर्वारणम् । **यथे**ति । बभूव सुमेरुः, भवति सुमेरुः, भविष्यति सुमेरुरित्येवमन्वयो बोध्यः । **कालादी**त्यत्राऽऽदिपदेन लिङ्गादीनां ग्रहणादत्राप्यादिपदेन-तटः तटी, करोति क्रियते कुम्भः, दाराः कलत्रमित्यादेरुपग्रहः । **शब्दा** इत्यन्तं पक्षनिर्देशः, **भिन्नमेवाऽर्थमभिदधती**ति साध्यनिर्देशः, **भिन्नकालशब्दत्वा**दिति हेतुनिर्देशः । इदं च भिन्नलिङ्गशब्दत्वादेरुपलक्षणम् । **तादृक्सिद्धे**ति । भिन्नार्थतया भिन्नकालशब्दतयोभयसम्प्रतिपन्नेत्यर्थः ।

समभिरूढनयाभासं निरूपयति-

**पर्यायध्वनीनामभिधेयनानात्वमेव कक्षीकुर्वाणः समभिरूढाभासः । यथा-इन्द्रः शक्रः पुरन्दर इत्यादयः शब्दा-भिन्नाभिधेया एव-भिन्नशब्दत्वात्-करिकुरङ्गशब्दवदिति ।**

**अभिधेयनानात्व**मेवेत्येवकारोपादानप्रयोजनं सत्समभिरूढनयेऽतिव्याप्तिवारणम् । उदाहरति-**यथे**ति । **शब्दा** इत्यन्तं पक्षनिर्देशः, **भिन्नाभिधेया एवे**ति साध्यम्, **भिन्नशब्दत्वा**दिति हेतुः, **करिकुरङ्गशब्दव**दिति दृष्टान्तवचनम् ।

एवम्भूतनयाभासं निरूपयति-

**क्रियानाविष्टं वस्तु शब्दवाच्यतया प्रतिक्षिपन् एवम्भूताभासः । यथा-विशिष्टचेष्टाशून्यं घटाख्यं वस्तु-न घटशब्दवाच्यं-घटशब्दप्रवृत्तिनिमित्तभूतक्रियाशून्यत्वात्-पटवदिति ।**

एतावता क्रियाविष्टमेव वस्तु शब्दवाच्यतयाऽभ्युपैतीत्यायातमेव । **क्रियानाविष्टं**=व्युत्पत्तिनिमित्तक्रियाशून्यम् । व्युत्पत्तिनिमित्तक्रियैव चाऽत्र प्रवृत्तिनिमित्तमिति सन्नयनिरूपणावसरे दर्शितमेव । उदाहरति-**यथे**ति । **विशिष्टे**त्यादि पक्षः, **न घटशब्दवाच्य**मिति साध्यम्, **घटशब्दप्रवृत्तिनिमित्तक्रियाशून्यत्वा**दिति हेतुः, **पटव**दिति निदर्शनम् ।

यावन्तः सन्तोऽर्थनयादयः पूर्वं निरूपिताः, तावन्तोऽर्थनयाभासादयोऽपि भवन्ति । तेषां क्रमेण स्वरूपाण्युपदर्शयति-

**अर्थाभिधायी शब्दप्रतिक्षेपी अर्थनयाभासः । शब्दाभिधाय्यर्थप्रतिक्षेपी शब्द-**

**नयाभासः । अर्पितमभिदधानोऽनर्पितं प्रतिक्षिपन् अर्पितनयाभासः । अनर्पितमभिदधदर्पितं प्रतिक्षिपन् अनर्पितनयाभासः । लोकव्यवहारमभ्युपगम्य तत्त्वप्रतिक्षेपी व्यवहाराभासः । तत्त्वमभ्युपगम्य व्यवहारप्रतिक्षेपी निश्चयाभासः । ज्ञानमभ्युपगम्य क्रियाप्रतिक्षेपी ज्ञाननयाभासः । क्रियामभ्युपगम्य ज्ञानप्रतिक्षेपी क्रियानयाभास इति ।**

व्यक्तं सर्वम् । इति नयाभासनिरूपणम् ।

सन्नये नयाभासे च निरूपिते भेदान्तराभावाद् नयनिरूपणं परिपूर्णम् ।

●●●

## निक्षेपपरिच्छेदः

नयनिरूपणानन्तरमवसरसङ्गत्या निक्षेपनिरूपणं प्रतिजानीते—

**नया निरूपिताः । अथ निक्षेपा निरूप्यन्ते ।**

प्रतिबन्धकविनिवृत्तावश्यवक्तव्यत्वमवसरसङ्गतिः । प्रमाणनयनिक्षेपैरित्यनेन प्रमाण-नयनिक्षेपा उद्दिष्टाः । तत्र प्रमाणानन्तरं नय उद्दिष्टो, नयानन्तरं निक्षेप उद्दिष्ट इति 'यथोद्देशं निर्देश' इति प्रमाणनिरूपणानन्तरं नयस्यैव जिज्ञासा समुल्लसति । यावद् नया न निरूपिता भवन्ति तावद् नयजिज्ञासा न शाम्यतीति साऽन्यनिरूपणप्रतिबन्धिका । नये च निरूपिते तादृशजिज्ञासाया उपशान्तौ तदनन्तरोपदिष्टे निक्षेपे जिज्ञासोपतिष्ठते इति तदुपशान्तये निक्षेपस्याऽवश्यवक्त-व्यत्वमायातीति प्रतिबन्धजिज्ञासानिवृत्त्यवबोधनायोक्तं-**नया निरूपिता** इति ।

निवर्त्तनीयतया निक्षेपनिरूपणाङ्ग[1]निक्षेपजिज्ञासासौलभ्यावेदनायोक्तम्-**अथेति** । नय-निरूपणानन्तरमिति तदर्थः । एतावतोत्तरकालीनकर्त्तव्यत्वप्रकारकज्ञानानुकूलव्यापार[विशे-ष्यक]लक्षणप्रतिज्ञाघटकोत्तरकालीनत्वमावेदितम् । [2]निरूप्यन्ते इत्यत्र कर्माख्यातस्य कृति-विषयत्वलक्षणकर्मत्वमर्थः । कृतौ च ज्ञानानुकूलव्यापाररूपस्य निरूपणधात्वर्थस्याऽनुकूलत्व-सम्बन्धेनाऽन्वयः । कृतिविषयत्वं च निक्षेपेषु न साक्षात्, किन्तु स्वप्रयोज्यव्यापारप्रयोज्य-ज्ञानविषयत्वद्वारैव । तदिदं विषयत्वमुद्देश्यत्वाख्यविषयत्वमुच्यते । तत्रापि मुख्यमुद्देश्यं ज्ञानमेव, तद्विषयत्वाद् निक्षेपेषूद्देश्यत्वमिति । व्यापारे तु कृतिसाध्ये विधेयत्वाख्यविषयत्वम्, तच्च

---

१. निक्षेपविषयकजिज्ञासाया निवर्त्तनार्थं निक्षेपनिरूपणं भवति । अतो निक्षेपजिज्ञासा निवर्त्तनीयतया निक्षेपनिरूपणस्याऽङ्गं भवति ।

२. यथा-'चैत्रेण तण्डुलः पच्यते' इत्यत्राऽऽख्यातस्य कृतिविषयत्वमर्थः । तच्च तण्डुलेऽन्वेति । 'पच्' धात्वर्थो विक्लित्तिः । तस्यामुद्देश्यताख्यविषयता । तामुद्दिश्य व्यापारो विधेयः, अतो व्यापारस्तदनुकूलत्वात् तत्प्रयोजक उच्यते । स चैत्रादिशरीरनिष्ठव्यापारः चैत्रनिष्ठकृतिसाध्यो भवतीति कृतौ व्यापारानुकूलत्वम् । अथ सा विक्लित्तिस्तण्डुलनिष्ठोद्देश्यते इति तण्डुले गौणी उद्देश्यताख्यविषयता । इयमेव परम्परया कृतिविषयता । अन्वयस्तु मुख्यां वा गौणीं वोद्देश्यताख्यकृतिविषयतामधिकृत्य वक्तुं शक्यते । मुख्या (=विक्लित्तिनिष्ठा) विवक्ष्यते चेत्-चैत्रनिष्ठकृतिप्रयोज्यव्यापारप्रयोज्यविक्लित्तिनिरूपिताधेयतावत्तण्डुलः । गौणी (=तण्डुलनिष्ठा) विवक्ष्यते चेद् विक्लित्त्यनुकूलव्यापारानुकूलचैत्रनिष्ठकृतिविषयतावत्तण्डुलः । तथैव 'निक्षेपा निरूप्यन्ते' इत्यत्र उद्देश्यताख्यकृतिविषयताद्वयं-मुख्या 'निरूप्'धात्वर्थ-ज्ञानानुकूलव्यापारस्थज्ञाने, तन्निरूपिता विषयता निक्षेपेषु; गौणी निक्षेपेषु (स्वप्रयोज्यव्यापारप्रयोज्यज्ञानविषयतारूपपरम्परासम्बन्धेन) । अन्वयोऽपि द्विधा १. कृतिप्रयोज्यव्यापारप्रयोज्यज्ञानविषयतावन्निक्षेपाः २. ज्ञानानुकूलव्यापारानुकूलकृतिविषयतावन्निक्षेपाः । एतत्सर्वमेवाऽत्र शब्दान्तरैः प्रदर्श्यते ।

साध्यताशब्देनाऽपि गीयते इति कृतौ व्यापारानुकूलत्वप्रतीतौ [१]तुल्यवित्तिवेद्यतया व्यापारेऽपि कृतिसाध्यत्वं प्रतीयते एव । अथवा कर्तृप्रत्ययस्थले आख्यातार्थस्य कृतेर्धात्वर्थविशेष्यतया भानम्, कर्मप्रत्ययस्थले तु आख्यातार्थस्य कृतेर्धात्वर्थविशेषणतया भानम्, [२]धात्वर्थस्य तु विषयत्वलक्षणकर्मत्वेऽन्वयः, तस्य च प्रथमान्तनामार्थेऽन्वय इति भवत्युक्तवाक्यं [३]'कृति-साध्यत्वलक्षणकर्त्तव्यत्वप्रकारकनिरूपणविशेष्यकज्ञानजनिके'तिप्रतिज्ञास्वरूपमित्यर्थः ।

निक्षेपसामान्यलक्षणमुपदर्शयति-

**प्रकरणादिवशेनाऽप्रतिपत्त्यादिव्यवच्छेदक-यथास्थानविनियोगाय शब्दार्थरचना-विशेषा निक्षेपाः ।**

अत्र **शब्दार्थरचनाविशेषा** इत्येतावन्मात्रं लक्षणम्, **निक्षेपा** इति लक्ष्यम् । निक्षिप्यन्ते=अर्थविशेषस्वरूपबोधकतया स्थाप्यन्ते=विरच्यन्ते इति भावव्युत्पत्त्या शब्दार्थ-रचनाविशेषस्यैव निक्षेपत्वावगतेः । प्रमीयते=प्रकर्षेण वस्तु निर्णीयते इति भावव्युत्पत्त्या स्वपरव्यवसितिलक्षणप्रमारूपफलं प्रमाणम्, करणव्युत्पत्त्या तु स्वपरव्यवसितिकरणं प्रमाणम् । नीयन्ते=प्राप्यन्ते इति नयाः, प्राप्तिश्च वस्त्वंशावधारणरूपैव फलम्, करणव्युत्पत्त्या च प्रापका नयाः-तादृशावधारणजनकप्रमातृतात्पर्यविशेषाः, तदाकलिताः शब्दविशेषा उपचाराद् नयाः ।

अनन्तधर्मात्मकवस्तुनिर्णयस्य प्रमाणेनैव जातत्वेऽपि, यथा परस्परविरुद्धानां धर्माणा-मेकधर्मिणि समावेशासम्भवाद्, धर्मधर्मिभावनिबन्धनतादात्म्यमप्येकत्र वस्तुनि दुर्घटमिति शङ्काशङ्कुसमुद्धरणाय विरोधभञ्जकावच्छेदकभेदावगतये[४] भवति तत्र नयापेक्षा, अन्यथाऽनन्त-धर्मात्मकवस्तुनि निर्णीते तदेकदेशरूपाणां तत्तद्धर्माणां नयविषयाणामपि निर्णीतत्वादफलमेव नयकल्पनं प्रसज्येत । तथाऽनुयोगद्वारतया शब्दार्थरचनाविशेषलक्षणा निक्षेपा अपि साफल्य-मञ्चन्ति, व्याख्येयग्रन्थान्तर्गतमङ्गलादिपदाद् नाममङ्गलादिलक्षणमङ्गलाद्यात्मकविशेष्य-वस्तुस्वरूपविशेषनिर्णयस्य निक्षेपादेव भावात् ।

यथाहि सैन्धवपदस्य लवणेऽश्वे च शक्तिर्व्युत्पादिताऽस्ति । तत्र 'सैन्धवमानये'त्युक्तौ

---

१. ययोरर्थयोरन्यतरस्य ज्ञानं येन भवति तेनैव तदितरस्याऽपि ज्ञानमवश्यं भवति चेत् तौ अर्थौ तुल्यवित्तिवेद्यौ ।

२. कृतिः कर्तृनिष्ठा भवति, धात्वर्थः=फलं च कर्मनिष्ठं भवति । कर्तृप्रत्ययस्थले यथा कृतेः प्राधान्याद् विशेष्यता, तथैव कर्मप्रत्ययस्थले धात्वर्थस्य प्राधान्याद् विशेष्यतेत्याशयः । उपरि दर्शितः प्रथमोऽन्वय एतदनुसारमेव ।

३. 'निक्षेपान् निरूपयिष्यामी'त्यादिप्रतिज्ञाभिरुक्ताकारकं ज्ञानं जन्यते इति प्रतिज्ञा ज्ञानजनिका । प्रतिज्ञास्वरूपमेव 'निक्षेपा निरूप्यन्ते' इति वाक्यम् ।

४. परस्परविरुद्धानां धर्माणामेकत्र समावेशे यद्यपि विरोधः, तथापि स एकावच्छेदेन समावेशे एव, न त्ववच्छेदकभेदेन समावेशे इति विरोधबुद्धिभञ्जकावच्छेदकभेदज्ञानार्थं नयानामपेक्षा ।

भोजनप्रकरणसहकाराद् लवणरूपार्थगतिः, यात्राप्रकरणसहकारादश्वविशेषरूपार्थगतिर्भवति । यदि तत्र कोशेन शक्तिर्व्युत्पादितैव न भवेत्, प्रकरणादयोऽपि किं कुर्युः ? सन्ति भोजनोपयोगिनो बहवो यात्रोपयोगिनश्चेति अप्रतिपत्तिरेव ततो वाक्याद् भवेद्, बहूनां वैमत्यं विप्रतिपत्तिर्वा, साधकबाधकप्रमाणाभावे संशयो वा स्यात् । कोशेन विशिष्याऽर्थद्वये शक्तौ व्युत्पादितायां सत्यां तु तत्र प्रकरणादिनाऽप्रतिपत्त्यादीनि निरस्याऽर्थविशेषावगतिर्भवति । तथा प्रकृतेऽपि सत्सु नामादिनिक्षेपेषु प्रकरणादिवशेनाऽप्रतिपत्त्यादीनि व्युदस्य नाममङ्गलस्योपयोगे मङ्गलपदेन नाममङ्गलस्य, एवं स्थापनामङ्गलाद्युपयोगे स्थापनामङ्गलादेः प्रतिपत्तिरिति तद्रूपयथास्थानविनियोगफलवत्त्वेन फलवन्तो निक्षेपा इत्याशयेन **प्रकरणादिवशे**नेत्याद्युक्तम् ।

उक्ताशयस्फोरणायाऽऽह–

**मङ्गलादिपदार्थनिक्षेपाद्[१] नाममङ्गलादिविनियोगोपपत्तेश्च निक्षेपाणां फलवत्त्वम् ।**

उक्तार्थे प्राचां सम्मतिमुपदर्शयति–

**तदुक्तम्–"अप्रस्तुतार्थापाकरणात् प्रस्तुतार्थव्याकरणाच्च निक्षेपः फलवान् ।"**

अप्रस्तुतार्थनिराकरणे प्रस्तुतार्थप्रकाशने च निक्षेपस्य प्रकरणादयः सहकारिणो भवन्तीति बोध्यम् ।

यद्यपि सत्सङ्ख्यादिकमप्यनुयोगाङ्गम्, तथापि विशेषणविशेष्यभावेन विशिष्टार्थगतौ तद् निबन्धनम् । निक्षेपास्तु अखण्डस्यैव विशेष्यस्वरूपविशेषस्याऽवगतौ निबन्धनम्, यतो न नामघटे नामविशिष्टो घटः, किन्तु यस्य कस्यचिद् घट इति नाम क्रियते, स वस्तुविशेषोऽखण्ड एव नामघटः । एवं स्थापनाघटादयोऽपीति ।

शब्दार्थरचना चाऽत्र कर्मधारयसमासलक्षणैव । अन्यत्र कर्मधारयस्य विशेष्यपदार्थे विशेषणपदार्थाभेदबोधकत्वम्, प्रकृतस्य तु विशेषणविशेष्यपदाभ्यां सम्भूय विशेष्यस्वरूपविशेषावबोधकत्वम् । तथाऽत्र विशेषणवाचकपदं केवलान्वयितानवच्छेदकधर्मप्रवृत्तिनिमित्तकमेव–नाऽतो ज्ञेयघट इत्यादेर्निक्षेपत्वम्, न वा ततो विशेष्यरूपविशेषस्याऽखण्डस्य प्रतीतिः–ज्ञेयत्वविशिष्टघटादेरेव विशेषणविशेष्यभावेन ततः प्रतीतेः । अत एव[२] मृद्घटसुवर्णघटेत्यादेरपि न निक्षेपत्वमित्यपि बोध्यम् ।

---

१. मङ्गलपदार्थनिक्षेपा इत्थम्–१. 'नाम च तन्मङ्गलं चे'ति व्युत्पत्तेः कस्यचित् पुंसः पदार्थस्य वा 'मङ्गल' इति नाम क्रियते तद्, 'मङ्गल' इति वर्णावलीमात्रं वा नाममङ्गलमुच्यते । 'नाम्ना मङ्गल'मिति व्युत्पत्तेर्मङ्गलनामवान् पदार्थो नाममङ्गलम् । २. काष्ठादौ मङ्गलबुद्ध्या स्वस्तिकालेखनादि स्थापनामङ्गलम् । ३. स्वर्णमाल्येक्षुदध्यादि द्रव्याणि द्रव्यमङ्गलम् । ४. जिननमनादिकं भावमङ्गलम् ।

२. निक्षेपे विशेष्यस्वरूपविशेषस्याऽखण्डस्य बोधकत्वमिति स्वीकारादेव ।

निक्षेपान् विभजते—

**ते च सामान्यतः चतुर्धा-नामस्थापनाद्रव्यभावभेदात् ।**

नामनिक्षेप-स्थापनानिक्षेप-द्रव्यनिक्षेप-भावनिक्षेपभेदेन निक्षेपाः सामान्यतः चतुष्प्रकारा इत्यर्थः ।

नामनिक्षेपं निरूपयति—

**तत्र प्रकृतार्थनिरपेक्षा नामार्थान्यतरपरिणतिर्नामनिक्षेपः ।**

**तत्र**=नामनिक्षेपादिचतुर्विधनिक्षेपेषु । **परिणतिरि**त्यन्तं लक्षणम्, **नामनिक्षेप** इति लक्ष्यम् । इन्द्रशब्दस्य प्रकृतोऽर्थः स्वर्गाधिपत्यादिगुणविशिष्टः सहस्राक्षः शचीपतिर्यो वासवः, तद् नाऽपेक्षते इति **प्रकृतार्थनिरपेक्षा** । तत्सापेक्षत्वे नामेन्द्रो गोपालदारको वासववत् तत्पर्यायशक्रादिशब्दवाच्योऽपि भवेत्, स्वर्गाधिपत्यादिकमप्यनुभवेच्च । एवम्भूता या **नामार्थान्यतरपरिणतिः** । यद्यपि यस्य गोपालादारकस्येन्द्र इति नाम क्रियते तन्नाम-नामवतोरभेदोपचाराद् गोपालदारकात्मकार्यपरिणतिरेव नामेन्द्रः, तथापि तद्वाचकत्वाद् नाम्नोऽप्युचारतः परिणतिरित्येवं नामार्थान्यतरपरिणतिः सा **नामनिक्षेप** इत्यर्थः ।

उदाहरति—

**यथा सङ्केतितमात्रेणाऽन्यार्थस्थितेनेन्द्रादिशब्देन वाच्यस्य गोपालदारकस्य शक्रादिपर्यायशब्दानभिधेया परिणतिरियमेव वा यथाऽन्यत्राऽवर्त्तमानेन यदृच्छाप्रवृत्तेन डित्थडवित्थादिशब्देन वाच्या ।**

**सङ्केतितमात्रेणे**ति । आधुनिकपित्रादिसङ्केतितत्वमात्रेणेत्यर्थः । **मात्र**पदेन वृद्धपरम्परागतसङ्केतितत्वस्य व्यवच्छेदः । सर्वे सर्वार्थवाचका-इत्यत्र इन्द्रपदस्य गोपालदारकेणाऽपि समं वाच्यवाचकभावसम्बन्धोऽस्त्येव, परं वृद्धपरम्परागतसङ्केताभिव्यक्त एव शाब्दबोधजनकतया शब्दार्थसम्बन्धः स नाऽन्यथेति तथाभूतविशिष्टवाच्यवाचकभावस्याऽपि व्यवच्छेदः सम्भवत्येव। **सङ्केतितमात्रेणे**त्यस्य **वाच्ये**त्यनेनाऽन्वयः । **अन्यार्थस्थितेन**=आदितात्पर्य-

---

**'तत्र प्रकृतार्थ०'**—अत्र रत्नप्रभायामुद्धृतः 'पज्जायाणभिधेयं०' इति भाष्यपाठः समस्ति । तदनन्तरमयं पाठः-

**"यद्वस्तुनोऽभिधानं स्थितमन्यार्थे तदर्थनिरपेक्षम् ।**
**पर्यायानभिधेयं च नाम यादृच्छिकं च तथा ॥"**

अस्या आर्याया व्याख्या **अनुयोगद्वारटीकातः** [पृ० ११] अवसेया ।

गृहीतसङ्केतबलाद् गोपालदारकभिन्नवासवरूपार्थस्थितेन । यत एवाऽन्यार्थस्थितत्वमिन्द्रादिशब्दस्य, तत एव-तेन सङ्केतितमात्रेण वाच्यस्य गोपालदारकस्य या परिणतिः सा **शक्रादिपर्यायशब्दानभिधेया**=तस्यां परिणताविन्द्रादिशब्दस्यैवाऽऽधुनिकसङ्केतो, न तु तत्समानार्थकस्याऽपि शक्रादिशब्दस्येति । एवम्भूता परिणतिर्नामनिक्षेपो नामेन्द्र इत्यर्थः ।

अथवा यस्य शब्दस्य न पर्यायान्तरम्, नाऽपि कुत्राऽप्यर्थेऽनादितात्पर्यमूलकसङ्केतः, तस्याऽपि डित्थडवित्थादिशब्दस्य गोपालदारकेऽधुना सङ्केतः क्रियते, तत्सङ्केतमात्रेण डित्थडवित्थादिशब्देन वाच्यस्य गोपालदारकस्य परिणतिरपि नामनिक्षेपो नामडित्थो नामडवित्थ इत्याह-**इयमेवेति** । **इयमेव**=गोपालदारकस्य परिणतिरेवेत्यर्थः । **वा**=अथवा । **यथेत्युपदर्शनार्थः** । **अन्यत्राऽवर्त्तमानेन**=गोपालदारकभिन्नार्थे सङ्केतसम्बन्धेनाऽवर्त्तमानेन, **यदृच्छाप्रवृत्तेन**=अभिनवसङ्केतकर्तृपुरुषेच्छासम्भूतेन ।

गोपालदारकस्य या परिणतिः सा गोपालदारकात्मकपिण्डरूपार्थनिष्ठैव, न त्विन्द्रादिनामनिष्ठेत्येकमात्रनिष्ठत्वेऽप्यन्यतरनिष्ठत्वसम्भवेऽपि शब्दनिष्ठत्वस्याऽभावतः, तस्याऽन्यतरत्वेन सङ्ग्रहो निष्प्रयोजन एवेत्यत आह-

**तत्त्वतोऽर्थनिष्ठा उपचारतः शब्दनिष्ठा च ।**

**तत्त्वतः**=परमार्थतः । यतो विभिन्नावच्छेद्यमर्थनिष्ठत्वं शब्दनिष्ठत्वं चाऽतः शब्दार्थोभयपरिणतिरित्यनुक्त्वा शब्दार्थान्यतरपरिणतिरित्येवमुक्तिरपि सुसङ्गतेति ।

यत एव किञ्चिन्नामापेक्षया यावद्द्रव्यभावित्वम्, किञ्चिन्नामापेक्षया चाऽयावद्द्रव्यभावित्वमप्यस्या उपपन्नमिति द्वैविध्यमप्याह-

**मेर्वादिनामापेक्षया यावद्द्रव्यभाविनी, देवदत्तादिनामापेक्षया चाऽयावद्द्रव्यभाविनी ।**

तृतीयप्रकारोऽपि नामनिक्षेपस्य भवति । उदाहरणमात्रोपदर्शनेन तत्स्वरूपमावेदयति-

**यथा वा पुस्तकपत्रचित्रादिलिखिता वस्त्वभिधानभूतेन्द्रादिवर्णावली ।**[१]

एतावता नाम्नोऽपि नामनिक्षेपत्वम् । ततश्च प्रधानीभूते इन्द्रशब्दार्थे वासवे इन्द्र इति यद् नाम तदपि नामेन्द्रः, तस्य सहस्राक्षाकारावयवसन्निवेशः स्थापनेन्द्रः, तत्कारणीभूतपूर्वावस्थाकलितरूपो द्रव्येन्द्रः, वर्त्तमानस्वर्गाधिपत्यादिगुणभाक् पर्यायान्तरप्रतिपाद्यश्च भावेन्द्र इति निक्षेपचतुष्टयसमन्वय[२] इति बोध्यम् ।

---

१. 'इन्द्र इति लिखे'त्यादिषु इकारादिसमुदायस्येन्द्रपदवाच्यत्वात्तत्रापि नामनिक्षेपः ।

२. अर्थाभिधानप्रत्ययाः तुल्यनामधेया इति वचनादेकशब्दवाच्यत्वेन शब्दार्थयोस्तादात्म्यमिति घट इति नामाऽपि

नामनिक्षेपस्वरूपप्रतिपादप्रवणो **विशेषावश्यक**ग्रन्थो यथा-

"पज्जायाणभिधेयं, ठिअमण्णत्थे तयत्थनिरवेक्खं ।
जाइच्छिअं च नामं, जावदव्वं च पाएण ॥" (विशेषा० २५)

व्याख्या-"यत् कस्मिंश्चिद् भृतकदारकादौ इन्द्राद्यभिधानं क्रियते तद् नाम भण्यते । कथम्भूत तदित्याह-पर्यायाणां=शक्रपुरन्दरपाकशासनशतमखहरिप्रभृतीनां समानार्थवाचकानां ध्वनीनाम्, अनभिधेयम्=अवाच्यम् । नामवतः पिण्डस्य सम्बन्धी धर्मोऽयं नाम्न्युपचरितः, स हि नामवान् भृतकदारकादिपिण्डः किलैकेन सङ्केतितमात्रेणेन्द्रादिशब्देनैवाऽभिधीयते, न तु शेषैः शक्रपुरन्दरपाकशासनादिशब्दैः । अतो नामयुक्तपिण्डगतधर्मो नाम्न्युपचरितः पर्यायानभिधेयमिति ।

"पुनरपि कथम्भूतं तन्नामेत्याह—ठिअमण्णत्थेत्ति । विवक्षितभृतकदारकादिपिण्डादन्यश्चाऽऽसावर्थश्चाऽन्यार्थो देवाधिपादिः, सद्भावतः तत्र यत् स्थितं, भृतकदारकादौ तु सङ्केतमात्रतयैव वर्त्तते, अथवा सद्भावतः स्थितमन्वर्थे अनुगतः सम्बद्धः परमैश्वर्यादिकोऽर्थो यत्र सोऽन्वर्थः शचीपत्यादिः, सद्भावतः तत्र स्थितम् । भृतकदारकादौ तर्हि कथं वर्त्तते ? इत्याह-तदर्थनिरपेक्षम् । तस्येन्द्रादिनाम्नोऽर्थः तदर्थः परमैश्वर्यादिः, तस्य निरपेक्षं सङ्केतमात्रेणैव तदर्थशून्ये भृतकदारकादौ वर्त्तते इति पर्यायानभिधेयम्, स्थितमन्यार्थे अन्वर्थे वा तदर्थनिरपेक्षं यत् क्वचिद् भृतकदारकादौ इन्द्राद्यभिधानं क्रियते तद् नाम इतीह तात्पर्यार्थः ।

"प्रकारान्तरेणाऽपि नाम्नः स्वरूपमाह-यादृच्छिकं चेति । इदमुक्तं भवति-न केवलमनन्तरोक्तम्, किन्त्वन्यत्राऽवर्त्तमानमपि यद् एवमेव यदृच्छया केनचिद् गोपालदारकादेरभिधानं क्रियते तदपि नाम, यथा डित्थो डवित्थ इत्यादि ।

"इदञ्चोभयरूपमपि कथम्भूतमित्याह—यावद्द्रव्यं च प्रायेणेति । यावदेतद्वाच्यं द्रव्यमवतिष्ठते तावदिदं नामाऽप्यवतिष्ठते इति भावः । किं सर्वमपि ? नेत्याह-प्रायेणेति । मेरु-द्वीप-समुद्रादिकं नाम प्रभूतं यावद्द्रव्यभावि दृश्यते, किञ्चित्तु अन्यथाऽपि समीक्ष्यते-देवदत्तादि-नामवाच्यानां द्रव्याणां विद्यमानानामपि अपरापरनामपरावर्त्तस्य लोके दर्शनात् । सिद्धान्तेऽपि यद् उक्तं-नाम आवकहियं ति, तत् प्रतिनियतजनपदादिसंज्ञामेवाऽङ्गीकृत्य, यथोत्तराः कुरव इत्यादि ।

---

घट एव । तुल्यपरिमाणत्वेन घटादिरूपार्थेन समं चित्रस्थघटादिवस्तुनोऽभेदेन घटाकारोऽपि घट एव-मुख्यार्थस्याऽभावादेव तत्र 'प्रतिकृति'व्यपदेशः । परिणामपरिणामिभावसम्बन्धस्याऽत्यन्तभेदेऽनुपपन्नत्वेन मृत्पिण्डादिद्रव्यघटेऽपि घट एव । भावघटस्य तु घटत्वं निर्विवादमेवेति चत्वारोऽपि निक्षेपा नयसम्मताः ।

"तदेवं प्रकारद्वयेन नाम्नः स्वरूपमत्रोक्तम्। एतच्च तृतीयप्रकारस्योपलक्षणम्। पुस्तक-पत्रचित्रादिलिखितस्य वस्त्वभिधानभूतेन्द्रादिवर्णालीमात्रस्याऽप्यन्यत्र नामत्वेनोक्तत्वादिति।"

**तत्त्वार्थटीका**यामप्युपपादितो नामनिक्षेपः तद्ग्रन्थावलोकेन सुधीभिः परिशीलनीयः।

स्थापनानिक्षेपं लक्षयति—

**यत्तु वस्तु तदर्थवियुक्तं तदभिप्रायेण स्थाप्यते चित्रादौ तादृशाकारम्, अक्षादौ च निराकारम्, चित्राद्यपेक्षयेत्वरं नन्दीश्वरचैत्यप्रतिमाद्यपेक्षया च यावत्कथिकं स स्थापना-निक्षेपः। यथा जिनप्रतिमा स्थापनाजिनः, यथा चेन्द्रप्रतिमा स्थापनेन्द्रः।**

अत्र-**यत्तु वस्तु तदर्थवियुक्तं तदभिप्रायेण स्थाप्यते स** इति लक्षणनिर्देशः, **स्थापनानिक्षेप** इति लक्ष्यनिर्देशः। **चित्रादा**विति विभागवचनम्। तत्र-चित्रादौ तादृशाकार-मिति सद्भूतस्थापनानिक्षेपः, अक्षादौ [१]निराकारमित्यसद्भूतस्थापनानिक्षेपः, चित्राद्यपेक्षयेत्वर-मित्ययावत्कथिकस्थापनानिक्षेपः, नन्दीश्वरचैत्यप्रतिमाद्यपेक्षया च यावत्कथिकमिति यावत्क-थिकस्थापनानिक्षेपः।

लक्षणवाक्येऽपि विभागवचनम् 'इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि-व्यवसायात्मकं प्रत्यक्ष'मिति **गौतमसूत्रे** दृष्टम्। तत्र हि इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमिति लक्षणम्, प्रत्यक्षमिति लक्ष्यम्। तस्य निर्विकल्पकसविकल्पकप्रमाप्रत्यक्षभेदेन द्वैविध्योप-दर्शकमव्यपदेश्यमव्यभिचारिव्यवसायात्मकमिति विवेकः।

**यत्तु**=जिनप्रतिमालक्षणं वस्तु, **तदर्थवियुक्तं**=जिनशब्दवाच्य-रागद्वेषादिरहित-केवलज्ञानादिगुणालङ्कृत-पुरुषधौरेयरूपार्थात्मकं न भवति, अथ च **तदभिप्रायेण**=तथाविधपुरुषविशेषबोधकत्वेच्छया, **स्थाप्यते**=अयं जिन इति निक्षिप्यते, **स**=जिनप्रतिमादिः, **स्थापनानिक्षेपः**=स्थापनाजिन इति तद् वस्तु।

**चित्रादौ**=भित्त्यादिगतरेखोपरेखादिविरचनसञ्जातजिनशरीराद्याकारनिर्मितिविशेषादौ, **तादृशाकारं**=वस्तुभूतजिनशरीराकृतिसदृशाकृतिकम्, **तदर्थवियुक्तं तदभिप्रायेण स्थाप्यते** इत्यस्याऽत्र सम्बन्धः। **एवमक्षादौ च निराकार**मित्यादावग्रेऽपि सम्बन्धः। एतदसद्भूतस्थापना-कथनम्। **इत्वरं**=किञ्चित्कालानन्तरमपगमनस्वभावम्। [२]**यावत्कथिकं**=यावत्पूज्यपूजकादि-

---

१. निराकारम्=असमानाकारम्। यस्य वस्तुन आकारो न भवति तस्याऽपि स्थापना निराकारैवोच्यते। यथा-पुस्तकलिखित-इकारादिवर्णावली।

२. यावत्कथिकस्थापनास्थले 'तिष्ठतीति स्थापने'त्येव व्युत्पत्तिः, न तु 'स्थाप्यते इति स्थापने'ति—तस्याः शाश्वतत्वेन केनापि स्थाप्यमानत्वाभावात्।

व्यवहारकालानुगामि । अन्यद् व्यक्तम् ।

उदाहरति-**यथेति** । उक्तमुदाहरणद्वयं सद्भूतस्थापनायाः । उपलक्षणं चैतदसद्भूतस्थापनोदाहरणस्याऽपि ।

द्रव्यनिक्षेपं निरूपयति—

**भूतस्य भाविनो वा भावस्य कारणं यद् निक्षिप्यते स द्रव्यनिक्षेपः । यथाऽनुभूतेन्द्रपर्यायोऽनुभविष्यमाणेन्द्रपर्यायो वा इन्द्रः ।**

अत्र **स** इत्यन्तं लक्षणवचनम्, **द्रव्यनिक्षेप** इति लक्ष्यवचनम् । **भूतस्य**=अतीतपर्यायस्य, **भाविनः**=भविष्यत्पर्यायस्य, **भावस्य**=स्वर्गाधिपत्यादिधर्मालिङ्गितेन्द्रादिरूपार्थस्य, **कारणं**=यद् जीवद्रव्यं पूर्वमिन्द्रोऽभूद्, भविष्यति वोत्तरकाले इन्द्रः, **निक्षिप्यते**=अयमिन्द्र इत्येतद्रूपेण स्थाप्यते, **स**=जीवः, **द्रव्यनिक्षेपः**=द्रव्येन्द्रः ।

उदाहरति-**यथेति** । यः खलु जीवविशेषो देवेन्द्रो भूत्वा तद्योगजनककर्मपरिसमाप्तौ तच्छरीरं परित्यज्य मनुजयोनौ समुत्पन्नः, तदानीं मनुष्योऽपि सन् **अनुभूतेन्द्रपर्यायः**=पूर्वमासादितेन्द्रपर्याय इति कृत्वा 'इन्द्रोऽय'मिति व्यपदिश्यते । यो वेदानीं मनुजगतौ वर्त्तमानो जीव उत्तरकाले मनुजोपभोग्याखिलकर्मपरिशाटे मनुजतनुं विहाय देवेन्द्रपदोपभोग्यकर्मोदयकाले देवगतौ देवेन्द्रो भविष्यत्काले भविष्यति, स जीवो**ऽनुभविष्यमाणेन्द्रपर्यायः** 'इन्द्रोऽय'-मिति व्यपदिश्यते । तावुभौ, **इन्द्रः**=द्रव्येन्द्रः, द्रव्यनिक्षेप इत्यर्थः ।

कथमनयोरिन्द्रपर्यायाभावकाले इन्द्रपदव्यपदेश्यतेत्यपेक्षायां निदर्शनावष्टम्भतः तद्व्यवस्थामाह-

**अनुभूतघृताधारत्वपर्यायेऽनुभविष्यमाणघृताधारत्वपर्याये च घृतघटव्यपदेशवत् तत्रेन्द्रशब्दव्यपदेशोपपत्तेः ।**

**अनुभूतघृताधारत्वपर्याये**=येन घटेन पूर्वं घृतधारणं कृतं तस्मिन्, **अनुभविष्यमाणघृताधारत्वपर्याये**=यश्च घट उत्तरकालं घृतधारणं करिष्यति तस्मिन् । तदुभयस्मिन् घटे **घृतघटव्यपदेशवद्**= लोके 'अयं घृतघट' इति व्यपदेशो यथा भवति तथा, **तत्र**=अनुभूतेन्द्रपर्यायेऽनुभविष्यमाणेन्द्रपर्याये च जीवे, **इन्द्रशब्दव्यपदेशोपपत्तेः**= 'अयमिन्द्र' इत्येवमिन्द्रशब्दप्रयोगस्य युक्तत्वात् ।

प्रकारान्तरेण द्रव्यनिक्षेपप्रवृत्तिमुपदर्शयति-

**क्वचिदप्राधान्येऽपि द्रव्यनिक्षेप प्रवर्तते, यथाऽङ्गारमर्दको द्रव्याचार्यः, आचार्यगुणरहितत्वाद् अप्रधानाचार्य इत्यर्थः ।**

उदाहरति-**यथेति** । **अङ्गारमर्दकः**=अङ्गारमर्दकसंज्ञक आचार्यविशेषः[१] । तत्र द्रव्याचार्यत्वमुपपादयति-**आचार्यगुणरहितत्वादिति** ।

**क्वचिदनुपयोगेऽपि, यथाऽनाभोगेनेहपरलोकाद्याशंसालक्षणेनाऽविधिना च भक्त्याऽपि क्रियमाणा जिनपूजादिक्रिया द्रव्यक्रियैव-अनुपयुक्तक्रियायाः साक्षाद् मोक्षाङ्गत्वाभावाद् ।**

**क्वचिदनुपयोगेऽपीत्यनन्तरं द्रव्यनिक्षेपः प्रवर्त्तते** इत्यनुवर्त्तनीयम् । उदाहरति-**यथेति** । **अनाभोगेन**=अन्यगतचित्तत्वादिना यथावदुपयोगशून्येन । अथवाऽनाभोगस्वरूपोपदर्शकमेव **इहलोकपरलोकाद्याशंसालक्षणेनेति** । यदि पूजाविधायकागमार्थोपयोगो भवेत् तदा तत्रेहलोकाद्याशंसा प्रतिषिद्धेति तदाशंसया जिनपूजां नैव कुर्यादिति तदाशंसा चिह्नमागमार्थानुपयोगस्य । अप्राधान्यादेवाऽत्राऽपि द्रव्यत्वमित्याह-**अनुपयुक्तक्रियाया** इति ।

**साक्षादित्युपादानात्** परम्परया मोक्षाङ्गत्वमनुपयुक्तक्रियाया अप्यस्तीति लब्धमेव स्पष्टप्रतिपत्तये आह-

**भक्त्याऽविधिनाऽपि क्रियमाणा सा पारम्पर्येण मोक्षाङ्गत्वापेक्षया द्रव्यतामश्नुते-भक्तिगुणेनाऽविधिदोषस्य निरनुबन्धीकृतत्वादित्याचार्याः ।**

**सा**=जिनपूजादिक्रिया । ननु विध्यभावे सति कथं परम्परया ततः फलमित्यत आह-**भक्तिगुणेनेति** । भक्त्यभावविशिष्टाविधेरेव कार्यप्रतिबन्धकत्वम्, तदभावस्य च कारणत्वमित्यभिसन्धिः । **निरनुबन्धित्वम्**=अङ्गवैगुण्यप्रयुक्तजिनपूजागतस्वस्वकार्यानर्जकत्वापादनलक्षणकार्यासाम्मुख्यम् । **आचार्याः**=जैनाचार्याः ।

अनुपयोगे द्रव्यत्वं **विशेषावश्यके**ऽपि प्रतिपादितम् । तथा च तद्ग्रन्थः-"योऽनुपयुक्तो जिनप्रणीतां मङ्गलरूपां प्रत्युपेक्षणादिक्रियां करोति स नोआगमतो ज्ञशरीरभव्यशरीरातिरिक्तं द्रव्यमङ्गलम् । उपयोगरूपोऽत्राऽऽगमो नाऽस्तीति नोआगमतो, ज्ञशरीरभव्यशरीरयोर्ज्ञानापेक्षा द्रव्यमङ्गलता, अत्र तु क्रियापेक्षा, अतः तद्व्यतिरिक्तत्वम्, अनुपयुक्तस्य क्रियाकरणात्तु द्रव्यमङ्गलता भावनीया । उपयुक्तस्य तु क्रिया यदि गृह्येत तदा भावमङ्गलतैव स्यादिति भावः" (विशेषा० बृ० ४६) इति ।

भावनिक्षेपं निरूपयति-

---

'**क्वचिदनुपयोगेऽपि**'-अत्र रत्नप्रभायामुल्लिखितो 'योऽनुप०' इति भाष्यपाठः समस्ति ।

---

१. अस्याऽऽचार्यस्य वृत्तान्त उपदेशमाला(गाथा १६८) टीकातोऽवगन्तव्यः ।

**विवक्षितक्रियानुभूतिविशिष्टं स्वतत्त्वं यद् [1]निक्षिप्यते स भावनिक्षेपः । यथा इन्दनक्रियापरिणतो भावेन्द्र इति ।**

अत्र **से**त्यन्तं लक्षणम्, **भावनिक्षेप** इति लक्ष्यम् । विवक्षिता=वक्तुर्विवक्षिता या इन्दनादिलक्षणा क्रिया, तस्या अनुभवनम्=अनुभूतिः, तया विशिष्टं=युक्तं **विवक्षितक्रियानुभूतिविशिष्टम्, स्वतत्त्वम्**=इन्द्रादिस्वरूपवस्तुतत्त्वम्, इन्द्रादिशब्देन स्वर्गाधिपत्यादिलक्षणैश्वर्याद्यभिधानात्, तस्य तत्र घटनाद् भवति तदेवेन्द्रादिशब्दस्य वाच्यतत्त्वं पारमार्थिकपदार्थः, एवम्भूतं **यद् निक्षिप्यते**='अयमिन्द्र' इत्येवंरूपेणेन्द्रादिशब्दवाच्यतया स्थाप्यते **स** इन्द्रादिर्भावनिक्षेपो **भावेन्द्र** इत्यर्थः । उदाहरति-**यथे**ति ।

ननु भवनं=विवक्षितक्रियानुभूतिविशिष्टतया परिणमनं भाव इति व्युत्पत्तिः परमार्थतः शब्दवाच्यं घटते इति तत्र भावनिक्षेपो नाम एको निक्षेपोऽस्तु, तद्भिन्नेषु तु नामादिषु त्रिषु निक्षेपेषु भाववियुतेषु परस्परार्थानुगतिमत्सु विरुद्धधर्माध्यासाभावादैक्यमेव युक्तमिति द्विधैव निक्षेपविभजनं युक्तं न चतुर्धेति परः प्रत्यवतिष्ठते-

**ननु भाववर्जितानां नामादीनां कः प्रतिविशेषः ?-त्रिष्वपि वृत्त्यविशेषात् । तथाहि-नाम तावद् नामवति पदार्थे स्थापनायां द्रव्ये चाऽविशेषेण वर्त्तते । भावार्थशून्यत्वं स्थापनारूपमपि त्रिष्वपि समानं-त्रिष्वपि भावस्याऽभावात् । द्रव्यमपि नामस्थापनाद्रव्येषु वर्त्तते एव-द्रव्यस्यैव नामस्थापनाकरणात्, द्रव्यस्य द्रव्ये सुतरां वृत्तेश्चेति विरुद्धधर्माध्यासाभावाद् नैषां भेदो युक्त इति चेत्,**

**नामादीना**मित्यत्रादिपदात् स्थापनाद्रव्ययोः परिग्रहः । **प्रतिविशेषः**=भेदः । **त्रिष्वपि**=

---

**'विवक्षित'**—

"**भावो विवक्षितक्रियाऽनुभूतियुक्तो हि वै समाख्यातः ।**
**सर्वज्ञैरिन्द्रादिवदिहेन्दनादिक्रियाऽनुभवात् ॥**" इति ।

"अत्रायमर्थः-भवनं विवक्षितरूपेण परिणमनं भावः, अथवा भवति विवक्षितरूपेण संपद्यत इति भावः । कः पुनरयम् ? इत्याह-वक्तुर्विवक्षिता इन्दन-ज्वलन-जीवनादिका या क्रिया तस्या अनुभूतिरनुभवनं तया युक्तो विवक्षितक्रियानुभूतियुक्तः, सर्वज्ञैः समाख्यातः । क इव ?, इत्याह-इन्द्रादिवत् स्वर्गाधिपादिवत्, आदिशब्दाज्ज्वलन-जीवादिपरिग्रहः । सोऽपि कथं भावः ? इत्याह-इन्दनादिक्रियानुभवात् इति, आदिशब्देन ज्वलन-जीवादिक्रियास्वीकारः, विवक्षितेन्दनादिक्रियान्वितो लोके प्रसिद्धः पारमार्थिकपदार्थो भाव उच्यते ।"-विशेषा० बृ० गा० ४९ ।

---

१. अनुभूयमानपर्याययुक्तं वस्तुस्वरूपं यदा प्रतिपाद्यते तदा भावनिक्षेप इति भावः ।

नामस्थापनाद्रव्येषु **वृत्त्यविशेषात्**=सङ्केतविशेषवृत्तेः प्रवर्त्तनस्य साधारण्यात् ।

वृत्त्यविशेषमेवोपपादयति-**तथाही**ति । तत्र प्रथमं नामनिक्षेपस्य वृत्त्यविशेषं दर्शयति-**नामे**ति । **तावदि**ति वाक्यालङ्कारे । **वर्त्तते**=प्रवर्त्तते-इन्द्रनाम्ना नामेन्द्रस्थापनेन्द्रद्रव्येन्द्राणां त्रयाणामपि व्यपदेशात् । यद्यपि भावेन्द्रस्याऽपि तेन व्यपदेशः, तथापीन्दनादिक्रियानुभूति-युक्तत्वस्याऽन्यत्राऽवर्त्तमानस्य तत्रैव भावतो, नामादितो वैलक्षण्यस्य योगादस्तु पृथक्त्वमित्य-भिसन्धिः । स्थापनायाः त्रिषु नामादिष्वविशेषवृत्तिं दर्शयति-**भावार्थे**ति । **भावस्य**=भावार्थस्य । द्रव्यनिक्षेपस्य त्रिष्वविशेषवृत्तिमुपदर्शयति-**द्रव्यमपी**ति । कथं वर्त्तते इत्यपेक्षा-यामाह-**द्रव्यस्यैवे**ति ।

तथा चैकेन नामनिक्षेपेण स्थापनानिक्षेपेण द्रव्यनिक्षेपेण वा त्रयाणां निक्षेपाणां विरुद्धधर्माध्यासाभावतः सङ्ग्रहसम्भवाद् निक्षेपद्वयमेव वक्तव्यम्, न निक्षेपचतुष्टयमिति प्रश्नयिता स्वपक्षमुपसंहरति-**इति विरुद्धे**ति । **एषां**=नामस्थापनाद्रव्याणाम् ।

'अणुरपि विशेषः [भेद ?]प्रतिपत्तिकर' इति न्यायाद् भावार्थशून्यत्वरूपधर्मेण त्रयाणामविशेषेऽपि रूपान्तरेणाऽन्योन्यव्यावृत्तेनाऽसाधारणेन त्रयाणां भेदसम्भवात् चतुर्धा विभजनं युक्तमेवेति समाधत्ते-

**न, अनेन रूपेण विरुद्धधर्माध्यासाभावेऽपि, रूपान्तरेण विरुद्धधर्माध्यासात् तद्भेदोपपत्तेः । तथाहि-नामद्रव्याभ्यां स्थापना तावदाकाराभिप्रायबुद्धिक्रियाफलदर्शनाद् भिद्यते । यथा हि स्थापनेन्द्रे लोचनसहस्राद्याकारः, स्थापनाकर्तुश्च सद्भूतेन्द्राभिप्रायो, द्रष्टुश्च तदाकारदर्शनादिन्द्रादिबुद्धिः, भक्तिपरिणतबुद्धीनां नमस्करणादिक्रिया, तत्फलं च पुत्रोत्पत्त्यादिकं संवीक्ष्यते, न तथा नामेन्द्रे द्रव्येन्द्रे चेति ताभ्यां तस्य भेदः ।**

**अनेन रूपेण**=भावार्थशून्यत्वादिना, **रूपान्तरेण**=अनन्तरवक्ष्यमाणधर्मेण, **तद्भेदोप-पत्तेः**=नामादित्रयभेदसम्भवात् ।

नामादित्रयाणां भेदमेव भावयति-**तथाही**ति । 'स्थापना-नामद्रव्येन्द्राभ्यां भिद्यते-आकाराभिप्रायबुद्धिक्रियाफलदर्शना'दिति योजनयाऽत्राऽनुमानप्रयोगः स्पष्टं प्रतिभासते । आकारश्चाऽभिप्रायश्च बुद्धिश्च क्रिया च फलं चेत्याकाराभिप्रायबुद्धिक्रियाफलानि, तेषां दर्शनादित्ययं हेतुः स्थापनायां वर्त्तते, नामद्रव्ययोश्च न वर्त्तते इति भवति विरुद्धधर्मस्वरूपत्वाद् भेदलक्षणसाध्याविनाभूत इत्युपपादयितुमाकारादीनां स्थापनायां सत्त्वं नामद्रव्ययोश्चाऽसत्त्वमुप-दर्शयति-**यथाही**ति । **तदाकारदर्शनात्**=प्रतिमागतस्य लोचनसहस्रादिविरचनाविशेषलक्षण-मुख्येन्द्रशरीरसंस्थानसदृशसंस्थानदर्शनात् । **तत्फलं च**=नमस्करणक्रियाफलं च । जिनप्रति-

बिम्बपूजनफलं तु-

"अभ्यर्चनादर्हतां, मनःप्रसादस्ततः समाधिश्च ।

तस्मादपि निःश्रेयसमतो हि तत्पूजनं न्याय्यम् ॥" इति **तत्त्वार्थाधिगमभाष्य-कारिकायां** (का.१/८) परम्परया मुक्तिरुपदिष्टा । **न तथेति** । दर्शिताकारादिकं नामेन्द्रे द्रव्येन्द्रे च न संवीक्ष्यते इत्यर्थः । **ताभ्यां**=नामेन्द्रद्रव्येन्द्राभ्याम्, **तस्य**=स्थापनेन्द्रस्य भेदः ।

**द्रव्यमपि भावपरिणामिकारणत्वाद् नामस्थापनाभ्यां भिद्यते । यथा ह्यनुपयुक्तो वक्ता द्रव्यम्, उपयुक्तत्वकाले उपयोगलक्षणस्य भावस्य कारणं भवति, यथा वा साधुजीवो द्रव्येन्द्रः सद्भावेन्द्ररूपायाः परिणतेः, न तथा नामस्थापनेन्द्राविति ।**

द्रव्यं-नामस्थापनाभ्यां भिद्यते-भावपरिणामिकारणत्वादित्यनुमानप्रयोगोऽत्र स्पष्टं प्रतिभासते । उक्तहेतोः द्रव्ये सत्त्वं नामस्थापनयोरसत्त्वमिति भवति भेदनियतत्वमित्युप-पादयति-**यथेति** । पूर्वं योऽनुपयुक्तो वक्ता स एवोत्तरकाले उपयुक्तः तादृशेनोपयोगात्मना परिणतो भवतीत्युपयोगपरिणामलक्षणभावकारणत्वाद् **द्रव्यमिति** । एवमिदानीं यो जीवः साधुपर्यायमनुभवति स प्रेत्य देवेन्द्रो भविष्यति तत उत्तरकालभावि-सद्भावदेवेन्द्रपरिणतेः कारणत्वाद् द्रव्येन्द्र इत्यर्थः । **न तथेति** । नामेन्द्रः स्थापनेन्द्रश्च न सद्भावेन्द्ररूपपरिणतेः कारणमिति न तयोर्भावपरिणामकारणत्वमिति वैधर्म्याद् द्रव्यं नामस्थापनाभ्यां भिन्नमित्यर्थः ।

स्थापनाद्रव्यगतौ विभिन्नौ यौ धर्मौ अनन्तरमुपदर्शितौ, तच्छून्यत्वरूपधर्मवत्त्वाद् नामाऽपि स्थापनाद्रव्याभ्यां भिद्यते इत्याह-

**नामाऽपि स्थापनाद्रव्याभ्यामुक्तवैधर्म्यादेव भिद्यते इति ।**

दृष्टान्तावष्टम्भेन नामस्थापनादीनां भेदाभेदावुपदर्शयति-

**दुग्धतक्रादीनां श्वेतत्वादिनाऽभेदेऽपि माधुर्यादिना भेदवद् नामादीनां केनचि-द्रूपेणाऽभेदेऽपि रूपान्तरेण भेद इति स्थितम् ।**

तथा च स्याद्वादोऽत्रापि पदमादधातीति हृदयम् ।

भावेन्द्रस्य स्वर्गपालनादिकं यत् कार्यं तद् नामेन्द्रो गोपालदारकादिः, स्थापनेन्द्र इन्द्रप्रतिमादिः, द्रव्येन्द्रः साधुजीवादिर्वा न कर्तुं समर्थ इति प्रतिनियतार्थक्रियाकारित्वाद् भावेन्द्र एव वस्तु, न तु नामेन्द्रादिरिति तदर्थशून्यैर्नामादिनिक्षेपैरलमिति शङ्कते-

**ननु भाव एव वस्तु, किं तदर्थशून्यैर्नामादिभिरिति चेत्,**

**तदर्थशून्यैः**=भावार्थरहितैः ।

इन्द्रशब्दार्थो हीन्द्रवद् नामतदाकारतत्कारणचतुष्टयात्मको वस्त्वेवेति भावेन्द्रवद् नामादीनामपि वस्तुपर्यायत्वमविशिष्टमेव । उक्तचतुष्टयान्यतमस्य यत् कार्यं तद् इन्द्रशब्दार्थकार्यं भवत्येवेति सामान्यत इन्द्रकार्यकारित्वं सर्वेषामविशिष्टमेव, यथाऽनन्तधर्मात्मके वस्तुनि प्रत्येकधर्मस्य यत् कार्यं तदपि वस्तुकार्यं भवत्येव, अन्यथा तदात्मकत्वमेव वस्तुनो न स्यादित्याशयेन समाधत्ते-

**न, नामादीनामपि वस्तुपर्यायत्वेन सामान्यतो भावत्वानतिक्रमात्, अविशिष्टे इन्द्रवस्तुन्युच्चरिते नामादिभेदचतुष्टयपरामर्शनात् प्रकरणादिनैव विशेषपर्यवसानात् ।**

'इन्द्रोऽत्र वर्त्तते, इन्द्रोऽस्ती'त्येवं नामादिरहितकेवलेन्द्रशब्दोच्चारणेऽविशेषेण नामेन्द्रादिचतुष्टयस्याऽप्यवबोधात्, देवानां परिगणनानामवसर इति प्रकरणपरिस्फूर्त्तौ भावेन्द्रस्य, गोपालदारकादिसम्मेलनादिप्रकरणे नामेन्द्रस्य, देवकुलादौ स्थापनेन्द्रस्य, 'अयमेतत्तपःप्रभावाद् धरणो भविष्यति, अयमेतदुपासनयैन्द्रपदमलङ्करिष्यती'त्यादि तपोमाहात्म्यवर्णनप्रसङ्गे द्रव्येन्द्रस्य च विशेषतोऽवबोधात्, विशेषावगमकप्रकरणाद्यभावे च विशेषत एकैकमात्रप्रतीतेर-भावादित्याह-**अविशिष्ट** इति । **परामर्शनाद्**=निश्चयात्मकग्रहणं परामर्शनम्, तद्भावाद् । परामर्शदर्शनादिति पाठस्तु समीचीनः । तथा सत्युक्तपरामर्शस्याऽनुभूयमानत्वलाभेन तथाविध-परामर्शो न भवतीति वक्तुमशक्यम्-अनुभूयमानस्याऽपलापासम्भवात् । तथा सति ततो भावेन्द्रादिविशेषप्रतिपत्ति न भवेदेवेत्यत आह-**प्रकरणादिनैवे**ति ।

प्रकारान्तरेण नामादीनां सफलत्वमुपदर्शयति-

**भावाङ्गत्वेनैव वा नामादीनामुपयोगः-जिननाम-जिनस्थापना-परिनिर्वृतमुनिदेह-दर्शनाद् भावोल्लासानुभवात् ।**

**वा**=अथवा । भावाङ्गत्वमेवैकं कथमित्यपेक्षायामाह-**जिने**ति । यत्र कुत्रचित् पुरुषादौ सङ्केतितं जिननाम श्रुत्वाऽपि रागद्वेषाद्यान्तराशेषशत्रून् हतवति भावजिने स्मृतिमारूढे सति **भावोल्लासस्य**=भक्त्युद्रेकस्य श्रोतृगतस्या**ऽनुभवाद्**=अनुभूयमानत्वात्; एवं सर्वथा रागद्वेषादि-राहित्यानुमापकलिङ्गविशेषालिङ्गितां जिनप्रतिमां साक्षात् पुरतः पश्यतो भव्यस्य 'अहमप्येवम्भूतः कदा स्या'मित्येवमाशंसालक्षणतद्गुणैकतानतास्वभावात्मकभावोल्लासावि-र्भावस्याऽनुभूयमानत्वात्, **परिनिर्वृतस्य**=निर्वाणं प्राप्तस्य कालधर्ममुपागतस्य वा मुनेः सम्यक्-चारित्रवतः साधोर्द्वित्र्यादिभवैरेव जिनभावमासादयिष्यतो द्रव्यजिनस्य देहदर्शनाद् द्रष्टुर्भव्यस्य भावविशेषोल्लासस्याऽनुभूयमानत्वाच्च नामादित्रयाणां भावाङ्गत्वेनोपयोग एव, न निरुपयोग-त्वमित्यर्थः ।

नन्वेवं नामादीनां सर्वेषां वस्तुपर्यायत्वेन भावत्वानतिक्रमे भावाङ्गत्वे च किमिति दैवाद् नगरसमीपं समुपागतवति भावजिनेन्द्रे महनीयचरितानामपि लोके पूजाद्यतिशयाद्याकलितानां राज्ञां सामात्यानां सपरिच्छदानां ससामन्तानामहमहमिकया भक्तिभरनिर्भरेण समहोत्सवं नमनादिक्रियाविधानार्थं झटित्येव तत्समीपमुपसर्पणम्, न तु जिनादिनाम्नि श्रुते, जिनादिप्रतिबिम्बे स्वप्रासादसमीपवर्त्तिप्रासादव्यवस्थिते, द्रव्यजिने वा मुनिप्रकाण्डे वा नगरान्तःप्रविष्टे इत्यतो वक्तव्यः कश्चित् प्रतिविशेषो नामादित्रयसद्भावे इत्यत आह-

**केवलं नामादित्रयं भावोल्लासेऽनैकान्तिकमात्यन्तिकं च कारणमिति ऐकान्तिकात्यन्तिकस्य भावस्याऽभ्यर्हितत्वमनुमन्यन्ते प्रवचनवृद्धाः ।**

**केवल**मिति । एतावन्मात्रं, पदानन्तरमेवा(यद् अनन्तरमेवा?)ऽभिधीयते तदित्यर्थः । **अनैकान्तिक**मिति । एकान्तो=नियमः, तद्वदैकान्तिकम्, न ऐकान्तिकमनैकान्तिकम् । नामादित्रयान्यतमसद्भावे कदाचिद् भवति भावोल्लासः, कदाचिद् न भवत्यपीति व्यभिचारीत्यर्थः । **अनात्यन्तिक**मिति । अत्यन्तम्=अतिशयेनाऽतिप्रकृष्टमन्यातिशायिकार्यं विदधातीत्यात्यन्तिकम्, तथा यद् न भवति तद् अनात्यन्तिकम् ।

भावजिनाद् यादृशः प्रकृष्टतमो भावोल्लासो भवति, न तादृशो भावोल्लासो जिननामादित इति नामादिकं भावोल्लासेऽनैकान्तिकमनात्यन्तिकं च कारणम् । भावजिनस्तु भावोल्लासे ऐकान्तिकमात्यन्तिकं च कारणमतः तेभ्योऽभ्यर्हितः स इत्येवं प्रतिविशेष इत्याह-**ऐकान्तके**ति । नैतत् स्वानुभवसंवेद्यमेव, **विशेषावश्यककारा**दयः पूज्या अप्येनमर्थमित्थमुशन्तीत्याह-**अनुमन्यन्ते** इति ।

भावातिरिक्तगतानामपि नामादीनामुक्तदिशाऽस्त्येवोपयोगो वस्तुपर्यायत्वाद् भावाङ्गत्वाच्चेत्येतावताऽभिहितम् । अथैकवस्तुगतानां नामादीनां त्रयाणां भावाविनाभूतत्वाद् वस्तुत्वमुपपादयति-

**एतच्च भिन्नवस्तुगतनामाद्यपेक्षयोक्तम्, अभिन्नवस्तुगतानां तु नामादीनां भावाविनाभूतत्वादेव वस्तुत्वम्-**

नामस्थापनाद्रव्याणामनुक्रमेण भावाविनाभूतत्वं भावयति-

**सर्वस्य वस्तुनः स्वाभिधानस्य नामरूपत्वात्, स्वाकारस्य स्थापनारूपत्वात्, कारणतायाश्च द्रव्यरूपत्वात्, कार्यापन्नस्य च स्वस्य भावरूपत्वात् ।**

नामादिषु स्वसम्बन्धित्वेन स्वाभिन्नत्वं-सर्वस्य सम्बन्धस्य कथञ्चित्तादात्म्यलक्षणाविष्वग्भावनियतत्वाद्, यस्य कस्यचित् सम्बन्धस्य सत्त्वे कथञ्चित्तादात्म्यस्याऽवश्यं सद्भाव

इति । भावस्य तु साक्षादेव स्वस्वरूपत्वेन वस्तुत्वमिति नामादिभ्यः प्रतिविशेष इत्यावेदयितुं **कार्यापन्नस्य च स्वस्येत्यत्र** स्वपदोपादानम् ।

नामादीनां वस्तुना सह धर्मधर्मिभावे सिद्धे सत्येव तदाक्षिप्तसम्बन्धविशेषबलाद् वस्तुत्वसिद्धिरिति धर्मधर्मिभावमुपपादयति-

**यदि च घटनाम घटधर्मो न भवेत् तदा ततः तत्सम्प्रत्ययो न स्यात्-तस्य स्वापृथग्भूतसम्बन्धनिमित्तकत्वादिति सर्वं नामात्मकमेष्टव्यम् ।**

**ततः**=घटनामतः, **तत्सम्प्रत्ययो**=घटज्ञानम् । **तस्य**=घटनामतो घटसम्प्रत्ययस्य । **स्वापृथग्भूतेति** । घटनामघटरूपार्थाभिन्न-वाच्यवाचकभावलक्षणसम्बन्धजन्यत्वादित्यर्थः । **इति**=एतस्मात् कारणात् ।

सर्वं वस्तु साकारमित्याकारलक्षणस्थापनया सह धर्मधर्मिभावादभिन्नत्वमित्युपदर्शयति-

**साकारं च सर्वं—मतिशब्दघटादीनामाकारवत्त्वात्, नीलाकारसंस्थानविशेषादीनामाकाराणामनुभवसिद्धत्वात् ।**

मतिर्हि 'अयं घटोऽयं पट' इत्यादिरूपेणैव व्यवहारवीथीमवतरतीति घटाद्याकारवत्त्वं तस्याः, घटादिशब्दश्च घकारोत्तरटकारोत्तरत्वलक्षणानुपूर्वीस्वरूपाकारसमन्वित एवाऽऽभासते इति साकारः, घटादिरपि पृथुबुध्नाद्याकारवानेवाऽनुभूयते इति साकार इत्येवं सर्वस्य साकारत्वमवसेयमित्याह-**मतीति** । नीलाकारः, पीताकार इत्येवं मतावाकारानुभूतिः, तत्तद्वर्णाव्यवहि-

---

**'यदि च घटनाम'**—"अयमभिप्रायः-वस्तुनः स्वरूपं नाम, तत्प्रत्ययहेतुत्वात् स्वधर्मवत्, इह यद् यस्य प्रत्ययहेतुस्तत् तस्य धर्मः, यथा घटस्य स्वधर्मा रूपादयः, यच्च यस्य धर्मो न भवति न तत् तस्य प्रत्ययहेतुः, यथा घटस्य धर्माः पटस्य, संपद्यते च घटाभिधानाद् घटे संप्रत्ययः, तस्मात् तत् तस्य धर्मः, सिद्धश्च हेतुरावयोः, घटशब्दात् पटादिव्यवच्छेदेन घट इति प्रतिपत्त्यनुभूतेः ।"—विशेषा० बृ० गा० ६१ ।

**'साकारं च सर्वं'**—"मतिस्तावत् ज्ञेयाकारग्रहणपरिणतत्वात् आकारवती, तदनाकारवत्त्वे तु नीलस्येदं संवेदनं न पीतादेः इति नैयत्यं न स्याद् नियामकाभावात् । नीलाद्याकारो हि नियामकः, यदा च स नेष्यते तदा 'नीलग्राहिणी मतिः न पीतादिग्राहिणी' इति कथं व्यवस्थाप्यते विशेषाभावात् ? तस्मादाकारवत्येव मतिरभ्युपगन्तव्या । शब्दोऽपि पौद्गलिकत्वादाकारवानेव । घटादिकं वस्तु आकारवत्त्वेन प्रत्यक्षसिद्धमेव । तस्मात् यदस्ति तत् सर्वमाकारमयमेव । यत्त्वनाकारं तन्नास्त्येव वन्ध्यापुत्रादिरूपत्वात् तस्य ।"—विशेषा बृ० गा० ६४ ।

तोत्तरतत्तद्वर्णत्वलक्षणानुपूर्वीस्वरूपः शब्दे संस्थानविशेषः, घटादौ च कम्बुग्रीवाद्यवयवसन्निवेशलक्षणसंस्थानविशेष इत्येवमाकारस्य सर्वत्राऽनुभूयमानस्याऽपलपितुमशक्यत्वादित्याह- **नीलाकारेति** ।

सर्वस्य वस्तुनो द्रव्यात्मकत्वं व्यवस्थापयति-

**द्रव्यात्मकं च सर्वम्-उत्फणविफणकुण्डलिताकारसमन्वितसर्पवद् विकाररहितस्याऽऽविर्भावतिरोभावमात्रपरिणामस्य द्रव्यस्यैव सर्वत्र सर्वदाऽनुभवात् ।**

अनेकावस्थानुगामित्वरूपं द्रव्यत्वम् । तत्राऽनुगाम्यननुगामिनोर्मध्येऽनुगामिनो वस्तुनो वस्तुतो वस्तुत्वम्, अनुगामिरूपं चाऽन्ततः सत्स्वरूपं सर्वत्राऽनुभूयते एवेति तद्रूपस्य द्रव्यस्य नाऽपलापसम्भव इति दृष्टान्तोपदर्शनपुरस्सरमाह-**उत्फणेति** । उद्गता=प्रसारिता फणा यस्य स उत्फणः, विगता=सङ्कुचिता फणा यस्य स विफणः, कुण्डलिताकारः कुण्डलस्वरूपतां गोलकरूपतां प्राप्तः कुण्डलित आकारो यस्य स कुण्डलिताकार इति त्रिभिरपि पर्यायैः समन्वितो यः सर्पः तद्वत् । उत्फणोऽपि सर्पः सर्प एव, एवं विफणः कुण्डलिताकारश्चेत्यवस्थाभेदेऽपि यथैक एव सर्पः सर्वदानुगतः तथा द्रव्यमपि ।

यथाहि तत्त्वत उत्फणविफणादयो न सर्पाः तत्त्वान्तरम्, तथा पर्याया अपि । द्रव्यमेव तत्तत्पर्यायात्मनाऽऽविर्भूतस्वभावं तत्तत्परिणामकं भवत् तत्तद्रूपेण व्यपदिश्यते । तत्तत्पर्यायतिरोभावे स्वस्वरूपव्यवस्थितं द्रव्यमिति गीयते । न विकारो नामतः तत्त्वान्तरमित्याह- **विकाररहितस्येति** । एतच्च द्रव्यार्थिकनयमवलम्ब्येति बोध्यम् ।

सर्वस्य वस्तुनो भावात्मकत्वं व्यवस्थापयति-

**भावात्मकं च सर्वं-परापरकार्यक्षणसन्तानात्मकस्यैव तस्याऽनुभवादिति चतुष्टयात्मकं जगदिति नामादिनयसमुदयवादः ।**

**सन्तानात्मकस्यैवे**त्येवकारोपादानमत्राऽपि पर्यायार्थिकनयमाश्रित्य । **तस्य**=सर्वस्य । उपसंहरति-**इतीति** । **इति**=एवंदिशा । **चतुष्टयात्मकं**=नामस्थापनाद्रव्यभावात्मकम् । निक्षेपचतुष्टयस्य सर्वव्यापकत्ववादोऽयं प्रमाणवाद एवेत्याह-**इति नामादीति** । नामादीत्यनन्तरं निक्षेपस्य वक्तव्यत्वे यत् तत्स्थाने नयेत्यभिधानं, तत् तत्तन्निक्षेपाभ्युपगन्ता नयोऽपि तत्तन्निक्षेपशब्दाभिलाप्य इति नामाभ्युपगन्ता नयो नामनयः, स्थापनाभ्युपगन्ता नयो स्थापनानयः, एवं द्रव्यनयो भावनय इति वेदनीयमिति ।

---

**'चतुष्टयात्मकम्'**—अत्र रत्नप्रभायामवतारितो 'घटपटादिक'मिति भाष्यपाठ एव समस्ति । विशेषा० बृ० गा० ७३ ।

यद्ययं नयसमुदयवादः तदा सिद्धान्तग्रन्थेऽप्ययं वादः सुप्रथितः स्यादिति चेदस्त्येव सर्वस्य वस्तुनो नामादिचतुष्टयात्मकत्वानुमतिर्**विशेषावश्यके** । तथा च तद्ग्रन्थः-

''घटपटादिकं यत्किमपि वस्तु अस्ति लोके, तत् सर्वं प्रत्येकमेव निश्चितं चतुष्पर्यायम्, न पुनर्यथा नामादिनयाः प्राहुः-यथा केवलनाममयं वा, केवलाकाररूपं वा, केवल-द्रव्यताश्लिष्टं वा, केवलभावात्मकं वा । प्रयोगः-यत्र शब्दार्थबुद्धिपरिणामसद्भावः-तत् सर्वं चतुष्पर्यायम्-चतुष्पर्यायत्वाभावे शब्दादिपरिणामभावोऽपि न दृष्टः-यथा शशशृङ्गे, तस्मात् शब्दादिपरिणामसद्भावे सर्वचतुष्पर्यायत्वं निश्चितमिति भावः ।

''इदमुक्तं भवति-अन्योन्यसंवलितनामादिचतुष्टयात्मन्येव वस्तुनि घटादिशब्दस्य तदभिधायकत्वेन परिणतिर्दृष्टा । अर्थस्याऽपि पृथुबुध्नोदराद्याकारस्य नामादिचतुष्टयात्मकतयैव परिणामः समुपलब्धः । बुद्धेरपि तदाकारग्रहणरूपतया परिणतिः तदात्मन्येव वस्तुन्यवलोकिता । न चेदं दर्शनं भ्रान्तं-बाधकाभावात् । नाऽप्यदृष्टाशङ्कयाऽनिष्टकल्पना युक्तिमती-अतिप्रसङ्गात् । न हि दिनकरास्तमयोदयोपलब्धरात्रिन्दिवादिवस्तूनां बाधकसम्भावनयाऽन्यथात्वकल्पना सङ्गतिमावहति । न चेहाऽपि दर्शनादर्शने विहायाऽन्यद् निश्चायकं प्रमाणमुपलभामहे । तस्मादेकत्वपरिणत्यापन्ननामादिभेदेष्वेव शब्दादिपरिणतिदर्शनात् सर्वं चतुष्पर्यायं वस्त्विति सिद्धम् ।''

## निक्षेपाणां नयैः सह संयोजना

निरूपितानां निक्षेपाणां मध्ये को निक्षेपः कस्य नयस्याऽभ्युपगमविषय इत्याशङ्का-निवृत्तये निक्षेपाणां नयैः सह संयोजनमधिकरोति-

**अथ नामादिनिक्षेपा नयैः सह योज्यन्ते । तत्र नामादित्रयं द्रव्यास्तिकनयस्यैवा-ऽभिमतम्, पर्यायास्तिकनयस्य च भाव एव ।**

**तत्र**=नामादिनिक्षेपाणां नयैः सह संयोजने । **नामादित्रय**मित्युक्त्या भावस्य व्यवच्छेदः । **द्रव्यास्तिकनयस्यैवे**त्येवकारेण पर्यायास्तिकस्य व्यवच्छेदः । एतावता पर्यायास्तिकस्यैव भाव एवाऽभिमत इति लब्धेऽपि स्पष्टप्रतिपत्तये आह-**पर्यायास्तिके**ति । लिङ्गविपरिणामेन अभिमत इति सम्बध्यते ।

नयनिरूपणे 'तत्र द्रव्यार्थिकाः त्रिधा-नैगमसङ्ग्रहव्यवहारभेदा'दित्युक्तम् । इदानीं **सिद्धसेनसूरि**मतानुसरणं तत्सम्मतनयनिक्षेपसंयोजनप्रतिपादनं विधेयमित्याशयेनाऽऽह-

---

**'तत्र नामादित्रयम्'**—अत्र रत्नप्रभायामुद्धृता 'दव्वट्ठिय०' 'मूलणिभेण' 'नामं ठवणा' इति सम्मतिगाथाः तट्टीका च सन्ति ।

**आद्यस्य भेदौ सङ्ग्रहव्यवहारौ-**

नैगमनयस्य तद्भेदतया पृथगनभिधाने हेतुं दर्शयति-

**नैगमस्य यथाक्रमं सामान्यग्राहिणो विशेषग्राहिणश्चाऽनयोरेवाऽन्तर्भावात् ।**

**अनयोः**=सङ्ग्रहव्यवहारयोः, अत्र **यथाक्रम**मिति सम्बध्यते । तथा च [१]सामान्यग्राहिणो नैगमस्य सङ्ग्रहेऽन्तर्भावाद्, विशेषग्राहिणो नैगमस्य व्यवहारेऽन्तर्भावाद् न पृथक्तयाऽभिधानमतो द्रव्यास्तिकस्य सङ्ग्रहव्यवहाराभ्यां द्वैविध्यं **सिद्धसेन**मते युक्तमेवेति भावः । तद्द्वैविध्यप्रतिपादनपरा **श्रीसिद्धसेन**गाथा **सम्मति**विषया-

"दव्वट्ठियनयपयडी, सुद्धा संगहपरूवणाविसओ ।
पडिरूवे पुण वयणत्थनिच्छओ तस्स ववहारो ॥" (१-४)

(द्रव्यास्तिकनयप्रकृतिः, शुद्धा सङ्ग्रहप्ररूपणाविषयः ।
प्रतिरूपं पुनः वचनार्थनिश्चयस्तस्य व्यवहारः ॥)

एतन्निर्गलितार्थः टीकायाम्—"अत्र च सङ्ग्रहनयः शुद्धो द्रव्यास्तिकः, व्यवहारनयस्त्वशुद्ध" इति । एतेन द्रव्यास्तिकस्य सङ्ग्रहव्यवहाराभ्यां द्वैविध्यं तदनुमतं स्पष्टं प्रतीयते ।

नयनिरूपणावसरे 'पर्यायार्थिकः चतुर्धे'ति यद् उक्तम्, तत् **सिद्धसेन**मतमेवाऽवलम्ब्य[२] । तत्रैव 'ऋजुसूत्रो द्रव्यार्थिकस्यैव भेद इति तु **जिनभद्रगणिक्षमाश्रमणा**' इत्यनेन तन्मते पर्यायास्तिकस्य त्रैविध्यमेव ज्ञायते । परं चातुर्विध्याभिधाने 'आचार्य**सिद्धसेन**मते' इत्युल्लेखाभावाद् न स्पष्टप्रतीतिरत आह-

**ऋजुसूत्रादयश्च चत्वारो द्वितीयस्य भेदा इत्याचार्यसिद्धसेनमतानुसारेणाऽभिहितं जिनभद्रगणिक्षमाश्रमणपूज्यपादैः-**

---

"ननु नया नैगमादयः प्रसिद्धाः ततस्तैरेवाऽयं विचारो युज्यते । अथ तेऽत्रैव द्रव्यपर्यायास्तिकनयद्वयेऽन्तर्भवन्ति, तर्ह्युच्यतां कस्य कस्मिन्नन्तर्भावः ? इत्याशङ्क्याह"—विशेषा० गा० ७५.—'**नैगमस्य**' इति ।

---

१. नैगमस्य परस्परविशकलितसामान्यविशेषाभ्युपगमान्न प्रमाणत्वम् ।

२. अयमत्र विभागः-आचार्यश्रीसिद्धसेनमते सङ्ग्रहव्यवहारौ (नैगमस्याऽनयोरेवाऽन्तर्भावः) द्रव्यार्थिकभेदौ । ऋजुसूत्रादयश्चत्वारः पर्यायार्थिकाः । द्रव्यार्थिकौ आद्यनिक्षेपत्रयमेवेच्छतः, पर्यायार्थिकेषु च भावस्यैवाऽभ्युपगमः । क्षमाश्रमणमते तु—द्रव्यार्थिकत्वं नैगमादिचतुष्कस्य, पर्यायार्थिकत्वं च शब्दनयानाम् । द्रव्यार्थिकानां चत्वारोऽपि निक्षेपा सम्मता इत्यप्यत्र विशेषः ।

**''नामाइतियं दव्वट्ठियस्स, भावो अ पज्जवणयस्स ।**
**संगहववहारा पढमगस्स, सेसा उ इयस्स ॥ ( ७५ )'' इत्यादिना विशेषावश्यके ।**

**( नामादित्रिकं द्रव्यार्थिकस्य, भावश्च पर्यवनयस्य ।**
**सङ्ग्रहव्यवहारौ प्रथमस्य, शेषास्त्वितरस्य ॥ )**

**द्वितीयस्य**=पर्यायास्तिकनयस्य । तत्प्रतिपादनपरा **सम्मति**गाथा चेयम्–

''मूलणिभेण पज्जवणयस्स, उज्जुसुअवयणविच्छेओ ।
तस्स उ सद्दाईआ, साहपसाहा सुहुमभेआ ॥'' इति । (१-५)

(मूलमात्रं पर्यवनयस्य, ऋजुसूत्रवचनविच्छेदः ।
तस्य तु शब्दादिकाः, शाखाप्रशाखाः सूक्ष्मभेदाः ॥)

एतन्निर्गलितार्थो यथा टीकायां–''पर्यायनयस्य प्रवृत्तिराद्या ऋजुसूत्रः, सा त्वशुद्धा, शब्दः शुद्धा, शुद्धतरा समभिरूढः, अत्यन्तशुद्धा त्वेवम्भूतः'' इति । **इत्याचार्ये**ति । उक्तस्वरूपं यद् आचार्य**सिद्धसेन**मतम्, तदनुसारेणेत्यर्थः । नामादित्रिकं द्रव्यार्थिकानुमतमिति तु **सिद्धसेन**मतं–

''नामं ठवणा दविएति एस दव्वट्ठियस्स णिक्खेवो ।
भावो उ पज्जवट्ठियस्स, परूवणा एस परमत्थो ॥'' इत्यनया गाथया ज्ञायते ।

(नाम स्थापना द्रव्यमित्येष द्रव्यार्थिकस्य निक्षेपः ।
भावस्तु पर्यायार्थिकस्य, प्ररूपणा एष परमार्थः ॥)

ननु 'नामादिनिक्षेपत्रयं द्रव्यार्थिकस्य, भावनिक्षेपः पर्यायार्थिकस्ये'त्यभिहितं यत् पूज्यैः, तद् यदि **सिद्धसेन**मतानुसारेण, तर्हि **पूज्य**मते कीदृशी तद्व्यवस्थेत्यपेक्षायामाह–

**स्वमते तु नमस्कारनिक्षेपविचारस्थाने–**

**''भावं चिय सद्दणया, सेसा इच्छन्ति सव्वणिक्खेवे ॥''**

**( भावं चैव शब्दनयाः, शेषा इच्छन्ति सर्वनिक्षेपान् ।) इति वचसा त्रयोऽपि शब्दनयाः शुद्धत्वाद् भावमेवेच्छन्ति, ऋजुसूत्रादयस्तु चत्वारः चतुरोऽपि निक्षेपानिच्छन्ति- अविशुद्धत्वादित्युक्तम् ।**

**स्वमते तु**=**जिनभद्रगणिक्षमाश्रमण**मते पुनः । **त्रयः**=शब्दसमभिरूढैवम्भूताख्याः । **ऋजुसूत्रादयः**=ऋजुसूत्रनैगमसङ्ग्रहव्यवहाराः । नैगमादय इति वक्तव्ये यदेवमभिधानं तद् ऋजुसूत्रस्य द्रव्यार्थिकत्वस्पष्टप्रतिपत्तये । **चतुरोऽपि**=नामस्थापनाद्रव्यभावानपि ।

ननु नैगमसङ्ग्रहव्यवहाराणां निक्षेपचतुष्टयाभ्युपगन्तृत्वं भवतु नाम, ऋजुसूत्रस्तु पर्यायाभ्युपगन्ता द्रव्यं नेच्छत्येव, नाऽपि स्थापनाम्, किन्तु नामभावनिक्षेपावेवाऽभ्युपगच्छतीत्यविशेषेण नैगमादिनयैः सह ऋजुसूत्रस्य निक्षेपचतुष्टयाभ्युपगन्तृत्वाभिधानं न युक्तमिति नाऽऽशङ्कनीयं-नामभावनिक्षेपावेवेच्छति ऋजुसूत्र इति परेषां मतम्, न तु सूत्रानुयायिनां-सूत्रे ऋजुसूत्रस्य द्रव्याभ्युपगन्तृतया भणनादित्याशयेनाऽन्येषां मतं प्रतिक्षेप्तुमुपन्यस्यति-

**ऋजुसूत्रो नामभावनिक्षेपावेवेच्छतीत्यन्ये, तन्न, ऋजुसूत्रेण द्रव्याभ्युपगमस्य सूत्राभिहितत्वात्, पृथक्त्वाभ्युपगमस्य परं निषेधात् । तथा च सूत्रम्-''उज्जुसुअस्स एगे अणुवउत्ते आगमओ एगं दव्वावस्सयं, पुहत्तं नेच्छइत्ति ॥'' [अनु० सू० १४] (ऋजुसूत्रस्यैकोऽनुपयुक्त आगमत एकं द्रव्यावश्यकम्, पृथक्त्वं नेच्छत्यसौ ।)**

अनेन वर्त्तमानमेव वस्तूपेयते, नाऽतीतानागते, नाऽपि परकीयम्, किन्तु स्वगतमेवेति, अतीतानागतभेदापेक्षया परकीयभेदापेक्षया च **पृथक्त्वाभ्युपगमस्य**=पार्थक्याभिसन्धेः **परं**=केवलम्, **निषेधात्**=तत्र नाऽस्तीति सूत्रे प्रतिपादनात् । ऋजुसूत्रस्य द्रव्याभ्युपगन्तृत्वमस्ति, पृथक्त्वाभ्युपगमो नाऽस्तीत्युपदर्शकमनुयोगद्वारसूत्रमुपदर्शयति-**उज्जुसुअस्स** इति ।

एतद्व्याख्यानं यथा-''ऋजु=अतीतानागतपरकीयपरिहारेण प्राञ्जलं वस्तु सूत्रयति=अभ्युपगच्छतीति ऋजुसूत्रः । अयं हि वर्त्तमानकालभाव्येव वस्तूपगच्छति । नाऽतीतं-विनष्टत्वात् । नाऽप्यनागतम्-अनुत्पन्नत्वात् । वर्त्तमानकालभाव्यपि स्वकीयमेव मन्यते-स्वकार्यसाधकत्वात्, स्वधनवत् । परकीयं तु नेच्छति-स्वकार्याप्रसाधकत्वात्, परधनवत् । तस्मादेको देवादत्तादिरनुपयुक्तोऽस्य मते आगमत एकं द्रव्यावश्यकमस्ति । पुहत्तं नेच्छइत्ति=अतीतानागतभेदतः परकीयभेदतश्च पृथक्त्वं=पार्थक्यं नेच्छत्यसौ । किं तर्हि ? वर्त्तमानकालीनं स्वगतमेव चाऽभ्युपैति, तच्चैकमेवेति भावः ।'' इति ।

एतावता द्रव्यनिक्षेपाभ्युपगन्तृत्वम् ऋजुसूत्रस्य व्यवस्थापितम् । अथ स्थापनाभ्युपगन्तृत्वव्यवस्थापनायाऽऽह-

**कथं चाऽयं पिण्डावस्थायां सुवर्णादिद्रव्यमनाकारं भविष्यत्कुण्डलादिपर्यायलक्षणभावहेतुत्वेनाऽभ्युपगच्छन् विशिष्टेन्द्राद्यभिलापहेतुभूतां साकारामिन्द्रादिस्थापनां**

---

**'उज्जुसुअस्स'**—अत्र रत्नप्रभायामुद्धृत 'ऋजु=अतीतानागत०' इति टीकापाठ एव समस्ति ।

**'कथं चाऽयं'**—''इदमुक्तं भवति-यो ह्यनाकारमपि भावहेतुत्वात् द्रव्यमिच्छति ऋजुसूत्रः स साकारामपि विशिष्टेन्द्रादिभावहेतुत्वात् स्थापनां किमिति नेच्छेत् ? इच्छेदेव नात्र संशयः ।''—विशेषा० बृ० गा० २८४९ ।

**नेच्छेत् ? न हि दृष्टेऽनुपपन्नं नामेति ।**

**कथमित्यस्य नेच्छेदित्यनेन** सम्बन्धः । **अयम्**=ऋजुसूत्रः । पिण्डावस्थायामनाकारमपि सुवर्णं भविष्यत्कुण्डलादिलक्षणभावकारणत्वात् यद्यैतन्मते द्रव्यम्, तदा विशिष्टेन्द्राद्यभिलाप-हेतुभूता साकारैन्द्रादिप्रतिमैतन्मते कथं न भवेदिति समुदितार्थः । **कथं नेच्छेदि**त्यस्येच्छेदे-वेत्यर्थः । नाऽदृष्टचरीयं कल्पना येन प्रमाणवीथीं नाऽवतरेदपि-प्रत्यक्षप्रमाणादेव चेत्थमवधार्यते इति नाऽनुपपन्नत्वसङ्कथाऽपीत्याह-**न हीति** ।

प्रकारान्तरेण स्थापनाभ्युपगन्तृत्वम् ऋजुसूत्रस्य व्यवस्थापयति-

**किञ्च, इन्द्रादिसञ्ज्ञामात्रं तदर्थरहितमिन्द्रादिशब्दवाच्यं वा नामेच्छन् अयं भावकारणत्वाविशेषात् कुतो द्रव्यस्थापने नेच्छेत् ? प्रत्युत सुतरां तदभ्युपगमो न्याय्यः-इन्द्रमूर्त्तिलक्षणद्रव्य-विशिष्टतदाकाररूपस्थापनयोरिन्द्रपर्यायरूपे भावे तादात्म्यसम्बन्धेना-ऽवस्थिततत्वात्, तत्र वाच्यवाचकभावसम्बन्धेन सम्बद्धाद् नाम्नोऽपेक्षया सन्निहिततर-कारणत्वात् ।**

**तदर्थरहितम्**=इन्द्रार्थरहितम् । **अयम्**=ऋजुसूत्रः । **भावकारणत्वाविशेषाद्**=भावोल्लासकारणत्वस्य द्रव्यस्थापनयोः साधारण्यात् । कुतो द्रव्यस्थापने नेच्छेदित्युक्तिभङ्ग्या द्रव्यस्थापने इच्छेदेवेत्यर्थतो लब्धमपि स्पष्टप्रतिपत्त्यर्थमाह-**प्रत्युतेति** । **प्रत्युत**=अपितु, **सुतराम्**= अवश्यमेव, **तदभ्युपगमः**=ऋजुसूत्रनये नामाभ्युपगमवत् द्रव्य-स्थापनाभ्युप-गमनाभ्युपगमोऽपि **न्याय्यः**=न्यायादनपेतः ।

नाम इन्द्रपर्यायस्वरूपभावे वाच्यवाचकभावलक्षणसम्बन्धेनाऽवस्थितम्, द्रव्यस्थापने तु तत्र तादात्म्यसम्बन्धेनाऽवस्थिते इति भावोल्लासे नामापेक्षया सन्निहिततरकारणत्वाद्, यदि भावोल्लासे विप्रकृष्टकारणस्याऽपि नाम्नोऽभ्युपगमः, किमिति सन्निहिततरकारणयोर्द्रव्यस्थापन-योरभ्युपगमो न भवेद्, अपि तु भवेदित्येव न्यायादनपेततां=न्यायप्राप्तत्वं स्पष्टमाचष्टे-**इन्द्र-मूर्त्तीति** । पूर्वापरपर्यायानुगामित्वाद् इन्द्रस्य सहस्राक्षाद्यवयवावगुण्ठितविग्रह इन्द्रमूर्त्तिलक्षण-द्रव्यम्, तस्यैव **विशिष्टो**=विलक्षणो=यथावदानुपूर्व्याकलितावस्थानाकलितः **तदाकारः**=इन्द्र-शरीराकारोऽवयवसन्निवेशः तद्रूपा स्थापना, तयोरित्यर्थः । **तत्र**=इन्द्रपर्यायरूपभावे ।

**किञ्चे**त्यादिना यदत्र ऋजुसूत्रद्रव्यस्थापनाभ्युपगमप्रत्यलयुक्त्युपदर्शनम्, तद् इत्थं **विशेषावश्यके**- "उपपत्त्यन्तरेणाऽपि द्रव्यस्थापनेच्छामस्य साधयन् आह-ननु ऋजुसूत्रः

---

'**किञ्च**'-अत्र रत्नप्रभायामुल्लिखित 'उपपत्त्यन्तरेणाऽपि' इति भाष्यपाठः समस्ति ।

तावद् नाम निर्विवादमिच्छति । तच्च नाम इन्द्रादिसञ्ज्ञामात्रं वा भवेद् इन्द्राद्यर्थरहितं गोपालदारकादि वस्तु भवेदिति द्वयी गतिः । इदं चोभयरूपमपि नाम भावकारणमिति कृत्वा इच्छन् असावृजुसूत्रो द्रव्यस्थापने कथं नाम नेच्छेत् ? भावकारणत्वाविशेषादिति भावः । अथेन्द्रादिकं नाम भावेऽपि भावेन्द्रेऽपि सन्निहितमस्ति, तस्मादिच्छति तद् ऋजुसूत्रः, तर्हि जितमस्माभिः-तस्य न्यायस्य द्रव्यस्थापनापक्षे सुलभतरत्वात् । तथाहि-द्रव्यस्थापने अपि भावस्येन्द्रपर्यायस्याऽऽसन्नतरौ हेतू, शब्दस्तु तन्नामलक्षणो बाह्यतर इति । एतदुक्तं भवति-इन्द्रमूर्त्तिलक्षणं द्रव्यम्, विशिष्टतदाकाररूपा तु स्थापना-एते द्वे अपि इन्द्रपर्यायस्य तादात्म्येनाऽवस्थितत्वात् सन्निहिततरे, शब्दस्तु नामलक्षणो वाच्यवाचकभावसम्बन्धमात्रेणैव स्थितत्वाद् बाह्यतर इति । अतो भावे सन्निहितत्वाद् नामेच्छन् ऋजुसूत्रो द्रव्यस्थापने सन्निहिततरत्वात् सुतरामिच्छेदिति।" (विशेषा० बृ० २८५०-१)

एतावता ऋजुसूत्रस्य निक्षेपचतुष्टयाभ्युपगन्तृत्वं निष्टङ्कितम् । अथ सङ्ग्रहव्यवहारयोः तत्साधनायोपक्रमः । तत्र सङ्ग्रहव्यवहारौ स्थापनां नाऽभ्युपगच्छत इति केषाञ्चिद् मतं प्रतिक्षेप्तुमुपन्यस्यति-

**सङ्ग्रहव्यवहारौ स्थापनावर्जान् त्रीन् निक्षेपानिच्छत इति केचित्, तद् नाऽनवद्यम् ।**

**त्रीन्**=नामद्रव्यभावान् । **तद् नाऽनवद्यम्**=उक्तमतं न निर्दुष्टम् । तत्र हेतुमाह-

**यतः सङ्ग्रहिकोऽसङ्ग्रहिकोऽनर्पितभेदः परिपूर्णो वा नैगमः तावत् स्थापनामिच्छतीत्यवश्यमभ्युपेयम्-सङ्ग्रहव्यवहारयोरन्यत्र द्रव्यार्थिके स्थापनाभ्युपगमावर्जनात् । तत्राऽऽद्यपक्षे सङ्ग्रहे स्थापनाभ्युपगमप्रसङ्गः-सङ्ग्रहनयमतस्य सङ्ग्रहिकनैगममताविशेषात् । द्वितीये व्यवहारे तदभ्युपगमप्रसङ्गः-तन्मतस्य व्यवहारमतादविशेषात् । तृतीये च निरपेक्षयोः सङ्ग्रहव्यवहारयोः स्थापनानभ्युपगमोपपत्तावपि समुदितयोः सम्पूर्णनैगमरूपत्वात् तदभ्युपगमस्य दुर्निवारत्वम्-अविभागस्थाद् नैगमात् प्रत्येकं तदेकैकभागग्रहणात् ।**

नैगमो नयः त्रिविधः-सङ्ग्रहिकासङ्ग्रहिकसर्वभेदात् । तत्र-सङ्ग्रहिकः सङ्ग्रहमतावलम्बी, सामान्यमात्रग्राहीति यावत् । असङ्ग्रहिको व्यवहारमतावलम्बी, विशेषमात्रग्राहीति यावत् । सर्वोऽनर्पितभेदः परिपूर्णः सामान्यविशेषोभयग्राहीति यावत् । स च नैगमः स्थापनामभ्युपगच्छतीति भवतोऽपि सम्मतं-सङ्ग्रहव्यवहारयोरेव स्थापनावर्जनस्य भवताऽभिधानात् ।

---

**'तन्नाऽनवद्यम्'**—अत्र रत्नप्रभायामुल्लिखितः (पृष्ठ २४९) 'तत् परिहरन्०' इति भाष्यपाठः समस्ति ।

एवं च यदि सामान्यमात्रग्राही नैगमः स्थापनामिच्छति, कथं तर्हि सामान्यमात्रग्राहित्वेन तदविशिष्टः सङ्ग्रहः स्थापनां नाऽभ्युपेयात् ? एवं यदि विशेषमात्रग्राही नैगमः स्थापनां स्वीकरोति, कथं विशेषमात्रग्राहित्वेन तदविशिष्टो व्यवहारो न स्थापनां स्वीकुर्याद् ? तथा सामान्यविशेषोभयग्राही नैगमो यदा स्थापनाभ्युपगन्ता, तदा निरपेक्षयोः सङ्ग्रहव्यवहारयोः सामान्यविशेषोभयग्राहित्वाभावात् तदविशिष्टत्वाभावात् तद्दृष्टान्तावष्टम्भेन स्थापनाभ्युपगन्तृत्वस्य साधयितुमशक्यत्वेऽपि, परस्परसापेक्षत्वेन समुदितरूपयोः सङ्ग्रहव्यवहारयोः परिपूर्णनैगमरूपत्वसम्भवतः स्थापनाभ्युपगन्तृत्वं स्यादेवेत्याह-**यतः सङ्ग्रहिक** इति । नैगमः स्थापनामुपगच्छतीति कथमभ्युपेयमित्याकाङ्क्षायामाह-**सङ्ग्रहव्यवहारयोरन्यत्रे**ति । सङ्ग्रहव्यवहाराभिन्ने द्रव्यार्थिकनये स्थापनाभ्युपगमवर्जनस्याऽभावात्-'सङ्ग्रहव्यवहारौ स्थापनावर्जा'नित्युक्त्या सङ्ग्रहव्यवहारयोरेव स्थापनावर्जनस्य भवता कृतत्वादित्यर्थः ।

ननु नैगमस्य स्थापनाभ्युपगन्तृत्वेऽपि प्रकृते किमायातमित्यत आह-**तत्रे**ति । **तत्र**=नैगमस्य स्थापनाभ्युपगमे सति । **आद्यपक्षे**=सङ्ग्रहिको नैगमः स्थापनामभ्युपगच्छतीति पक्षे । **द्वितीये**=असङ्ग्रहिको नैगमः स्थापनामभ्युपगच्छतीति पक्षे । **तदभ्युपगमप्रसङ्गः**=स्थापनाभ्युपगमप्रसङ्गः । **तन्मतस्य**=असङ्ग्रहिकनैगमनयमतस्य । **तृतीये च**=सामान्यविशेषोभयग्राही यः परिपूर्णो नैगमः, स स्थापनामभ्युपगच्छतीति पक्षे च । **समुदितयो**रित्यनन्तरं **सङ्ग्रहव्यवहारयो**रिति सम्बद्ध्यते । **तदभ्युपगमस्य**=स्थापनाभ्युपगमस्य । **अविभागस्थात्**=सम्पूर्णात् । **प्रत्येकम्**=समुदितयोः सङ्ग्रहव्यवहारयोरेकैकेन पृथक्सङ्ग्रहेण पृथग्व्यवहारेण । **तदेकैकभागग्रहणात्**=नैगमैकभागस्य सामान्यग्राहित्वस्य सङ्ग्रहेण, नैगमैकभागस्य विशेषग्राहित्वस्य च व्यवहारेण ग्रहणात्=स्वधर्मतयाऽऽश्रयणादिति ।

अपि च नैगमस्य यः सामान्यावगाहनलक्षणो भागः स एव [सङ्ग्रहः, यश्च विशेषावगाहनलक्षणो भागः स एव] व्यवहार-इत्येवं सङ्ग्रहव्यवहारौ नैगमान्तर्भूतावेव । एवञ्च नैगमस्य यद् मतम्, तन्मतान्तर्गतमेव सङ्ग्रहव्यवहारयोरपि [मतमिति तयोः] मते स्थापनाभ्युपगमोऽस्तीत्यायातमेवेति तत्र तद्वर्जनं न युक्तमित्याह-

**किञ्च, सङ्ग्रहव्यवहारयोर्नैगमान्तर्भावात् स्थापनाभ्युपगमलक्षणं तन्मतमपि तत्राऽन्तर्भूतमेव, उभयधर्मलक्षणस्य विषयस्य प्रत्येकमप्रवेशेऽपि स्थापनालक्षणस्यैकधर्मस्य प्रवेशस्य सूपपादत्वात्, स्थापनासामान्य-तद्विशेषाभ्युपगममात्रेणैव सङ्ग्रहव्यवहारयोर्भेदोपपत्तिरिति यथागमं भावनीयम् ।**

---

'**किञ्च**'-अत्र रत्नप्रभायामुल्लिखितः (पृष्ठ २५०) 'इदमुक्तं भवति...' इति भाष्यपाठः समस्ति ।

अत्र यद्यपि सङ्ग्रहव्यवहारयोर्मध्ये सामान्यमात्रावगाहिनो नैगमस्य सङ्ग्रहे, विशेषमात्रावगाहिनो नैगमस्य च व्यवहारेऽन्तर्भावाद् नैगममतमपि सङ्ग्रहव्यवहारमतयोरन्तर्भूतमेवेति व्याख्यानं सम्भवति, तथापि तथा व्याख्याने-सङ्ग्रहव्यवहारयोः स्थापनावर्जने नैगमेऽपि स्थापनावर्जनस्य प्राप्तत्वात्, सङ्ग्रहव्यवहारयोरन्यत्र द्रव्यार्थिके स्थापनाभ्युपगमावर्जनादिति पूर्वग्रन्थो न सङ्गतो भवेदिति न तथा व्याख्यातम् ।

**तन्मतमपि**=सङ्ग्रहव्यवहारमतमपि (नैगममतमपि ?) । **तत्र**=स्थापनाभ्युपगमलक्षणनैगममते (सङ्ग्रहव्यवहारयोः ?) । **उभयधर्मलक्षणस्य विषयस्य**=नैगमे विषयीभूतस्य सामान्यविशेषोभयात्मकस्थापनाभ्युपगमस्य **प्रत्येकं**=व्यवहारविषयीभूते विशेषात्मकस्थापनाभ्युपगमे, सङ्ग्रहविषयीभूते सामान्यात्मकस्थापनाभ्युपगमे, **अप्रवेशेऽपि**=तयोरेकैकमात्राभ्युपगम[म?]त्वतः सामान्यविशेषोभयाभ्युपगन्तृत्वाभावात् सामान्यविशेषोभयात्मकस्थापनाभ्युपगमत्वेन रूपेण नैगममतमात्रवृत्तिना तदभिन्नतालक्षणप्रवेशासम्भवेऽपि, **स्थापनालक्षणस्यैकधर्मस्य**=सामान्यात्मकस्थापनाऽपि स्थापना भवति, विशेषात्मकस्थापनाऽपि स्थापना भवत्येवेति कृत्वा स्थापनाभ्युपगम[मत्?]त्वं नैगममते सङ्ग्रहमते व्यवहारमते चाऽविशिष्टमिति तद्रूपस्य प्रवेशस्य, **सूपपादत्वात्**=स्थापनाभ्युपगमलक्षणे सङ्ग्रहव्यवहारमते-नैगममतात्मके-स्थापनाभ्युपगमत्वात्-तथाविधनैगममतवदित्येवमुपपादयितुं शक्यत्वात् ।

स्थापनाभ्युपगमत्वलक्षणसाधारणधर्मेण [सङ्ग्रहव्यवहारयोरैक्येऽपि] स्थापनासामान्याभ्युपगमत्व-स्थापनाविशेषाभ्युपगमत्वलक्षणस्वस्वासाधारणधर्मेण भेदोऽप्यन्योन्यमुपपद्यते इत्याह-**स्थापनासामान्ये**ति । **तद्विशेषे**ति=स्थापनाविशेषेति ।

न चैषा स्वमनीषा, किन्त्वागमप्ररूपणैवेत्याह-**यथागम**मिति । आगममनतिक्रम्येत्यर्थः । न चेयमुक्तिः समानानुपूर्व्या आगमे दृश्यते इत्यत आह-**भावनीय**मिति । आगमनिष्णातैः सुधीभिरिति शेषः । तथा चाऽऽगमार्थविचारणया भङ्ग्यन्तरेणाऽऽगमोक्तमेवैतदिति सुधियां बुद्धिमधिरोहतीति ।

**तद् नाऽनवद्य**मित्यादिनाऽत्र दर्शिता सङ्ग्रहव्यवहारयोः स्थापनाभ्युपगमप्रक्रिया **विशेषावश्यके** इत्थं दृश्यते-"तत् परिहरन् आह-इह सङ्ग्रहिकोऽसङ्ग्रहिकः सर्वो वा नैगमः तावद् निर्विवादं स्थापनामिच्छत्येव । तत्र-सङ्ग्रहिकः सङ्ग्रहमतावलम्बी सामान्यवादीत्यर्थः, असङ्ग्रहिकस्तु व्यवहारनयमतानुसारी विशेषवादीत्यर्थः, सर्वस्तु समुदितः ।

"ततश्च यदि सङ्ग्रहमतावलम्बी नैगमः स्थापनामिच्छति तर्हि सङ्ग्रहः तत्समानमतोऽपि तां किं नेच्छति ? इच्छेदेवेत्यर्थः । अथ यद्यपि सामान्येन सर्वो नैगमः स्थापनामिच्छति, तथापि व्याख्यानतो विशेषप्रतिपत्तेरसङ्ग्रहिकोऽसौ तामिच्छतीति प्रतिपत्तव्यम्, न

सङ्ग्रहिकः, न ततः सङ्ग्रहस्य स्थापनेच्छा निषिध्यते (विधीयते) तर्हि एकत्र सन्धित्सतोऽन्यत्र प्रच्यवते । एवं हि सति व्यवहारोऽपि स्थापनां किं नेच्छति ? कुतः ? असङ्ग्रहिक-नैगमसमानधर्मा व्यवहारनयोऽपि वर्त्तते विशेषवादित्वात्, ततश्चैषोऽपि स्थापनामिच्छेदेवेति निषिद्धा चाऽस्याऽपि त्वया । अथ परिपूर्णो नैगमः स्थापनामिच्छति, न तु सङ्ग्रहिको-ऽसङ्ग्रहिको वेति भेदवान्, अतः तदृष्टान्तात् सङ्ग्रहव्यवहारयोर्न स्थापनेच्छा साधयितुम् । अत्रोच्यते-तर्हि नैगमसमानधर्माणौ द्वावपि समुदितौ सङ्ग्रहव्यवहारौ युक्तावेव । इदमत्र हृदयम्-तर्हि प्रत्येकं तयोरेकतरनिरपेक्षयोः स्थापनाभ्युपगमो मा भूदिति समुदितयोः तयोः सम्पूर्णनैगम-रूपत्वात् तदभ्युपगमः केन वार्यते ? अविभागस्थाद् नैगमात् प्रत्येकं तदेकैकताग्रहणा''दिति । (विशेषा० बृ०गा० २८५२-३)

**किञ्च सङ्ग्रहव्यवहारयो**रित्यादिना दर्शिताया युक्तेः तत्रैवं प्ररूपणा-''इदमुक्तं भवति-यथा विभिन्नयोः सङ्ग्रहव्यवहारयोर्नैगमोऽन्तर्भूतः तथा स्थापनाभ्युपगमलक्षणं तन्मतमपि तयोरन्तर्भूतमेव । ततो भिन्नं भेदेन तौ तदिच्छत एव, स्थापनासामान्यं सङ्ग्रह इच्छति, स्थापनाविशेषांस्तु व्यवहार इत्येतदेव युक्तम्, तदनिच्छा तु सर्वथाऽनयोर्न युक्ते''ति । (विशेषा० बृ०गा० २८५४)

## जीवविषयकद्रव्यनिक्षेपस्य चर्चा

**एतैश्च नामादिनिक्षेपैर्जीवादयः पदार्था निक्षेप्याः ।**

नामस्थापनाद्रव्यभावनिक्षेपानां वस्तुमात्रगतत्वं समर्थयिष्यन् ग्रन्थकारो द्रव्यनिक्षेप-भिन्नानां त्रयाणां निक्षेपानां जीवे सम्भवेऽपि, द्रव्यनिक्षेपस्य न तत्र सम्भव इति कथं निक्षेप-चतुष्टयस्य वस्तुत्व(त्वा)व्यापकत्वमिति तावदादावाह-

**तत्र यद्यपि यस्य जीवस्याऽजीवस्य वा जीव इति नाम क्रियते स नामजीवः,**

---

**'तत्र यद्यपि यस्य'**-''चेतनावतोऽचेतनस्य वा द्रव्यस्य जीव इति नाम क्रियते स नामजीवः, यः काष्ठ-पुस्त-चित्रकर्मा-ऽक्षनिक्षेपादिषु स्थाप्यते जीव इति स स्थापनाजीवः, देवता-प्रतिकृतिवत् इन्द्रो रुद्रः स्कन्दो विष्णुरिति । द्रव्यजीव इति गुणपर्यायवियुक्तः प्रज्ञास्थापितो-ऽनादिपारिणामिकभावयुक्तो जीव इत्युच्यते । अथवा शून्योऽयं भङ्गः । यस्य हि अजीवस्य सतो भव्यं जीवत्वं स्यात् स द्रव्यजीवः स्यात् अनिष्टं चैतत् । भावतो जीवः औपशमिकक्षायिक-क्षायोपशमिकौदयिकपारिणामिकभावयुक्ता उपयोगलक्षणाः संसारिणो मुक्ताश्च द्विधा वक्ष्यन्ते ।''-तत्त्वार्थभा० १.५, तत्त्वार्थभा० वृ० १.५.

**सुखादिना सुखान्तेन लालान्तेन दिलादिना ।**<br>**महेन्द्रेण च सम्भूय कृतिरेषा समापिता ॥**

**देवतादिप्रतिमा च स्थापनाजीवः, औपशमिकादिभावशाली च भावजीव इति जीवविषयं निक्षेपत्रयं सम्भवति, न तु द्रव्यनिक्षेपः ।**

**तत्र**=निक्षेपचतुष्टये । **जीवस्य**=चेतनावतः, **अजीवस्य**=चेतनारहितस्य, **स**=चेतनावान् अचेतनो वा । **देवतादी**त्यादिपदाद् मनुष्यादेरुपग्रहः । **औपशमिकादी**त्यादिपदात् क्षायिक-क्षायोपशमिकौदयिकपारिणामिकानां ग्रहणम् ।

अत्र **देवतादि**पदेन [१]देवतादिशरीरगतजीवस्य ग्रहणम्, अन्यथा देवतादिशरीरस्य जीवसम्भिन्नत्वमाश्रित्य तत्प्रतिमायां स्थापनाजीवत्वे, तच्छरीरकारणस्य द्रव्यजीवत्वमपि स्यादिति द्रव्यजीवासम्भवप्रतिपादनमसङ्गतं स्यात् । अत एव **तत्त्वार्थे**-"यः काष्ठपुस्तक-चित्रकर्माक्षनिक्षेपादिषु स्थाप्यते जीव इति स स्थापनाजीवः देवतादिप्रतिकृतिवद्, इन्द्रो रुद्रः स्कन्दो विष्णु"रित्यसद्भूतस्थापनैव जीवस्य दर्शिता । देवतादिप्रतिकृतिवदिति तु यथा देवतादिप्रतिकृतिर्देवतादिस्थापना तथेत्यर्थकम् । देवतादिप्रतिमाया एव स्थापनाजीवत्वे तस्य दार्ष्टान्तिकत्वतो दृष्टान्तता न स्यादिति बोध्यम् । (तत्त्वार्थभाष्य १.५)

द्रव्यनिक्षेपस्य जीवविषये कथं न सम्भव इत्यपेक्षायामाह-

**अयं हि तदा सम्भवेत्, यद्यजीवः सन् आयत्यां जीवोऽभविष्यत्, यथाऽदेवः सन् आयत्यां देवो भविष्यन् द्रव्यदेव इति । न चैतदिष्टं सिद्धान्ते-यतो जीवत्वमनादिनिधनः पारिणामिको भाव इष्यते इति ।**

**अयं**=द्रव्यजीव इत्याकारकः प्रकृते द्रव्यनिक्षेपः, **हि**=यतः । **अजीवः सन्**=पूर्वकाले उपयोगलक्षणचेतनारहितः सन्, **आयत्याम्**=आगामिकाले, **जीवोऽभविष्यत्**=चेतनावान् स्यात् । तदोत्तरकालभाविभावजीवकारणत्वेन पूर्वमचेतनतया व्यवस्थितस्य द्रव्यत्वमिति कृत्वा द्रव्यजीव इति द्रव्यनिक्षेपः सम्भवेत् ।

भवतु, एवमेवाऽभ्युपगमे का हानिरित्यत आह-**न चैतदिष्ट**मिति । पूर्वमजीवस्य सत उत्तरकाले जीवत्वमुपजायते इत्येतद् जैनराद्धान्ते नाऽभ्युपगतम् । एतदेव कुतो ज्ञातं भवतेत्यत आह-**यत** इति । **अनादिनिधनः**=स्वत उत्पत्तिविनाशरहितः, सदातन इति यावत् ।

---

१. इदमत्र तत्त्वम्-देवतादिशरीरप्रतिमा यथा स्थापनादेवताद्युच्यते तथा देवतादिशरीरं जीवसम्भिन्नमिति कृत्वा सा प्रतिमा स्थापनाजीव इत्यपि वक्तुं शक्यते एव । तथा च 'देवतादिप्रतिमा स्थापनाजीव' इति कथनमपि युक्तमेव । परमेवमभ्युपगमे देवतादिशरीरोपादानस्य पुद्गलादेर्द्रव्यजीवत्वमपि स्याद्-देवतादिशरीरस्य भावजीवत्वेनाऽभिमतत्वाद् । एवं सति 'जीवविषयं निक्षेपत्रयं सम्भवति, न तु द्रव्यनिक्षेप' इति वचनमयुक्तं भवेदिति 'देवतादिप्रतिमे'त्यनेन देवतादिशरीरगतजीवप्रतिमाऽसद्भूतस्थापनारूपा ग्रहीतव्या ।

पारिणामिकस्याऽपि भव्यत्वस्य मुक्तौ [१]विनाशो भवति, नैवं जीवत्वस्येत्यावेदयितुं **जीवत्व**मित्युक्तम् । **इष्यते** इत्यत्र **सिद्धान्ते** इत्यनुवर्त्तते ।

एतावता द्रव्यनिक्षेपस्य जीवेऽभावाद्, निक्षेपचतुष्टयस्य वस्तुत्वाव्यापकत्वं प्रतिपाद्येदानीं तद्व्यापकत्वपक्षपातादाह-

**तथापि गुणपर्यायवियुक्तत्वेन बुद्ध्या कल्पितोऽनादिपारिणामिकभावयुक्तो द्रव्यजीवः ।**

**तथापि**=उक्तदिशा द्रव्यनिक्षेपस्य जीवेऽसम्भवेऽपि । **गुणपर्यायवियुक्तत्वे**नेति । सहभाविनो गुणा जीवस्योपयोगादयः, क्रमभाविनः पर्याया जीवस्य हर्षशोकविषादादयः-ताभ्यां वियुक्तत्वेन=रहितत्वेनेत्यर्थः ।

[२]यस्य यो गुणः, तस्य तत्र यदाकदाप्यभावेऽपि यस्मिन् कस्मिन्नपि क्षणे पर्यायसामान्याभावाभ्युपगतौ-'द्रवति=तान् तान् पर्यायान् गच्छतीति द्रव्य'मिति व्युत्पत्तिलभ्यस्य पर्यायानुगामित्वस्य तदानीमभावेन द्रव्यत्वमेव न स्याद् । एवमुत्पादव्ययध्रौव्ययुक्तत्वं वस्तुन सर्वकालनियतं सत्त्वम्[३] । तत्र द्रव्यस्य स्वस्वरूपेण ध्रौव्ये प्रतिक्षणं कस्यचित् पर्यायस्योत्पादः, कस्यचित् पर्यायस्य विनाश इत्यत एवोत्पादव्ययौ तत्र । पर्यायवियुक्ते च तदुत्पादव्ययाधीनोत्पादव्यययोरभावाद् निरुक्तलक्षणं सत्त्वमेव न स्याद् । व्यापकस्य सत्त्वस्याऽभावे तद्व्याप्यं द्रव्यत्वमपि न भवेदेव । तथा गुणपर्यायवद् द्रव्यमिति द्रव्यलक्षणस्य तदानीमभावादपि द्रव्यत्वं तदानीं न स्यादतो गुणपर्यायवियुक्तत्वं नाऽस्त्येव द्रव्यस्येत्यत आह-**बुद्ध्या कल्पित** इति । शास्त्रे [४]'गुणपर्यायवद् द्रव्य'मित्यनेन गुणपर्याययोर्धर्मतया द्रव्यस्य धर्मितयोपादानाद्, धर्मधर्मिभावस्य दण्डी पुरुष इत्यादौ दण्डमन्तरेणाऽपि पुरुषस्य, पुरुषमन्तरेणाऽपि दण्डस्य दर्शनेन पृथग्भावो यथा तत्र, तथाऽत्राऽप्येवं स्याद् बुद्ध्या कल्पितः ।

ननु तत्र पुरुषस्याऽसाधारणस्वभावपुरुषत्वमस्तीति दण्डवियुक्तत्वेऽपि पुरुषः सम्भवति, जीवस्य तु ज्ञानादिवियुक्तत्वे ईदृशस्वभाव एव नोपलभ्यते इति कथं बुद्ध्याऽपि गुणपर्यायवियुक्तत्वेन स्थापितः स स्यादित्यत आह-**अनादी**ति । अनादिपारिणामिको यो जीवादिलक्षणो

---

१. औपशमिकादिभव्यत्वाभावाच्चा.... ॥ (तत्त्वा० १०-४)

२. इत आरम्भ 'बुद्ध्या कल्पित' इत्युक्तौ कारणत्रयं दर्शितमस्ति ।

३. उत्पादव्ययध्रौव्ययुक्तं सत् ॥ (तत्त्वा० ५-२९)

४. गुणपर्यायवद् द्रव्यम् ॥ (तत्त्वा० ५-३७)

भावः तेन युक्त इत्यर्थः । [१]सादेर्भावस्य पर्यायत्वेन तद्युक्तस्य बुद्ध्या पर्यायवियुक्तत्वकल्पना न सम्भवतीत्यतोऽनादीति ।

**शून्योऽयं भङ्ग इति यावत्—सतां गुणपर्यायाणां बुद्ध्याऽपनयस्य कर्तुमशक्यत्वात् । न खलु ज्ञानायत्ताऽर्थपरिणतिः, किन्त्वर्थो यथा यथा विपरिणमते तथा तथा ज्ञानं प्रादुरस्तीति ।**

**तत्त्वार्थाधिगमे** "अथवा शून्योऽयं भङ्ग" इत्येवमुल्लेखादेकस्मिन् पक्षे उक्तदिशा द्रव्यजीवः सम्भवति, पक्षान्तरे न सम्भवतीत्यर्थो लभ्यते । ग्रन्थकारेण तु अथवेति पक्षान्तरसूचकं वचनमनुपादायैव **इति यावदि**त्यन्ते वचनमुपादाय यत् तदेवोक्तम्, तेनेदं ज्ञापितं—विभिन्नपक्षतयाऽवबोधनस्थले, आदावन्ते [वा ?], वा इति केचिदित्यन्ये आचार्या इत्याद्यन्यतमवचनमवश्यमेव भवति । तादृशवचनाभावाद् न कल्पान्तरमिति प्रथमस्य प्रपञ्चनम्[२] । अथवेत्युक्तिश्च प्रतिपाद्यबुद्धिवैशद्यायेत्थं प्रथममभिहितम्, न तु तथा सम्भवतीति बोधनार्थम् ।

कथं द्रव्यजीव उक्तदिशा प्रतिपादितोऽपि शून्यः ? शून्यत्वं ह्यसम्भवदर्थकत्वे सत्त्वेन वचनात्मकभङ्गस्य घटते, नाऽन्यथेत्यतोऽसम्भवदर्थकत्वं दर्शयति-**सतामि**ति । **सतां**=जीवद्रव्ये सर्वदैव विद्यमानानाम् ।

यदि यथा ज्ञानं भवति तथैव वस्तु सन् (वस्तुतः ?) अर्थो भवेत्, तदा सम्भाव्येताऽपि गुणपर्यायवियुक्तत्वेन जीवस्य बुद्धितः तथाविधो जीवः । न चैवम्, किन्तु येन रूपेणाऽर्था भवन्ति तेन रूपेणैव तज्ज्ञानं भवति । तथा च गुणपर्यायवियुक्तस्य जीवस्याऽभावात् तथा बुद्धिः सम्भवत्येव नेति न तयाऽसम्भवन्त्या बुद्ध्या द्रव्यस्थापना युक्तेत्याह-**न खलु** इति ।

नन्वेवं **यद्यपी**त्यादिना संसूचिता 'निक्षेपचतुष्टयस्य न सर्वव्यापकता स्या'दित्याशङ्काऽनिवारितप्रसरैवेत्याशङ्कां प्रतिक्षिपति-

**न चैवं नामादिचतुष्टयव्यापिताभङ्गः, यतः प्रायः सर्वपदार्थेष्वन्येषु तत् सम्भवति । यद् यत्रैकस्मिन् न सम्भवति नैतावता भवत्यव्यापितेति वृद्धाः ।**

**एवं**=द्रव्यजीव इति भङ्गस्य शून्यत्वे सति । निषेधहेतुमाह-**यत** इति । **अन्येषु**=जीवभिन्नेषु । द्रव्यधर्मो द्रव्याधर्मो द्रव्याकाश इत्यादिरपि धर्मास्तिकायादिषु जीवभिन्नेष्वपि भङ्गो न सम्भवत्येवेत्यत उक्तं **प्राय** इति । तथा च जीवपदं तादृशानामुपलक्षणम् । एतादृशाश्च

---

१. सादिभावस्य पर्यायत्वेन, जीवत्वस्य सादिभावत्वे पर्यायरूपत्वेन, बुद्ध्या पर्यायवियुक्तत्वकल्पनाकाले जीवे तदपि न स्यादतोऽनादीत्युदितमित्याशयः ।

२. 'अथवा शून्योऽयं भङ्ग' इति वाक्यं 'गुणपर्याय...द्रव्यजीव' इति पूर्ववाक्यस्य विवेचनम् ।

कतिपये एवेति तदव्यापकत्वेऽपि नाऽव्यापित्वमित्यभिसन्धिः ।

**तद्**=निक्षेपचतुष्टयम् । **अत्रैकस्मिन्**=जीवपदार्थे एव केवले । **न सम्भवतीति** । द्रव्यजीवाभावाद् निक्षेपचतुष्टयमिति शेषः । **नञो भवतीत्यनेनाऽन्वयः** । **एतावता**=जीवेऽसम्भवमात्रेण । **वृद्धाः**=प्रवचनवृद्धा **विशेषावश्यककारादयः**, वदन्तीति शेषः ।

जीवेऽपि द्रव्यनिक्षेपः सम्भवत्येवेति वस्तुत एव वस्तुव्यापित्वं निक्षेपचतुष्टयस्य । यः खलु 'जीव प्राणधारणे' इति धातुनिष्पन्नजीवपदस्य प्राणधारणादिरूपव्युत्पत्तिलभ्यमर्थमुपयोगलक्षणं जानाति स, यदा तदुपयोगो न वर्त्तते तदानीं द्रव्यजीव इति मतमुपदर्शयति-

**जीवशब्दार्थज्ञः तत्राऽनुपयुक्तो द्रव्यजीव इत्यप्याहुः ।**

**तत्र**=जीवशब्दार्थे । एतच्चाऽनुपयोगो द्रव्यमित्याश्रित्य ।

कारणं द्रव्यमित्यवलम्बनेन द्रव्यजीवमुपपादयतां मतमाह-

**अपरे तु वदन्ति-अहमेव मनुष्यजीवो द्रव्यजीवोऽभिधातव्यः, उत्तरं देवजीवमप्रादुर्भूतमाश्रित्य अहं हि तस्योत्पित्सोर्देवजीवस्य कारणं भवामि, यतश्चाऽहमेव तेन देवजीवभावेन भविष्यामि, अतोऽहमधुना द्रव्यजीव इति ।**

**अप्रादुर्भूतं**=वर्त्तमानकालेऽप्रकटीभूतमर्थाद् भविष्यत्काले भाविनम् । उत्तरकालभाविनो देवजीवस्य मनुष्यजीवः कारणमिति कृत्वा मनुष्यजीवो द्रव्यजीवः इत्येतदेव तयोः कार्यकारणसमर्थनेनोपपादयति-**अहं हीति** ।

**अह**मित्यनेनैतत्स्वरूपसमर्थनपरा आचार्याः स्वस्याऽ(स्वस्य)विशिष्टसाध्वाचारसेवनपरायणत्वतोऽवश्यमुत्तरकालभाविदेवभवं निर्विचिकित्समवधारयन्त आत्मानमेव परामृशन्ति । आस्तां दृष्टान्तान्तरगवेषणा, मामेव तावद् द्रव्यजीवं जानन्तु भवन्त इति नाऽव्यापिता निक्षेपचतुष्टयस्य । अन्यद् व्यक्तम् ।

**एतत् कथितं तैर्भवति-पूर्वः पूर्वो जीवः परस्य परस्योत्पित्सोः कारणमिति ।**

**एतत्**='पूर्वः पूर्व' इत्यादिनाऽनन्तरमेवोपवर्ण्यमानम् । **तैः**=मनुष्यजीवस्य द्रव्यजीवत्वमुपगच्छद्भिराचार्यैः । **परस्य परस्ये**त्यनन्तरं जीवस्येति दृश्यम् ।

**अस्मिन् च पक्षे सिद्ध एव भावजीवो भवति, नान्य इति एतदपि नाऽनवद्यमिति तत्त्वार्थटीकाकृतः ।**

**अस्मिन् च पक्षे**=अनन्तराभिहिताचार्यमते च । **सिद्ध** एवेति । सिद्धजीवभवनान्तरं

पुनरपरजीवभावेन भवनाभावात्, कस्यचिदपि विशिष्टजीवस्य[१] कारणत्वाभावात् सिद्धजीवस्य द्रव्यजीवत्वं न सम्भवतीति स एव भावजीवः ।

मनुष्यादिजीवस्य तु यावद् न सिद्धिः, तावदवश्यमुत्तरकाले विशिष्टजीवभावेन भवनमिति कारणत्वाद् द्रव्यजीवत्वमित्येवकारलभ्यमेव स्पष्टयति-**नाऽन्य** इति । सिद्धभिन्न-जीवो न भावजीव इत्यर्थः ।

**इति**=एतस्मात् कारणात्, **एतदपि**=अनन्तरोपदर्शिताचार्यमतमपि, **नाऽनवद्यं**=न निर्दुष्टं सिद्धान्यजीवे भावजीव इति निक्षेपस्याऽघटनात्, सिद्धे द्रव्यजीव इति निक्षेपस्याऽघटनात्, तन्निबन्धनाव्यापितादोषसद्भावात् ।

स्वयम्—उक्ताचार्यमते मनुष्यजीवादौ विशिष्टजीवे 'द्रव्यजीव' इति द्रव्यनिक्षेपस्य सम्भवेऽपि, विशेषणा[न]नुरक्ते जीवे 'द्रव्यजीव' इत्येवं द्रव्यनिक्षेपो नैवमुपपादितः स्यात् । निर्विशेषं जीवं प्रति मनुष्यजीवादेरकारणत्वाद्, देवजीवं प्रति मनुष्यजीवस्य कारणत्वेन, 'मनुष्यजीवो द्रव्य[देव]जीव' इत्येवं द्रव्यनिक्षेपाकारो भवेद्, न तु द्रव्यजीव इति । नहि पार्थिवविशेषघटं प्रति कारणस्य मृत्पिण्डस्य द्रव्यघट इति व्यपदेशवद् द्रव्यपार्थिव इति व्यपदेश इति—दोषदुष्टत्वं सङ्गमयिष्यन् **तत्त्वार्थटीकाकृ**दुक्तदोषं तावदादौ परिहरति-

**इदं पुनरिहाऽवधेयम्-इत्थं संसारिजीवे द्रव्यत्वेऽपि भावत्वाविरोधः-एकवस्तु-गतानां नामादीनां भावाविनाभूतत्वप्रतिपादनात् ।**

**इह**=अनन्तराभिहिताचार्यमतगत-तत्त्वार्थटीकाकृदुक्त-सिद्धमात्रवृत्तिभावजीवत्व-प्रसङ्गदोषे । **इदम्**=इत्थमित्यादिनाऽनन्तरमेव वक्ष्यमाणम् । **अवधेयं**=सुधिया परिशीलनीयम् । **इत्थम्**=उत्तरोत्तरजीवं प्रति कारणत्वतः । **भावत्वाविरोधः**=भावत्वविरोधाभावोऽर्थात् कारण-त्वाद् द्रव्यत्वमप्यस्तु, कार्यापन्नत्वाद् अनादिपारिणामिकजीवत्वादिभावयोगात् प्राणधारणादि-मत्त्वाच्च भावत्वमप्यस्तु, नाऽस्त्यत्र कश्चित् प्रतिकूलः तर्कः । एवं च सिद्ध एव भावजीवो, नाऽन्य इति दोषस्य नाऽवकाशः । प्रत्युत शास्त्रे नामादीनामेकवस्तुगतानां भावाविनाभूतत्व-प्रतिपादनतो भावत्वाविरोध एव प्रतिपादितोऽस्तीत्याह-**एके**ति ।

कुत्र प्रतिपादनमित्यपेक्षायामाह-

**तदाह भाष्यकारः-**

**"अहवा वत्थूभिहाणं, नामं ठवणा य जो तयागारो ।**
**कारणया से दव्वं, कज्जावन्नं तयं भावो ॥" ( ६० ) इति ।**

---

१. षष्ठी निरूपितार्थे । तथाच विशिष्टजीवनिरूपितकारणत्वाभावात् सिद्धजीवस्य न द्रव्यजीवत्वमित्यर्थः ।

**( अथवा वस्त्वभिधानं, नाम स्थापना यस्तदाकारः ।**
**कारणत्वमस्य द्रव्यं, कार्यापन्नं तकं भावः ॥)**

तत्र स्वाभिमतं दोषमुद्भावयति-

**केवलमविशिष्टजीवापेक्षया द्रव्यजीवत्वव्यवहार एव न स्याद्, मनुष्यादेर्देवत्वादि-विशिष्टजीवं प्रत्येव हेतुत्वादिति अधिकं नयरहस्यादौ विवेचितमस्माभिः ॥**

एतत्स्वरूपविशेषजिज्ञासुभिरस्मन्निर्मितनयरहस्यादिकमवलोकनीयम् । ग्रन्थगौरव-भयाद् नेह तद्विशेषविचारः प्रतन्यते इत्याशयेनाऽऽह-**अधिकमिति** ।

●●●

## ।। टीकाकर्तुः प्रशस्तिः ।।

स्वपरसमयविज्ञो जैनसिद्धान्तनिष्ठः,
प्रमितिनयविदग्धः सर्वनिक्षेपदक्षः ।
मतमननप्रवीणो नव्यनिर्माणकर्त्ता,
क्व नु सकलयशःश्रीः **श्रीयशो**नामधेयः ।।१।। (मालिनी)

क्व च विगतमतिश्रीर्नीतिमात्रे विषण्णो,
निजपरमतबोधे हीनबुद्धिश्च मादृक् ।
अनुभवतु तथापि पृष्ठतःकृत्य मूला-
नुगमनसुमहिम्नाऽऽदेयतामेष ग्रन्थः ।।२।।

स्खलनमिह विचारे यद् भवेत् तत्त्वदृष्ट्यां,
परकृतिमननार्थाः शोधयिष्यन्ति तत्तु ।
न हि भवति नियोगस्तान् प्रतीत्थं कदापि,
न रविरुदयमेति प्रेरितोऽन्यस्य वाक्यैः ।।३।।

उपकृतिरपरस्याऽप्यस्तु मा वाऽस्त्वमुष्माद्,
मम मननमवश्यम्भावि चाऽतो विचारात् ।
भवति सफल एवं श्रीगुरोर्नेमिसूरे-
श्चरणकमलपूजासम्बसादोःक्षयार्थः (? लम्बनाद् दोःक्षयार्थः) ।।४।।

देशे **गुर्ज्जर**नाम्नि **राजनगरे** लक्ष्मीभृतामास्पदे,
**पाडापोल**सुनामचारुविदिते तद्ग्रामभागेऽभवत् ।
श्री**प्राग्वाट**कुलीन-शाह**अमथालाल**ेतिनामा सुधीः,
सुश्राद्धः समुपात्तयोग्यविभवो धर्मक्रियातत्परः ।।५।। (शार्दूलविक्रीडितम्)

पुत्रौ तस्य बभूवतुर्बुधवरौ धर्मैकनिष्ठौ परः,
श्रीमान् **गोकुलदास**नामविदितः पाश्चात्यविद्यैकभूः ।
अन्य**श्रीकमलाल**नामगदितो यो दाक्तरश्चैम डी
गत्वा देश**ममेरिका**दिकमतो लब्धप्रतिष्ठोऽभवत् ।।६।।

श्रीसूरीश्वर**नेमिसूरि**निकटे दीक्षां प्रपद्याऽग्रजः,
कश्चित्कालमुपास्य देवगतिको जातः **सुभद्रो** मुनिः ।

दीक्षां प्राप्य सुतोऽस्य सम्प्रति गुरोः **सोमस्य** पार्श्वे स्थितो,
**मोक्षानन्द**मुनिः तथाऽस्य भगिनी साध्वी **सुचारित्रिणी** ॥७॥

श्रीमान् **त्रिकमलाल** आत्तविभवः श्री**नेमिसूरे**र्गुरो-
र्ज्ञात्वाऽसारमशेषमेव भवजं दीक्षां सभार्योऽगृहीत् ।
सोऽयं **रत्नप्रभा**भिधो मुनिवरः चारित्रचूडामणिः,
सा चाऽपि प्रमदा समस्ति विदिता साध्वी **विमुक्त्यर्थिनी** ॥८॥

श्री**वीर**स्य प्रभोश्चरित्रममलं तद्ध्यानलीनात्मना,
कृत्वा चाऽऽङ्ग्लजभाषया सुविशदं तद्भावितार्थस्पृहः ।
मां जैनागममान्यमानप्रभृतेः संक्षिप्ततो ज्ञप्तये,
भूयोऽभ्यर्थितवान् स शास्त्ररचने सुस्पष्टबोध्यार्थके ॥९॥

किञ्चाऽस्याऽध्ययने भवेद् नु सुगमो यावद् विचारोद्गमः,
तावद् दृष्टिमुपागता कृतिरियं श्री**तर्कभाषा**भिधा ।
श्रीमद्वाचकपुङ्गवस्य **यशसो** वृद्धोक्तिसंवादिता,
तट्टीकोदयसूरिणा विरचिता **रत्नप्रभा**ख्या मया ॥१०॥

श्रीमन्**नेम्य**भिधावतः सुमहतः श्रीसूरिचूडामणेः,
तीर्थोद्धारपरायणस्य कृतिनो विज्ञातशास्त्राम्बुधेः ।
**सम्मत्या**दिकवृत्तिगुम्फनपटो**र्हेमप्रभा**दिप्रभा-
नल्पोद्भावनतत्परस्य सुगुरोर्भक्त्या कृतैषा प्रभा ॥११॥

श्री**सिद्धाचल**तुल्यगौरवभृति श्रीमत्**कदम्बाचले**,
पूर्णा व्योमखखद्वि (२०००) सम्मिततमेऽब्दे वैक्रमीये शुभे ।
माघे नागतिथौ सिते रविदिने **रत्नप्रभे**यं सतां,
सम्मोदाय विचार्यमाणहृदयाऽस्त्वापुष्पदन्तोदयम् ॥१२॥

टीकामेतां स्वगुरुरचितां साभिधेयां समग्रां,
शुद्धीकृत्य प्रमुदितमना **नन्दना**ख्योऽपि सूरिः ।
आशास्तेऽसौ जिनवरमतात् क्षुण्णमत्राऽस्ति यत् तत्,
क्षन्तव्यं स्तात् सकरुणमनस्सूरिवर्यैः समस्तम् ॥१३॥ (मन्दाक्रान्ता)

● ● ●

## परिशिष्ट-१

### महोपाध्यायश्रीयशोविजयकृता

# जैनतर्कभाषा (मूल)

**सम्पादकः - पण्डित सुखलालजी संघवी**

**प्रतिपरिचय**

**मु० - मुद्रित-यशोविजयकृतग्रन्थमाला (पृ. ११३-१३२) प्र. भावनगर जैनधर्म प्रसारक सभा**

**प्र० - प्रवर्त्तक श्रीमत् कांतिविजय पुस्तकसंग्रह, लेखन संवत् १७३६**

**सं० - पाटण संघ पुस्तक संग्रह (वखतजीनी शेरी)**

**डब्बा नं० ४० पोथी नं० ३६ पृष्ठ ४०-५३**

**व० - पाटण संघ पुस्तक संग्रह (वखतजीनी शेरी) डब्बा नं० २७, पोथी नं० २५**

## १. प्रमाणपरिच्छेदः ।

**ऐन्द्रवृन्दनतं नत्वा जिनं तत्त्वार्थदेशिनम् ।**
**प्रमाणनयनिक्षेपैस्तर्कभाषां तनोम्यहम् ॥**[1]

[प्रमाणसामान्यस्य लक्षणनिरूपणम् ।]

तत्र-स्वपरव्यवसायि ज्ञानं प्रमाणम्[2]-स्वम्[3] आत्मा ज्ञानस्यैव स्वरूपमित्यर्थः, परः तस्मादन्योऽर्थ इति यावत्, तौ व्यवस्यति यथास्थिततत्वेन निश्चिनोतीत्येवंशीलं स्वपरव्यवसायि । अत्र दर्शनेऽतिव्याप्तिवारणाय ज्ञानपदम् । संशयविपर्ययानध्यवसायेषु तद्वारणाय व्यवसायिपदम् । परोक्षबुद्ध्यादिवादिनां **मीमांसकादीनाम्**, बाह्यार्थापलापिनां ज्ञानाद्वैत**वादिनां** च मतनिरासाय स्वपरेति स्वरूपविशेषणार्थमुक्तम् ।

ननु यद्येवं सम्यग्ज्ञानमेव प्रमाणमिष्यते तदा किमन्यत् तत्फलं वाच्यमिति चेत्, सत्यम्, स्वार्थव्यवसितेरेव तत्फलत्वात् । नन्वेवं प्रमाणे स्वपरव्यवसायित्वं न स्यात्, प्रमाणस्य परव्यवसायित्वात् फलस्य च स्वव्यवसायित्वादिति चेत्, न, प्रमाण-फलयोः कथञ्चिदभेदेन तदुपपत्तेः ।

इत्थं चात्मव्यापाररूपमुपयोगेन्द्रियमेव प्रमाणमिति स्थितम् । न[4] ह्यव्यापृत आत्मा स्पर्शादिप्रकाशको भवति, निर्व्यापारेण कारकेण क्रियाजननायोगात्, मसृणतूलिकादिसन्निकर्षेण सुषुप्तस्यापि तत्प्रसङ्गाच्च ।

केचित्तु-

"**ततोऽर्थग्रहणाकारा शक्तिर्ज्ञानमिहात्मनः ।**
**करणत्वेन निर्दिष्टा न विरुद्धा कथञ्चन ॥**" [तत्त्वार्थश्लोकवा० १.१.२२]इति-

---

१. ०निःक्षेपै०-प्र० सं० व० । २. प्र० न० १. २. । ३. स्या० र० पृ० ३३-३४ । ४. स्या० २० पृ० ५० ।

लब्धीन्द्रियमेवाऽर्थग्रहणशक्तिलक्षणं प्रमाणं सङ्गिरन्ते, तदपेशलम्, उपयोगात्मना करणेन लब्धेः फले व्यवधानात्, शक्तीनां परोक्षत्वाभ्युपगमेन करण-फलज्ञानयोः परोक्षप्रत्यक्षत्वाभ्युपगमे **प्राभाकर**मत-प्रवेशाच्च । अथ ज्ञानशक्तिरप्यात्मनि स्वाश्रये परिच्छिन्ने द्रव्यार्थतः प्रत्यक्षेति न दोष इति चेत्, न, द्रव्यद्वारा प्रत्यक्षत्वेन सुखादिवत् स्वसंविदितत्वाव्यवस्थितेः, 'ज्ञानेन घटं जानामि' इति करणोल्लेखानुपपत्तेश्च, न हि कलशसमाकलनवेलायां द्रव्यार्थतः प्रत्यक्षाणामपि कुशूलकपालादीनामुल्लेखोऽस्तीति ।

[प्रत्यक्षं लक्षयित्वा सांव्यवहारिक-पारमार्थिकत्वाभ्यां तद्विभजनम् ।]

तद् द्विभेदम्-प्रत्यक्षम्, परोक्षं च[१] । अक्षम्-इन्द्रियं प्रतिगतम्-कार्यत्वेनाऽऽश्रितं प्रत्यक्षम्, अथवाऽश्नुते ज्ञानात्मना सर्वार्थान् व्याप्नोतीत्यौणादिकनिपातनाद् अक्षो जीवः, तं प्रतिगतं प्रत्यक्षम् । न चैवमवध्यादौ मत्यादौ च प्रत्यक्षव्यपदेशो न स्यादिति वाच्यम्, यतो व्युत्पत्तिनिमित्तमेवैतत्, प्रवृत्तिनिमित्तं तु एकार्थसमवायिनाऽनेनोपलक्षितं स्पष्टतावत्त्वमिति । [२]स्पष्टता चाऽनुमानादिभ्योऽतिरेकेण विशेष-प्रकाशनमित्यदोषः । अक्षेभ्योऽक्षाद्वा परतो वर्तत इति परोक्षम्, अस्पष्टं ज्ञानमित्यर्थः ।

[३]प्रत्यक्षं द्विविधम्-सांव्यवहारिकम्, पारमार्थिकं चेति । समीचीनो बाधारहितो व्यवहारः प्रवृत्तिनिवृत्तिलोकाभिलापलक्षणः संव्यवहारः, तत्प्रयोजनकं सांव्यवहारिकम् अपारमार्थिकमित्यर्थः, यथा अस्मदादिप्रत्यक्षम् । तद्धीन्द्रियानिन्द्रियव्यवहितात्मव्यापारसम्पाद्यत्वात् परमार्थतः परोक्षमेव, धूमाद् अग्निज्ञानवद् व्यवधानाविशेषात् । किञ्च, असिद्धानैकान्तिकविरुद्धानुमानाभासवत् संशयविपर्ययान-ध्यवसायसम्भवात्, सदनुमानवत् सङ्केतस्मरणादिपूर्वकनिश्चयसम्भवाच्च परमार्थतः परोक्षमेवैतत् ।

[सांव्यवहारिकप्रत्यक्षस्य निरूपणम्, मतिश्रुतयोर्विवेकश्च ।]

[४]एतच्च द्विविधम्-इन्द्रियजम्, अनिन्द्रियजं च । तत्रेन्द्रियजं चक्षुरादिजनितम्, अनिन्द्रियजं च मनोजन्म । यद्यपीन्द्रियजज्ञानेऽपि मनो व्यापिपर्ति, तथापि तत्रेन्द्रियस्यैवाऽसाधारणकारणत्वाददोषः । द्वयमपीदं मतिश्रुतभेदाद् द्विधा । तत्रेन्द्रियमनोनिमित्तं श्रुताननुसारि ज्ञानं मतिज्ञानम्, श्रुतानुसारि च श्रुतज्ञानम् । श्रुतानुसारित्वं च-सङ्केतविषयपरोपदेशं श्रुतग्रन्थं वाऽनुसृत्य वाच्यवाचकभावेन संयोज्य 'घटो घटः' इत्याद्यन्तर्जन्या(र्जल्पा)काराग्राहित्वम् ।

नन्वेवमवग्रह एव मतिज्ञानं स्यान्न त्वीहादयः, तेषां शब्दोल्लेखसहितत्वेन श्रुतत्वप्रसङ्गादिति चेत्, न, श्रुतनिश्रितानामप्यवग्रहादीनां सङ्केतकाले श्रुतानुसारित्वेऽपि व्यवहारकाले तदननुसारित्वात्, अभ्यास-पाटववशेन श्रुतानुसरणमन्तरेणापि विकल्पपरम्परापूर्वक-विविधवचनप्रवृत्तिदर्शनात् । अङ्गोपाङ्गादौ शब्दाद्यवग्रहणे च श्रुताननुसारित्वान्मतित्वमेव, यस्तु तत्र श्रुतानुसारी प्रत्ययस्तत्र श्रुतत्वमेवेत्यवधेयम् ।

[मतिज्ञानस्य अवग्रहादिभेदेन चातुर्विध्यप्रकटनम् ।]

मतिज्ञानम्-अवग्रहेहापायधारणाभेदाच्चतुर्विधम् । अवकृष्टो ग्रहः-अवग्रहः । [५]से द्विविधः-व्यञ्जनावग्रहः, अर्थावग्रहश्च । व्यज्यते-प्रकटीक्रियतेऽर्थोऽनेनेति व्यञ्जनम्-कदम्बपुष्पगोलकादिरूपाणामन्त-र्निर्वृत्तीन्द्रियाणां शब्दादिविषयपरिच्छेदहेतुशक्तिविशेषलक्षणमुपकरणेन्द्रियम्, शब्दादिपरिणतद्रव्यनिकुरुम्बम्,

---

१. तुलना-प्र० न० २. १ । २. तुलना-प्र० न० २. ३ । ३. तुलना-प्र- न० २. ४ । ४. तुलना-प्र० न० २. ५ । ५. अवग्रहः ।

तदुभयसम्बन्धश्च । ततो व्यञ्जनेन व्यञ्जनस्याऽवग्रहो व्यञ्जनावग्रह इति मध्यमपदलोपी समासः ।

अथ अज्ञानम् अयं-बधिरादीनां श्रोत्रशब्दादिसम्बन्धवत् तत्काले ज्ञानानुपलम्भादिति चेत्, न, ज्ञानोपादानत्वेन तत्र ज्ञानत्वोपचारात्, अन्तेऽर्थावग्रहरूपज्ञानदर्शनेन तत्कालेऽपि चेष्टाविशेषाद्यनुमेयस्वप्न-ज्ञानादितुल्याव्यक्तज्ञानानुमानाद्वा, एकतेजोऽवयववत् तस्य तनुत्वेनाऽनुपलक्षणात् ।

[व्यञ्जनावग्रहस्य चातुर्विध्यप्रदर्शने मनश्चक्षुषोरप्राप्यकारित्वसमर्थनम् ।]

[1]स च नयन-मनोवर्जेन्द्रियभेदाच्चतुर्धा, नयन-मनसोरप्राप्यकारित्वेन व्यञ्जनावग्रहासिद्धेः, अन्यथा तयोर्ज्ञेयकृतानुग्रहोपघातपात्रत्वे जलानलदर्शन-चिन्तनयोः क्लेद-दाहापत्तेः । रवि-चन्द्राद्यवलोकने चक्षुषोऽनुग्रहोपघातौ दृष्टावेवेति चेत्, न, प्रथमावलोकनसमये तददर्शनात्, अनवरतावलोकने च प्राप्तेन रविकिरणादिनोपघातस्या(स्य), नैसर्गिक-सौम्यादिगुणे चन्द्रादौ चाऽवलोकिते उपघाताभावादनुग्रहाभि-मानस्योपपत्तेः । मृतनष्टादिवस्तुचिन्तने, इष्टसङ्गमविभवलाभादिचिन्तने च जायमानौ दौर्बल्योरःक्षतादि-वदनविकासरोमाञ्चोद्गमादिलिङ्गकावुपघातानुग्रहौ न मनसः, किन्तु मनस्त्वपरिणतानिष्टेष्टपुद्गलनिचय-रूपद्रव्यमनोऽवष्टम्भेन हृन्निरुद्धवायुभेषजाभ्यामिव जीवस्यैवेति न ताभ्यां मनसः प्राप्यकारित्वसिद्धिः ।

ननु यदि मनो विषयं प्राप्य न परिच्छिनत्ति तदा कथं प्रसुप्तस्य 'मेर्वादौ गतं मे मनः' इति प्रत्यय इति चेत्, न, मेर्वादौ शरीरस्येव मनसो गमनस्वप्नस्याऽसत्यत्वात्, अन्यथा विबुद्धस्य कुसुमपरिमलाद्यध्व-जनितपरिश्रमाद्यनुग्रहोपघातप्रसङ्गात् । ननु[2] स्वप्नानुभूतजिनस्नात्रदर्शन-समीहितार्थालाभयोरनुग्रहोपघातौ विबुध(द्ध)स्य सतो दृश्येते एवेति चेत्, दृश्येतां स्वप्नविज्ञानकृतौ तौ, स्वप्नविज्ञानकृतं क्रियाफलं तु तृप्त्यादिकं नास्ति, यतो विषयप्राप्तिरूपा प्राप्यकारिता मनसो युज्येतेति ब्रूमः । क्रियाफलमपि स्वप्ने व्यञ्जनविसर्गलक्षणं दृश्यत एवेति चेत्, तत् तीव्राध्यवसायकृतम्, न तु कामिनीनिधुवनक्रियाकृतमिति को दोषः ? ननु स्त्यानर्धिनिद्रोदये गीतादिकं श्रृण्वतो व्यञ्जनावग्रहो मनसोऽपि भवतीति चेत्, न, तदा स्वप्नाभिमानिनोऽपि श्रवणाद्यवग्रहेणैवोपपत्तेः ।

ननु '[3]च्यवमानो न जानाति' इत्यादिवचनात् सर्वस्यापि छद्मस्थोपयोगस्याऽसङ्ख्येयसमय-मानत्वात्, प्रतिसमयं च मनोद्रव्याणां ग्रहणात् विषयमसम्प्राप्तस्यापि मनसो देहाद[4]निर्गतस्य तस्य [5]च स्वसन्निहित-हृदयादिचिन्तनवेलायां कथं व्यञ्जनावग्रहो न भवतीति चेत्, शृणु, ग्रहणं हि मनः, न तु ग्राह्यम् । ग्राह्यवस्तुग्रहणे [6]च व्यञ्जनावग्रहो भवतीति न मनोद्रव्यग्रहणे तदवकाशः । सन्निहितहृदयादिदेशग्रहवेलायामपि नैतदवकाशः-बाह्यार्थापेक्षयैव प्राप्यकारित्वाप्राप्यकारित्वव्यवस्थानात् । क्षयोपशमपाटवेन मनसः प्रथम-मर्थानुपलब्धिकालासम्भवाद्वा, श्रोत्रादीन्द्रियव्यापारकालेऽपि मनोव्यापारस्य व्यञ्जनावग्रहोत्तरमेवाऽभ्युपगमात्, 'मनुतेऽर्थान् मन्यन्तेऽर्थाः अनेनेति वा मनः' इति मनःशब्दस्याऽन्वर्थत्वात्, अर्थभाषणं विना भाषाया इव अर्थमननं विना मनसोऽप्रवृत्तेः । तदेवं नयनमनसोर्न व्यञ्जनावग्रह इति स्थितम् ।

[अर्थावग्रहस्य निरूपणम् ।]

स्वरूपनामजातिक्रियागुणद्रव्यकल्पनारहितं सामान्यग्रहणम् अर्थावग्रहः । कथं तर्हि 'तेन शब्द

---

१. व्यञ्जनावग्रहः । २. आज्ञार्थकं तृतीयपुरुषद्विवचनम्-सम्पा० । ३. ''चुइस्सामित्ति जाणइ चुएमित्ति जाणइ चयमाणे न याणेइ सुहुमे णं से काले पन्नत्ते ।'' - आचा० २.१७६ । ४. देहानिर्ग०-सं० । ५. तस्य स्व०-प्र० व० । ६. ०ग्रहणे व्य०-सं० ।

इत्यवगृहीतः' इति सूत्रार्थः, तत्र शब्दाद्युल्लेखराहित्याभावादिति चेत्, न, 'शब्दः' इति वक्त्रैव भणनात्, रूपरसादिविशेषव्यावृत्त्यनवधारणपरत्वाद्वा । यदि च 'शब्दोऽयम्' इत्यध्यवसायोऽवग्रहे भवेत् तदा शब्दोल्लेखस्याऽऽन्तर्मुहूर्त्तिकत्वादर्थावग्रहस्यैकसामा(म)यिकत्वं भज्येत । स्यान्मतम्-'शब्दोऽयम्' इति सामान्यविशेषग्रहणप्यर्थावग्रह इष्यताम्, तदुत्तरम्-'प्रायो माधुर्यादयः शङ्खशब्दधर्मा इह, न तु शार्ङ्गधर्माः खरकर्कशत्वादयः' इतीहोत्पत्तेः-इति, मैवम्, अशब्दव्यावृत्त्या विशेषप्रतिभासेनाऽस्याऽपायत्वात्, स्तोक-ग्रहणस्योत्तरोत्तरभेदापेक्षयाऽव्यवस्थितत्वात् । किञ्च, 'शब्दोऽयम्' इति ज्ञान(नं) शब्दगतान्वयधर्मेषु रूपादिव्यावृत्तिपर्यालोचनरूपामीहां विनाऽनुपपन्नम्, सा च नाऽगृहीतेऽर्थे सम्भवतीति तद्ग्रहणमस्म-दभ्युपगतार्थावग्रहकालात् प्राक् प्रतिपत्तव्यम्, स च व्यञ्जनावग्रहकालोऽर्थपरिशून्य इति यत्किञ्चिदेतत् ।

नन्वनन्तरम्-'क एष शब्दः' इति शब्दत्वावान्तरधर्मविषयकेहानिर्देशात् 'शब्दोऽयम्' इत्याकार एवावग्रहोऽभ्युपेय इति चेत्, न, 'शब्दः शब्दः' इति भाषकेणैव भणनात्-अर्थावग्रहेऽव्यक्तशब्दश्रवणस्यैव सूत्रे निर्देशात्, अव्यक्तस्य च सामान्यरूपत्वादनाकारोपयोगरूपस्य चाऽस्य तन्मात्रविषयत्वात् । यदि च व्यञ्जनावग्रह एवाऽव्यक्तशब्दग्रहणमिष्येत तदा सोऽप्यर्थावग्रहः स्यात्, अर्थस्य ग्रहणात् ।

केचित्तु-'सङ्केतादिविकल्पविकलस्य जातमात्रस्य बालस्य सामान्यग्रहणम्, परिचितविषयस्य त्वाद्यसमय एव विशेषज्ञानमित्येतदपेक्षया "तेन शब्द इत्यवगृहीतः" इति नाऽनुपपन्नम्'-इत्याहुः, तन्न, एवं हि व्यक्ततरस्य व्यक्तशब्दज्ञानमतिक्रम्यापि सुबहुविशेषग्रहप्रसङ्गात् । न चेष्टापत्तिः, 'न पुनर्जानाति क एष शब्दः' इति सूत्रावयवस्याऽविशेषेणोक्तत्वात्, प्रकृष्टमतेरपि शब्दं धर्मिणमगृहीत्वोत्तरोत्तरसुबहु-धर्मग्रहणानुपपत्तेश्च ।

अन्ये तु-'आलोचनपूर्वकमर्थावग्रहमाचक्षते, तत्रालोचनमव्यक्तसामान्यग्राहि, अर्थावग्रह-स्त्वितरव्यावृत्तवस्तुस्वरूपग्राहीति न सूत्रानुपपत्तिः'-इति, तदसत्, यत आलोचनं व्यञ्जनावग्रहात् पूर्वं स्यात्, पश्चाद्वा, स एव वा ? नाऽऽद्यः, अर्थव्यञ्जनसम्बन्धं विना तदयोगात् । न द्वितीयः, व्यञ्जनावग्रहान्त्य-समयेऽर्थावग्रहस्यैवोत्पादादालोचनानवकाशात् । न तृतीयः, व्यञ्जनावग्रहस्यैव नामान्तरकरणात् , तस्य चाऽर्थशून्यत्वेनाऽर्थालोचनानुपपत्तेः । किञ्च, आलोचनेनेहां विना झटित्येवार्थावग्रहः कथं जन्यताम् ? युगपच्चेहावग्रहौ पृथगसङ्ख्येयसमयमानौ कथं घटेताम्? इति विचारणीयम् । नन्ववग्रहेऽपि क्षिप्रे-तरादिभेदप्रदर्शनादसङ्ख्यसमयमानत्वम्, विशेषविषयत्वं चाऽविरुद्धमिति चेत्, न, तत्त्वतस्तेषा-मपायभेदत्वात्, कारणे कार्योपचारमाश्रित्याऽवग्रहभेदत्वप्रतिपादनात्, अविशेषविषये विशेषविषयत्व-स्याऽवास्तवत्वात् ।

अथवा अवग्रहो द्विविधः-नैश्चयिकः, व्यावहारिकश्च । आद्यः सामान्यमात्रग्राही, द्वितीयश्च विशेषविषयः-तदुत्तरमुत्तरोत्तरधर्माकाङ्क्षारूपेहाप्रवृत्तेः, अन्यथा अवग्रहं विनेहानुत्थानप्रसङ्गात्, अत्रैव क्षिप्रेतरादिभेदसङ्गतिः, अत एव चोपर्युपरि ज्ञानप्रवृत्तिरूपसन्तानव्यवहार इति द्रष्टव्यम् ।

[ईहावायधारणानां क्रमशो निरूपणम् ।]

अवगृहीतविशेषाकाङ्क्षणम्-ईहा[१], व्यतिरेकधर्मनिराकरणपरोऽन्वयधर्मघटनप्रवृत्तो बोध इति यावत्, यथा-'श्रोत्रग्राह्यत्वादिना प्रायोऽनेन शब्देन भवितव्यम्' 'मधुरत्वादिधर्मयुक्तत्वात् शाङ्खादिना' वा इति । न

---

१. प्र० मी० १. १. २७ ।

चेयं संशय एव, तस्यैकत्र धर्मिणि विरुद्धनानार्थज्ञानरूपत्वात्, अस्याश्च निश्चयाभिमुखत्वेन विलक्षणत्वात्।

ईहितस्य विशेषनिर्णयोऽवायः[१], यथा–'शब्द एवाऽयम्', 'शाङ्ग एवाऽयम्' इति वा।

स एव दृढतमावस्थापन्नो धारणा[२]। सा च त्रिविधा–अविच्युतिः, स्मृतिः, वासना च। तत्रैकार्थोपयोगसातत्यानिवृत्तिः अविच्युतिः। तस्यैवाऽर्थोपयोगस्य कालान्तरे 'तदेव' इत्युल्लेखेन समुन्मीलनं स्मृतिः। अपायाहितः स्मृतिहेतुः संस्कारो वासना। द्वयोरवग्रहयोरवग्रहत्वेन[३] च तिसृणां धारणानां धारणात्वेनोपग्रहान्न विभागव्याघातः।

केचित्तु–अपनयनमपायः, धरणं च धारणेति व्युत्पत्त्यर्थमात्रानुसारिणः–असद्भूतार्थविशेष-व्यतिरेकावधारणमपायः, सद्भूतार्थविशेषावधारणं च धारणा'–इत्याहुः, तन्न, क्वचित्तदन्यव्यतिरेकपरामर्शात्, क्वचिदन्वयधर्मसमनुगमात्, क्वचिच्चोभाभ्यामपि भवतोऽपायस्य निश्चयैकरूपेण भेदाभावात्, अन्यथा स्मृतेराधिक्येन मतेः पञ्चभेदत्वप्रसङ्गात्।

अथ नाऽस्त्येव भवदभिमता धारणेति भेदचतुष्टया(य)व्याघातः। तथाहि–उपयोगोपरमे का नाम धारणा? उपयोगसातत्यलक्षणा अविच्युतिश्चाऽपायान्नाऽतिरिच्यते। या च घटाद्युपयोगोपरमे सङ्ख्येय-मसङ्ख्येयं वा कालं वासनाऽभ्युपगम्यते, या च 'तदेव' इतिलक्षणा स्मृतिः सा मत्यंशरूपा धारणा न भवति–मत्युपयोगस्य प्रागेवोपरतत्वात्, कालान्तरे जायमानोपयोगेऽप्यन्वयमुख्यां धारणायां स्मृत्यन्त-र्भावादिति चेत्, न, अपायप्रवृत्त्यनन्तरं क्वचिदन्तर्मुहूर्तं यावदपायधाराप्रवृत्तिदर्शनात् अविच्युतेः, पूर्वापरदर्शनानुसन्धानस्य 'तदेवेदम्' इति स्मृत्याख्यस्य प्राच्यापायपरिणामस्य, तदाधायकसंस्कारलक्षणाया वासनायाश्च अपायाभ्यधिकत्वात्।

नन्वविच्युतिस्मृतिलक्षणौ ज्ञानभेदौ गृहीतग्राहित्वान्न प्रमाणम्, संस्कारश्च किं स्मृतिज्ञानावरण-क्षयोपशमो वा, तज्ज्ञानजननशक्तिर्वा, तद्वस्तुविकल्पो वेति त्रयी गतिः? तत्र–आद्यपक्षद्वयमयुक्तम्, ज्ञानरूपत्वाभावात् तद्भेदानां चेह विचार्यत्वात्। तृतीयपक्षोऽप्ययुक्त एव, सङ्ख्येयमसङ्ख्येयं वा कालं वासनाया इष्टत्वात्, एतावन्तं च कालं वस्तुविकल्पायोगादिति न कापि धारणा घटत इति चेत्, न, स्पष्टस्पष्टतरस्पष्टतम–भिन्नधर्मकवासनाजनकत्वेन अन्यान्यवस्तुग्राहित्वादविच्युतेः प्रागननुभूतवस्त्वेकत्व-ग्राहित्वाच्च स्मृतेः अगृहीतग्राहित्वात्, स्मृतिज्ञानावरणकर्मक्षयोपशमरूपायास्तद्विज्ञानजननशक्तिरूपायाश्च वासनायाः स्वयमज्ञानरूपत्वेऽपि कारणे कार्योपचारेण ज्ञानभेदाभिधानाविरोधादिति।

एते[४] चाऽवग्रहादयो नोत्क्रमव्यतिक्रमाभ्यां न्यूनत्वेन चोत्पद्यन्ते, ज्ञेयस्येत्थमेव ज्ञानजनन-स्वाभाव्यात्। क्वचिदभ्यस्तेऽपायमात्रस्य दृढवासने विषये स्मृतिमात्रस्य चोपलक्षणेऽप्युत्पलपत्रशतव्यतिभेद इव सौक्ष्म्यादवग्रहादिक्रमानुपलक्षणात्।

तदेवम् अर्थावग्रहादयो मन–इन्द्रियैः षोढा भिद्यमाना व्यञ्जनावग्रहचतुर्भेदैः सहाऽष्टाविंशतिर्मतिभेदा भवन्ति। अथवा बहु–बहुविध–क्षिप्रा–ऽनिश्रित–निश्चित–ध्रुवैः सप्रतिपक्षै–र्द्वादशभिर्भेदैर्भिन्नानामेतेषां षट्त्रिंशदधिकानि त्रीणि शतानि भवन्ति।

---

१. तुलना प्र० न० २. ९। २. प्र० न० २. १०। ३. –रवग्रहत्वेन तिसृणां च धारणानाम्–इति पाठः सम्यग् भाति। ४. तुलना–प्र० न० २. १४।

बह्वादयश्च भेदा विषयापेक्षाः, तथाहि-कश्चित् नानाशब्दसमूहमाकर्णितं [१]बहुं जानाति-'एतावन्तोऽत्र शङ्खशब्दा एतावन्तश्च पटहादिशब्दाः' इति पृथग्भिन्नजातीयं क्षयोपशमविशेषात् परिच्छिनत्तीत्यर्थः । अन्यस्त्वल्पक्षयोपशमत्वात् तत्समानदेशोऽप्य[२]बहुम् । अपरस्तु क्षयोपशमवैचित्र्यात् बहुविधम्, एकैकस्याऽपि शङ्खादिशब्दस्य स्निग्धत्वादिबहुधर्मान्वितत्वेनाऽप्याकलनात् । परस्त्वबहुविधम्, स्निग्धत्वादिस्वल्पधर्मान्वितत्वेनाऽऽकलनात् । अन्यस्तु क्षिप्रम्, शीघ्रमेव परिच्छेदात् । इतरस्त्वक्षिप्रम्, चिरविमर्शेनाऽऽकलनात् । परस्त्वनिश्रितम्, लिङ्गं विना स्वरूपत एव परिच्छेदात्। अपरस्तु निश्रितम्, लिङ्गनिश्रयाऽऽकलनात् । [[३]कश्चित्तु निश्चितम्, विरुद्धधर्मानालिङ्गितत्वेनाऽवगतेः । इतरस्त्वनिश्चितम्, विरुद्धधर्माङ्कितत‌याऽवगमात् ।] अन्यो ध्रुवम्, बह्वादिरूपेणाऽवगतस्य सर्वदैव तथाबोधात्। अन्यस्त्वध्रुवम्, कदाचिद्बह्वादिरूपेण कदाचित्त्वबह्वादिरूपेणाऽवगमादिति । उक्ता मतिभेदाः ।

[श्रुतज्ञानं चतुर्दशधा विभज्य तन्निरूपणम् ।]

श्रुतभेदा उच्यन्ते-श्रुतम् अक्षर-सञ्ज्ञि-सम्यक्-सादि-सपर्यवसित-गमिकाऽङ्गप्रविष्टभेदैः सप्रतिपक्षैश्चतुर्दशविधम् । तत्राऽक्षरं त्रिविधम्-सञ्ज्ञा-व्यञ्जन-लब्धिभेदात् । सञ्ज्ञाक्षरं बहुविधलिपिभेदम्, व्यञ्जनाक्षरं भाष्यमाणमकारादि-एते चोपचाराच्छ्रुते । लब्ध्यक्षरं तु इन्द्रियमनोनिमित्तः श्रुतोपयोगः, तदावरणक्षयोपशमो वा-एतच्च परोपदेशं विनापि नाऽसम्भाव्यम्, अनाकलितोपदेशानामपि मुग्धानां गवादीनां च शब्दश्रवणे तदाभिमुख्यदर्शनात्, एकेन्द्रियाणामप्यव्यक्ताक्षरलाभाच्च । अनक्षरश्रुतमुच्छ्वासादि, तस्यापि भावश्रुतहेतुत्वात्, ततोऽपि 'सशोकोऽयम्' इत्यादिज्ञानाविर्भावात् । अथवा श्रुतोपयुक्तस्य सर्वात्मनैवोपयोगात् सर्वस्यैव व्यापारस्य श्रुतरूपत्वेऽपि अत्रैव शास्त्रज्ञलोकप्रसिद्धा रूढिः । समनस्कस्य श्रुतं सञ्ज्ञिश्रुतम्। तद्विपरीतमसञ्ज्ञिश्रुतम् । सम्यक्श्रुतम् अङ्गानङ्गप्रविष्टम्, लौकिकं तु मिथ्याश्रुतम् । स्वामित्वचिन्तायां तु भजना-सम्यग्दृष्टिपरिगृहीतं मिथ्याश्रुतमपि सम्यक्श्रुतमेव-वितथभाषित्वादिना यथास्थानं तदर्थविनियोगात्, विपर्ययान्मिथ्यादृष्टिपरिगृहीतं च सम्यक्श्रुतमपि मिथ्याश्रुतमेवेति । सादि द्रव्यत एकं पुरुषमाश्रित्य, क्षेत्रतश्च भरतैरावते, कालत उत्सर्पिण्यवसर्पिण्यौ, भावतश्च तत्तज्ज्ञापकप्रयत्नादिकम् । अनादि द्रव्यतो नानापुरुषानाश्रित्य, क्षेत्रतो महाविदेहान्, कालतो नोउत्सर्पिण्यवसर्पिणीलक्षणम्, भावतश्च सामान्यतः क्षयोपशममिति । एवं सपर्यवसितापर्यवसितभेदावपि भाव्यौ । गमिकं सदृशपाठं प्रायो **दृष्टिवाद**गतम् । अगमिकमसदृशपाठं प्रायः कालिकश्रुतगतम् । अङ्गप्रविष्टं गणधरकृतम् । अनङ्गप्रविष्टं तु स्थविरकृतमिति। तदेवं सप्रभेदं सांव्यवहारिकं मतिश्रुतलक्षणं प्रत्यक्षं निरूपितम् ।

[पारमार्थिकं प्रत्यक्षं त्रिधा विभज्य प्रथममवधेर्निरूपणम् ।]

स्वोत्पत्तावात्मव्यापारमात्रापेक्षं पारमार्थिक[४]म् । तत् त्रिविधम्-अवधि-मनःपर्यय-केवलभेदात् । सकलरूपिद्रव्यविषयकजातीयम् आत्ममात्रापेक्षं ज्ञानमवधि[५]ज्ञानम् । तच्च षोढा-अनुगामि-वर्धमान-प्रतिपातीतरभेदात् । तत्रोत्पत्तिक्षेत्रादन्यत्राऽप्यनुवर्तमानमानुगामिकम्, भास्करप्रकाशवत्, यथा भास्करप्रकाशः प्राच्यामाविर्भूतः प्रतीचीमनुसरत्यपि तत्राऽवकाशमुद्योतयति, तथैतदप्येकत्रोत्पन्नमन्यत्र गच्छतोऽपि पुंसो विषयमवभासयतीति । उत्पत्तिक्षेत्र एव विषयावभासकमनानुगामिकम्, प्रश्नादेशपुरुषज्ञानवत्, यथा

१. बहु जा०-प्र० व० । २. बहु अ०-प्र० । ३. अयं पाठः कोष्ठके एव पूर्वं मुद्रितः । स च अन्यत्र क्वापि प्रतावसन्नपि औचित्यवशात् तथैवात्र गृहीतः । ४. तुलना-प्र० न० २. १८ । ५. तुलना-प्र० न० २. २१ ।

प्रश्नादेशः क्वचिदेव स्थाने संवादयितुं शक्नोति पृच्छ्यमानमर्थम्, तथेदमपि अधिकृत एव स्थाने विषयमुद्योतयितुमलमिति । उत्पत्तिक्षेत्रात् क्रमेण विषयव्याप्तिमवगाहमानं वर्धमानम्, अधरोत्तरारणि-निर्मथनोत्पन्नो-पात्तशुष्कोपचीयमानाधीयमानेन्धनराश्यग्निवत्, यथा अग्निः प्रयत्नादुपजातः सन् पुनरिन्धन-लाभाद् विवृद्धिमुपागच्छति, एवं परमशुभाध्यवसायलाभादिदमपि पूर्वोत्पन्नं वर्धत इति । उत्पत्तिक्षेत्रापेक्षया क्रमेणाऽल्पीभवद्विषयं हीयमानम्, परिच्छिन्नेन्धनोपादानसन्तत्यग्निशिखावत्, यथा अपनीतेन्धनाऽग्निज्वाला परिहीयते तथा इदमपीति । उत्पत्त्यनन्तरं निर्मूलनश्वरं प्रतिपाति, जलतरङ्गवत्, यथा जलतरङ्ग उत्पन्नमात्र एव निर्मूलं विलीयते तथा इदमपि । आ केवलप्राप्तेः आ मरणाद्वा अवतिष्ठमानम् अप्रतिपाति, वेदवत्, यथा पुरुषवेदादिरापुरुषादिपर्यायं तिष्ठति तथा इदमपीति ।

[मनःपर्यवज्ञानस्य निरूपणम् ।]

मनोमात्रसाक्षात्कारि मनःपर्यवज्ञानम्[1] । मनःपर्यायानिदं साक्षात्परिच्छेत्तुमलम्, बाह्यानर्थान् पुनस्तदन्यथाऽनुपपत्त्याऽनुमानेनैव परिच्छिनत्तीति द्रष्टव्यम् । तद् द्विविधम्-ऋजुमति-विपुलमतिभेदात् । ऋज्वी सामान्यग्राहिणी मतिः ऋजुमतिः । सामान्यशब्दोऽत्र विपुलमत्यपेक्षयाऽल्पविशेषपरः, अन्यथा सामान्यमात्रग्राहित्वे मनःपर्यायदर्शनप्रसङ्गात् । विपुला विशेषग्राहिणी मतिर्विपुलमतिः । तत्र ऋजुमत्या घटादिमात्रमनेन चिन्तितमिति ज्ञायते, विपुलमत्या तु पर्यायशतोपेतं तत् परिच्छिद्यत इति । एते च द्वे ज्ञाने विकलविषयत्वाद् विकलप्रत्यक्षे परिभाष्येते ।

[केवलज्ञानस्य निरूपणम् ।]

निखिलद्रव्यपर्यायसाक्षात्कारि केवलज्ञानम्[2] । अत एवैतत्सकलप्रत्यक्षम् । तच्चाऽऽवरणक्षयस्य हेतोरैक्याद्भेदरहितम् । आवरणं चाऽत्र कर्मैव, स्वविषयेऽप्रवृत्तिमतोऽस्मदादिज्ञानस्य सावरणत्वात्, असर्वविषयत्वे व्याप्तिज्ञानाभावप्रसङ्गात्, सावरणत्वाभावेऽस्पष्टत्वानुपपत्तेश्च । आवरणस्य च कर्मणो विरोधिना सम्यग्दर्शनादिना विनाशात् सिद्ध्यति कैवल्यम् ।

'योगजधर्मानुगृहीतमंनोजन्यमेवेदमस्तु' इति केचित्, तन्न, धर्मानुगृहीतेनाऽपि मनसा पञ्चेन्द्रियार्थ-ज्ञानवदस्य जनयितुमशक्यत्वात् ।

'कवलभोजिनः कैवल्यं न घटते' इति **दिक्पटः**, तन्न, आहारपर्याप्त्यसातवेदनीयोदयादिप्रसूतया कवलभुक्त्या कैवल्याविरोधात्, घातिकर्मणामेव तद्विरोधित्वात् । दग्धरज्जुस्थानीयात् ततो न तदुत्पत्तिरिति चेत्, नन्वेवं तादृशादायुषो भवोपग्रहोऽपि न स्यात् । किञ्च, औदारिकशरीरस्थितिः कथं कवलभुक्तिं विना भगवतः स्यात् ? अनन्तवीर्यत्वेन तां विना तदुपपत्तौ छद्मस्थावस्थायामप्यपरिमितबलत्व[3]श्रवणाद् भुक्त्यभावः स्यादित्यन्यत्र विस्तरः । उक्तं प्रत्यक्षम् ।

[परोक्षं लक्षयित्वा पञ्चधा विभज्य च स्मृतेर्निरूपणम् ।]

अथ परोक्षमुच्यते-अस्पष्टं परोक्षम्[4] । तच्च स्मरण-प्रत्यभिज्ञान-तर्का-ऽनुमाना-ऽऽगमभेदतः पञ्चप्रकारम्[5] । अनुभवमात्रजन्यं ज्ञानं स्मरणम्, यथा तत् तीर्थकरबिम्बम्[6] । न चेदमप्रमाणम्, प्रत्यक्षादिवत्

१. तुलना-प्र० न० २. २२ । २. तुलना-प्र० न. २० २३ । ३. -०लवत्त्वश्र०-मु० । -०लश्र०-प्र० । ४. प्र० न० ३.१ । ५. तुलना-प्र० न० ३.२ । ६. तुलना-प्र० न० ३. ३-४ ।

अविसंवादकत्वात् । अतीततत्तांशे वर्तमानत्वविषयत्वादप्रमाणमिदमिति चेत्, न, सर्वत्र विशेषणे विशेष्य-कालभानानियमात् । अनुभवप्रमात्व-पारतन्त्र्यादत्राऽप्रमात्वमिति चेत्, न, अनुमितेरपि व्याप्तिज्ञानादि-प्रमात्वपारतन्त्र्येणाऽप्रमात्वप्रसङ्गात् । अनुमितेरुत्पत्तौ परापेक्षा, विषयपरिच्छेदे तु स्वातन्त्र्यमिति चेत्, न, स्मृतेरप्युत्पत्तावेवाऽनुभवसव्यपेक्षत्वात्, स्वविषयपरिच्छेदे तु स्वातन्त्र्यात् । अनुभवविषयीकृतभावा-वभासिन्याः स्मृतेर्विषयपरिच्छेदेऽपि न स्वातन्त्र्यमिति चेत्, तर्हि व्याप्तिज्ञानादि-विषयीकृतानर्थान् परि-च्छिन्दत्या अनुमितेरपि प्रामाण्यं दूरत एव । नैयत्येनाऽभात एवाऽर्थोऽनुमित्या विषयीक्रियत इति चेत्, तर्हि तत्तयाऽभात एवाऽर्थः स्मृत्या विषयीक्रियत इति तुल्यमिति न किञ्चिदेतत् ।

[प्रत्यभिज्ञानस्य निरूपणम् ।]

अनुभवस्मृतिहेतुकं तिर्यगूर्ध्वतासामान्यादिगोचरं सङ्कलनात्मकं ज्ञानं प्रत्यभिज्ञानम्[1] । यथा 'तज्जातीय एवाऽयं गोपिण्डः' 'गोसदृशो गवयः' 'स एवाऽयं जिनदत्तः' 'स एवाऽनेनाऽर्थः कथ्यते' 'गो-विलक्षणो महिषः' 'इदं तस्माद् दूरम्' 'इदं तस्मात् समीपम्' 'इदं तस्मात् प्रांशु ह्रस्वं वा' इत्यादि[2] ।

तत्तेदन्तारूपस्पष्टास्पष्टाकारभेदान्नैकं प्रत्यभिज्ञानस्वरूपमस्तीति **शाक्यः**, तन्न, आकारभेदेऽपि चित्रज्ञानवदेकस्य तस्याऽनुभूयमानत्वात्, स्वसामग्रीप्रभवस्याऽस्य वस्तुतोऽस्पष्टैकरूपत्वाच्च, इदन्तोल्लेखस्य प्रत्यभिज्ञानिबन्धनत्वात् । विषयाभावान्नेदमस्तीति चेत्, न, पूर्वापरविवर्तवर्त्त्येकद्रव्यस्य विशिष्ट-स्यैतद्विषयत्वात् । अत एव 'अगृहीतासंसर्गकमनुभवस्मृतिरूपं[3] ज्ञानद्वयमेवैतद्' इति निरस्तम्, इत्थं सति विशिष्टज्ञानमात्रोच्छेदापत्तेः । तथापि 'अक्षान्वयव्यतिरेकानुविधायित्वात् प्रत्यक्षरूपमेवेदं युक्तम्' इति केचित्, तन्न, साक्षादक्षान्वयव्यतिरेकानुविधायित्वस्याऽसिद्धेः, प्रत्यभिज्ञानस्य साक्षात्प्रत्यक्षस्मरणान्वय-व्यतिरेकानुविधायित्वेनाऽनुभूयमानत्वात्, अन्यथा प्रथमव्यक्तिदर्शनकालेऽप्युत्पत्तिप्रसङ्गात् ।

अथ पुनर्दर्शने पूर्वदर्शनाहितसंस्कारप्रबोधोत्पन्नस्मृतिसहायमिन्द्रियं प्रत्यभिज्ञानमुत्पादयतीत्युच्यते, तदनुचितम्, प्रत्यक्षस्य स्मृतिनिरपेक्षत्वात् । अन्यथा पर्वते वह्निज्ञानस्याऽपि व्याप्तिस्मरणादिसापेक्ष-मनसैवोपपत्तौ अनुमानस्याऽप्युच्छेदप्रसङ्गात् । किञ्च, 'प्रत्यभिजानामि' इति विलक्षणप्रतीतेरप्यति-रिक्तमेतत्, एतेन 'विशेष्येन्द्रियसन्निकर्षसत्त्वाद् विशेषणज्ञाने सति विशिष्टप्रत्यक्षरूपमेतदुपपद्यते' इति निरस्तम्, 'एतत्सदृशः सः' इत्यादौ तदभावात्, स्मृत्यनुभवसङ्कलनक्रमस्याऽऽनुभविकत्वाच्चेति दिक् ।

अत्राह **भाट्टः**-नन्वेकत्वज्ञानं प्रत्यभिज्ञानमस्तु, सादृश्यज्ञानं तूपमानमेव, गवये दृष्टे गवि च स्मृते सति सादृश्यज्ञानस्योपमानत्वात्, तदुक्तम्-

**''तस्माद्यत् स्मर्यते तत् स्यात् सादृश्येन विशेषितम् ।**
**प्रमेयमुपमानस्य सादृश्यं वा तदन्वितम् ॥१॥**

**प्रत्यक्षेणाऽवबुद्धेऽपि सादृश्ये गवि च स्मृते ।**
**विशिष्टस्याऽन्यतोऽसिद्धेरुपमानप्रमाणता ॥२॥''** [श्लोकवा० उप० श्लो० ३७-३८]

इति, तन्न, दृष्टस्य सादृश्यविशिष्टपिण्डस्य स्मृतस्य च गोः सङ्कलनात्मकस्य 'गोसदृशो गवयः' इति ज्ञानस्य प्रत्यभिज्ञानताऽनतिक्रमात् । अन्यथा 'गोविसदृशो महिषः' इत्यादेरपि सादृश्याविषयत्वेनोपमानातिरेके

---

१. प्र० न० ३. ५ । २. तुलना- प्र० न० ३. ६ । ३-०रूपज्ञान०-प्र० ।

प्रमाणसङ्ख्याव्याघातप्रसङ्गात् ।

एतेन-'गोसदृशो गवयः' इत्यतिदेशवाक्यार्थज्ञानकरणकं सादृश्यविशिष्टपिण्डदर्शनव्यापारकम् 'अयं गवयशब्दवाच्यः' इति सञ्ज्ञासञ्ज्ञिसम्बन्धप्रतिपत्तिरूपमुपमानम्-इति **नैयायिक**मतमप्यपहस्तितं भवति। अनुभूतव्यक्तौ गवयपदवाच्यत्वसङ्कलनात्मकस्याऽस्य प्रत्यभिज्ञानत्वानतिक्रमात् प्रत्यभिज्ञानावरणकर्म-क्षयोपशमविशेषेण यद्धर्मावच्छेदेनाऽतिदेशवाक्यानूद्यधर्मदर्शनं तद्धर्मावच्छेदेनैव पदवाच्यत्वपरिच्छेदोप-पत्तेः । अत एव "पयोम्बुभेदी हंसः स्यात्" इत्यादि-वाक्यार्थज्ञानवतां पयोऽम्बुभेदित्वादि-विशिष्टव्यक्तिदर्शने सति 'अयं हंसपदवाच्यः' इत्यादिप्रतीतिर्जायमानोपपद्यते । यदि च 'अयं गवयपदवाच्यः' इति प्रतीत्यर्थं प्रत्यभिज्ञातिरिक्तं प्रमाणमाश्रीयते तदा आमलकादिदर्शनाहितसंस्कारस्य बिल्वादिदर्शनात् 'अतस्तत् सूक्ष्मम्' इत्यादिप्रतीत्यर्थं प्रमाणान्तरमन्वेषणीयं स्यात् । मानसत्वे चाऽऽसामुपमानस्यापि मानसत्वप्रसङ्गात् । 'प्रत्यभिजानामि' इति प्रतीत्या प्रत्यभिज्ञानत्वमेवाऽभ्युपेयमिति दिक् ।

[तर्कस्य निरूपणम् ।]

सकलदेशकालाद्यवच्छेदेन साध्यसाधनभावादिविषय ऊहस्तर्कः, यथा 'यावान् कश्चिद्धूमः स सर्वो वह्नौ सत्येव भवति, वह्निं विना वा न भवति'[1] 'घटशब्दमात्रं घटस्य वाचकम्' 'घटमात्रं घटशब्दवाच्यम्' इत्यादि । तथाहि-स्वरूपप्रयुक्ता[2]ऽव्यभिचारलक्षणायां व्याप्तौ भूयोदर्शनसहितान्वयव्यतिरेकसहकारेणाऽपि प्रत्यक्षस्य तावदविषयत्वादेवाऽप्रवृत्तिः, सुतरां च सकलसाध्यसाधनव्यक्त्युपसंहारेण तद्ग्रह इति साध्यसाधनदर्शनस्मरणप्रत्यभिज्ञानोपजनितस्तर्क एव तत्प्रतीतिमाधातुमलम् ।

अथ स्वव्यापकसाध्य-सामानाधिकरण्यलक्षणाया व्याप्तेर्योग्यत्वाद् भूयोदर्शन-व्यभिचारा-दर्शनसहकृतेनेन्द्रियेण व्याप्तिग्रहोऽस्तु, सकलसाध्यसाधनव्यक्त्युपसंहारस्याऽपि सामान्यलक्षणप्रत्यास[3]त्त्या सम्भवादिति चेत्, न, 'तर्कयामि' इत्यनुभवसिद्धेन तर्केणैव सकलसाध्यसाधनव्यक्त्युपसंहारेण व्याप्ति-ग्रहोपपत्तौ सामान्यलक्षण-प्रत्यासत्तिकल्पने प्रमाणाभावात्, ऊहं विना ज्ञातेन सामान्येनाऽपि सकल-व्यक्त्यनुपस्थितेश्च । वाच्यवाचकभावोऽपि तर्केणैवाऽवगम्यते, तस्यैव सकलशब्दार्थगोचरत्वात् । प्रयोजकवृद्धोक्तं श्रुत्वा प्रवर्तमानस्य प्रयोज्यवृद्धस्य चेष्टामवलोक्य तत्कारणज्ञानजनकतां शब्देऽवधारयन्तो-(यतो)ऽन्त्यावयवश्रवण-पूर्वावयवस्मरणोपजनित-वर्णपदवाक्यविषयसङ्कलनात्मकप्रत्यभिज्ञानव[4]त् आवापोद्वापाभ्यां सकलव्यक्त्युपसंहारेण च वाच्यवाचकभावप्रतीतिदर्शनादिति । अयं च तर्कः सम्बन्ध-प्रतीत्यन्तरनिरपेक्ष एव स्वयोग्यतासामर्थ्यात् सम्बन्धप्रतीतिं जनयतीति नाऽनवस्था ।

प्रत्यक्षपृष्ठभाविविकल्परूपत्वान्नाऽयं प्रमाणमिति **बौद्धाः**, तन्न, प्रत्यक्षपृष्ठभाविनो विकल्प-स्याऽपि प्रत्यक्षगृहीतमात्राध्यवसायित्वेन सर्वोपसंहारेण व्याप्तिग्राहकत्वाभावात् । तादृशस्य तस्य सामान्यविषयस्याऽप्यनुमानवत् प्रमाणत्वात्, अवस्तुनिर्भासेऽपि परम्परया पदार्थप्रतिबन्धेन भवतां व्यवहारतः प्रामाण्यप्रसिद्धेः ।

यस्तु-अग्निधूमव्यतिरिक्तदेशे प्रथमं धूमस्याऽनुपलम्भ एकः, तदनन्तरमग्नेरुपलम्भस्ततो धूमस्ये-त्युपलम्भद्वयम्, पश्चादग्नेरनुपलम्भोऽनन्तरं धूमस्याऽप्यनुपलम्भ इति द्वावनुपलम्भाविति प्रत्यक्षानुप-

---

१. तुलना-प्र० न० ३. ७-८ । २. -०युक्तव्यभि०-सं० मु० । ३.-०सत्त्यसम्भ० - प्र० व० । ४. -०ज्ञानवत् आवा०-मु० ।

लम्भपञ्चकाद् व्याप्तिग्रहः-इत्येतेषां सिद्धान्तः, तदुक्तम्-

"**धूमाधीर्वह्निविज्ञानं धूमज्ञानमधीस्तयोः ।**
**प्रत्यक्षानुपलम्भाभ्यामिति पञ्चभिरन्वयः ॥**" इति,

स तु मिथ्या, उपलम्भानुपलम्भस्वभावस्य द्विविधस्याऽपि प्रत्यक्षस्य सन्निहितमात्रविषयतयाऽविचारकतया च देशादिव्यवहित-समस्तपदार्थगोचरत्वायोगात् ।

यत्तु 'व्याप्यस्याऽऽहार्यारोपेण व्यापाकस्याऽऽहार्यप्रसञ्जनं तर्कः । स च विशेषदर्शनवद् विरोधिशङ्काकालीन-प्रमाणमात्रसहकारी, विरोधिशङ्कानिवर्तकत्वेन तदनुकूल एव वा । न चाऽयं स्वतः प्रमाणम्' इति **नैयायिकै**रिष्यते, तन्न, व्याप्तिग्रहरूपस्य तर्कस्य स्वपरव्यवसायित्वेन स्वतः प्रमाणत्वात्, पराभिमततर्कस्याऽपि क्वचिदेतद्विचाराङ्गतया, विपर्ययपर्यवसायिन आहार्यशङ्काविघटकतया, स्वातन्त्र्येण शङ्कामात्रविघटकतया[1] वोपयोगात् ।

इत्थं चाऽज्ञाननिवर्तकत्वेन तर्कस्य प्रामाण्यं **धर्मभूषणो**[2]क्तं सत्येव[3] तन्न(तत्र)मिथ्याज्ञानरूपे व्यवच्छेद्ये सङ्गच्छते, ज्ञानाभावनिवृत्तिस्त्वर्थ[4]ज्ञातताव्यवहारनिबन्धन-स्वव्यवसिति-पर्यवसितैव सामान्यतः फलमिति द्रष्टव्यम् ।

[अनुमानं द्वेधा विभज्य स्वार्थानुमानस्य लक्षणम् ।]

साधनात्साध्यविज्ञानम्-अनुमानम्[5] । तद् द्विविधं स्वार्थं परार्थं च[6] । तत्र हेतुग्रहण-सम्बन्धस्मरणकारणकं साध्यविज्ञानं स्वार्थम्[7], यथा गृहीतधूमस्य स्मृतव्याप्तिकस्य 'पर्वतो वह्निमान्' इति ज्ञानम् । अत्र हेतुग्रहण-सम्बन्धस्मरणयोः समुदितयोरेव कारणत्वमवसेयम्, अन्यथा विस्मृताप्रतिपन्नसम्बन्धस्याऽगृहीतलिङ्गकस्य च कस्यचिदनुमानोत्पादप्रसङ्गात् ।

[हेतुस्वरूपचर्चा ।]

निश्चितान्यथानुपपत्त्येकलक्षणो हेतुः, न तु त्रिलक्षणकादिः[8] । तथाहि-त्रिलक्षण एव हेतुरिति **बौद्धाः** । पक्षधर्मत्वाभावेऽसिद्धत्वव्यवच्छेदस्य, सपक्ष एव सत्त्वाभावे च विरुद्धत्वव्युदासस्य, विपक्षेऽसत्त्वनियमाभावे चा[9]ऽनैकान्तिकत्वनिषेधस्याऽसम्भवेनाऽनुमित्यप्रतिरोधानुपपत्तेरिति, तन्न, पक्षधर्मत्वाभावेऽपि उदेष्यति शकटं-कृत्तिकोदयाद्, उपरि सविता-भूमेरालोकवत्त्वाद्, अस्ति नभश्चन्द्रो-जलचन्द्रादित्याद्यनुमानदर्शनात् । न चात्रापि 'कालाकाशादिकं भविष्यच्छकटोदयादिमत् कृत्तिकोदयादिमत्त्वात्' इत्येवं पक्षधर्मत्वोपपत्तिरिति वाच्यम्, अननुभूयमानधर्मिविषयत्वेनेत्थं पक्षधर्मत्वोपपादने जगद्धर्म्यपेक्षया काककार्ष्ण्येन प्रासादधावल्यस्याऽपि साधनोपपत्तेः ।

ननु यद्येवं पक्षधर्मताऽनुमितौ नाऽङ्गं तदा कथं तत्र पक्षभाननियम इति चेत्, क्वचिदन्यथाऽनुपपत्त्यवच्छेदकतया ग्रहणात् पक्षभानं, यथा नभश्चन्द्रास्तित्वं विना जलचन्द्रोऽनुपपन्न इत्यत्र; क्वचिच्च

---

१. -०तया चोपयो०-प्र० मु० । २. धर्मभूषणेन हि श्लोकवार्त्तिकीयवाक्योल्लेखेन स्वमतं समर्थितम्, तथाहि- "तदुक्तं श्लोकवार्तिकभाष्ये-'साध्यसाधनसम्बन्धाज्ञाननिवृत्तिरूपे हि फले साधकतमस्तर्कः' इति ।" [न्यायदी० पृ० १९] । द्रष्टव्यं चैतत् तत्त्वार्थश्लोकवा० १. १३. ११५-८ वृत्तौ । ३. धर्मभूषणोक्तं तत्र सत्येव मिथ्याज्ञाने व्यवच्छेद्ये सङ्गच्छते ज्ञानरूपे । ज्ञानाभाव०-मु० । ४. -०ज्ञानता०-मु० । ५. प्र० मी० १. २. ७ । ६. तुलना प्र० न० ३. ९ । ७. प्र० न० ३. १० । ८. प्र० न० ३. ११-१२ । ९. -०भावे वानै०-सं० ।

हेतुग्रहणाधिकरणतया, यथा पर्वतो वह्निमान् धूमवत्त्वादित्यत्र धूमस्य पर्वते ग्रहणाद् वह्नेरपि तत्र भानमिति। व्याप्तिग्रहवेलायां तु पर्वतस्य सर्वत्राऽनुवृत्त्यभावेन न ग्रह इति ।

यत्तु अन्तर्व्याप्त्या पक्षीयसाध्यसाधनसम्बन्धग्रहात् पक्षसाध्यसंसर्गभानम्, तदुक्तम्-"**पक्षीकृत**[1] **एव विषये साधनस्य साध्येन व्याप्तिरन्तर्व्याप्तिः, अन्यत्र तु बहिर्व्याप्तिः**"[2] (प्र.न. ३.३८) इति, तन्न, अन्तर्व्याप्त्या हेतोः साध्यप्रत्यायनशक्तौ सत्यां बहिर्व्याप्तेरुद्भावनव्यर्थत्वप्रतिपादनेन तस्याः स्वरूपप्रयुक्त-(क्ता)व्यभिचारलक्षणत्वस्य, बहिर्व्याप्तेश्च सहचारमात्रत्वस्य लाभात्, सार्वत्रिक्या व्याप्तेर्विषयभेदमात्रेण भेदस्य दुर्वचत्वात् । न चेदेवं तदाऽन्तर्व्याप्ति-ग्रहकाले[3] एष एव[4](काल एव) पक्षसाध्यसंसर्गभानादनुमान-वैक(फ)ल्यापत्तिः विना पर्वतोवह्निमानित्युद्देश्यप्रतीतिमिति यथातन्त्रं भावनीयं सुधीभिः ।

इत्थं च 'पक्वान्येतानि सहकारफलानि-एकशाखाप्रभवत्वाद्-उपयुक्तसहकारफलवदित्यादौ बाधितविषये, मूर्खोऽयं देवदत्तः-तत्पुत्रत्वात्-इतरतत्पुत्रवदित्यादौ सत्प्रतिपक्षे चाऽतिप्रसङ्गवारणाय अबाधितविषयत्वासत्प्रतिपक्षत्वसहितं प्रागुक्तरूपत्रयमादाय पाञ्चरूप्यं हेतुलक्षणम्' इति **नैयायिक**-मतमप्यपास्तम्, उदेष्यति शकटमित्यादौ पक्षधर्मत्वस्यैवाऽसिद्धेः, स श्यामः तत्पुत्रत्वादित्यत्र हेत्वाभासेऽपि पाञ्चरूप्यसत्त्वाच्च, निश्चितान्यथानुपपत्तेरेव सर्वत्र हेतुलक्षणत्वौचित्यात् ।

[साध्यस्वरूपचर्चा ।]

ननु हेतुना साध्यमनुमातव्यम् । तत्र किंलक्षणं साध्यमिति चेत्, उच्यते-[5]अप्रतीतमनिराकृत-मभीप्सितं च साध्यम् । शङ्कित-विपरीता-नध्यवसितवस्तूनां साध्यताप्रतिपत्त्यर्थमप्रतीतमिति विशेषणम् । प्रत्यक्षादिविरुद्धस्य साध्यत्वं मा प्रसाङ्क्षीदित्यनिराकृतग्रहणम् । अनभिमतस्याऽसाध्यत्वप्रतिपत्तये-ऽभीप्सितग्रहणम् ।

कथायां शङ्कितस्यैव साध्यस्य साधनं युक्तमिति कश्चित्, तन्न, विपर्यस्ताव्युत्पन्नयोरपि परपक्षदिदृक्षादिना कथायामुपसर्पणसम्भवेन संशयनिरासार्थमिव विपर्ययानध्यवसायनिरासार्थमपि प्रयोगसम्भवात्, पित्रादेर्विपर्यस्ताव्युत्पन्नपुत्रादिशिक्षाप्रदानदर्शनाच्च । न चेदेवं जिगीषुकथायामनुमानप्रयोग एव न स्यात्-तस्य साभिमानत्वेन विपर्यस्तत्वात् ।

अनिराकृतमिति विशेषणं वादिप्रतिवाद्युभयापेक्षया, द्वयोः प्रमाणेनाऽबाधितस्य कथायां साध्यत्वात्। अभीप्सितमिति तु वाद्यपेक्षयैव, वक्तुरेव स्वाभिप्रेतार्थप्रतिपादनायेच्छासम्भवात् । ततश्च परार्थाश्चक्षुरादय इत्यादौ पारार्थ्यमात्राभिधानेऽप्यात्मार्थत्वमेव सायं(०मेव साध्यं) सिध्यति। अन्यथा संहतपरार्थत्वेन **बौद्धै**श्चक्षुरादीनामभ्युपगमा[6][त् साधनवैफल्या]दित्यनन्वयादिदोषदुष्टमेतत्**साङ्ख्य**साधनमिति

१. तत्रान्तर्व्या०-सं० प्र० मु० । २. तुलना-प्र० न० ३. ३७ । ३. -०काल एव च पक्ष-मु० । ४. "विना पर्वतो वह्निमानित्युद्देश्यप्रतीतिम्" इत्यग्रेतनः पाठः सङ्गतार्थकतया अत्रैव सूपपादः । तथा च-तदान्तर्व्याप्तिग्रहकाल एव पर्वतो वह्निमानित्युद्देश्यप्रतीतिं विना पक्षसाध्यसंसर्गभानादनुमानवैफल्यापत्तिरित्यादिरर्थः सम्पद्यते । ५. तुलना-प्र० न० ३. १४-१७ । ६. -०गमादित्यनन्वय०-व० । अत्रायं पाठोऽनुसन्धेयः-"ततश्च परार्थाश्चक्षुरादय इत्यादौ पारार्थ्यमात्राभिधानेऽप्यात्मार्थत्वमेव साध्यस्य प्रसिद्ध्यति । तद्धीच्छया व्याप्तं साङ्ख्यस्य बौद्धं प्रति साध्यमेव । आत्मा हि साङ्ख्येन साधयितुमुपक्रान्तस्ततोऽसावेव साध्यः । अन्यथा साधनस्य वैफल्यापत्तेः, संहतपरार्थत्वेन बौद्धैश्चक्षुरादीनामुपगमात् । एवं चात्मनः साध्यत्वे हेतोरिष्टविघातकारितया विशेषविरुद्धत्वं साध्यस्य च दृष्टान्तदोषः साध्यवैकल्यमिति ।" -स्या० र० पृ० ५३८ ।

वदन्ति । स्वार्थानुमानावसरेऽपि परार्थानुमानोपयोग्यभिधानम्, परार्थस्य स्वार्थपुरःसरत्वेनाऽनतिभेद-ज्ञापनार्थम् ।

व्याप्तिग्रहणसमयापेक्षया[१] साध्यं धर्म एव, अन्यथा तदनुपपत्तेः । आनुमानिकप्रतिपत्त्यवसरापेक्षया तु पक्षापरपर्यायस्तद्विशिष्टः प्रसिद्धो धर्मी । इत्थं[२] च स्वार्थानुमानस्य त्रीण्यङ्गानि-धर्मी साध्यं साधनं च । तत्र साधनं गमकत्वेनाऽङ्गम्, साध्यं तु गम्यत्वेन, धर्मी पुनः साध्यधर्माधारत्वेन-आधारविशेषनिष्ठतया साध्याद्धे(साध्यसिद्धे)रनुमानप्रयोजनत्वात् । अथवा पक्षो हेतुरित्यङ्गद्वयं स्वार्थानुमाने, साध्यधर्मविशिष्टस्य धर्मिणः पक्षत्वात् इति धर्मधर्मिभेदाभेदविवक्षया पक्षद्वयं द्रष्टव्यम् ।

धर्मिणः प्रसिद्धिश्च क्वचित्प्रमाणात् क्वचिद्विकल्पात् क्वचित्प्रमाणविकल्पाभ्याम्[३] । तत्र निश्चितप्रामाण्यक-प्रत्यक्षाद्यन्यतमावधृतत्वं प्रमाणप्रसिद्धत्वम् । अनिश्चितप्रामाण्याप्रामाण्य-प्रत्ययगोचरत्वं[४] विकल्पप्रसिद्धत्वम् । तद्द्वयविषयत्वं प्रमाणविकल्पप्रसिद्धत्वम् । तत्र प्रमाणसिद्धो धर्मी यथा धूमवत्त्वादग्निमत्त्वे साध्ये पर्वतः, स खलु प्रत्यक्षेणाऽनुभूयते । विकल्पसिद्धो धर्मी यथा सर्वज्ञोऽस्ति सुनिश्चितासम्भवद्बाधकप्रमाणत्वादित्यस्तित्वे साध्ये सर्वज्ञः, अथवा खरविषाणं नाऽस्तीति नास्तित्वे साध्ये खरविषाणम् । अत्र हि सर्वज्ञखरविषाणे अस्तित्वनास्तित्वसिद्धिभ्यां प्राग् विकल्पसिद्धे । उभयसिद्धो धर्मी यथा शब्दः परिणामी-कृतकत्वादित्यत्र शब्दः, स हि वर्तमान(नः) प्रत्यक्षगम्यः, भूतो भविष्यंश्च विकल्पगम्यः, स सर्वोऽपि धर्मीति प्रमाणविकल्पसिद्धो धर्मी । प्रमाणोभयसिद्धयोर्धर्मिणोः साध्ये कामचारः । विकल्पसिद्धे तु धर्मिणि सत्तासत्तयोरेव साध्यत्वमिति नियमः । तदुक्तम्-"**विकल्पसिद्धे तस्मिन् सत्तेतरे साध्ये**" [परी० ३. २३] इति ।

अत्र **बौद्धः** सत्तामात्रस्याऽनभीप्सितत्वाद् विशिष्टसत्तासाधने[५] वाऽनन्वयाद् विकल्पसिद्धे धर्मिणि न सत्ता साध्येत्याह, तदसत्, इत्थं सति प्रकृतानुमानस्याऽपि भङ्गप्रसङ्गात्, वह्निमात्रस्याऽनभीप्सितत्वाद् विशिष्टवह्नेश्चाऽनन्वयादिति । अथ तत्र सत्तायां साध्यायां तद्धेतुः-भावधर्मः, भावाभावधर्मः, अभावधर्मो वा स्यात् ? । आद्येऽसिद्धिः, असिद्धसत्ताके भावधर्मासिद्धेः । द्वितीये व्यभिचारः, अस्तित्वाभाववत्यपि वृत्तेः । तृतीये च विरोधा भा(विरोधोऽभा)वधर्मस्य भावे क्वचिदप्यसम्भवात्, तदुक्तम्—

"**नाऽसिद्धे भावधर्मोऽस्ति व्यभिचार्युभयाश्रयः ।**
**धर्मो विरुद्धोऽभावस्य सा सत्ता साध्यते कथम् ?** ॥" [प्रमाणवा० १.१९२]

इति चेत्, न, इत्थं वह्निमद्धर्मत्वादिविकल्पैर्धूमेन वह्न्यनुमानस्याऽप्युच्छेदापत्तेः ।

विकल्पस्याऽप्रमाणत्वाद् विकल्पसिद्धो धर्मी नाऽस्त्येवेति **नैयायिकः** । तस्येत्थंवचनस्यैवाऽनुप-पत्तेस्तूष्णीम्भावापत्तिः, विकल्पसिद्धधर्मिणोऽप्रसिद्धौ तत्प्रतिषेधानुपपत्तेरिति ।

इदं त्ववधेयम्-विकल्पसिद्धस्य धर्मिणो नाऽखण्डस्यैव[६] भानमसत्ख्यातिप्रसङ्गादिति । शब्दा-देर्विशिष्टस्य तस्य[७] [भा]नाभ्युपगमे विशेषणस्य संशयेऽभावनिश्चये वा[८] वैशिष्ट्यभा[ना]नुपपत्तेः विशेषणाद्यंशे

---

१. ०ग्रहसमया०-सं० व० मु० । प्र० न० ३. १७, २० । २. तुलना-न्यायदी० पृ० २२ । ३. तुलना -प्र० न० ३. २१ । ४. अनिश्चितप्रामाण्यप्रत्य०-प्र० । ५-०साधने चानन्वया०-मु० । ६. नाखण्डलस्यै०-सं० । नाखण्डस्यैवाभानं-व० । ७. तस्य भानाभ्यु०-मु० । ८. वा विशिष्टवैशिष्ट्यभानानु०मु० ।

आहार्यारोपरूपा विकल्पात्मिकैवाऽनुमितिः स्वीकर्तव्या, देशकालसत्तालक्षणस्याऽस्तित्वस्य, सकलदेश-कालसत्ताऽभावलक्षणस्य च नास्तित्वस्य साधनेन परपरिकल्पितविपरीतारोपव्यवच्छेदमात्रस्य फलत्वात् ।

वस्तुतस्तु खण्डशः प्रसिद्धपदार्थाऽस्तित्वनास्तित्व-साधनमेवोचितम् । अत एव "**असतो नत्थि णिसेहो**" [विशेषा० गा० १५७४] इत्यादि **भाष्य**ग्रन्थे खरविषाणं नास्तीत्यत्र 'खरे विषाणं नाऽस्ति' इत्येवाऽर्थ उपपादितः । एकान्तनित्यमर्थक्रियासमर्थं न भवति क्रम-यौगपद्याभावादित्यत्रापि विशेषा-[1]वमर्शदशायां क्रमयौगपद्यनिरूपकत्वाभावेनाऽर्थक्रियानियामकत्वाभावो नित्यत्वादौ सुसाध इति सम्यग्-निभालनीयं स्वपरसमयदत्तदृष्टिभिः ।

[परार्थानुमानस्य प्रतिपादनम् ।]

[2]परार्थं पक्षहेतुवचनात्मकमनुमानमुपचारात्, तेन श्रोतुरनुमानेनाऽर्थबोधनात् । पक्षस्य विवादादेव गम्यमानत्वादप्रयोग इति **सौगतः** तन्न, यत्किञ्चिद्वचनव्यवहितात् ततो व्युत्पन्नमतेः पक्षप्रतीतावप्यन्यान् प्रत्यवश्यनिर्देश्यत्वात् । प्रकृतानुमान[3]वाक्यावयवान्तरैकवाक्यतापन्नात् तत[4]ोऽवगम्यमानस्य पक्षस्याऽप्रयोगस्य चेष्टत्वात् । [5]अवश्यं चाऽभ्युपगन्तव्यं हेतोः प्रतिनियत[6]धर्मिधर्मताप्रतिपत्त्यर्थमुपसंहारवचनवत् साध्यस्याऽपि [7]तदर्थं पक्षवचनं **ताथागते**नापि, अन्यथा समर्थनोपन्यासादेव गम्यमानस्य हेतोरप्यनुपन्यासप्रसङ्गात्, मन्दमतिप्रतिपत्त्यर्थस्य चोभयत्राऽविशेषादिति । किञ्च, प्रतिज्ञायाः प्रयोगानर्हत्वे शास्त्रादावप्[8]यसौ न प्रयुज्येत, दृश्यते च प्रयुज्यमानेयं **शाक्य**शास्त्रेऽपि । परानुग्रहार्थं शास्त्रे तत्प्रयोगश्च वादेऽपि तुल्यः, विजिगीषूणामपि मन्दमतीनामर्थप्रतिपत्तेस्तत एवोपपत्तेरिति ।

आगमात् परेणैव ज्ञातस्य वचनं परार्थानुमानम्, यथा बुद्धिरचेतना उत्पत्तिमत्त्वात् घटवदिति **साङ्ख्या**नुमानम् । अत्र हि बुद्धावुत्पत्तिमत्त्वं **साङ्ख्याने**(ख्येन)नैवाऽभ्युपगम्यते इति, तदेतदपेशलम्, वादिप्रतिवादिनोरागमप्रामाण्यविप्रतिप्रत्तेः, अन्यथा तत एव साध्यसिद्धिप्रसङ्गात् । परीक्षापूर्वमागमाभ्युपगमेऽपि परीक्षाकाले तद्बाधात् ।

नन्वेवं भवद्भिरपि कथमापाद्यते परं प्रति 'यत् सर्वथैकं तत् नाऽनेकत्र सम्बध्यते, तथा च सामान्यम्' इति ? सत्यम्, एकधर्मोपगते(मे) धर्मान्तरसन्दर्शनमात्रं(त्र)तत्परत्वेनैतदापादनस्य वस्तु-निश्चायकत्वाभावात्, प्रसङ्गविपर्ययरूपस्य मौलहेतोरेव तन्निश्चायकत्वात्, अनेकवृत्तित्वव्यापका-ऽनेकत्व-निवृत्त्यैव तन्निवृत्तेः मौलहेतुपरिकरत्वेन प्रसङ्गोपन्यासस्याऽपि न्याय्यत्वात्। बुद्धिरचेतनेत्यादौ च प्रसङ्ग-विपर्ययहेतोर्व्याप्तिसिद्धिनिबन्धनस्य विरुद्धधर्माध्यासस्य विपक्षबाधकप्रमाणस्याऽनुपस्थापनात् प्रसङ्गस्या-ऽप्यन्याय्यत्वमिति वदन्ति ।

[9]हेतुः साध्योपपत्त्यन्यथानुपपत्तिभ्यां द्विधा प्रयोक्तव्यः, यथा पर्वतो वह्निमान्, सत्येव वह्नौ धूमोपपत्तेः असत्यनुपपत्तेर्वा । [10]अनयोरन्यतरप्रयोगेणैव साध्यप्रतिपत्तौ द्वितीयप्रयोगस्यैकत्राऽनुपयोगः ।

---

१. विशेषामर्श०-प्र० व० । २. तुलना-प्र० न० ३. २३ । ३.-०मानशक्या०-सं० प्र० । व० प्रतौ 'वाक्यावय' इत्यादि पाठः प्रथमं लिखितोऽपि पश्चात् 'शक्यावय' इत्यादिरूपेण शोधितो दृश्यते । ४. ततः-विवादात् । द्रष्टव्यः-स्या० र० पृ० ५५० । ५. तुलना-प्र० न० ३. २४ । ६. प्रतिनियतधर्मिता प्रति०-प्र० सं० । ७. तदर्थपक्ष०-सं० । ८. ०प्यस्मै न-सं० । ०प्यस्यै न-प्र० । ९. तुलना-प्र० न० ३. २९-३१ । १०. प्र० न० ३. ३२ ।

[१]पक्षहेतुवचनलक्षणमवयवद्वयमेव च परप्रतिपत्त्यङ्गं न दृष्टान्तादिवचनम्, पक्षहेतुवचनादेव परप्रतिपत्तेः, प्रतिबन्धस्य तर्कत एव निर्णयात्, तत्स्मरणस्याऽपि पक्षहेतुदर्शनेनैव सिद्धेः, असमर्थितस्य दृष्टान्तादेः प्रतिपत्त्यनङ्गत्वात् तत्समर्थनेनैवाऽन्यथासिद्धेश्च । समर्थनं हि हेतोरसिद्धत्वादिदोषान्निराकृत्य स्वसाध्येनाऽविनाभावसाधनम्, तत एव च परप्रतीत्युपपत्तौ किमपरप्रयासेनेति ?

[२]मन्दमतींस्तु व्युत्पादयितुं दृष्टान्तादिप्रयोगोऽप्युपयुज्यते, तथाहि-यः खलु क्षयोपशमविशेषादेव निर्णीतपक्षो दृष्टान्तस्मार्यप्रतिबन्ध-ग्राहकप्रमाणस्मरणनिपुणोऽपरावयवाभ्यूहनसमर्थश्च भवति, तं प्रति हेतुरेव प्रयोज्यः । यस्य तु नाऽद्यापि पक्षनिर्णयः, तं प्रति पक्षोऽपि । यस्तु प्रतिबन्धग्राहिणः प्रमाणस्य न स्मरति, तं प्रति दृष्टान्तोऽपि । यस्तु दार्ष्टान्तिके हेतुं योजयितुं न जानीते, तं प्रत्युपनयोऽपि । एवमपि साकाङ्क्षं प्रति च निगमनम् । पक्षादिस्वरूपविप्रतिपत्तिमन्तं प्रति च पक्षशुद्ध्यादि[३]कमपीति सोऽयं दशावयवो हेतुः पर्यवस्यति ।

[हेतुप्रकाराणां प्रदर्शनम् ।]

[४]स चाऽयं द्विविधः-विधिरूपः प्रतिषेधरूपश्च । तत्र विधिरूपो द्विविधः-विधिसाधकः प्रतिषेध-साधकश्च । तत्राऽऽद्यः षोढा[५], तद्यथा-कश्चिद् व्याप्य एव, यथा शब्दोऽनित्यः प्रयत्नानान्तरीयकत्वादिति । यद्यपि व्याप्यो हेतुः सर्व एव, तथापि कार्याद्यना[६]त्मव्याप्यस्यात्(त्र) ग्रहणाद्भेदः । वृक्षः शिंशपाया इत्यादेरप्यत्रैवाऽन्तर्भावः । [७]कश्चित्कार्यरूपः, यथा पर्वतोऽयमग्निमान् धूमवत्त्वान्यथानुपपत्तेरित्यत्र धूमः, धूमो ह्यग्नेः कार्यभूतः तदभावेऽनुपपद्यमानोऽग्निं गमयति । कश्चित्कारणरू[८]पः, यथा वृष्टिर्भविष्यति, विशिष्ट-मेघान्यथानुपपत्तेरित्यत्र मेघविशेषः, स हि वर्षस्य कारणं स्वकार्यभूतं वर्षं गमयति । ननु कार्याभावेऽपि सम्भवत् कारणं न कार्यानुमापकम्, अत एव न वह्निर्धूमं गमयतीति चेत्, सत्यम्, [९]यस्मिन् सामर्थ्याप्रतिबन्धः कारणान्तरसाकल्यं च निश्चेतुं शक्यते, तस्यैव कारणस्य कार्यानुमापकत्वात् । कश्चित् पूर्वच[१०]रः, यथा उदेष्यति शकटं कृत्तिकोदयान्यथानुपपत्तेरित्यत्र कृत्तिकोदयानन्तरं मुहूर्तान्ते नियमेन शकटोदयो जायत इति कृत्तिकोदयः पूर्वचरो हेतुः शकटोदयं गमयति । कश्चित् उत्तरचरः[११], यथोदगाद्भरणिः प्राक्, कृत्तिकोदयादित्यत्र कृत्तिकोदयः, कृत्तिकोदयो हि भरण्युदयोत्तरचरस्तं गमयतीति [१२]कालव्यवधानेनाऽनयोः कार्यकारणाभ्यां भेदः । कश्चित् सहचरः[१३], यथा मातुलिङ्गं रूपवद्भवितुमर्हति रसवत्तान्यथानुपपत्तेरित्यत्र रसः, रसो हि नियमेन रूपसहचरितः, तदभावेऽनुपपद्यमानस्तद् गमयति, [१४]परस्परस्वरूपपरित्यागो-पलम्भपौर्वापर्याभावाभ्यां स्वभावकार्यकारणे-भ्योऽस्य भेदः । एतेषूदाहरणेषु भावरूपानेवाऽग्न्यादीन् साधयन्ति धूमादयो हेतवो भावरूपा एवेति विधिसाधकविधिरूपास्त एवाऽविरुद्धोपलब्धय इत्युच्यन्ते ।

द्वितीयस्[१५]तु निषेधसाधको विरुद्धोपलब्धिनामा । स च स्व[१६]भावविरुद्धतद्व्याप्याद्युपलब्धिभेदात् सप्तधा । [१७]यथा नास्त्येव सर्वथा एकान्तः, अनेकान्तस्योपलम्भात् । नास्त्यस्य तत्त्वनिश्चयः, तत्र सन्देहात् ।

---

१. तुलना-प्र० न० ३. २८, ३३-३६ । २. तुलना-प्र० न० ३. ४२ । ३. दिगम्बरजैनपरम्परायां पञ्चधा शुद्धिर्न दृश्यते । ४. तुलना-प्र० न० ३. ५४-५५ । ५. तुलना-प्र० न० ३. ६८-६९, ७७ । ६. -०व्याप्यः स्यात् प्र० सं० । ७. तुलना-प्र० न० ३. ७८ । ८. तुलना-प्र० न० ३. ७९. । ९. तुलना-प्र० न० ३. ७०. । १०. तुलना प्र० न० ३. ८० । ११. तुलना-प्र० न० ३. ८१ । १२. तुलना-प्र० न० ३. ७१ । १३. तुलना-प्र० न० ३. ८२ । १४. तुलना-प्र० न० ३. ७६ । १५. तुलना-प्र० न० ३. ८३-९२ । १६. विरुद्धस्वभावव्यापककार्यकारणपूर्व-चरोत्तरचरसहचरोपलम्भभेदात्सप्तधा । १७. तुलना-प्र० न० ३. ८४, ८५, ८७-९२ ।

नास्त्यस्य क्रोधोपशान्तिः, वदनविकारादेः । नास्त्यस्याऽसत्यं वचः, रागाद्यकलङ्कितज्ञानकलितत्वात् । नोद्गमिष्यति मुहूर्तान्ते पुष्यतारा, रोहिण्युद्गमात् । नोदगान्मुहूर्तात्पूर्वं मृगशिरः, पूर्वफा(फ)ल्गुन्युदयात्[1] । नास्त्यस्य मिथ्याज्ञानं, सम्यग्दर्शनादिति । अत्रानेकान्तः प्रतिषेध्यस्यैकान्तस्य स्वभावतो विरुद्धः । तत्त्वसन्देहश्च प्रतिषेध्यतत्त्वनिश्चयविरुद्ध-तदनिश्चयव्याप्यः । वदनविकारादिश्च क्रोधोपशमविरुद्धतदनुपशमकार्यम् । रागाद्यकलङ्कितज्ञानकलितत्वं चाऽसत्यविरुद्धसत्यकारणम् । रोहिण्युद्गमश्च पुष्यतारोद्गमविरुद्धमृगशीर्षोदयपूर्वचरः । पूर्वफल्गुन्युदयश्च मृगशीर्षोदयविरुद्धमघोदयोत्तरचरः । सम्यग्दर्शनं च मिथ्याज्ञानविरुद्धसम्यग्ज्ञानसहचरमिति ।

प्रतिषेधरूपोऽपि हेतुर्द्विविधः-विधिसाधकः प्रतिषेधसाधकश्चेति । आद्यो[2] विरुद्धानुपलब्धिनामा विधेयविरुद्ध-कार्यकारणस्वभावव्यापकसहचरानुपलम्भभेदात्पञ्चधा । यथा अस्त्यत्र रोगातिशयः, नीरोगव्यापारानुपलब्धेः । विद्यतेऽत्र कष्टम्, इष्टसंयोगाभावात् । वस्तुजातमनेकान्तात्मकम्, एकान्तस्वभावानुपलम्भात् । अस्त्यत्र च्छाया, औष्ण्यानुपलब्धेः । अस्त्यस्य मिथ्याज्ञानम्, सम्यग्दर्शनानुपलब्धेरिति ।

द्वितीयोऽविरुद्धानुपलब्धिनामा[3] प्रतिषेध्याविरुद्ध-स्वभावव्यापककार्यकारणपूर्वचरोत्तरचरसहचरानुपलब्धिभेदात् सप्तधा । यथा नास्त्यत्र भूतले कुम्भः, उपलब्धिलक्षणप्राप्तस्य तत्स्वभावस्याऽनुपलम्भात् । नास्त्यत्र पनसः, पादपानुपलब्धेः । नास्त्यत्राऽप्रतिहतशक्तिकं बीजम्, अङ्कुरानवलोकनात् । न सन्त्यस्य प्रशमप्रभृतयो भावाः, तत्त्वार्थश्रद्धानाभावात् । नोद्गमिष्यति मुहूर्तान्ते स्वातिः, चित्रोदयादर्शनात् । नोदगमत्पूर्वभद्रपदा मुहूर्तात्पूर्वम्, उत्तरभद्रपदोद्गमानवगमात् । नास्त्यत्र सम्यग्ज्ञानम्, सम्यग्दर्शनानुपलब्धेरिति । सोऽयमनेकविधोऽन्यथानुपपत्त्येकलक्षणो हेतुरुक्तोऽतोऽन्यो हेत्वाभासः ।

[हेत्वाभासनिरूपणम् ।]

स त्रेधा[4]-असिद्धविरुद्धानैकान्तिकभेदात् । तत्राऽप्रतीयमानस्वरूपो हेतुरसिद्धः[5] । स्वरूपाप्रतीतिश्चाऽज्ञानात्सन्देहाद्विपर्ययाद्वा । स द्विविधः-उभयासिद्धोऽन्यतरासिद्धश्च । आद्यो यथा शब्दः परिणामी चाक्षुषत्वादिति । द्वितीयो यथा अचेतनास्तरवः, विज्ञानेन्द्रियायुर्निरोधलक्षणमरणरहितत्वात्, अचेतनाः सुखादयः उत्पत्तिमत्त्वादिति वा ।

नन्वन्यतरासिद्धो हेत्वाभास एव नास्ति, तथाहि-परेणाऽसिद्ध इत्युद्भाविते यदि वादी न तत्साधकं प्रमाणमाचक्षीत, तदा प्रमाणाभावादुभयोरप्यसिद्धः । अथाऽऽचक्षीत तदा प्रमाणस्याऽपक्षपातित्वादुभयोरपि सिद्धः । अथ यावन्न परं प्रति प्रमाणेन प्रसाध्यते, तावत् तं प्रत्यसिद्ध इति चेत्, गौणं तर्ह्यसिद्धत्वम्, न हि रत्नादिपदार्थस्तत्त्वतोऽप्रतीयमानस्तावन्तमपि कालं मुख्यतया तदाभासः । किञ्च, अन्यतरासिद्धो यदा हेत्वाभासस्तदा वादी निगृहीतः स्यात्, न च निगृहीतस्य पश्चादनिग्रह इति युक्तम् । नापि हेतुसमर्थनं पश्चाद् युक्तम्, निग्रहान्तत्वाद् वादस्येति । अत्रोच्यते-यदा वादी सम्यग्घेतुत्वं प्रतिपद्यमानोऽपि तत्समर्थनन्यायविस्मरणादिनिमित्तेन प्रतिवादिनं प्राश्निकान् वा प्रतिबोधयितुं न शक्नोति, असिद्धतामपि नाऽनुमन्यते, तदाऽन्यतरासिद्धत्वेनैव निगृह्यते । तथा, स्वयमनभ्युपगतोऽपि परस्य सिद्ध इत्येतावानै[6](इत्येतावतै)वोपन्यस्तो

१. पूर्वाफाल्गु-प्र० । २. तुलना- प्र० न० ३. १०३-१०९ । ३. तुलना- प्र० न० ३. ९४-१०२ । ४. तुलना प्र० न० ६. ४७ । ५. तुलना-प्र० न० ६. ४८-५१ । ६. -इत्येतावामेवोप०-सं० ।

हेतुरन्यतरासिद्धो निग्रहाधिकरणम्, यथा **साङ्ख्यस्य जैनं** प्रति 'अचेतनाः सुखादय उत्पत्तिमत्त्वात् घटवत्' इति।

साध्यविपरीतव्याप्तो विरुद्धः[1]। यथा अपरिणामी शब्दः कृतकत्वादिति। कृतकत्वं ह्यपरिणामित्वविरुद्धेन परिणामित्वेन व्याप्तमिति।

यस्याऽन्यथानुपपत्तिः सन्दिह्यते सोऽनैकान्तिकः[2]। स द्वेधा-निर्णीतविपक्षवृत्तिकः सन्दिग्धविपक्षवृत्तिकश्च। आद्यो यथा-नित्यः शब्दः प्रमेयत्वात्। अत्र हि प्रमेयत्वस्य वृत्तिर्नित्ये व्योमादौ सपक्ष इव विपक्षेऽनित्ये घटादावपि निश्चिता। द्वितीयो यथा-अभिमतः सर्वज्ञो न भवति वक्तृत्वादिति। अत्र हि वक्तृत्वं विपक्षे सर्वज्ञे संदिग्धवृत्तिकम्, सर्वज्ञः किं वक्ताऽऽहोस्विन्नेति सन्देहात्। एवं स श्यामो मित्रापुत्रत्वादित्याद्यप्युदाहार्यम्।

अकिञ्चित्कराख्यश्चतुर्थोऽपि हेत्वाभासभेदो **धर्मभूषणे**नोदाहृतो न श्रद्धेयः। सिद्धसाधनो बाधितविषयश्चेति द्विविधस्याऽप्यप्रयोजकाह्वयस्य तस्य प्रतीत-निराकृताख्यपक्षाभासभेदानतिरिक्तत्वात्। न च यत्र पक्षदोषस्तत्राऽवश्यं हेतुदोषोऽपि वाच्यः, दृष्टान्तादिदोषस्याऽप्यवश्यं वाच्यत्वापत्तेः। एतेन कालात्ययापदिष्टोऽपि प्रत्युक्तो वेदितव्यः। प्रकरणसमोऽपि नाऽतिरिच्यते, तुल्यबल-साध्यतद्विपर्यय-साधकहेतुद्वयरूपे सत्यस्मिन् प्रकृतसाध्यसाधनयोरन्यथानुपपत्त्यनिश्चयेऽसिद्ध एवाऽन्तर्भावादिति संक्षेपः।

[आगमप्रमाणनिरूपणम्।]

आप्तवचनादाविर्भूतमर्थसंवेदनमागमः[3]। न च व्याप्तिग्रहणबलेनाऽर्थप्रतिपादकत्वाद् धूमवदस्याऽनुमानेऽन्तर्भावः, कूटाकूटकार्षापणनिरूपणप्रवणप्रत्यक्षवदभ्यासदशायां व्याप्तिग्रहनैरपेक्ष्येणैवाऽस्याऽर्थबोधकत्वात्। यथास्थितार्थपरिज्ञानपूर्वकहितोपदेशप्रवण आप्तः[4]। वर्णपदवाक्यात्मकं तद्वचनम्[5]। वर्णोऽकारादिः पौद्गलिकः। पदं सङ्केतवत्। अन्योऽन्यापेक्षाणां पदानां समुदायो वाक्यम्[6]।

तदिदमागमप्रमाणं[7] सर्वत्र विधिप्रतिषेधाभ्यां स्वार्थमभिदधानं सप्तभङ्गीमनुगच्छति, तथैव परिपूर्णार्थप्रापकत्वलक्षण-तात्त्विकप्रामाण्यनिर्वाहात्, क्वचिदेकभङ्गदर्शनेऽपि व्युत्पन्नमतीनामितरभङ्गाक्षेपध्रौव्यात्। यत्र तु घटोऽस्तीत्यादिलोकवाक्ये सप्तभङ्गीसंस्पर्शशून्यता तत्राऽर्थप्रापकत्वमात्रेण लोकापेक्षया प्रामाण्येऽपि तत्त्वतो न प्रामाण्यमिति द्रष्टव्यम्।

[सप्तभङ्गीस्वरूपचर्चा।]

केयं सप्तभङ्गीति चेदुच्यते-एकत्र वस्तुन्येकैकधर्मपर्यनुयोगवशादविरोधेन व्यस्तयोः समस्तयोश्च विधिनिषेधयोः कल्पनया स्यात्काराङ्कितः सप्तधा वाक्प्रयोगः सप्तभङ्गी[8]। इयं च सप्तभङ्गी वस्तुनि प्रतिपर्यायं सप्तविधधर्माणां सम्भवात् सप्तविधसंशयोत्थापित-सप्तविधजिज्ञासामूल-सप्तविधप्रश्नानुरोधादुपपद्यते[9]। तत्र स्यादस्त्येव सर्वमिति प्राधान्येन विधिकल्पनया प्रथमो भङ्गः[10]। स्यात्-कथञ्चित् स्वद्रव्यक्षेत्रकालभावापेक्षयेत्यर्थः। अस्ति हि घटादिकं द्रव्यतः पार्थिवादित्वेन, न जलादित्वेन। क्षेत्रतः

---

१. तुलना- प्र० न० ६. ५२, ५३। २. तुलना-प्र० न० ६. ५४-५७। ३. प्र० न० ४. १। ४. तुलना-प्र० न० ४. ४। ५. तुलना-प्र० न० ४. ८, ९। ६. तुलना-प्र० न० ४. १०। ७. तुलना-प्र० न० ४. १३। ८. प्र० न० ४. १४। ९. तुलना-प्र० न० ४. ३७-४२। १०. तुलना-प्र० न० ४. १५।

पाटलिपुत्रकादित्वेन, न कान्यकुब्जादित्वेन । कालतः शैशिरादित्वेन, न वासन्तिकादित्वेन । भावतः श्यामादित्वेन, न रक्तादित्वेनेति । एवं स्यान्नास्त्येव सर्वमिति प्राधान्येन निषेधकल्पनया द्वितीयः[१] । न चाऽसत्त्वं काल्पनिकम्, सत्त्ववत् तस्य स्वातन्त्र्येणाऽनुभवात्, अन्यथा विपक्षासत्त्वस्य तात्त्विकस्याऽभावेन हेतोस्त्रैरूप्यव्याघातप्रसङ्गात् । स्यादस्त्येव स्यान्नास्त्येवेति प्राधान्येन क्रमिकविधिनिषेधकल्पनया तृतीयः[२] । स्यादवक्तव्यमेवेति युगपत्प्राधान्येन विधिनिषेधकल्पनया चतुर्थः[३], एकेन पदेन युगपदुभयोर्वक्तुमशक्यत्वात् । शतृशानशौ[४] सदित्यादौ साङ्केतिकपदेनाऽपि क्रमेणाऽर्थद्वयबोधनात् । अन्यतरत्वादिना कथञ्चिदुभयबोधनेऽपि प्रातिस्विकरूपेणैकपदादुभयबोधस्य ब्रह्मणापि दुरुपपादत्वात् । स्यादस्त्येव स्यादवक्तव्यमेवेति विधिकल्पनया युगपद्विधिनिषेधकल्पनया च पञ्चमः[५] । स्यान्नास्त्येव स्यादवक्तव्यमेवेति निषेधकल्पनया युगपद्विधिनिषेधकल्पनया च षष्ठः[६] । स्यादस्त्येव स्यान्नास्त्येव स्यादवक्तव्यमेवेति विधिनिषेधकल्पनया युगपद्विधिनिषेधकल्पनया च सप्तम[७] इति ।

सेयं सप्तभङ्गी प्रतिभङ्ग(ङ्गं) सकलादेशस्वभावा विकलादेशस्वभावा च[८] । तत्र प्रमाणप्रति[९]पन्नानन्तधर्मात्मकवस्तुनः कालादिभिरभेदवृत्तिप्राधान्यादभेदोपचाराद्वा यौगपद्येन प्रतिपादकं वचः सकलादेशः[१०] । नयविषयीकृतस्य वस्तुधर्मस्य भेदवृत्तिप्राधान्याद्भेदोपचाराद्वा क्रमेणाऽभिधायकं वाक्यं विकलादेशः । ननु कः क्रमः, किं वा यौगपद्यम्[११] ? उच्यते—यदाऽस्तित्वादिधर्माणां कालादिभिर्भेदविवक्षा तदैकशब्दस्याऽनेकार्थप्रत्यायने शक्त्यभावात् क्रमः । यदा तु तेषामेव धर्माणां कालादिभिरभेदेन वृत्तमात्मरूपमुच्यते तदैकेनापि शब्देनैकधर्मप्रत्यायनमुखेन तदात्मकतामापन्नस्याऽनेकाशेषरूपस्य वस्तुनः प्रतिपादनसम्भवाद् यौगपद्यम् ।

के पुनः कालादयः ? । उच्यते-काल आत्मरूपमर्थः सम्बन्ध उपकारः गुणिदेशः संसर्गः शब्द इत्यष्टौ । तत्र स्याज्जीवादि वस्त्वस्त्येवेत्यत्र यत्कालमस्तित्वं त्वत्(तत्)कालाः शेषानन्तधर्मा वस्तुन्येकत्रेति तेषां कालेनाऽभेदवृत्तिः । यदेव चाऽस्तित्वस्य तद्गुणत्वमात्मरूपं तदेवाऽन्यानन्तगुणानामपीत्यात्मरूपेणाऽभेदवृत्तिः । य एव चाऽऽधारे(रो)ऽर्थो द्रव्याख्योऽस्तित्वस्य स एवाऽन्यपर्यायाणामित्यर्थेनाऽभेदवृत्तिः । य एव चाऽविष्वग्भावः सम्बन्धोऽस्तित्वस्य स एवाऽन्येषामिति सम्बन्धेनाऽभेदवृत्तिः । य एव चोपकारोऽस्तित्वेन स्वानुरक्तत्वकरणं स एवाऽन्यैरपीत्युपकारेणाऽभेदवृत्तिः । य एव गुणिनः सम्बन्धी देशः क्षेत्रलक्षणोऽस्तित्वस्य स एवाऽन्येषामिति गुणिदेशेनाऽभेदवृत्तिः । य एव चैकवस्त्वात्मनाऽस्तित्वस्य संसर्गः स एवाऽन्येषामिति संसर्गेणाऽभेदवृत्तिः । गुणीभूतभेदादभेदप्रधानात् सम्बन्धाद् विपर्ययेण संसर्गस्य भेदः । य एव चाऽस्तीति शब्दोऽस्तित्वधर्मात्मकस्य वस्तुनो वाचकः स एवाऽशेषानन्तधर्मात्मकस्याऽपीति शब्देनाऽभेदवृत्तिः, पर्यायार्थिकनयगुणभावेन द्रव्यार्थिकनयप्राधान्यादुपपद्यते ।

द्रव्यार्थिकगुणभावेन पर्यायार्थिकप्राधान्ये तु न गुणानामभेदवृत्तिः सम्भवति, समकालमेकत्र नानागुणानामसम्भवात्, सम्भवे वा तदाश्रयस्य भेदप्रसङ्गात्, नानागुणानां सम्बन्धिन आत्मरूपस्य च भिन्नत्वात्, अन्यथा तेषां भेदविरोधात्, स्वाश्रयस्याऽर्थस्याऽपि नानात्वात्, अन्यथा नानागुणाश्रयत्व-

---

१. तुलना-प्र० न० ४. १६ । २. तुलना-प्र० न० ४. १७ । ३. तुलना-प्र० न० ४. १८ । ४. -०नचौ-रत्नाकरा० ४. १८ । ५. प्र० न० ४. १९ । ६. प्र० न० ४. २० । ७. तुलना प्र० न० ४. २१ । ८. तुलना प्र० न० ४. ४३ । ९. प्र० न० ४. ४४ । १०. तुलना-प्र० न० ४. ४५ । ११. द्रष्टव्या-रत्नाकरा० ४. ४४ ।

विरोधात्। सम्बन्धस्य च सम्बन्धिभेदेन भेददर्शनात्, नानासम्बन्धिभिरेकत्रैकसम्बन्धाघटनात् । तैः क्रियमाणस्योपकारस्य च प्रतिनियतरूपस्याऽनेकत्वात्, अनेकैरुपकारिभिः क्रियमाणस्योपकारस्यैकस्य विरोधात्। गुणिदेशस्य च प्रतिगुणं भेदात्, तदभेदे भिन्नार्थगुणानामपि गुणिदेशाभेदप्रसङ्गात्। संसर्गस्य च प्रतिसंसर्गिभेदात्, तदभेदे संसर्गिभेदविरोधात्। शब्दस्य प्रतिविषयं नानात्वात्, सर्वगुणानामेकशब्दवाच्यतायां सर्वार्थानामेकशब्दवाच्यतापत्तेरिति कालादिभिर्भिन्नात्मनामभेदोपचारः क्रियते। एवं भेदवृत्तितदुपचारावपि वाच्याविति। पर्यवसितं परोक्षम्। ततश्च निरूपितः प्रमाणपदार्थः।

इति महामहोपाध्यायश्रीकल्याणविजयगणिशिष्यमुख्य-
पण्डितश्रीलाभविजयगणिशिष्यावतंस-पण्डितश्रीजीतविजयगणिसतीर्थ्य-
पण्डितश्रीनयविजयगणिशिष्येण पण्डितश्रीपद्मविजयगणिसहोदरेण पण्डितयशोविजयगणिना
कृतायां जैनतर्कभाषायां प्रमाणपरिच्छेदः सम्पूर्णः।

## २. नयपरिच्छेदः।

[नयानां स्वरूपनिरूपणम्।]

प्रमाणान्युक्तानि। अथ नया उच्यन्ते। प्रमाणपरिच्छिन्नस्याऽनन्तधर्मात्मकस्य वस्तुन एकदेश-ग्राहिणस्तदितरांशाप्रतिक्षेपिणोऽध्यवसायविशेषा नयाः[1]। प्रमाणैकदेशत्वात् तेषां ततो भेदः। यथा हि समुद्रैकदेशो न समुद्रो नाऽप्यसमुद्रस्तथा नया अपि न प्रमाणं न वाऽप्रमाणमिति[2]। ते च द्विधा-द्रव्यार्थिकपर्यायार्थिकभेदात्[3]। तत्र प्राधान्येन द्रव्यमात्रग्राही द्रव्यार्थिकः। प्राधान्येन पर्यायमात्रग्राही पर्यायार्थिकः। तत्र द्रव्यार्थिकस्त्रिधा-नैगमसङ्ग्रहव्यवहारभेदात्[4]। पर्यायार्थिकश्चतुर्धा-ऋजुसूत्रशब्दसमभि-रूढैवंभूतभेदात्[5]। ऋजुसूत्रो द्रव्यार्थिकस्यैव भेद इति तु **जिनभद्रगणिक्षमाश्रमणाः।**

तत्र[6] सामान्यविशेषाद्यनेकधर्मोपनयनपरोऽध्यवसायो नैगमः, यथा पर्याययोर्द्रव्ययोः पर्याय-द्रव्ययोश्च मुख्यामुख्यरूपतया विवक्षणपरः। अत्र सच्चैतन्यमात्मनीति पर्याययोर्मुख्यामुख्यतया विवक्षणम्[7]। अत्र चैतन्याख्यस्य व्यञ्जनपर्यायस्य विशेष्यत्वेन मुख्यत्वात्, सत्त्वाख्यस्य तु विशेषणत्वेनाऽमुख्यत्वात्। प्रवृत्तिनिवृत्तिनिबन्धनार्थक्रियाकारित्वोपलक्षितो व्यञ्जनपर्यायः। भूतभविष्यतत्त्वसंस्पर्शरहितं वर्तमान-कालावच्छिन्नं वस्तुस्वरूपं चाऽर्थपर्यायः। वस्तु[8] पर्यायवद्द्रव्यमिति द्रव्ययोर्मुख्यामुख्यतया विवक्षणम्,

---

१. तुलना-प्र० न० ७. १।

२. तुलना-"नाऽप्रमाणं प्रमाणं वा नयो ज्ञानात्मको मतः।
स्यात्प्रमाणैकदेशस्तु सर्वथाप्यविरोधतः॥
नाऽयं वस्तु नचाऽवस्तु वस्त्वंशः कथ्यते यतः।
नाऽसमुद्रः समुद्रो वा समुद्रांशो यथोच्यते॥" तत्त्वार्थश्लोकवा० १.६.२१,५।

३. तुलना-प्र० न० ७. ५। ४. तुलना-प्र० न० ७. ६। ५. तुलना-प्र० न० ७. २७।

६. तुलना-प्र० न० ७. ७।
"गुणप्रधानभावेन धर्मयोरेकधर्मिणि।
विवक्षा नैगमोऽत्यन्तभेदोक्तिः स्यात्तदावृत्तिः॥" लघीय० ६.१८। तत्त्वार्थश्लोकवा० १.३३.२१।

७. तुलना-प्र० न० ७. ८। तत्त्वार्थश्लोकवा० १. ३३. ३२, ३३। ८. तुलना-प्र० न० ७. ९। तत्त्वार्थश्लोकवा० १.३३. ३९।

पर्यायवद्द्रव्याख्यस्य धर्मिणो विशेष्यत्वेन प्राधान्यात्, वस्त्वाख्यस्य विशेषणत्वेन गौणत्वात् । [१]क्षणमेकं सुखी विषयासक्तजीव इति पर्यायद्रव्ययोर्मुख्यामुख्यतया विवक्षणम्, अत्र विषयासक्तजीवाख्यस्य धर्मिणो विशेष्यत्वेन मुख्यत्वात्, सुखलक्षणस्य तु धर्मस्य तद्विशेषणत्वेनाऽमुख्यत्वात् । [२]न चैवं द्रव्यपर्यायोभयावगाहित्वेन नैगमस्य प्रामाण्यप्रसङ्गः, प्राधान्येन तदुभयावगाहिन एव ज्ञानस्य प्रमाणत्वात् ।

सामान्यमात्रग्राही परामर्शः सङ्ग्रहः[३]-स द्वेधा परोऽपरश्च[४] । तत्राऽशेषविशेषेष्वौदासीन्यं भजमानः शुद्धद्रव्यं सन्मात्रमभिमन्यमानः परः सङ्ग्रहः[५] । यथा विश्वमेकं सदविशेषादिति[६] । द्रव्यत्वादीन्यवान्तरसामान्यानि मन्वानस्तद्भेदेषु गजनिमीलिकामवलम्बमानः पुनरपरसङ्ग्रहः[७] ।

सङ्ग्रहेण गोचरीकृतानामर्थानां विधिपूर्वकमवहरणं येनाऽभिसन्धिना क्रियते स व्यवहारः[८] । यथा यत् सत् तद् द्रव्यं पर्यायो वा[९] । यद् द्रव्यं तज्जीवादिषड्विधम् । यः पर्यायः स द्विविधः-क्रमभावी सहभावी चेत्यादि ।

[१०]ऋजु वर्तमानक्षणस्थायिपर्यायमात्रं प्राधान्यतः सूचयन्नभिप्राय ऋजुसूत्रः । यथा सुखविवर्तः सम्प्रत्यस्ति । अत्र हि क्षणस्थायि सुखाख्यं पर्यायमात्रं प्राधान्येन प्रदर्श्यते, तदधिकरणभूतं पुनरात्मद्रव्यं गौणतया नाऽर्प्यत इति ।

[११]कालादिभेदेन ध्वनेरर्थभेदं प्रतिपद्यमानः शब्दः । कालकारकलिङ्गसङ्ख्यापुरुषोपसर्गाः कालादयः । [१२]तत्र बभूव भवति भविष्यति सुमेरुरित्यत्राऽतीतादिकालभेदेन सुमेरोर्भेदप्रतिपत्तिः, करोति क्रियते कुम्भ इत्यादौ कारकभेदेन, तटस्तटी तटमित्यादौ लिङ्गभेदेन, दाराः कलत्रमित्यादौ सङ्ख्याभेदेन, यास्यसि त्वम्, यास्यति भवानित्यादौ पुरुषभेदेन, सन्तिष्ठते अवतिष्ठते इत्यादावुपसर्गभेदेन ।

[१३]पर्यायशब्देषु निरुक्तिभेदेन भिन्नमर्थं समभिरोहन् समभिरूढः । शब्दनयो हि पर्यायभेदेऽप्यर्थाभेदमभिप्रैति, समभिरूढस्तु पर्यायभेदे भिन्नानर्थानभिमन्यते । अभेदं त्वर्थगतं पर्यायशब्दानामुपेक्षत इति, यथा [१४]इन्दनादिन्द्रः, शकनाच्छक्रः, पूर्दारणात्पुरन्दर इत्यादि ।

[१५]शब्दानां स्वप्रवृत्तिनिमित्तभूतक्रियाविष्टमर्थं वाच्यत्वेनाऽभ्युपगच्छन्नेवम्भूतः । यथेन्दनमनुभवन्निन्द्रः । समभिरूढनयो हीन्दनादिक्रियायां सत्यामसत्यां च वासवादेरर्थस्येन्द्रादिव्यपदेशमभिप्रैति, क्रियोपलक्षितसामान्यस्यैव प्रवृत्तिनिमित्तत्वात्, पशुविशेषस्य[१६] गमनक्रियायां सत्यामसत्यां च गोव्यपदेशवत्, तथारूढेः सद्भावात् । एवम्भूतः पुनरिन्दनादिक्रियापरिणतमर्थं तत्क्रियाकाले इन्द्रादिव्यपदेशभाजमभिमन्यते । न हि कश्चिदक्रियाशब्दोऽस्याऽस्ति । गौरश्व इत्यादिजातिशब्दाभिमतानामपि क्रियाशब्दत्वात्,

---

१. तुलना-प्र० न० ७. १० । तत्त्वार्थश्लोकवा० १. ३३. ४३ । २. तुलना-तत्त्वार्थश्लोकवा० १. ३३. २२, २३ । ३. प्र० न० ७. १३ । तुलना-लघीय० ६. १९ । तत्त्वार्थश्लोकवा० १.३३. ५१, ५५ । ४. तुलना-प्र० न० ७. १४ । ५. प्र० न० ७. १५ । ६. तुलना-प्र० न० ७. १६ । ७. प्र० न० ७. १९ । ८. प्र० न० ७. २३ । तत्त्वार्थश्लोकवा० १. ३३. ५८ । ९. तुलना-प्र० न० ७. २४ । १०. तुलना-प्र० न० ७.२८, २९ । तत्त्वार्थश्लोकवा० १.३३.६१ । ११. प्र० न० ७. ३२ । तुलना-लघीय० ६. १४ । तत्त्वार्थश्लोकवा० १. ३३. ६८-७२ । १२. तुलना प्र० न० ७. ३३ । १३. प्र० न० ७. ३६ । तुलना-तत्त्वार्थश्लोकवा० १. ३३. ७६, ७७ । १४. तुलना प्र० न० ७. ३७ । १५. प्र० न० ७. ४०, ४१ । तुलना-तत्त्वार्थश्लोकवा० १. ३३. ७८, ७९ । १६. -०स्य च गमन०-प्र० व० ।

गच्छतीति गौः, आशुगामित्वादश्व इति । शुक्लो नील इति गुणशब्दाभिमता अपि क्रियाशब्दा एव, शुचीभवनाच्छुक्लो, नीलनान्नील इति । देवदत्तो यज्ञदत्त इति यदृच्छाशब्दाभिमता अपि क्रियाशब्दा एव, देव एनं देयात्, यज्ञ एनं देयादिति । संयोगिद्रव्यशब्दाः[1] समवाय(यि)द्रव्यशब्दाश्चाऽभिमताः क्रियाशब्दा एव दण्डोऽस्याऽस्तीति दण्डी, विषाणमस्याऽस्तीति विषाणीत्यस्तिक्रियाप्रधानत्वात् । पञ्चतयी तु शब्दानां व्यवहारमात्रात्, न तु निश्चयादित्ययं नयः स्वीकुरुते ।

[2]एतेष्वाद्याश्चत्वारः प्राधान्येनाऽर्थगोचरत्वादर्थनयाः, अन्त्यास्तु त्रयः प्राधान्येन शब्दगोचरत्वाच्छब्दनयाः । तथा विशेषग्राहिणोऽर्पितनयाः, सामान्यग्राहिणश्चाऽनर्पितनयाः । तत्राऽनर्पितनयमते तुल्यमेव रूपं सर्वेषां सिद्धानां भगवताम् । अर्पितनयमते त्वेकद्वित्र्यादिसमयसिद्धाः स्वसमानसमयसिद्धैरेव तुल्या इति ।

तथा, लोकप्रसिद्धार्थानुवादपरो व्यवहारनयः, यथा पञ्चस्वपि वर्णेषु भ्रमरे[3] सत्सु श्यामो भ्रमर इति व्यपदेशः । तात्त्विकार्थाभ्युपगमपरस्तु निश्चयः, स पुनर्मन्यते पञ्चवर्णो भ्रमरः, बादरस्कन्धत्वेन तच्छरीरस्य पञ्चवर्णपुद्‌गलैर्निष्पन्नत्वात्, शुक्लादीनां च न्यग्भूतत्वेनाऽनुपलक्षणात् । अथवा एकनयमतार्थग्राही व्यवहारः, सर्वनयमतार्थग्राही च निश्चयः । न चैवं निश्चयस्य प्रमाणत्वेन नयत्वव्याघातः, सर्वनयमतस्याऽपि स्वार्थस्य तेन प्राधान्याभ्युपगमात् ।

तथा, ज्ञानमात्रप्राधान्याभ्युपगमपरा ज्ञाननयाः । क्रियामात्रप्राधान्याभ्युपगमपराश्च क्रियानयाः । तत्रर्जुसूत्रादयश्चत्वारो नयाश्चारित्रलक्षणायाः क्रियाया एव प्राधान्यमभ्युपगच्छन्ति, तस्या एव मोक्षं प्रत्यव्यवहितकारणत्वात् । नैगमसंग्रहव्यवहारास्तु यद्यपि चारित्रश्रुतसम्यक्त्वानां त्रयाणामपि मोक्षकारणत्वमिच्छन्ति, तथापि व्यस्तानामेव, न तु समस्तानाम्, एतन्मते ज्ञानादित्रयादेव मोक्ष इत्यनियमात्, अन्यथा नयत्वहानिप्रसङ्गात्, समुदयवादस्य स्थितपक्षत्वादिति द्रष्टव्यम् ।

[नयविषयाणामल्पबहुत्वम् ।]

कः पुनरत्र बहुविषयो नयः को वाऽल्पविषयः ? इति चेदु[4]च्यते-सन्मात्रगोचरात्संग्रहात्तावन्नैगमो बहुविषयो भावाभावभूमिकत्वात् । सद्विशेषप्रकाशकाद् व्यवहारतः संग्रहः समस्तसत्समूहोपदर्शकत्वाद् बहुविषयः । वर्तमानविषयावलम्बिन ऋजुसूत्रात् कालत्रितयवर्त्यर्थजातावलम्बी व्यवहारो बहुविषयः । कालादिभेदेन भिन्नार्थोपदेशकात् शब्दात् तद्विपरीतवेदक ऋजुसूत्रो बहुविषयः । न केवलं कालादिभेदेनैवर्जुसूत्रादल्पार्थता शब्दस्य, किन्तु भावघटस्याऽपि सद्भावासद्भावादिनाऽर्पितस्य 'स्याद् घटः स्यादघट' इत्यादिभङ्गपरिकरितस्य तेनाऽभ्युपगमात् तस्यर्जुसूत्राद् विशेषिततरत्वोपदेशात् । यद्यपीदृशसम्पूर्णसप्तभङ्गपरिकरितं वस्तु स्याद्वादिन एव सङ्गिरन्ते, तथापि ऋजुसूत्रकृतैतदभ्युपगमापेक्षयाऽन्यतरभङ्गेन विशेषितप्रतिपत्तिरत्राऽदुष्टेत्यदोष इति वदन्ति । प्रतिपर्यायशब्दमर्थभेदमभीप्सतः समभिरूढात् शब्दस्तद्विषया(द्विपर्यया)नुयायित्वाद्बहुविषयः । प्रतिक्रियं विभिन्नमर्थं प्रतिजानानादेवम्भूतात्समभिरूढः तदन्यथार्थस्थापकत्वाद्बहुविषयः ।

---

१. -०शब्दः स०-सं० । ० शब्दा स०-प्र० । २. तुलना-प्र० न० ७. ४४ । तत्त्वार्थश्लोकवा० १. ३३. ८१ । ३. -०भ्रमरेषु सत्सु-सं० प्र० । ४. तुलना-प्र० न० ७. ४६-५२ । सर्वार्थ० १. ३३ । तत्त्वार्थश्लोकवा० १. ३३. ८२-८९ ।

[1]नयवाक्यमपि स्वविषये प्रवर्तमानं विधिप्रतिषेधाभ्यां सप्तभङ्गीमनुगच्छति, विकलादेशत्वात् परमेतद्वाक्यस्य प्रमाणवाक्याद्विशेष इति द्रष्टव्यम् ।

[नयाभासानां निरूपणम् ।]

अथ नयाभासाः । तत्र द्रव्यमात्रग्राही पर्यायप्रतिक्षेपी द्रव्यार्थिकाभासः । पर्यायमात्रग्राही द्रव्यप्रतिक्षेपी पर्यायार्थिकाभासः । [2]धर्मिधर्मादीनामे(मै)कान्तिकपार्थक्याभिसन्धिर्नैगमाभासः, यथा **नैयायिकवैशेषिक**दर्शनम् । [3]सत्ताऽद्वैतं स्वीकुर्वाणः सकलविशेषान् निराचक्षाणः संग्रहाभासः, यथाऽखिलान्यद्वैत**वादि**दर्शनानि **सांख्य**दर्शनं च । [4]अपारमार्थिकद्रव्यपर्यायविभागाभिप्रायो व्यवहाराभासः, यथा **चार्वाक**दर्शनम्, [5]**चार्वाको** हि प्रमाणप्रतिपन्नं जीवद्रव्यपर्यायादिप्रविभागं कल्पनारोपितत्वेनाऽपह्नुते, अविचारितरमणीयं भूतचतुष्टयप्रविभागमात्रं तु स्थूललोकव्यवहारानुयायितया समर्थयत इति । [6]वर्तमानपर्यायाभ्युपगन्ता सर्वथा द्रव्यापलापी ऋजुसूत्राभासः, यथा [7]**ताथागतं** मतं । [8]कालादिभेदेनाऽर्थभेदमेवाऽभ्युपगच्छन् शब्दाभासः, यथा बभूव भवति भविष्यति सुमेरुरित्यादयः शब्दा भिन्नमेवाऽर्थमभिदधति, भिन्नकालशब्दत्वात् तादृक्सिद्धान्यशब्दवदिति । [9]पर्यायध्वनीनामभिधेयनानात्वमेव कक्षीकुर्वाणः समभिरूढाभासः, यथा इन्द्रः शक्रः पुरन्दर इत्यादयः शब्दा भिन्नाभिधेया एव, भिन्नशब्दत्वात्, करिकुरङ्गशब्दवदिति। [10]क्रियानाविष्टं वस्तु शब्दवाच्यतया प्रतिक्षिपन्नेवम्भूताभासः, [11]यथा विशिष्टचेष्टाशून्यं घटाख्यं वस्तु न घटशब्दवाच्यम्, घटशब्दप्रवृत्तिनिमित्तभूतक्रियाशून्यत्वात्, पटवदिति । अर्थाभिधायी शब्दप्रतिक्षेपी अर्थनयाभासः । शब्दाभिधाय्यर्थप्रतिक्षेपी शब्दनयाभासः । अर्पितमभिदधानोऽनर्पितं प्रतिक्षिपन्नर्पितनयाभासः । अनर्पितमभिदधदर्पितं प्रतिक्षिपन्ननर्पिताभासः । लोकव्यवहारमभ्युपगम्य तत्त्वप्रतिक्षेपी व्यवहाराभासः । तत्त्वमभ्युपगम्य व्यवहारप्रतिक्षेपी निश्चयाभासः । ज्ञानमभ्युपगम्य क्रियाप्रतिक्षेपी ज्ञाननयाभासः । क्रियामभ्युपगम्य ज्ञानप्रतिक्षेपी क्रियानयाभास इति ।

इति महामहोपाध्यायश्रीकल्याणविजयगणिशिष्यमुख्य-
पण्डितश्रीलाभविजयगणिशिष्यावतंस-पण्डितश्रीजीतविजयगणिसतीर्थ्य-
पण्डितश्रीनयविजयगणिशिष्येण पण्डितश्रीपद्मविजयगणिसहोदरेण पण्डितयशोविजयगणिना
विरचितायां जैनतर्कभाषायां नयपरिच्छेदः सम्पूर्णः ।

## ३. निक्षेपरिच्छेदः ।

[नामादिनिक्षेपनिरूपणम् ।]

नया निरूपिताः । अथ निःक्षेपा निरूप्यन्ते । प्रकरणादिवशेनाऽप्रतिपत्त्या(त्त्या)[12]दिव्यवच्छेदक-

---

१. तुलना-प्र० न० ७.५३ । २. तुलना-प्र० न० ७. ११, १२ । लघीय० स्ववि० ५. ९ । तत्त्वार्थश्लोकवा० १. ३३. ३१, ३४, ३६, ३८, ४०, ४२, ४४, ४७ । ३. तुलना-प्र० न० ७. १७, १८, २१, २२ । लघीय० ५. ८ । तत्त्वार्थश्लोकवा० १. ३३. ५२-५४, ५७ । ४. तुलना-प्र० न० ७. २५, २६ । लघीय० ५. १२ । तत्त्वार्थश्लोकवा० १. ३३. ६० । ५. स्या० र० पृ० १०५८ । ६. तुलना-प्र० न० ७. ३०, ३१ । तत्त्वार्थश्लोकवा० १. ३३. ६२ । ७. तथागतमतं-सं० मु० । ८. तुलना-प्र० न० ७. ३४, ३५ । तत्त्वार्थश्लोकवा० १. ३३. ८० । ९. तुलना-प्र० न० ७. ३८, ३९ । १०. तुलना-प्र० न० ७. ४२ । ११. प्र० न० ७. ४३ । १२. -०प्रतिपत्यवच्छेदक०-व० प्रतौ प्रथमं लिखितं पठ्यते ।

यथास्थानविनियोगाय शब्दार्थरचनाविशेषा निःक्षेपाः । मङ्गलादिपदार्थनिःक्षेपान्नाममङ्गलादिविनियोगोपपत्तेश्च निःक्षेपाणां फलवत्त्वम्, तदुक्तम्–"**अप्रस्तुतार्थापाकरणात् प्रस्तुतार्थव्याकरणाच्च निःक्षेपः फलवान्**" [लघी० स्ववि० ७.२] इति । ते च सामान्यतश्चतुर्धा–नामस्थापनाद्रव्यभावभेदात् ।

तत्र प्रकृतार्थनिरपेक्षा नामार्थान्यतरपरिणतिर्नामनिःक्षेपः । यथा सङ्केतितमात्रेणाऽन्यार्थस्थितेनेन्द्रादिशब्देन वाच्यस्य गोपालदारकस्य शक्रादिपर्यायशब्दानभिधेया परिणतिरियमेव वा यथाऽन्यत्राऽवर्तमानेन यदृच्छाप्रवृत्तेन डित्थडवित्थादिशब्देन वाच्या । तत्त्वतोऽर्थनिष्ठा उपचारतः शब्दनिष्ठा च । मेर्वादिनामापेक्षया यावद्द्रव्यभाविनी, देवदत्तादिनामापेक्षया[१] चाऽयावद्द्रव्यभाविनी, यथा वा पुस्तकपत्रचित्रादिलिखिता वस्त्वभिधानभूतेन्द्रादिवर्णावली ।

[२]यत्तु वस्तु तदर्थवियुक्तं तदभिप्रायेण स्थाप्यते चित्रादौ तादृशाकारम्, अक्षादौ च निराकारम्, चित्राद्यपेक्षयेत्वरं नन्दीश्वरचैत्यप्रतिमाद्यपेक्षया च यावत्कथिकं स स्थापनानिःक्षेपः, यथा जिनप्रतिमा स्थापनाजिनः, यथा चेन्द्रप्रतिमा स्थापनेन्द्रः ।

[३]भूतस्य भाविनो वा भावस्य कारणं यन्निक्षिप्यते स द्रव्यनिःक्षेपः, यथाऽनुभूतेन्द्रपर्यायोऽनुभविष्यमाणेन्द्रपर्यायो वा इन्द्रः, अनुभूतघृताधारत्वपर्यायेऽनुभविष्यमाणघृताधारत्वपर्याये च घृतघटव्यपदेशवत् तत्रेन्द्रशब्दव्यपदेशोपपत्तेः । क्वचिदप्राधान्येऽपि द्रव्यनिःक्षेपः प्रवर्तते, यथा**ऽङ्गारमर्दको** द्रव्याचार्यः, आचार्यगुणरहितत्वात् अप्रधानाचार्य इत्यर्थः । क्वचिदनुपयोगेऽपि, यथाऽनाभोगेनेहपरलोकाद्याशंसालक्षणेनाऽविधिना च भक्त्यापि क्रियमाणा जिनपूजादिक्रिया द्रव्यक्रियैव, अनुपयुक्तक्रियायाः साक्षान्मोक्षाङ्गत्वाभावात् । भक्त्याऽविधिनाऽपि क्रियमाणा सा पारम्पर्येण मोक्षाङ्गत्वापेक्षया द्रव्यतामश्नुते, भक्तिगुणेनाऽविधिदोषस्य निरनुबन्धीकृतत्वादित्याचार्याः ।

विवक्षितक्रियानुभूतिविशिष्टं स्वतत्त्वं यन्निक्षिप्यते स भावनिःक्षेपः, यथा इन्दनक्रियापरिणतो भावेन्द्र इति ।

[४]ननु भाववर्जितानां नामादीनां कः प्रतिविशेषस्त्रिष्वपि वृत्त्यविशेषात्? तथाहि–नाम तावन्नामवति पदार्थे स्थापनायां द्रव्ये चाऽविशेषेण वर्तते । भावार्थशून्यत्वं स्थापनारूपमपि त्रिष्वपि समानम्, त्रिष्वपि भावस्याऽभावात् । द्रव्यमपि नामस्थापनाद्रव्येषु वर्तत एव, द्रव्यस्यैव नामस्थापनाकरणात्, द्रव्यस्य द्रव्ये सुतरां वृत्तेश्चेति विरुद्धधर्माध्यासाभावान्नैषां भेदो युक्त इति चेत्, न, अनेन रूपेण विरुद्धधर्माध्यासाभावेऽपि रूपान्तरेण विरुद्धधर्माध्यासात् तद्भेदोपपत्तेः । तथाहि–[५]नामद्रव्याभ्यां स्थापना तावदाकाराभिप्रायबुद्धिक्रियाफलदर्शनाद् भिद्यते, यथा हि स्थापनेन्द्रे लोचनसहस्राद्याकारः, स्थापनाकर्तुश्च सद्भूतेन्द्राभिप्रायो, द्रष्टुश्च तदाकारदर्शनादिन्द्रबुद्धिः, भक्तिपरिणतबुद्धीनां नमस्करणादिक्रिया, तत्फलं च पुत्रोत्पत्त्यादिकं संवीक्ष्यते, न तथा नामेन्द्रे द्रव्येन्द्रे चेति ताभ्यां तस्य भेदः । [६]द्रव्यमपि भावपरिणामिकारणत्वाद् नामस्थापनाभ्यां भिद्यते, यथा ह्यनुपयुक्तो वक्ता द्रव्यम्, उपयुक्तत्वकाले उपयोगलक्षणस्य भावस्य कारणं भवति, यथा वा साधुजीवो द्रव्येन्द्रः सद्भावेन्द्ररूपायाः परिणतेः, न तथा नाम-स्थापनेन्द्राविति । नामाऽपि

---

१. -०क्षया वा याव०-प्र० व० । २. तुलना-विशेषा० गा० २६ । ३. तुलना-विशेष० गा० २८ । ४. तुलना-विशेषा० गा० ५२ । ५. तुलना-विशेषा० गा० ५३ । ६. तुलना-विशेषा० गा० ५४ ।

स्थापनाद्रव्याभ्यामुक्तवैधर्म्यादेव भिद्यत इति । दुग्धतक्रादीनां श्वेतत्वादिनाऽभेदेऽपि माधुर्यादिना भेदवन्नामादीनां केनचिद्रूपेणाऽभेदेऽपि रूपान्तरेण भेद इति स्थितम् ।

[१]ननु भाव एव वस्तु, किं तदर्थशून्यैर्नामादिभिरिति चेत्, न, नामादीनामपि वस्तुपर्यायत्वेन सामान्यतो भावत्वानतिक्रमात्, अविशिष्टे इन्द्रवस्तुन्युच्चरिते नामादिभेदचतुष्टयपरामर्शनात्,[२] प्रकरणादिनैव विशेषपर्यवसानात् । [३]भावाङ्गत्वेनैव वा नामादीनामुपयोगः जिननाम-जिनस्थापना-परिनिर्वृतमुनिदेह-दर्शनाद्भावोल्लासानुभवात् । केवलं नामादित्रयं भावोल्लासेऽनैकान्तिकमनात्यन्तिकं च कारणमिति ऐकान्तिका-त्यन्तिकस्य भावस्याऽभ्यर्हितत्वमनुमन्यन्ते[४] प्रवचनवृद्धाः[५] । एतच्च भिन्नवस्तुगत-नामाद्यपेक्षयोक्तम् ।

अभिन्नवस्तुगतानां तु नामादीनां भावाविनाभूतत्वादेव वस्तुत्वम्, सर्वस्य वस्तुनः स्वाभिधानस्य नामरूपत्वात्, स्वाकारस्य स्थापनारूपत्वात्, कारणतायाश्च द्रव्यरूपत्वात्, कार्यापन्नस्य च स्वस्य भावरूपत्वात्[६] । यदि च घटनाम घटधर्मो न भवेत् तदा ततस्तत्संप्रत्ययो न स्यात्, तस्य स्वापृथग्भूत-संबन्धनिमित्तकत्वादिति सर्वं नामात्मकमेष्टव्यम् । साकारं च सर्वं मति-शब्द-घटादीनामाकारवत्त्वात्,[७] नीलाकारसंस्थानविशेषादीनामाकारणामनुभवसिद्धत्वात् । [८]द्रव्यात्मकं च सर्वम्-उत्फणविफणकुण्डलिता-कारसमन्वितसर्पवत् विकाररहितस्याऽऽविर्भावतिरोभावमात्रपरिणामस्य द्रव्यस्यैव सर्वत्र सर्वदाऽनुभवात् । [९]भावात्मकं च सर्वं परापरकार्यक्षणसन्तानात्मकस्यैव तस्याऽनुभवादिति चतुष्टयात्मकं जगदिति नामादिनयसमुदयवादः[१०] ।

[निःक्षेपाणां नयेषु योजना ।]

अथ नामादिनिक्षेपा नयैः सह योज्यन्ते । तत्र नामादित्रयं द्रव्यास्तिकनयस्यैवाऽभिमतम्, पर्यायास्तिकनयस्य च भाव एव । आद्यस्य भेदौ सङ्ग्रहव्यवहारौ, नैगमस्य यथाक्रमं सामान्यग्राहिणो विशेषग्राहिणश्च अनयोरेवाऽन्तर्भावात् । ऋजुसूत्रादयश्च चत्वारो द्वितीयस्य भेदा इत्याचार्य**सिद्धसेन**-मतानुसारेणाऽभिहितं **जिनभद्रगणिक्षमाश्रमण**पूज्यपादैः-

"**नामाइतियं दव्वट्ठियस्स भावो अ पज्जवणयस्स ।**
**संगहववहारा पढमगस्स सेसा उ इयरस्स ॥**" [७५]

इत्यादिना **विशेषावश्यके** । स्वमते तु नमस्कारनिक्षेपविचारस्थले-

"**भावं चिय सद्दणया सेसा इच्छन्ति सव्वणिक्खेवे ॥**" [२८४७]

इति वचसा त्रयोऽपि शब्दनयाः शुद्धत्वाद् भावमेवेच्छन्ति, ऋजुसूत्रादयस्तु चत्वारश्चतुरोऽपि निक्षेपानिच्छन्ति अविशुद्धत्वादित्युक्तम् ।

[११]ऋजुसूत्रो नामभावनिक्षेपावेवेच्छतीत्यन्ये, तत्र(तन्न), ऋजुसूत्रेण द्रव्याभ्युपगमस्य[१२] सूत्राभिहित-त्वात्, पृथक्त्वाभ्युपगमस्य परं निषेधात् । तथा च सूत्रम्-"**उज्जुसुअस्स एगे अणुवउत्ते आगमओ एगं**

---

१. तुलना-विशेषा० गा० ५५ । २. ०परमार्शदर्शनात्-सं० । ३. तुलना-विशेषा० गा० ५६-५८ । ४. -०मन्यन्ते च प्रव०-प्र० । ५. विशेषा० गा० ५९ । ६. तुलना-विशेषा० ६० । ७. -०माकारत्वान्नी०- प्र० । ८. तुलना-विशेषा० गा० ६६-६८ । ९. तुलना-विशेषा० गा० ६९-७१ । १०. तुलना-विशेषा० गा० ७२, ७३ । ११. तुलना-विशेषा० गा० २८४८ । १२. द्रव्याभ्युपगतस्य-सं० ।

**दव्वावस्सयं, पुहत्तं नेच्छइ त्ति''** [अनुयो० सू० १४] । [1]कथं चाऽयं पिण्डावस्थायां सुवर्णादिद्रव्यमनाकारं भविष्यत्कुण्डलादिपर्यायलक्षण-भावहेतुत्वेनाऽभ्युपगच्छन् विशिष्टेन्द्राद्यभिलापहेतुभूतां साकारामिन्द्रादिस्थापनां नेच्छेत् ? न हि दृष्टेऽनुपपन्नं नामेति । किञ्च, इन्द्रादिसञ्ज्ञामात्रं तदर्थरहितमिन्द्रादिशब्दवाच्यं वा नामेच्छन् अयं भावकारणत्वाविशेषात् कुतो द्रव्यस्थापने नेच्छेत् ? प्रत्युत सुतरां तदभ्युपगमो न्याय्यः । इन्द्रमूर्तिलक्षणद्रव्य-विशिष्टतदाकाररूपस्थापनयोरिन्द्रपर्यायरूपे भावे तादात्म्यसम्बन्धेनाऽवस्थितत्वात्तत्र वाच्यवाचकभावसम्बधेन सम्बद्धान्नाम्नोऽपेक्षया सन्निहिततरकारणत्वात् ।

सङ्ग्रहे[2]व्यवहारौ स्थापनावर्जांस्त्रीन्निक्षेपानिच्छत इति केचित्, तन्नाऽनवद्यं, यतः संग्रहिकोऽसंग्रहिको[3]ऽनर्पितभेदः परिपूर्णो वा नैगमस्तावत् स्थापनामिच्छतीत्यवश्यमभ्युपेयम्, सङ्ग्रहव्यवहारयोरन्यत्र द्रव्यार्थिके स्थापनाभ्युपगमावर्जनात् । तत्राऽऽद्यपक्षे संग्रहे स्थापनाभ्युपगमप्रसङ्गः, संग्रहनयमतस्य संग्रहिक[4]नैगममताविशेषात् । द्वितीये व्यवहारे तदभ्युपगमप्रसङ्गः, तन्मतस्य व्यवहारमतादविशेषात् । तृतीये च निरपेक्षयोः संग्रहव्यवहारयोः स्थापनानभ्युपगमोपपत्तावपि समुदितयोः संपूर्णनैगमरूपत्वात् तदभ्युपगमस्य दुर्निवारत्वम्, अविभागस्थाद् नैगमात्प्रत्येकं तदेकैकभागग्रहणात् । किञ्च, सङ्ग्रहव्यवहारयोर्नैगमान्तर्भावात्स्थापनाभ्युपगमलक्षणं तन्मतमपि तत्राऽन्तर्भूतमेव, उभयधर्मलक्षणस्य विषयस्य प्रत्येकमप्रवेशेऽपि स्थापनालक्षणस्यैकधर्मस्य प्रवेशस्य सूपपादत्वात्, [5]स्थापनासामान्य-तद्विशेषाभ्युपगममात्रेणैव सङ्ग्रहव्यवहारयोर्भेदोपपत्तेरिति यथागमं भावनीयम् । एतैश्च नामादिनिक्षेपैर्जीवादयः पदार्था निक्षेप्याः ।

[जीवविषये निःक्षेपाः ।]

